त्सक असाध्यरोगीकी चिकित्सा करताहै । वह सदैव अल्पविद्या, अपयश, ग्लानि, लाजहीनता और असंग्रहको प्राप्त होता है । एकगति, नूतनता, उपद्रवहीनता, एकदोषसे रोगका उत्पन्नहोना रोगीका शरीर सर्वऔषधियोंके सहनेको समर्थ, और चारोंपादोंका होना यह सब रोगके सुखसाध्य लक्षण हैं। बुद्धिमान् चिकित्सक प्रथम विकारोंके लक्षणों को जानकर पश्चात् चिकित्सा करै ॥ जो वैद्य रोग और औषधिको नहीं जानता और चिकित्सा करने लगै तिसको सिद्धिकी प्राप्ति ईश्वराधीन जाननी । रोगोंको जाननेवाला और सर्वप्रकारकी औषधियोंमें प्रवीण और देश तथा कालको जाननेवाला ऐसा वैद्य निःसन्देह सिद्धिको प्राप्त होताहै ॥ ऐसा चरकमें लिखाहै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

अथ ज्वरचिकित्सामाह ।

पक्षाभिघातगलगंडगलग्रहाश्च
दण्डापतानकसमीरणशोणिताद्याः ।
इत्यामयाःस्युरपरत्राधिनापहारा-
द्गुर्वङ्गनागमनविप्रवधादिभिर्यैं ॥ २७ ॥
दुष्कर्मभिस्तनुभृतामिहकर्मजास्ते
नोपक्रमेणभिषजामुपयांतिशान्तिम् ।
दानैर्दयाभिरतिथिद्विजदेवतागो-
गुर्वर्चनाप्रणतिभिश्चजपैस्तपोभिः ॥ २८ ॥
इत्युक्तपुण्यनिचयैरुपचीयमाना
प्राक्पापजायदिरुजःप्रशमंप्रयान्ति ॥ २९ ॥
स्वहेतुदुष्टैरनिलादिदोषै-
रुपप्लुतैःखपरितःस्वनद्भिः ।
भवन्तियेप्राणभृतांविकारा-
स्तेदोषजाभेषजसिद्धिसाध्याः ॥ ३० ॥

दानादिभिःकर्मभिरोषधीभिःकर्मक्षयेदोषपरिक्षयेच।
सिध्यन्तियेयत्नवतांकथंचित्तेकर्मदोषप्रभवाविकाराः ३१
निवृत्तोऽपिमहाव्याधिःस्वल्पेनायातिहेतुना।
क्षीणेमंदीकृतेदोषेशेषःसूक्ष्मइवानलः॥ ३२॥
नास्तिरोगोविनादोषैर्यस्मात्कस्माच्चिकित्सकः।
अनुक्तमपिदोषाणांलिंगैर्व्याधिंसमुच्चरेत्॥ ३३॥
वायुरायुर्बलंवायुर्धातावायुःशरीरिणाम्।
वायुर्विश्वमिदंसर्वप्रभुर्वायुश्चकीर्त्तितः॥ ३४॥
सर्वाहिचेष्टावातस्यसप्राणःप्राणिनांस्मृतः।
तेनैवजायतेरोगस्तेनचैवोपशाम्यति॥ ३५॥
पित्तादुष्मोष्मणःपक्तिर्नराणामुपजायते।
पित्तंचैवप्रकुपितंविकारान्कुरुतेबहून्॥ ३६॥
प्राकृतस्तुबलंश्लेष्माविकृतोमलउच्यते।
जाठरोयःस्मृतःकायेसचपाप्मोपादिश्यते॥ ३७॥
एकःप्रकुपितोदोषःसर्वानेवप्रकोपयेत्॥ ३८॥
अंगस्यगौरवमपाटवमन्तराग्ने-
रुत्क्लेदिताचहृदयस्यमुखप्रसेकः।
आलस्यमास्यमधुरत्वमपाककण्डूः
सपाण्डुतानयनयोरितिरोमहर्षः॥ ३९॥
प्रज्ञाप्लुतिर्वमथुवेपथुकाशनिद्रा-
तन्द्रादयश्चुलुचुलायनमुल्बणेच।
स्यादोष्ठकर्णरसनागलतालुमूल-
घ्राणेक्षणश्रवणशष्कुलिकान्तरेषु॥ ४०॥
श्लेष्मोद्भवेभवतिलिंगमिदंविकार-
संसर्गजेषुचगदेषुभवेद्धिदोषः।

जन्तोरिदं पवनपित्तकफप्रकोप-
लिंगाद्विदोषजरुजे प्रविभज्य योज्यम् ॥ ४१ ॥
उद्देशमात्रमपि लक्षणमेतदुक्तं
युक्त्याव्यनक्ति पवनादिगदांतराणाम् ॥ ४२ ॥

अर्थ–पक्षाघात, गलगण्ड, गलग्रह, दण्डापतानक, और वातरक्त आदि रोग चोरी करनेसे, गुरुकी स्त्रीके साथ मैथुन करनेसे, और ब्राह्मणादिको मारनेसे और दुष्टकर्म करनेसे उत्पन्न हुए यह सब केवल चिकित्सा करनेसेही शमन नहीं होते; दान, दया, अतिथिपूजा, ब्राह्मणपूजा, देव पूजा, गौपूजा, और गुरुकीपूजा, और प्रणति तथा जप, तप आदि पुण्यकर्म करनेसे पूर्वोक्तरोग दूर होयँ तौ उनको पापजरोग जानना. अपने कारणोंसे दुषित हुए, शरीरमें फैलेहुए वातादिसे उत्पन्न हुए रोग औषधिके द्वारा शान्त होनेसे वातादिदोषज, तथा दानादिकर्म और औषधके द्वारा दोष और कर्मका नाश होकर शान्त होनेसै कर्मजरोग कहे जातेहैं । क्षिण तथा दोषकी मंदताके होनेपर निवृत्त हुआ रोगभी अल्पकारणसेही फिर उत्पन्न होजाता है, जैसे अग्निका चैंकाभी पवन और ईंधनके संयोगसै चैतन्य होजाताहै, तैसेही और दोषोंके कोप विना रोग नहीं उत्पन्न होताहै, इसकारण चतुरवैद्य प्रथम दोषोंके चिन्होंसे रोगका निदान करै । आयु, स्वरूप और बलरूप और प्राणियोंको जिवानेवाली, समस्तविश्ववायुमय, वायुप्रभुस्वरूप, वायुके द्वाराहि संपूर्ण कार्य सिद्ध होतेहैं तथा प्राणियोंके प्राणरूप इसकारण वायुसै उत्पन्न हुए रोग वायुसे ही शमन होतेहैं । मनुष्योंके देहमें पित्तसै उष्णोष्णक्रिया पकती है और यही पित्त कुपित होनेपर अनेकप्रकारके रोगोंको उत्पन्न करता है । प्राकृत बल कफ कहाजाताहैं और यही विकृत हुआ मल कहाजाताहै, इसलिये मनुष्योंके जो उदरमें मलहै वह पापहै । एक दोषभी कुपित हुआ सब दोषोंको कुपित करदेवैहै, और कुपितकफ प्राणियोंके देहमें अंगका भारीपन, जठराग्निकी मंदता, हृदयमें ग्लानि, मुखसे कफका गिरना, आलस्य, मुखमें मधुरता, अन्नका नहीं पचना, शरीरमें खुजलीका होना, नेत्रोंमें पीलापन, रोमावलीका खड़ाहोना, बुद्धि भ्रष्ट होजानी, वमन, कम्प, खाँसी, निद्रा और

तन्द्राको उत्पन्न करता है, तथा ओष्ठ, जिह्वा, गल, तालूकीजड़, नाक, नेत्र, कान, और कनपटी इन अंगोंमें चुलचुलापनको उत्पन्न करताहै । यह सब लक्षण कफसे उत्पन्न हुए रोगोंमें होते हैं । और दो दोषोंसे उत्पन्न हुए ज्वरादिरोगोंमें दो दोषोंके चिह्न उत्पन्न होते हैं और तीन दोषोंसें उत्पन्न हुए ज्वरादि रोगोंमें तीन दोषोंके चिह्न उत्पन्न होतेहैं । ऐसे उद्देशमात्र लक्षण कहते हैं । सुचिकित्सक युक्तिद्वारा भलेप्रकार वातादिसे उत्पन्न हुए रोगोंका निर्णयकरै ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ॥३१॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७॥ ३८ ॥ ३९ ॥ ४० ॥ ॥ ४१ ॥ ४२ ॥

पित्तंप्रावृषिचीयतेशरदिचप्राप्नोतिकोपंपुनः ।
शान्तियातिहिमेकफस्यतुहिनेसञ्जायतेसंचयः ॥
कोपश्चास्यमधौप्रशान्तिरपिचग्रीष्मेसमीरःपुनः ।
ग्रीष्मेसंचितवातःप्रकुप्यति पयःकालेशरत्तंहरेत् ॥४३॥
वायुःपित्तंकफश्चेतित्रयोदोषाःसमासतः ।
विकृताविकृतादेहंघ्नन्तिसंवर्त्तयन्तिच ॥ ४४ ॥
निसर्गादानविक्षेपैःसोमसूर्यानिलायथा ।
धारयन्तिजगद्देहंकफापित्तानिलास्तथा ॥ ४५ ॥
विभुत्वादाशुकारित्वात्बलित्वादन्यकोपनात् ।
स्वातंत्र्याद्बहुवेगत्वाद्दोषाणांप्रभवोऽनिलः ॥ ४६ ॥
सर्वाहिचेष्टावातेनसप्राणःप्राणिनांमतः ।
पित्तंपङ्गुकफःपंगुःपङ्गवोमलधातवः ॥ ४७ ॥
वायुनायत्रनीयन्तेतत्रवर्षन्तिमेघवत् ।
शरीरेकर्मभिस्तैस्तैःपंचधातेपृथक्पृथक् ॥ ४८ ॥
पक्काशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानंवातस्यतत्रापिपक्काधानंविशेषतः ॥ ४९ ॥
स्थानंप्राणस्यमूर्द्धोरःकेचिज्जिह्वास्यनासिका ।

ष्ठीवनंक्षवथूद्गारःश्वासहासादिकर्मच ॥ ५० ॥
उरःस्थानमुदानस्यनासानाभिगलम्भवेत् ।
वाक्प्रवृत्तिश्चजनयेद्बलवर्णस्मृतिक्रियः ॥ ५१ ॥
समानोऽग्निसमीपस्थःकोष्ठेचरतिसर्वतः ।
अन्नंपचतिगृह्णातिविरेचयतिमुंचति ॥ ५२ ॥
अपानोऽपानगःश्रोणिबस्तिमेढ्रोरुगोचरः ।
शुक्रार्त्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः ॥ ५३ ॥
व्यानोहृदिस्थितःकृत्स्नदेहधारीमहाबलः ।
गतिप्रक्षेपणाक्षेपनिमेषोन्मेषणादिकः ॥ ५४ ॥
प्रायःसर्वाःक्रियास्तस्मिन्प्रतिबद्धाःशरीरिणाम् ॥५५ ॥

अर्थ-पित्त प्रावृट्काल (वर्षाऋतु) में संचित होकर शरद्ऋतुमें कुपित होताहै, और शीतऋतुमें शान्त होताहै। कफ शिशिर ऋतुमें संचित होकर वसन्तऋतुमें कुपित होताहै, और ग्रीष्मऋतुमें शांत होताहै। और वात ग्रीष्मऋतुमें संचित होकर वर्षाऋतुमें कुपित होतीहै,और शरत्कालमें शान्त होतीहै। वात,पित्त और कफ, यह तीनों दोष विकृत होनेसे देहको नष्ट करदेतेहैं, और अपनी प्रकृतिमें स्थित होनेपर शरीरकी रक्षा करतेहैं। जैसे-चन्द्रमा, सूर्य और वायु क्रमसे विसर्ग, आदान और विक्षेपके द्वारा जगत्को धारण कर रहेहैं, तैसे ही कफ, पित्त और वात यह तीनों मनुष्यके शरीरको धारण कर रहेहैं। सामर्थ्य, शीघ्रकारी, बलवान्, अन्यकोपनता, स्वतंत्र, और बहु वेगवाली होनेसे वायु तीनों दोषोंमें प्रधानहै और सर्वप्रकारकी चेष्टा शरीरमें वायुसेही होतीहैं, तथा प्राणियोंके प्राणस्वरूपहै।

पित्त, कफ, मल, धातु, यह सब पंगुकी समान गमनकरनेमें समर्थ नहीहैं इनको वायु जिसस्थानमें लेजातीहै उसी जगह मेघकी समान जातेहैं। वात, पित्त और कफ यह त्रिदोष शरीरमें भिन्न भिन्न कर्मयुक्त पाँचविभागोंमें विभक्तहैं। पक्काशय, कटि, सक्थि, कर्ण, चक्षु और चर्म इनोंमें रहतेहैं, किन्तु पक्काशय इनका प्रधानस्थान जानना।

प्राणवायु-मस्तक, वक्ष, जिह्वा, मुख और नासिकामें रहतीहै, तथा ष्ठीवन, हुचकी, उद्गार, श्वाँस और हास्यादि उसका कर्महै।

उदानवायु-कक्ष, नासा, नाभि, और गलमें रहतीहैं,तथा वाक्य, बल, वर्ण और स्मृति उसका कार्यहै।

समानवायु-जठराग्निके समीपमें वसती हुई कोठेके चारों ओर विचरतीहै। अन्नको पचावै, ग्रहणकरै, विरेचन और त्यागकार्य करैहै।

अपानवायु-गुह्यदेशमें वसतीहुई. नितम्ब, बस्ति, मेढ्र (लिंग) और उरुदेशमें विचरती हुई शुक्र, आर्त्तव, विष्ठा, मूत्र और गर्भको अधोनयन करैहै।

महाबलवान् व्यान वायु-हृदयमें होकर समस्त शरीरमें चलाचलपूर्वक रक्षाकरके गति, प्रक्षेप, आक्षेप, निमेष और उन्मेषादि सर्वकर्मोंको सम्पादनकरतीहै ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९॥५०॥ ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

पित्तादुष्मोष्मणःपक्तिर्नराणामुपजायते।
पित्तञ्चैवप्रकुपितंविकारान्कुरुतेबहून् ॥ ५६ ॥
दुरुपशंनश्चपित्तस्यस्थानंनाभिर्विशेषतः।
पचत्यन्नंविभजतेसारंकिट्टंपृथक्तथा ॥ ५७ ॥
तत्रस्थमेवपित्तानांशेषाणामप्यनुग्रहम्।
करोतिबलदानेनपाचकंभ्राजकंतथा ॥ ५८ ॥
प्राकृतस्तुबलंश्लेष्माविकृतोमलउच्यते।
उरःकण्ठशिरःक्लोमपर्वाण्यामाशयोरसः ॥ ५९॥
मेदोघ्राणञ्चजिह्वाचकफस्थानमुरःपरम्।
सचापिपंचधोरस्थःश्लेष्मणादिषुकर्मसु ॥ ६० ॥
कफधाम्लाञ्चशेषाणांयत्करोत्यवलंबनम्।
अतोऽवलंबनःश्लेष्मायश्चामाशयसंश्रयः ॥ ६१ ॥
उत्साहोच्छ्वासनिश्वासचेष्टाधातुगतिःसमा।
समोमोक्षोगतिमतांवायोःकर्माविकारजम् ॥ ६२ ॥

दर्शनंपक्तिरूष्माचक्षुत्तृष्णादेहमार्द्दवम्।
प्रभाप्रसादोमेधाचपित्तकर्माविकारजः ॥ ६३ ॥
स्नेहोबन्धःस्थिरत्वंचगौरवंवृषताबलम्।
क्षमाधृतिरलोभश्चकफकर्माविकारजः ॥ ६४ ॥
आममन्नरसंकेचित्केचित्तुमलसंचयम्।
प्रथमंदोषदुष्टञ्चआमइत्यभिधीयते ॥ ॥६५ ॥
अविपक्कंशकृद्दुष्टंदुर्गन्धंबहुपिच्छिलम्।
सादनंसर्वगात्राणामामइत्यभिधीयते ॥ ६६ ॥

अर्थ-उष्णोष्मगुणयुक्तपित्तके द्वारा मनुष्यके शरीरमें अन्नआदि पचते हैं, और यही कुपित होनेपर नानाप्रकारके रोगोंको उत्पन्न करता है, पित्तका स्थान दुस्पर्शन है, और विशेषकरकै पित्त नाभिमेंही रहता है। अन्नको पचाताहै, और अन्नकेसार तथा मैल अलग अलग करदेताहै। पाचक तथा भ्राजक पित्त अन्यान्यपित्तोंको अपना बल देकर सहाय देनेवाले हैं। प्राकृत बल कफ कहाताहै और यही कफ विकृतहुआ मल कहाजाताहै। वक्ष, कण्ठ, मस्तक, क्लोम, पर्वस्थान, आमाशय, रस, मेद, नासिका और जिह्वा यह एक एक कफका स्थानहै। तहाँ वक्ष इन सब स्थानोंमें प्रधानहै। वक्षस्थानोंमें पाँचप्रकारका वसताहुआ कफ शेषरहे कफके स्थानोंमें अवलंबन करताहै। उत्साह, उच्छ्वास, निश्वास, चेष्टा, धातुगति और मोक्ष यह सर्व निर्विकारवायुके कार्यहैं। निर्विकारपित्त-दर्शन, परिपाक, ऊष्मा, क्षुधा, तृष्णा, देहकीमृदुता, कान्ति, प्रसन्नता और मेधाको करता रहताहै। स्नेह, बंध, स्थिरता, गौरव, वृषता, बल, क्षमा, धृति और अलोभ यह सब निर्विकार कफके कार्य हैं। आमको कोई कोई वैद्य अन्नरस और कोई कोई मलसंचय कहते हैं। प्रथम आमको दोषदूषित तथा द्वितीयआमको अपक्क दुर्गन्ध दूषित बहुपिच्छिल सम्पूर्ण शरीरकी अवसन्नताजनक मलको जानना ॥ ५६ ॥ ५७ ॥५८॥ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥

वायुःसामोविबद्धाग्निमान्द्यतंद्रान्त्रकूजनैः।
वेदनाशोफनिस्तोदैःक्रमशोङ्गानिपीडयेत् ॥ ६७ ॥

विचरेद्युगपच्चापिगृह्णातिकुपितोभृशम् ।
स्नेहाद्यैर्वृद्धिमायातिमेघेसूर्योदयेनिशि ॥ ६८ ॥
दुर्गन्धंहरितंश्यामंपीतमम्लंस्थिरंगुरुम् ।
अम्लिकाकण्ठहृद्दाहंसामंपित्तंविनिर्दिशेत् ॥ ६९ ॥
आताम्रंपीतमत्युष्णंरसेकटुकमस्थिरम् ।
पक्कंविबन्धंविज्ञेयंरुचिपाक्तिबलप्रदम् ॥ ७० ॥
आविलस्तन्तुलःस्त्यानःकण्ठदेशेऽव्यवस्थितः ।
सामोबलासोदुर्गन्धःक्षुधोद्गारविघातकृत् ॥ ७१ ॥

अर्थ–सामवायु–विबद्धता, मन्दाग्नि,तन्द्रा, अन्त्रकूजन, वेदना; सूजन, इनसबको उत्पन्नकर क्रमसे अंगोंको पीड़ित करे है, तथा एकसमयही अत्यन्त कुपित होकर देहमें विचरण, ग्रहणादिकार्य करे है, वह स्नेहादि-द्वारा, मेघकाल, सूर्योदय और रात्रिमें वृद्धिको प्राप्त होतीहै । दुर्गन्ध, हरित, श्याम, पीत, अम्ल, स्थिर, गुरु, अम्लिका और कण्ठदाह तथा हृदयमें दाह उत्पन्नकरनेवाले पित्तको सामपित्त कहते हैं। तथा ताँबेके रंगकी समान, पीला अत्यन्तगरम, रसमें चरपरा, अस्थिर, विबन्ध, रुचि, पाक, और बलजनक पित्तको पक्कपित्त कहते हैं । आविल, तंतुल, स्त्यान,कण्ठस्थ,दुर्गन्ध तथा क्षुधा और डकारके दूर करनेवालेको साम कफ कहते हैं ॥६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥

दिवास्वप्नंव्यवायंचव्यायामंशिशिरंजलम् ।
क्रोधप्रवातभोज्यानिकषायांश्वविवर्जयेत् ॥ ७२ ॥
व्यायामाज्ज्वरसंवृद्धिर्व्यायामात्स्तम्भमूर्च्छनम् ।
मरणंपानतःस्नेहाच्छर्दिमूर्च्छामहारुचिः ॥ ७३ ॥
गुर्वन्नभोजनाच्चापिविष्टम्भोदोषकोपनः ।
शीतवारिकषायाश्वदोषविष्टम्भिनोऽहिताः ॥ ७४ ॥
अग्निसादःखरत्वश्चस्रोतसाञ्चाप्रवर्त्तनम् ।
तस्मान्नवज्वरीसर्वान्विषवत्परिवर्जयेत् ॥ ७५ ॥

स्वधातुवैषम्यनिमित्तजाये
विकारसंहारहराःशरीरे ।
नतेपृथक्पित्तकफानिलेभ्य
आगन्तवस्तेतुततोऽवशिष्टाः ॥ ७६ ॥
देशकालवयोवह्निसात्म्यप्रकृतिभेषजम् ।
देहसत्वबलव्याधीन्दृष्ट्वाकर्मसमाचरेत् ॥ ७७ ॥
नाभिरोजोगुदंशुक्रंशोणितंशंखकौतथा ।
मूर्द्धांसकण्ठहृदयंप्राणस्यायतनंदश ॥ ७८ ॥
ज्वरितोहितमश्नीयाद्येनतस्यबलंभवेत् ।
बलमायुर्बलंलक्ष्मीर्बलायत्तंहिजीवनम् ॥ ७९ ॥
बलेप्रतिष्ठितंकर्मतस्माद्रक्षेद्बलंबुधः ।
मनःप्रियंप्रदातव्यंहितंत्यक्तातदिच्छया ॥ ८० ॥
हितमेवप्रदातव्यमहितंव्यपदेशकृत् ।
संशोधयतियद्दोषान्समानुदीरयत्यपि ॥ ८१ ॥
समीकरोतिसंक्रुद्धांस्तत्संशमनमुच्यते ।
तच्चानित्यंप्रयुंजीतस्वास्थ्यंयेनोपपद्यते ॥ ८२ ॥
अजातानांविकाराणामनुत्पोत्तकरंचयत् ।
संचयंचप्रकोपंचप्रशमंकालसंश्रयम् ॥ ८३ ॥
व्यक्तिभेदश्चदोषाणांयोवैवेत्तिसवैभिषक् ॥ ८४ ॥

अर्थ–दिनमें सोना, मैथुन, व्यायाम (कसरत) शीतलजल, क्रोध, पवनका सेवन, भारीअन्न, और कषाय, यह सब नवीनज्वरमें त्यागदेवै; कारण यहहै कि–व्यायाम करनेसे ज्वरकी वृद्धि होतीहै, मैथुन करनेसे स्तम्भ, मूर्च्छा और मरण होताहै, स्नेहपान करनेसे वमन, मूर्च्छा और अरुचि उत्पन्न होतीहै, भारी अन्न सेवन करनेसे विष्टम्भ और दोषोंका कोप होताहै, शीतलजल और कषाय सेवन करनेसे विष्टम्भ दोष, मंदाग्नि, ज्वरका तीक्ष्णवेग, शरीरमें जड़ता और स्रोत बन्द होजातेहैं, इस

कारण नवीनज्वरवाला इनसबको त्याग देवै, अपने धातुओंकी विषमताके निमित्तसे जो शरीरमें विकार उत्पन्न होते है, वह पित्त, कफ, और वातसे पृकक् नहीं होते हैं इनसे अवशिष्ट रहे रोगोंको आगन्तुक रोग कहते हैं। देश, काल, अवस्था, अग्नि, सात्म्य, प्रकृति, देह, सत्व, बल, और व्याधि इन सबको भले प्रकारसे विचार कर वैद्य चिकित्सा करै। नाभि, ओज, गुह्य, शुक्र, रुधिर, कनपटी, मस्तक, कटि, कण्ठ और हृदय यह प्राणोंके रहनेके दश स्थानहैं। ज्वरवाला मनुष्य हितकारकद्रव्योंको सेवन करताहै, जिससे उसके शरीरमें बल बनारहै, क्योंकि बलही आयुहै, बलही लक्ष्मीहै, बलही जीवनहै, और सर्व कार्योंके आधारस्वरूपहै, इसकारण बुद्धिमान्मनुष्य बड़े यत्नोसे बलकी रक्षा करता रहे। जो द्रव्य रोगीको प्रियहो और हितकारकहो, वह द्रव्य रोगीको देवै, किन्तु अहितकारक द्रव्य कभी भी रोगीको नदेवै, जो औषध त्रिदोषको संशोधित करै, समदोषको उदीरण करै और कुपितदोषोंको शान्त करतीहै, उसको संशमन औषधि कहतेहैं। यह नित्यप्राति रोगीको देनी चाहिये, इससे रोगीकि आरोग्यता उत्पन्न होतीहै। जो विकारोंकी उत्पत्तिको नहीं होनेदेवै तथा दोषोंका संचय, प्रकोप, शमन, कालसंश्रय, दोषोंका विभाग इनको जाने वह उत्तम भिषक् कहा जाताहै ॥ ७२ ॥ ७३ ॥ ७४॥७५॥ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥

अस्थिचर्मनखमांसरोमाणिपृथिवीगुणाः।
शुक्रशोणितमूत्रश्चमज्जामेदःपयोगुणाः ॥ ८५ ॥
तेजसस्तृट्क्षुधानिद्राआलस्यंमैथुनंगुणाः।
प्रसाराकुञ्चनस्तम्भबन्धनश्चावरोधनम् ॥ ८६ ॥
वायोर्गुणाःखस्यकामःक्रोधलोभौसमोहकौ।
रूपश्चेतिपंचपंचपंचानांपरिकीर्तिताः ॥ ८७ ॥
आजानुपादतःपृथ्वीआनाभिजानुतोजलम्।
नाभेराहृदयंतेजआघ्राणहृदयान्मरुत् ॥ ८८ ॥
आमस्तंघ्राणतःस्वर्गमित्येषांस्थानपंचकम् ॥ ८९ ॥

अर्थ–अस्थि, चर्म, नख, मांस और रोम, यह पृथिवीके गुणहैं। शुक्र, रुधिर, मूत्र, मज्जा और मेद यह सब जलके गुण हैं। तृष्णा, क्षुधा, निद्रा, आलस्य और मैथुन यह सब तेजके गुणहैं। प्रसारण, आकुञ्चन, स्तम्भन बंधन और अवरोधन, यह सब वायुके गुणहैं, और काम, क्रोध, लोभ, मोह और रूप, यह सब आकाशके गुणहैं, इस प्रकार पंचभूतोंके यह पांच पांच गुण जानने।

पृथिवी पांवसे लेकर घुटनों पर्यन्त, जल घुटनोंसे लेकर नाभिपर्यंत, अग्नि नाभिसे लेकर हृदयपर्यन्त, वायु हृदयसे लेकर नासिकापर्यन्त, और आकाश नासिकासे लेकर मस्तकपर्यन्त रहताहै। इसप्रकार पाँच तत्वोंके पाँचस्थान शरीरमें कहेहैं ॥ ८५ ॥ ८६ ॥ ८७॥८८॥८९॥

गुडूचीनागरक्काथंसमभागंविपाचयेत्।
एवञ्चपाचनंकुर्यात्पिबेयुस्तरुणज्वरे ॥ ९० ॥
रोगराट्सर्वभूतानामन्तकृद्दारुणोज्वरः।
तस्माद्विशेषतस्तस्यप्रशान्तौयत्नमाचरेत् ॥ ९१ ॥
देहेन्द्रियमनस्तापीसर्वरोगराजोबली।
ज्वरःप्रधानंरोगाणामुक्तोभगवतापुरा ॥ ९२ ॥
जन्मादौनिधनेचायंभवतीहनसंशयः।
अतःसर्वविकाराणांज्वरोराजाप्रकीर्तितः ॥ ९३ ॥
ज्वरेलंघनमेवादावुपदिष्टमृतेज्वरात्।
क्षयानिलभयक्रोधकामशोकश्रमोद्भवात्।
क्षयोधातुक्षयोयक्ष्माक्षयात् प्रकुपितोऽनिलः।
उष्णंपित्तंयथासामंलंघनेननविपच्यते ॥ ९५ ॥
आमक्षयात्प्रशमितोवायुर्नसहतेक्षणम्।
आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधापयन् ॥ ८६ ॥
निदधातिज्वरंदोषस्तस्माल्लंघनमाचरेत्।
अनवास्थितदोषाग्नेर्लंघनंदोषपाचनम् ॥ ९७ ॥

ज्वरघ्नंदीपनंकांक्षारुचिलाघवकारकम् ।
प्राणाविरोधिनाचैनंलंघनेनोपपादयेत् ॥ ९८ ॥
बलाधिष्ठानमारोग्यंयदर्थोयंक्रियाक्रमः ।
तच्चमारुतक्षुत्तृष्णामुखशोषभ्रमान्विते ॥ ९९ ॥
कार्यंनबालेवृद्धेवानगुर्विण्यांनदुर्बले ।
वातमूत्रपुरीषाणांविसर्गेगात्रलाघवे ॥ १०० ॥
हृदयोद्गारकण्ठस्यशुद्धौतंद्राक्लमेगते ।
स्वेदेजातेरुचौचापिक्षुत्पिपासासहोदये ॥ १०१ ॥
कृतंलंघनमादेश्यंनिर्व्यथेचान्तरात्मनि ।
पर्वभेदोऽङ्गमर्दश्चकासःशोषोमुखस्यच ॥ १०२ ॥
क्षुत्प्रणाशोऽरुचिस्तृष्णादौर्बल्यंश्रोत्रनेत्रयोः ।
मनसःसम्भ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमोहृदि ॥ १०३ ॥
देहाग्निबलहानिश्चलंघनेऽतिकृतेभवेत् ॥ १०४ ॥

अर्थ–गिलोय और सोंठको समानभाग लेकर काढ़ा बनावै, यहपाचन तरुण ज्वर पीनेसे आमदोषका परिपाक होताहै । ज्वर सबरोगोंका राजा, सर्व प्राणियोंके प्राणोंको हरनेवाला और अत्यंत भयानकहै, इसकारण अनेक यत्नोंसे ज्वरके शान्तहोनेकी चेष्टा करनी चाहिये । ज्वर देह, इन्द्रिय और मनको तपानेवालाहै और सर्वरोगोंका राजा बलवान् तथा सर्व रोगोंमें श्रेष्ठ, ऐसे पूर्वकालमें भगवान्ने कहाहै । प्राणियोंके जन्मकी आदि और मरणसमयमें निश्चय ज्वर उत्पन्न होताहैं, इसकारण सर्वरोगोंका राजा ज्वर कहाहै । क्षय,वात,भय,क्रोध,काम,शोक और श्रम इनसबको छोड़कर अन्यकारणोंसें उत्पन्न हुए ज्वरमें प्रथम लंघन कराने चाहिये । क्षयशब्दका अर्थ यहाँ धातुक्षय और यक्ष्मारोगका है, इस क्षयमें वायु अत्यन्त कुपित होतीहै । उष्ण आमसहित पित्त लंघन करनेसे पकजाताहै, आमके नाश होनेपर वायु शान्त होजातीहै, और रोगी क्षणभरभी क्षुधाको नहीं सहनकर सक्ताहै । आमाशयमें स्थित हुआ सामदोष अग्निको नष्ट करकै स्रोतोंको आच्छादनकर रोगोंको उत्पन्न

करताहै, इसकारण ज्वरमें प्रथम लंघन कराना चाहिये। जिनके वातादि दोष और अग्नि यथास्थलमें अवस्थित नहींहै, उनको लंघन दोषोंको पचानेवाला, ज्वरको हरनेवाला, अग्निप्रदीपक और रुचि तथा देहकी लघुताकारक होताहै। इसप्रकार लंघन करावैकि जिससे मनुष्य निर्बल न होय; क्योंकि बल आरोग्यका प्रधान आश्रयहै, जिसकेलिये यह क्रियाक्रम कहाहै। वात, क्षुधा, तृषा, मुखशोष और भ्रमयुक्तमनुष्य, तथा बालक, वृद्ध, गर्भवती, और दुर्बलमनुष्यको कभीभी लंघन नहीं कराने चाहिये।अधोवात,मूत्र,विष्ठा इन सबके त्यागमें,शरीरकी लघुतामें, हृदय, डकार, कंठ और मुखकी शुद्धि, तन्द्रा, ग्लानि, पसीना, रुचि इनमें क्षुधा और तृषा यह एकवार उत्पन्न होवे इन सबमें लंघन कराना चाहिये और अन्तरात्मा वेदनारहित होनेपर लंघन कराने योग्य है। पर्वभेद, कास, अंगमर्द, मुखशोष, क्षुधानाश, अरुचि, तृष्णा, कर्ण और नेत्रोंकी दुर्बलता, वारवार मनमें भ्रम, अत्यन्तडकार, अंधकारदर्शन, देह, अग्नि और बलहानि यह सब अत्यन्तलंघनकरनेसे उत्पन्न होतेहैं ॥ ९०॥९१॥ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥९९॥ १०० ॥१०१॥ ॥ १०२ ॥ १०३ ॥ १०४ ॥

सद्योभुक्तस्यवाजातोज्वरेसन्तर्पणोत्थिते।
वमनंवमनार्हस्यशस्तमित्याहवाग्भटः ॥१०५॥
कफप्रधानानुत्क्लिष्टान्दोषानामाशयस्थितान्।
बुद्ध्वाज्वरकरान्कालेवम्यानांवमनैर्हरेत् ॥ १०६ ॥
उत्क्लिष्टानितिउपस्थितवमने
उद्युक्तान्वमनैर्वमनाध्यायोक्तैः ॥ १०७ ॥
अनुपस्थितदोषाणांवमनंतरुणेज्वरे।
हृद्रोगंश्वासमानाहंमोहञ्चकुरुतेभृशम् ॥ १०८ ॥
तृष्यतेसलिलंचोष्णंदद्याद्वातकफज्वरे।
मद्योत्थेपैत्तिकेवाथशीतलंतिक्तकैःशतम् ॥ १०९ ॥
दीपनंपाचनंचैवज्वरघ्नमुभयञ्चयत्।

स्रोतसांशोधनंबल्यंरुचिस्वेदप्रदंशिवम् ॥ ११० ॥
अविरेच्याबालवृद्धश्रान्तभीरुनवज्वराः ।
तथाभ्यामेवयोगाभ्यांकषायंपिप्पलीबलाम् ॥ १११ ॥
शृतशीतांपिबेच्चापित्रिवृच्चूर्णावचूर्णिताम् ।
आमेज्वरेकफेरक्तेएतत्स्रंशनमुच्यते ॥११२ ॥
यवक्षारान्वितोयद्वाक्काथोधान्यपटोलयोः ॥ ११३ ॥

अर्थ–तत्काल भोजनकरनेसे उत्पन्न हुए ज्वरमें और सन्तर्पणसे उत्पन्न हुए ज्वरमें वमन करने योग्य मनुष्यको वमन करानी चाहिये, यह वाग्भट आचार्यका मतहै । कफप्रधान, और अत्यन्त क्लेशकारक अर्थात् जिनसे वमन होनेकोहो, आमाशयमें स्थित ज्वरकारक दोषोंमें वमन-योग्य मनुष्यको वमनकारक औषधिको सेवन करा दोषोंको दूर करै । तरुणज्वरमें निर्दोषमनुष्यको वमन करावै तो हृदयरोग, श्वास, आनाह और मोह उत्पन्न होयहै. ज्वररोगीको तृष्णा होवैतौ कफज्वरमें गरम और पित्तज्वरमें तथा मद्यपानजनकज्वरमें कड़वी औषधियोंके रसके साथ औटे हुए जलको शीतल कर पीनेको देवै, यह दोनों जलकी विधि–अग्निदीपक, पाचक, ज्वरनाशक, स्रोतोविशोधक, बलकारक तथा रुचि और पसीनेको उत्पन्न करैहै । बालक, वृद्ध, श्रान्त, भीरु और नवीनज्वरवाले मनुष्यको कभी भी विरेचन नहीं करावै । कफ, और रक्त-सहित आमज्वरमें पीपल और खरैटीका काढ़ा शीतलकर उसमें निसोतका चूर्ण मिलाकर पीवै, यह स्रंसनहै ॥ १०५ ॥ १०६ ॥ १०७॥१०८॥ १०९ ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥

औषधंहेमरजतमृद्भाजनपरिस्थितम् ।
पिबेत्प्रसन्नवक्त्रस्त्यापीत्वापात्रमधोमुखम् ॥ ११४ ॥
निक्षिप्यचाननेतस्यताम्बूलानुप्रयोजयेत् ।
ॐह्रींह्रींविद्युताननह्नंह्नंफट्स्वाहा ॥ ११५ ॥
एतन्मंत्रंतालुस्थानेचूर्णमृक्षितेलिखित्वादिन-
त्रयंखादितंदेयंज्वरोपशमनंभवति ।

ॐ ब्रह्मरुद्रप्रमुर्मुन्दविष्णुवायुहुताशनाः ।
रक्षन्तुज्वरितंबालंमुञ्चमुञ्चइमंतथा ॥ ११६ ॥
ग्रहेस्वाहा ।
अनेनसर्षपंमंत्रयित्वानिर्मुञ्चयेत् ।
ओं ह्रीं ह्रीं हुं फट् स्वाहा ।
अनेननिर्गुण्डीपत्रचूर्णंधूपंदद्यात् ।
विषमज्वरोनश्यतिडाकिन्यादयोनप्रभवन्ति ।
कृष्णाम्बरदृढाबद्धगुग्गुलूलूकपुच्छजः ॥
धूपश्चातुर्थकंहन्तितमःसूर्योदयेयथा ॥ ११७ ॥
केशराजभृंगराजरसेनवस्त्रंकृष्णंविधाय ।
तेनापिगुग्गुलुपेचकपुच्छपक्षंबद्धाधूपः ॥ ११८ ॥
ब्रह्मात्वमेवविष्णुश्चरुद्रस्त्वंसहदुर्गया ।
आर्तस्यरोगनाशायप्रत्यक्षोभवपावकः ॥ ११९ ॥
अनेनधूपयेत् ।
अगस्त्यपुष्पस्वरसेननस्यं
निहन्तिचातुर्थकमुग्रवीर्यम् ॥ १२० ॥
अगस्त्यपुष्पंवाकसाना ।
कर्मसाधारणंकुर्यात्तृतीयकचतुर्थके ।
प्रायशःसन्निपातेनदृष्टःपंचविधोज्वरः ॥ १२१ ॥
आगन्तोरनुबन्धोहिप्रायशोविषमज्वरः ।
सन्निपातेततोभूयान्नदोषःपरिकीर्त्तितः ॥ १२२ ॥
ज्वराःपंचमयोक्तायेपूर्वंसन्ततकादयः ।
चत्वारःसन्ततंहित्वाज्ञेयास्तेविषमज्वराः ॥ १२३ ॥
इदंग्रंथान्तरे ।

अर्थ-औषधिको सुवर्णके बरतनमें वा चाँदीके बरतनमें, अथवा मट्टीके बरतनमें करकै प्रसन्नमनसे भक्तिपूर्वक पीकर बरतनको उलटा करकै गेर देवै, और फिर पान भक्षण करै। (ओंह्रींह्रीं विद्युतानन हं हं फट्स्वाहा) इस मंत्रको चूरनकी टिकियापै लिख रोगीके तालूपै धर-देवै, इस प्रकार तीनदिन इस मंत्रको लिखकर उस टिकियाको पकाकर खवानेसे ज्वर शान्त होताहै। (ओं ब्रह्मरुद्रप्रभुर्मुन्दविष्णुवायुहुताशनाः। रक्षन्तु ज्वरितं बालं मुञ्च मुञ्च इमं तथा॥ ग्रहेस्वाहा) इस मंत्रसे सरसोंको पढ़कर रोगीके चारों ओर वखेरै, फिर (ओं ह्रीं ह्रीं हुं फट् स्वाहा) इस मंत्रको पढ़कर सम्हालुके पत्तोंके चूर्णकी धूप रोगीके देहमें देवै, इससे विषमज्वर और डाकिनी आदिग्रह दूर होतेहैं।

कालेवस्त्रमें गूगल और उल्लूके पंखको खैंचकर बाँध धूपदेनेसे चातुर्थिक (चौथिया) ज्वर नष्ट होताहै। जैसे सूर्योदयसे अंधकार दूर होताहै। कुकुरभाँगरा और, भाँगरा इनके रसमें वस्त्रको कालाकर उस वस्त्रमें उल्लूके पंख और गूगलको दृढ़ बाँधकर (ब्रह्मात्वमेवविष्णुश्च रुद्रस्त्वंसह दुर्गया। आर्त्तस्य रोगनाशाय प्रत्यक्षो भव पावकः) इसमंत्रको पढ़ धूपदेनेसे अथवा पत्तोंके अगस्तियाके रसका नास देनेसे चातुर्थिक ज्वर नष्ट होताहै। तृतीयक और चातुर्थिकज्वरमें साधारण चिकित्सा करनी चाहिये। विषमज्वरमें प्रायः आगन्तुकज्वरका अनुबन्ध होताहै। संततकादि पाँचप्रकारके ज्वरोंमें त्रिदोषका संस्रव होताहै, और उनमें सन्ततकको छोड़ और चारप्रकारके ज्वरोंको विषमज्वर कहते हैं॥ ११४॥ ११५॥ ११६॥ ११७॥ ११८॥११९॥ १२०॥ १२१॥ ॥ १२२॥ १२३॥

अथरसरत्नाकरोक्तंयथा।

कुर्याद्भूतज्वरेनस्यंव्योषाम्बुतुलसीरसैः।
गोपालपुत्रिकामूलंसहदेवाबलाथवा॥ १२४॥
गलेबद्धाज्वरंहन्तिविष्णुक्रान्ताथकर्णयोः।
सूर्यावर्तस्यमूलन्तुकर्णेभूतज्वरापहम्॥ १२५॥
कर्कटस्यरसेभूतमृदातुतैलकेकृते।
ऐकाहिकंज्वरंहन्तिनस्येनगिरिकर्णिका॥ १२६॥

भूतकर्कटधूपेनसद्यःशीतज्वरंहरेत् ।
काकमाच्याश्चमूलन्तुकर्णेबद्धंनिशिज्वरम् ॥ १२७ ॥
निहन्तिनात्रसंदेहोयथासूर्योदयेतमः ।
श्मशानसहदेव्यावादूर्वायावाथमूलिका ॥ १२८ ॥
सूत्रेणवेष्टिताबद्धाहस्तेसर्वज्वरापहा ।
वृक्षेपुनर्वसौग्राह्यामन्दारस्यचबंधकम् ॥ १२९ ॥
तद्दक्षिणकरेबद्धंशीतज्वरहरंपरम् ।
चन्द्रस्यग्रहणेग्राह्यासर्पाक्ष्यामंत्रिताशिफा ॥ १३० ॥
वामेकरेचतांबद्धाकृष्णसूत्रेज्वरंहरेत् ।
तामेवबन्धयेत्कर्णेकृष्णसूत्रेणदक्षिणे ॥ १३१ ॥
त्र्याहिकन्तुज्वरंहन्तिनात्रकार्याविचारणा ।
ऊर्णनाभस्यजालेनवर्त्तिंकृत्वाप्रयततः ॥ १३२ ॥
क्षालयेत्तिलतैलेनकज्जलंग्राहयेच्छनैः ।
अञ्जयेन्नेत्रयुगलंत्र्याहिकन्तुज्वरंहरेत् ॥ १३३ ॥
श्मशानजातसर्पाक्ष्यारवौमूलंसमुद्धरेत् ।
घृतैःपिष्टाललाटेषुतिलकत्र्याहिकप्रणुत् ॥ १३४ ॥
अपामार्गस्यमूलन्तुपुष्येचातुर्थिकप्रणुत् ।
बृहत्याश्चापिपुष्येणसमुद्धृत्यतुमूलिकाम् ॥ १३५ ॥
धूपाच्चातुर्थकंहन्तिवासावागोपालपुत्रिका ।
श्वेतार्ककरवीरस्यअश्विन्यांमूलमुद्धरेत् ॥ १३६ ॥
तण्डुलोदकपानेनपृथक्चातुर्थनाशनम् ।
त्रिवन्याचामूलन्तुछुछुन्दर्याःसमायुतम् ॥ १३७ ॥
चातुर्थिकंज्वरंहन्तितत्क्षणाद्धूपनाज्ज्वरम् ।
चन्द्रस्यग्रहणेग्राह्यासर्पाक्षायाश्चमूलिका ॥ १३८ ॥

अन्तर्धूमेनसादग्धाच्छागीमूत्रेणचाञ्जनम् ।
चातुर्थिकहराश्रेष्ठासद्यःप्रत्ययकारिका ॥ १३९ ॥

अर्थ-त्रिकुटेके काढ़ेमें तुलसीका रस मिलाकर नास देनेसे भूतज्वर शान्त होताहै। गोपालककड़ी, पियावाँसा वा खिरैंटीकी जड़को गलेमें अथवा अपराजिता वा सूर्यावर्त्तकी जड़को कानमें बाँधनेसे भूतज्वर नष्ट होता है। केकड़ाजन्तुके रसमें तेलको पकाकर नाश लेनेसे, अथवा कोयलीके रसके द्वारा नास लेनेसे एकाहिकज्वर दूर होताहै, केकड़ा जन्तुके मांसके द्वारा धूप देनेसे तत्काल शीतज्वर नास होताहै। और मकोयकी जड़को कानमें बाँधनेसे रात्रिज्वर दूर होताहै। श्मशान-भूमिमें उत्पन्न हुई सहदेवी अथवा दूबकी जडको सूतके द्वारा हाथमें बाँधनेसे सर्व ज्वर नष्ट होतेहैं। पुनर्वसुनक्षत्रमें मंदारकी शिफा लाकर दहिने हाथमें बाँधनेसे शीतज्वर शमन होताहै। चन्द्रग्रहणके समय मंत्र-पाठपूर्वक सर्पाक्षीजडको ले सूतसे बांधे हाथमें बांधनेसे सर्वप्रकारके ज्वर दूर होते हैं,और दाहिने कानपै बांधनेसे तृतीयक ज्वर शान्त होता है। मकडीके जालेकी बत्ती बनाकर तिलके तेलमें भिजो दीपकमें जला कज्जल ग्रहणकरै, फिर इस कज्जलको दोनों नेत्रोंमें लगावै तौ त्र्याहिक ज्वर दूर होजाताहै। रविवारके दिन श्मशानभूमिमें उत्पन्न हुई सर्पा-क्षीकी जडको उखाडलेवै, फिर उसको घीके साथ पीसकर ललाटमें तिलक लगानेसे त्र्याहिकज्वर शांत होताहै। चिरचिटेकी जडको पुष्य नक्षत्रमें उखाडकर हाथपै बांधनेसे चातुर्थिकज्वर नष्ट होताहै। बृहती, कटेरी अथवा गोपालकाकडीकी जडको पुष्यनक्षत्रमें उखाडकर धूप-देनेसे चातुर्थिकज्वर नाश होता है। सफेद आक और कनेरकी जडको अश्विनीनक्षत्रमें उखाडकर चावलोंके जलके साथ पीनेसे चातुर्थिक ज्वर दूर होवै। त्रिशुनीकी जडको छुछुन्दरीके साथ धूप देनेसे चातुर्थिक ज्वर दूर होताहै। चन्द्रग्रहणमें सर्पाक्षीकी जडको उखाडकर इसप्रकार जलावै कि-जिससे उसमें धुआँ न निकले, फिर उसको बकरीके मूत्रमें घिस अंजन लगावै तौ चातुर्थिकज्वर शीघ्रही शांत होजा-ता है ॥ १२४ ॥ १२५ ॥ १२६ ॥ १२७ ॥ १२८ ॥ १२९ ॥ १३० ॥ ॥ १३१ ॥ १३२ ॥ १३३ ॥ १३४ ॥ १३५ ॥ १३६ ॥ १३७ ॥ ॥ १३८ ॥ १३९ ॥

ह्रंह्रींह्रींफः न्द्रूंफट्नमः ।
अनेनउलूकादिसर्वेयोगाअष्टोत्तरशतमंत्रितेन
सिद्धिःऔषधात्पाटनमाह ।
स्वभावारण्यएकान्तेप्रभातेमंत्रयुक्तितः ।
संग्राह्यमौषधंसिद्धंनोचेद्भवतिकाष्ठवत् ॥ १४० ॥
ओंनमस्तेऽमृतसंभवेरसवीर्यविवर्द्धिनि ।
बलमायुश्चमेदेहिपापान्मेजाहिदूरतः ॥ १४१ ॥
येनत्वांखनतेब्रह्मायेनत्वांखनतेभृगुः ।
येनवेन्द्रोऽथवरुणस्तेनत्वामुपचक्रमे ॥ १४२ ॥
तेनाहंखनयिष्यामिमंत्रपूतेनपाणिना ।
ओंआतप्तेतेमात्रियतेतेजोवीर्योऽन्यथाभवेत् ॥ १४३ ॥
अत्रैवतिष्ठकल्याणि ममकार्यकरीभव ।
ममकार्येभूतेसिद्धेततःस्वर्गंगामिष्यसि ॥ १४४ ॥
ओं ह्रींचण्डेन्द्रूंफट्स्वाहा ।
अनेनमंत्रेणनाणुसंयुतमातपेत्रिदिनंशुष्कं
निहितंवीर्यधृग्भवेत् ।
अर्कपृष्पायांसर्वाऔषध्यउत्पाट्यन्ते ।
उत्पाटितेसतिमूलिकायांछेदनबन्धनमाह ।
ओंरक्तेचामुंडेओरुओरुअमुकस्यसर्वज्वरं
कचेवत्वंद्रुंफट्स्वाहा ।
अनेनमंत्रेणमूलिकाछेदनं क्रियते ।
अपरमंत्रेणवेष्टयित्वाउक्तस्थानेबंधयेत् ॥
मण्डूरंदेवदारुश्चनराविष्ठातुकुंकुमम् ।
नरकेशसमायुक्तंधूपंज्वराविनाशनम् ॥ १४५ ॥

उलूकस्यतुपक्षाणिमहिषाक्षन्तुगुग्गुलुम् ।
ज्वरार्त्तंधूपयेत्तेनछादितंकृष्णकम्बलैः ॥ १४६ ॥
इमंमंत्रंपठेद्यस्तुसर्वज्वरंहरेत्परम् ॥ १४७ ॥
ओंनमोभगवतेरुद्रायओंक्षिप्रकारिणिकपालमालिनि
जटिलेदुर्गन्धदीर्घनखश्मश्रुरोमविकटाननधारिणि
ज्वरमैकाहिकंद्व्याहिकंत्र्याहिकंचातुर्थिकंमौहूर्त्तिकं
दिनज्वरंसन्ध्याज्वरंसर्वेषांनराणाम् उत्सादयउत्सा-
दयआरोग्यकरीभगवतीसर्वदेतिस्वाहा ।
अनेनमंत्रेणसर्वंधूपादेयाः ।
मूषिकस्यपुरीषेणतथाचर्मचटस्यतु ।
सर्षपामहिषाक्षश्चमन्त्रैर्धूपोज्वरापहः ॥ १४८ ॥
ओंपित्तज्वरवातज्वरकफज्वराथब्रह्मज्वरमाहेन्द्रज्वरा-
मजातज्वरसह पाताल जा श्रीराम तोहाकारे हऊसि-
द्धिगुरुरूपा ।

अनेनमंत्रेणमार्जयेदिति ।

अथ ज्वरपत्रिका यथा ।

ओंज्वरहृदयज्वरमार्त्तयिष्यामि ।
भोभोज्वरशृणुशृणुहनहनगर्ज्जगर्ज्जैकाहिकं
द्व्याहिकंत्र्याहिकंचातुर्थिकंसाप्ताहिकमर्द्धमासि-
कंनैमिषिकमटपटन्हुंफट्चक्रपाणिराज्ञापयति
ओंधृट्शिवोमुञ्चवाहुंमुञ्चकचंमुञ्चउरुमुञ्च
कटिंमुञ्चजंघांमुञ्चपादंमुञ्चभूम्यांगच्छस्वाहा ।
शृणुशृणुवज्रपाणिराज्ञापयति ।
अमुकस्यज्वरंहनहनहुंफट्स्वाहा ।

एतदलक्तकेनपात्रिकांलिखित्वाचाण्डालप्रोत्सा-
दनंविधायबलिपूर्वकंसवस्त्रंशिरसिबद्धादक्षिण-
स्यांदिशिप्रस्थापयेदिति ॥

ओंह्रींसःअमृतंकुरुअमृतेश्वरभैरवायनमः।
अनेनसप्ताभिमंत्रितंकृत्वासर्वरोगाययोज्यम् ॥
तुल्यांशंचूर्णयेत्खल्वेपिप्पलीहिंगुलंविषम्।
त्रिगुंजंमधुनापेयंवातज्वरविनाशनम् ॥ १४९ ॥
भोजनान्तेज्वरेजातेकुर्यात्पूर्वामिवक्रियाम्।
दिनान्तेदापयेत्पथ्यंसज्वरेविज्वरेऽपिच ॥ १५० ॥
मुस्तपर्पटमेरण्डकषायैर्भस्मसूतकम्।
गुंजमात्रंमूर्च्छितंवादेयंवातज्वरापहम् ॥ १५१ ॥

अर्थ-(ओं ह्रीं ह्रीं फः न्द्रूं फट् नमः) इसमंत्रको एकसौआठवार पढ़नेसे सम्पूर्ण उलूकादियोग सिद्ध होजातेहैं । स्वभावसे अरण्यके एकान्तमें प्रभातके समय जाकर मंत्रयुक्तिके साथ औषधको ग्रहणकरै, इसप्रकार करनेसे सिद्धि होतीहै,नहीं तौ औषधि काठके समान जाननी। 'ओं नमस्तेऽमृतसंभवे' इत्यादि । इस मंत्रको पढ़कर औषधिको उखाड़ लावै, फिर तीन दिन धूपमें सुखानेसे अत्यन्तवीर्यधारक होजा-तीहै । सर्वप्रकारकी औषधि पुष्यार्कनक्षत्रमें उखाड़नी चाहिये । आगै औषधिका मूलच्छेदन और बंध कहते हैं । 'ओं रक्ते चामुण्डे ओरु ओरु अमुकस्य सर्वज्वरं कच्चेवत्वं द्रूं फट् स्वाहा' इसमंत्रको पढ़कर औषधिका मूल छेदन करे और दूसरे मंत्रसे उक्तस्थानमें बाँधै, मण्डूर, देवदारु,नरविष्ठा केशर और मनुष्यके बाल इनसबको एकत्रकरकै धूपदेनेसे अथवा उल्लूके पंख और महिषाक्ष गूगलको काले कम्बलमें बाँधकर धूपदेनेसे सर्वप्रकारके ज्वर दूर होते हैं । 'ओंनमो भगवते रुद्राय' इत्यादि । इस मंत्रको पढ़कर सर्व प्रकारकी धूप देनी चाहिये । चूहे और चिमगादरकी विष्ठा, सरसों और महिषाक्षगूगल, इन सबकी धूप देवैतो सर्व प्रकारके ज्वर दूर होवैं । 'ओं पित्तज्वरवातज्वर

कफज्वराथ ' इत्यादि । इसमंत्रके द्वारा मार्जन करै । ' ओं ज्वर हृदयं ' इत्यादि । इस मंत्रकी लाखसे पत्री लिखकर बलिदानपूर्वक चण्डालप्रोच्छादन विधानकर रोगीके मस्तकमें बाँध दक्षिण दिशामें स्थापनकरनेसे ज्वर दूर होजाताहै । ' ओं ह्रीं सः अमृतं कुरु अमृतेश्वर ' इत्यादि । इस मंत्रसे औषधिको सातवार पढ़कर सबरोगोंमें प्रयोग करनी चाहिये । पीपल, सिंग्रहफ और विष इन सबको समान भाग लेकर खरलसे पीस तीन रत्ती प्रमाण दहीके पानीके साथ सेवन करै तौ वातज्वर नष्ट होय ।भोजनके अन्तमें ज्वर होवै तौ पूर्वोक्तक्रिया करनी चाहिये । ज्वरयुक्त अथवा विनाही ज्वरवाले मनुष्यको दिनान्तमें पथ्य सेवनकरना चाहिये । नागरमोथा, पित्तपापड़ा, और अंड इनका काढ़ा बना उसमें मूर्च्छितपारेकी भस्म एकरत्ती प्रमाण मिलाकर सेवन करनेसे वातज्वर नाश होताहै ॥ १४० ॥ १४१ ॥ १४२ ॥ १४३ ॥ १४४ ॥ १४५ ॥ १४६ ॥ १४७ ॥ ॥ १४८ ॥ १४९ ॥ १५० ॥ १५१ ॥

शुद्धसूतंद्विधागंधंमरिचंटंगणन्तथा ।
चतुस्तुल्यासितायोज्यामत्स्यापित्तेनभावयेत् ॥१५२॥
त्रिदिनंमर्दयेत्तेनरसोऽयश्चन्द्रशेखरः ।
द्विगुञ्जमार्द्रकद्रावैर्देयंशीतोदकंह्यनु ॥ १५३ ॥
ततःपटोलमुद्गञ्चपथ्यंतत्रप्रदापयेत् ।
त्रिदिनात्पित्तश्लेष्मोत्थमत्युग्रंनाशयेज्ज्वरम् ॥१५४॥

अर्थ-शुद्धपारा एकतोला, शुद्धगंधक दोतोले, कालीमिरच एकतोला और सुहागा एकतोला,तथा सबकी बराबर मिश्री मिलाकर मत्स्यपित्तमें भावना देकर तीन दिन खरल करनेपर चन्द्रशेखररस बनजाताहै।अनुपान अदरखके रसके साथ दोगुंजाप्रमाण सेवनकरै, पश्चात् शीतलजल पीवै. पथ्य परवल और मूँगकी दाल देवै। यह चन्द्रशेखररस पित्त और कफसे उत्पन्न हुए ज्वरको तीन दिनमें नष्ट करैहै ॥ १५२ ॥ १५३ ॥ १५४ ॥

त्रिफलामृतलोहश्चभृंगराजंचचूर्णितम् ।
चूर्णमर्जुनपत्रस्यत्रिजातकशिलाजतु ॥ १५५ ॥

त्र्यूषणंतुल्यतुल्यांशंसर्वेषाञ्चसमांशतः ।
क्षौद्रेणवटिकाकार्याकर्षमात्रन्तुभक्षयेत् ॥ १५६ ॥
सर्वज्वरहरःश्रेष्ठोह्यनुपानंप्रकल्पयेत् ॥ १५७ ॥

त्रिफलालोहम् ।

अर्थ-हरड़, बहेडा, आमला, विष, लोहा, भाँगरेके पत्तोंका चूर्ण, दालचीनी, अर्जुनवृक्षके पत्तोंका चूर्ण, इलायची, तेजपात, शिलाजीत, सोंठ, मिरच, पीपल, इन सबको समानभाग लेकर सहतमें गोली बनावै, उन गोलियोंको दो तोले प्रमाण भक्षणकरै, इससे सर्वप्रकारके ज्वर दूर होजातेहैं। इसपै यथायोग्य अनुपान करना चाहिये ॥ १५५ ॥ १५६ ॥ १५७ ॥

मेषाक्षीरेणदरदमम्लवर्गैश्चभावितम् ।
सप्तवारंप्रयत्नेनशुद्धिमायातिनिश्चितम् ॥ १५८ ॥
दरदघनरसानांशुद्धनागाभ्रकाणां
सुभगविडशिलानांसर्वमेकत्रयोज्यम् ।
विपिननृपदलोत्थैःशोषयेन्मर्दयेच्च
दिवसदशसमाप्तौवर्त्तिकाकारणीया ॥ १५९ ॥
गुंजाप्रमाणतोनित्यंभक्षयेदार्द्रकेणवै ।
सर्वशूलविनाशार्थंकफशोथविनाशनम् ॥ १६० ॥
दत्तमात्रंज्वरंहन्तिज्वरारिश्चनिगद्यते ॥ १६१ ॥

ज्वराररिसः ।

अर्थ-सिंग्रफको भेड़के दूधमें सातवार भावनादे, फिर अम्लरसमें सातवार भावनादेवै, इसप्रकार करनेसे सिंग्रफ शुद्ध होजाताहै. ऐसा शोधाहुआ सिंग्रफ, लोहा, पारा, शुद्धसीसा, अभ्रक, सुहागा, विड़लवण और मैनशिल इन सबको समान भाग लेकर अमलतासके पत्तोंके रसमें मर्दन कर सुखावै, इसप्रकार दशदिन मर्दन और सुखाकर रत्तीके प्रमाण गोली बनावै, एकगोली अदरखके रसके साथ खावै, इससे सर्वप्रकारके शूल, कफ, सूजन और यह ज्वराररिस एकहीवार देनेसे ज्वरको दूर करताहै ॥ १५८ ॥ १५९ ॥ १६० ॥ १६१ ॥

सूतार्कगंधचपलाजयपालतिक्ता
पथ्यात्रिवृद्धिषतिन्दुकजंसमांशम् ।
सम्मर्द्यवज्रीपयसामधुनाद्विगुंजं
त्रैलोक्यडम्बरभवोऽभिनवज्वरघ्नः ॥ १६२ ॥

ज्वरांकुशः ।

अर्थ-पारा, ताँबा, गन्धक, सोनामाखी, जमालगोटा, कुटकी, हरड़, निसोथ, और कुचला, इन सबको समान भाग लेकर थूहरके दूधमें खरलकरकै दो रत्ती प्रमाण गोली बनाले, एक गोली सहतके साथ खावै तौ नवीनज्वर दूर होताहै । यह त्रिलोकमें आश्चर्यकारक ज्वरांकुशहै १३२

रसस्याद्विगुणंगंधंगंधतुल्यन्तुटंगणम् ।
रसतुल्यंविषंयोज्यंमरिचंपंचधाविषात् ॥ १६३ ॥
कट्फलंदन्तिबीजञ्चप्रत्येकंशुक्तिसम्मितम् ।
ज्वरांकुशरसोह्येषचूर्णयेद्यामममात्रकम् ॥ १६४ ॥
मासैकेननिहन्त्याशुज्वरंजीर्णंत्रिदोषजम् १६५ ॥

ज्वरांकुशः ।

अर्थ-पारा एकभाग, गंधक दोभाग, सुहागा दोभाग, विष एकभाग, मिरच पाँचभाग, तथा कायफल और जमालगोटा दोदो तोले प्रमाणलेकर चूर्णकरले; इस चूर्णको सेवनकरनेसे एक महीनेमें जीर्णज्वर और सन्निपातज्वर दूर होता है ॥ १६३ ॥ १६४ ॥ १६५ ॥

जयन्तीवाजयापीताविषमज्वरशान्तये ।
चन्दनस्यकषायेणरक्तपित्तज्वरापहा ॥ १६६ ॥

अर्थ-जयन्ती अथवा जया औषधिको पीनेसे विषमज्वर शान्त होताहै । चन्दनके काढ़ेको पीनेसे रक्तपित्तज्वर दूर होता है ॥ १६६ ॥

सूतंगंधंविषंतुल्यंधूर्तबीजंत्रिभिःसमम् ।
चतुर्णाद्विगुणंव्योषंचूर्णंगुंजाद्वयंहितम् ॥ १६७ ॥
जम्बीरकस्यमज्जायामार्द्रकस्यद्रवैर्युतम् ।

ज्वरांकुशोरसोनाम्नाज्वरान्सर्वान्निकृन्तयेत् ॥ १६८ ॥
एकाहिकंद्व्याहिकंचत्र्याहिकंवाचतुर्थकम् ।
विषमश्चत्रिदोषोत्थंहन्तिसद्योनसंशयः ॥ १६९ ॥

महाज्वरांकुशः ।

अर्थ–एकभाग पारा,एकभाग गंधक, एकभाग विष, तीनभाग धतूरेके बीज, और बारहभाग त्रिकुटा, इनसबका चूर्ण बनावै,उस चूर्णको दोगुंजा प्रमाण लेकर जम्भीरी नीबूकी मज्जाके साथ और अदरखके रसके साथ सेवन करै, यह महाज्वरांकुश नामवाला रस,–सर्वप्रकारके ज्वरोंको हरैहै, तथा एकाहिक, द्व्याहिक, त्र्याहिक, चातुर्थिक,विषमज्वर, त्रिदोषज्वर, इनसबको निःसन्देह तत्काल नष्ट करैहै ॥ १६७॥ ॥ १६८ ॥ १६९ ॥

पारदंहिंगुलंताम्रंमाक्षिकंतुत्थमेवच ।
वंगंसूतश्चगंधश्चखर्परश्चमनःशिला ॥ १७० ॥
तालकंघनपाषाणोगैरिकंटंगणन्तथा ।
दन्तीबीजश्चसर्वाणिचूर्णयित्वाविभावयेत् ॥ १७१ ॥
जयन्तीविजयाचिंचातुलसीशालपर्णिका ।
प्रत्येकंचरसंदत्त्वानिर्जलेवाथभूगृहे ॥ १७२ ॥
चणमात्रांवटींकृत्वाछायाशुष्कन्तुकारयेत् ।
महाग्निकारकश्चैवज्वराणांकुलनाशनः ॥ १७३ ॥
द्वन्द्वजंसर्वजंचैवचिरकालसमुद्भवम् ।
एकाहिकंद्व्याहिकंचतथात्रिदिवसंज्वरम् ॥ १७४ ॥
चातुर्थिकंतथात्युग्रंजलदोषसमुद्भवम् ।
सर्वान्ज्वरान्निहन्त्याशुभास्करस्तिमिरंयथा ॥१७५॥
महाज्वरांकुशोनामदेयंगुंजाचतुष्टयम् ॥ १७६ ॥
घनपाषाणमभ्रकम् ।

महाज्वरांकुशः ।

अर्थ-पारा, सिंग्रफ, ताँबा, सोनामाखी, तूतिया, राँग, पारा, गंधक, खपरिया, मैनशिल, हरताल, अभ्रक, गेरू, सुहागा और जमालगोटा, इन सबको समानभाग लेकर चूर्णकरै, फिर उस चूर्णको जयन्ती, भाँग, इमली, तुलसी और शालपर्णी इन सबके निर्जलरसमें अलग अलग भावना देकर चनेकी बराबर गोली बना छायामें सुखादे, यह महाज्वरांकुशरस अत्यन्त अग्निको दीपन करनेवाला, ज्वरोंके कुलको विध्वंस करनेवाला, तथा द्वन्द्वज, त्रिदोषज्वर, जीर्णज्वर, एकाहिकज्वर, द्व्याहिकज्वर, तृतीयज्वर, चातुर्थिकज्वर, अत्युग्रज्वर, जलदोषजज्वर, और सर्वप्रकारके ज्वरोंको दूर करै है, जैसे सूर्य अंधकारको दूर करैहै। इस महाज्वरांकुशकी मात्रा चार गुंजाकी है ॥ १७० ॥ १७१ ॥ १७२ ॥ ॥ १७३ ॥ १७४ ॥ १७५ ॥ १७६ ॥

लाजासक्तुकपथ्यंस्यात्सैन्धवेनाविचूर्णयेत् ।
पचेज्जीर्यत्यविघ्नेनज्वरजिवित्तदाध्रुवम् ॥ १७७ ॥
रक्तपित्तहरत्वेनदाहज्वरकृतेतथा ।
सक्तवःशीतवीर्याःस्युर्लाजामण्डःकफोत्थके ॥ १७८ ॥

तेनादौकेवलानाहितान् ।

पाचनोदीपनोलाजमण्डस्तेनोष्णइष्यते ।
मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ॥१७९ ॥
शृतशीतजलंदद्यात्पिपासाज्वरशान्तये ।
शुण्ठीबलाहकोशीरैःपिबेत्तोयंप्रसाधितम् ॥ १८० ॥
दाहशीतज्वरहरंपाचनंचतृषापहम् ॥ १८१ ॥

बलाहकोमुस्तकम् ।

दोषावस्थांसमालोच्यप्रयुक्तःसन्निपातिनः ।
लंघनेदशमूलादिकषायोनाविरुध्यते ॥ १८२ ॥
कषायोऽत्रार्द्धशृतंनवज्वरेमुख्यकषायनिषेधात् ।
मुख्यभेषजसम्बन्धोनिषिद्धस्तरुणज्वरे ॥ १८३ ॥

तोयपेयादिसंस्कारेनिर्दोषस्तेनभेषजम्।
यःकषायैःकषायःस्यात्सवर्ज्यस्तरुणेज्वरे॥ १८४॥
कषायेणाकुलीभूतादोषाजेतुंसुदुस्तराः।
उद्यन्तेचाविमुच्यन्तेकुर्वतेविषमज्वरम्॥ १८५॥
कर्षैकमात्रंततोद्रव्यंसाधयेत्प्रास्थिकेऽम्भसि।
अर्द्धंश्रृतंप्रयोक्तव्यंपानेपेयादिसंविधौ॥ १८६॥
अर्द्धश्रृतमर्द्धावशेषितम्।
वामितंलंघितंकालेयवागूभिरुपाचरेत्।
यथाह्यौषधसिद्धाभिर्मण्डापूर्वाभिरादितः॥ १८७॥
धन्याकपिप्पलीविश्वदशमूलीजलंपिबेत्।
पेयांसर्वज्वरहरांसैन्धवेनावचूर्णिताम्॥ १८८॥
मृद्वीकापिप्पलीमूलचव्यामलकनागरैः।
यवागूःस्यात्रिदोषघ्नीव्याघ्रीदुष्पर्शगोक्षुरैः॥ १८९॥
यावज्ज्वरमृदुभावात्षडहंवाविचक्षणः।
श्वदंष्ट्राकण्टकारीभ्यांसिद्धांज्वरहरांपिबेत्॥ १९०॥
कुलत्थपंचमूलाभ्यांधान्यापिप्पलीनागरैः।
पेयाश्लेष्मज्वरहरासैन्धवेनावचूर्णिता १९१॥

अर्थ–खीलोंके सतुओंमे सैंधानोन मिलाकर ज्वररोगीको सेवन करानेसे हित करैहै, तथा ज्वर, रक्तपित्त और दाहको दूरकरैहै। खीलोंकेसत्तू–शीतवीर्यहैं। खीलोंका मोड़–कफज्वरमें हितकारीहै, पाचक और अग्निप्रदीपकहै, इसकारण कुछ गरमभीहै। नागरमोथा, पित्तपापड़ा, खस, लालचन्दन, सुगंधवाला और सोंठ, इनसबको समानभाग लेकर काढा बनावै,जब ठंडा होजाय तौ पीवै, इससे–तृषा,ज्वरशान्त होजाता है। सोंठ, नागरमोथा, और खस समानभागलेकर काढा बना पीवै तौ दाह, शीतज्वर, और तृषा दूर होतीहै, तथा पाचकहै। सन्निपातज्वरमें दोषोंकी अवस्थाको विचारकर लंघन होनेपर भी दशमूलका

काढ़ा देना चाहिये । तरुणज्वरमें आधा जलजावै तौ क्वाथ देना चाहिये, क्योंकि –तरुणज्वरमें सम्पूर्णलक्षणोंवाला क्वाथ वर्ज्यहै । मुख्य औषधीकाभी देना तरुणज्वरमें निषेधहै । किन्तु तोयपेयादिमें संस्कारितकी हुई औषधी तरुणज्वरमें निषिद्ध नहींहै । तरुणज्वर यथार्थ कषाय वर्ज्यहै, क्योंकि कषायसे त्रिदोष कुपित होकर विषमज्वरको उत्पन्न करतेहैं, इसकारण दोसेर जलमें २ दोतोले औषधिको डालकर, पकावै, जब आधा अर्थात् सेरभर जल शेष रहै तब उतारले,इसको तृषा लगनेपर पीतारहै । वमन और लंघन कराये हुए मनुष्यकों औषधि और मण्डादिसे सिद्ध किया हुआ यवागू देनाचाहिये । धनियां, पीपलामूल, सोंठ, और दशमूल इनसबका पेया बना उसमें सैंधेनोनका चूर्णमिला सेवन करनेसे सर्व प्रकारके ज्वर नष्ट होतेहैं । दाख, पीपलामूल, चव्य, आमला, सोंठ, कटेरी, जवासा और गोखरू इन सबका बनाया हुआ यवागू त्रिदोषनाशक है । और जबतक मृदुज्वर रहै तबतक छै दिन पर्यन्त गोखरू और कटेरीकी यवागू बनाकर पीवै तौ ज्वरनाश होताहै । कुलथी, पंचमूल, धनिया, पीपल और सोंठ इनका यवागू बना तिसमेंसे सैंधेनोनका चूर्णमिलाकर पीनेसे कफज्वरका नाश होताहै ॥ १७७ ॥ ॥ १७८ ॥ १७९ ॥ १८० ॥ १८१ ॥ १८२ ॥ १८३ ॥ १८४ ॥ १८५ ॥ ॥ १८६ ॥ १८७ ॥ १८८ ॥ १८९ ॥ १९० ॥ १९१ ॥

एषाचैवयवागूस्तुसचापित्तेऽप्ययंक्रमः ।
ज्वरापहैःफलरसैर्युक्तंसमधुशर्करम् ॥ १९२ ॥
तत्रमदात्ययादौ ।
द्राक्षादाडिमखर्ज्जूरपियालैःसपरूषकैः ।
तर्पणार्हेषुकर्त्तव्यंतर्पणंज्वरनाशनम् ॥ १९३ ॥
छर्द्यर्दितंतथाक्षीणंविशुद्धंतृष्णयान्वितम् ।
शर्करामधुसंयुक्तंपाययेल्लाजतर्पणम् ॥ १९४ ॥
उपवासश्रमकृतेज्वरेवाताधिकेतथा ।
दीप्ताग्निंभोजयेत्प्राज्ञोनरंमांसरसौदनम् ॥ १९५ ॥
मुद्गयूषौदनश्चापिदेयःकफसमन्विते ।

सएवसितयायुक्तःशीतपित्तज्वरेहितः ॥ १९६ ॥
मुद्गामलकयूषस्तुवातपित्तज्वरेहितः ।
निम्बमूलकयूषस्तुहितःपित्तकफाधिके ॥ १९७ ॥
निम्बपत्रंपटोलञ्चवार्ताकुंकारवेल्लकम् ।
कर्कोटकंपर्पटकंगोजिह्वावालमूलकम् ॥ १९८ ॥
पत्रंगुडूच्याःशाकाद्यैर्ज्वरितायप्रदापयेत् ।
अरुचौमातुलुंगस्यकेशरं साज्यसैन्धवम् ॥ १९९ ॥
धात्रीद्राक्षासितानांवाकल्कमास्येनधारयेत् ।
धारयेत्सर्वथैवनागिलेत् ।
शर्करादाडिमाभ्याञ्चद्राक्षादाडिमयोस्तथा ॥ २०० ॥
तैरस्यधारयेदास्येगण्डूषञ्चयथाहितम् ।
ननक्तंनगुरुप्रायंभुञ्जीततरुणज्वरी॥ २०१ ॥
वातपित्तज्वरेदेयमौषधंपंचमेदिने ।
सप्तमेश्लेष्मपित्तोत्थेतदूर्ध्वंकफवातजे ॥ २०२ ॥
नागरंदेवकाष्ठञ्चधन्याकंबृहतीद्वयम् ।
दद्यात्पाचनकंपूर्वंजरितायज्वरापहम् ॥ २०३ ॥
बिल्वादिपंचमूलस्यक्वाथःस्याद्वातिकेज्वरे ।
पंचमूलीबलारास्नाकुलत्थैःसहपुष्करैः ॥ २०४ ॥
पर्वभेदाशिरःकम्पयुतंहन्यान्मरुज्ज्वरम् ।
गुडूचीशारिवाद्राक्षाशतपुष्पापुनर्नवा ॥
सगुडोयंकषायःस्याद्वातज्वरविनाशनः ॥ २०५ ॥

इतिवाते ।

अर्थ-पित्तज्वरमेंभी उपरोक्तक्रिया करनी चाहिये । ज्वरनाशक फलोंके रसमें मधु और शर्करा मिलाकर पीवै। तथा दाख, अनार, खजूर, चिरोंजी, और फालसा, इनोंके रसमें सहत और चीनी मिलाकर

तर्पण करै, यह तर्पण ज्वरनाशकहै । वमनसे पीड़ित, क्षीण, विबन्ध-रोगी और तृषावान्मनुष्यको खीलोंके मांड़में सहत और चीनी मिलाकर तर्पण बनाकर पिलाना योग्यहै। उपवास तथा परिश्रमसे और उत्पन्न हुए ज्वरमें और वातज्वरमें दीप्ताग्निवाले मनुष्यको मांसरस-संयुक्त, भात भक्षण कराना चाहिये । कफज्वरमें मूँगके यूषके साथ भात सेवन कराना चाहिये । शीत और पित्तज्वरमें मूँगके यूषमें चीनी मिलाकर भातके साथ सेवन कराना चाहिये, वात-पित्तज्वरमें मूंग और आमलेके यूषके साथ भात सेवन कराना चाहिये, नीम और मूलीका यूष पित्तश्लेष्मज्वरमें देना चाहिये । नीमकेपत्ते, पर-वल, वैंगुन, करेला, ककोडा, पित्तपापडा, गोभी, कच्चीमूली और गिलो-यके पत्ते, यह ज्वरवाले मनुष्यको शाककेलिये देने चाहिये । ज्वररोगीको अरुचि होनेपर विजोरेकी केशरके साथ सैंधानोन और घृत अथवा आमला, दाख और चीनी एकत्र मिलाकर सेवन करानी चाहिये ।आमला, दाख और मिश्री इनका कल्क मुखमैं रखनेसै अरुचि दूर होतीहै । इस कल्कको एकसाथ न निगले किन्तु मुखमें रख थोड़ा थोड़ा रस पीता रहै । शर्करा और अनारका रस अथवा दाख और अनार इनका गण्डूष ग्रहण करनेसे ज्वरमें उत्पन्नहुई अरुचि नष्ट होतीहै । तरुणज्वर-वाला रोगी रात्रिमें भोजन और भारीपदार्थ भक्षण नहीं करै । वातपित्त-ज्वरमें पांचमें दिन, पित्तश्लेष्मज्वरमें सातमें दिन और वातकफज्वरमें सातमें दिनके भी पीछे औषधि देनी चाहिये । सोंठ, देवदारु, धनियाँ, बृहती और कटेरी इनका काढाकर ज्वरकी प्रथमअवस्थामें देना चाहिये। यह पाचन ज्वरनाशकहै । बिल्वादिपंचमूलका क्काथ वातज्वरमें देना चाहिये । स्वल्पपंचमूल, खिरैटी, रास्ना, कुलथी और पोहकरमूल इनका काढ़ा, पर्वभेद, और शिरकम्पयुक्तवातज्वरनाशकहै । गिलोय, शारिवा, दाख, सौंफ और पुनर्नवा इनका काढ़ा गुडके साथ पीनेसे वात-ज्वर नाश होताहै ॥ १९२ ॥ १९३ ॥ १९४ ॥ १९५ ॥ १९६ ॥ १९७ ॥ ॥ १९८ ॥ १९९ ॥ २०० ॥ २०१ ॥ २०२ ॥ २०३ ॥ २०४ ॥ २०५ ॥

सक्षौद्रंपाचनंपित्तेतिक्तासेन्द्रयवैःकृतम् ।
पाठेन्द्रयवतिक्ताभिःकटूफलैर्वासशर्करम् ॥ २०६ ॥
क्काथःपित्तज्वरंहन्यादथवापर्पटोद्भवः ।

पटोलयवधन्याकमधुकानांमधुप्लुतः ॥ २०७ ॥
क्वाथःपित्तज्वरंदाहंहन्तितृष्णांचदारुणाम् ॥ २०८ ॥
मधुकंयष्टीमधुः।
एकःपर्पटकःश्रेष्ठःपित्तज्वरविनाशकः।
किंपुनर्यदियुज्येतचन्दनोदीच्यनागरैः ॥ २०९ ॥
घनचन्दनपर्पटकंकटुकं
समृणालपटोलदलंसजलम्।
शृतशीतसितायुतपित्तहरं
ज्वरछर्दितृषारुचिदाहहरम् ॥ २१० ॥
द्राक्षाभयापर्पटकाम्लतिक्ता-
क्वाथंसशम्याकफलंविदध्यात्।
प्रलापमूर्च्छाभ्रमदाहशोष-
तृष्णान्वितेपित्तभवज्वरेतु ॥ २११ ॥
विदारीदाडिमंलोध्रंकपित्थंबीजपूरकम्।
एभिःप्रलिंह्यान्मूर्द्धानंतृड्दाहार्त्तस्यदेहिनः ॥२१२ ॥
करवीरस्यपत्राणिचन्दनंशारिवास्तिलाः।
तृष्णादाहेशिरोलेपआरनालेनपेषितः ॥ २१३ ॥
कालेयचन्दनानन्तायष्टीबदरकांजिकैः।
सघृतःस्याच्छिरोलेपस्तृष्णादाहार्त्तिशान्तये ॥ २१४ ॥
चन्दनोदकशीतेषुदाहार्त्तःसंविशेन्सुखम्।
हिमाम्बुपूर्णसदनेशीतधारागृहेऽपिवा ॥ २१५ ॥
पौष्करेऽम्भासिसामीप्येसुतरव्यंसहआदिशेत् ॥ २१६ ॥
सरःसमीपइत्यर्थः।
हेमशंखप्रवालानांमणीनांमौक्तिकस्यच।
चन्दनोदकपीतानिसंस्पर्शात्तरसाभवेत् ॥ २१७ ॥

हरीतकीप्रियंगुश्चपिप्पलीलोध्रमेवच ।
चव्यंदार्वीहरिद्राचसक्षौद्रंमुखधारणम् ॥ २१८ ॥

इतिपित्ते ।

अर्थ–कुटकी और इन्द्रजौ इनका काढ़ा, सहतके साथ, अथवा पाढ़, इन्द्रजौ, कायफल और कुटकी इनका काढ़ा चीनीके साथ या पित्तपापड़ेका काढ़ा पीनेसे पितज्वर नाश होताहै । कड़वेंपरवल, इन्द्रजौ, धनियाँ और मुलैठी, इनका काढ़ा पीनेसे पित्तज्वर, दाह और तृषा दूर होतीहै । केवल एकही पित्तपापड़ा पित्तज्वरको नाश करसक्ता है, और जो यदि इनमें चन्दन, सुगन्धवाला और सोंठ मिलाके देवै तबतौ क्याही कहनाहै । नागरमोथा, लालचन्दन, पित्तपापड़ा, कुटकी, कमलकीनाल और पटोलपत्र, इनका काढ़ा शीतलकर खाँडके साथ पीनेसे पितज्वर, वमन, तृषा, अरुचि, और दाह दूर होतीहै । दाख, हरड़, पित्तपापड़ा, इमली और कुटकी इनका काढ़ा बना उसमें अमलतासका गूदा मिलाकर पीनेसे प्रलाप, मूर्च्छा, भ्रम, दाह, और तृष्णायुक्तपित्तज्वर नष्ट होताहै । विदारीकन्द, अनार, लोध, कैथ और विजोरेकी केशर इनका कल्क, अथवा कनेरकेपत्ते, चंदन, शारिवा, और तिल इनको काँजीमें पीस शिरपै लेपकरनेसे तृषा और दाह दूर होतीहै । अथवा दारुहलदी, चन्दन, शारिवा, मुलैठी और बेरीके पत्ते इनसबको काँजीमें पीस घी मिला शिरपै लेपकरनेसे तृषा और दाह शान्त होजातीहै । लालचन्दनको शीतलजलमें घिसकर मुखमें धारणकरनेसे दाह दूर होतीहै । शीतलजलसे भरे हुए बागमें, शीतलजलकी धारा पढ़ती होय ऐसे घरमें, और कमलयुक्तसरोवरके समीपमें वास करै, चन्दनोदक पीवै, तथा सोना, शंख, मूँगा, मणि, और मुक्तादि धारण करनेसे दाह दूर होतीहै । हरड़, फूलप्रियंगू, पीपल, लोध, चव्य, दारुहलदी, और हलदी इनसबको सहतमें पीसकर मुखमें धारणकरनेसे दाह दूर होतीहै ॥ २०६ ॥ २०७ ॥ २०८ ॥ २०९ ॥ २१० ॥ २११ ॥ ॥ २१२ ॥ २१३ ॥ २१४ ॥ २१५ ॥ २१६ ॥ २१७ ॥ २१८ ॥

पिप्पलीपिप्पलीमूलंचव्याचित्रकनागरम् ।
मरिचैलाजमोदेन्द्रपाठावेल्लकजीरकम् ॥ २१९ ॥
भार्गीमहानिम्बफलंहिंगुरोहिणीसर्षपम् ।

विडंगातिविषामूर्वाचेत्ययंकीर्त्तितोगणः ॥ २२० ॥
पिप्पल्यादिःकफहरःप्रतिश्यायानिलापहः ।
निहन्याद्दीपनोगुल्मशूलघ्नस्त्वामपाचनः ॥ २२१ ॥
रविगुप्तोविनापाठामुस्तकोऽथचपाटला ।
पठत्यत्रगणेकिन्तुप्रचारोलिखितेनतु ॥ २२२ ॥
अजमोदावनयवानी इन्द्रयवः ।

पिप्पल्यादिगणः।

अर्थ–पीपल, पीपलामूल, चव्य, चीता, सोंठ, मिरच, इलायची, अजमोद, इन्द्रजौ, पाठ, गजपीपल, जीरा, भारंगी, हींग, बकायन, कुटकी, सरसौं, वायविड़ंग, अतीस और मूर्वा, इनसबको पिप्पल्यादि गण कहते हैं। यह पिप्पल्यादिगण–कफ, प्रतिश्याय (जुकाम,) वात, गुल्म और शूलको दूर करैहै। तथा अग्निदीपक और आमपाचक है। इस पिप्पल्यादिगणमें रविगुप्तवैद्यके मतसे पाठको निकाल नागरमोथा पाडर मिलाना चाहिये ॥ २१९ ॥ २२० ॥ २२१ ॥ २२२ ॥

कट्फलंपौष्करंशृंगीकृष्णाचमधुनासह ।
कासश्वासज्वरहरःश्रेष्ठोलेहःकफान्तकृत् ॥ २२३ ॥

चातुर्भद्रावलेहिका।

अर्थ–कायफल, पोहकरमूल, काकड़ाशिंगी, और पीपल इनका चूरण कर उसमें सहत मिला चाटनेसे कफ, श्वास, ज्वर और खाँसी दूर होती है ॥ २२३ ॥

कट्फलंपौष्करंशृंगीमुस्तकंकटुकंशठी ।
सर्वान्पृथग्वासंचूर्ण्यलिह्यान्मध्वार्द्रकेद्रवैः ॥ २२४ ॥
कफानिलारुचिच्छर्दिकाशश्वासरुजापहा ॥ २२५ ॥

कट्फलादि अवलेहिका।

अर्थ–कायफल, पोहकरमूल, काकड़ासिंगी, नागरमोथा, कुटकी और नरकचूर, इनसबको मिला अथवा पृथक् पृथक् चूर्णकर मधु और अदरखके रसकेसाथ चाटनेसे–कफ, वात, अरुचि, वमन और श्वास दूर होताहै ॥ २२४ ॥ २२५ ॥

कासश्वासज्वरच्छर्दिप्लीहपाण्डूदरापहा ।
मधुनापिप्पलीलीढापाचनीदीपनीमता ॥ २२६ ॥
भिनत्तिश्लेष्मसंघातंवायुर्जलधरानिव ॥ २२७ ॥

इति कफजे ।

अर्थ-पीपलको सहतके साथ चाटनेसे-खाँसी, श्वास, ज्वर, वमन, प्लीहा, पाण्डु, और उदररोग नष्ट होते हैं । तथा यह चटनी-पाचन और दीपन है । जैसे पवनसे बादल दूर होजाते हैं उसीप्रकार इससे कफका समूह नष्ट होजाता है ॥ २२६ ॥ २२७ ॥

संसृष्टदोषेषुहितंसंसृष्टमथपाचनम् ।
संसृष्टसंयुक्तंवातहरपित्तहरादिभिः ॥ २२८ ॥
विश्वामृताब्दभूनिम्बैःपंचमूलीसमन्वितैः ।
कृतःकषायोहन्त्याशुवातपित्तोद्भवंज्वरम् । २२९ ॥
पंचमूलीस्वल्पावातपित्तहन्तृत्वात् ॥ २३० ॥

अर्थ-वातपित्त और श्लेष्मपित्तादि मिले हुए दोषोंमें मिलीहुई औषधादि प्रयोग करनी चाहिये । सोंठ, गिलोय, नागरमोथा, चिरायता और स्वल्पपंचमूल, इनका काथ पीनेसे वातपित्तज्वर नष्ट होताहै ॥ २२८ ॥ ॥ २२९ ॥ २३० ॥

पंचांगः ।

गुडूचीपर्पटंमुस्तंकिरातंविश्वभेषजम् ।
वातपित्तज्वरेदेयंपंचभद्रमिदंशुभम् ॥ २३१ ॥
कफपित्तहरोमुद्गःकारवेल्लादिजारसाः ।
नदेयावातपित्तोत्थेज्वरेविष्टम्भकारकाः ॥ २३२ ॥

इतिवातपित्ते ।

अर्थ-गिलोय, पित्तपापड़ा, नागरमोथा, चिरायता और सोंठ, इन सबका काथ पीनेसे वातपित्तज्वर नष्ट होताहै ॥ २३१ ॥ मूँगका यूष कफपित्तनाशक है और करेला आदिका यूष वातपित्तज्वरमें नहीं देना चाहिये । क्योंकि यह विष्टम्भकारकहै ॥ २३२ ॥

गुडूच्यादिः।

गुडूचीनिम्बधन्याकंपद्मकंचन्दनानिच।
एपसर्वज्वरान्हन्तिगुडूच्यादिस्तुदीपनः॥ २३३॥
हृल्लासारोचकच्छर्दिपिपासादाहनाशनः॥ २३४॥

अर्थ–गिलोय, नीम, धनिया, पद्माख और लालचन्दन, इनका काढ़ा सर्वप्रकारके ज्वरोंको दूर करैहै, अग्निप्रदीपकहै॥ २३३॥ तथा हृल्लास, अरुचि, छर्दि, पिपासा और दाहनाशकहै॥ २३४॥

पटोलादिः।

पटोलयवधन्याकमुद्गामलकचन्दनम्।
पैत्तिकेश्लेष्मापित्तोत्थेतृट्छर्दिज्वरदाहनुत्॥ २३५॥

अर्थ–परवल, इन्द्रजौ, धनिया, मूंग, आमला और लालचन्दन, इनका काढ़ा बनाकर पीनेसे–पित्तज्वर, कफपित्तज्वर, तृषा, वमन और दाहसंयुक्तज्वरका नाश होताहै॥ २३५॥

कण्टकार्यादिः।

कण्टकार्य्यमृताभार्ङ्गीनागरेन्द्रयवासकम्।
भूनिम्बंचन्दनंमुस्तंपटोलंकटुरोहिणी॥ १३६॥
कषायंपाययेदेतत्पित्तश्लेष्मज्वरापहम्।
हृल्लासारोचकच्छर्दितृष्णादाहविबन्धनुत्॥ २३७॥

अर्थ–कटेरी, गिलोय, भारंगी, सोंठ, जवासा, चिरायता, लालचन्दन, नागरमोथा, परवल और कुटकी, इनका काढ़ा पित्तश्लेष्मज्वर, हृल्लास, अरुचि, वमन, तृषा दाह और विबन्धनाशकहै॥ २३६॥ २३७॥

चातुर्भद्रम्।

किराततिक्तकंमुस्तंगुडूचीविश्वभेषजम्।
चातुर्भद्रमिदंख्यातंवातश्लेष्मज्वरापहम्॥ २३८॥

अर्थ–चिरायता, नागरमोथा, गिलोय, और सोंठ यह सब मिले हुए चातुर्भद्र कहे जातेहैं। इनका काढ़ा–वातश्लेष्मज्वरनाशकहै॥ २३८॥

पंचकोलम्।

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरम्।

दीपनीयोःस्मृतोवर्गःकफानिलगदापहः ॥ २३९ ॥
पाचनःशीतहारुच्योग्रहणीकण्ठरोगनुत् ॥ २४० ॥

क्काथव्यंजनाभ्याम् ।

अर्थ-पीपल, पीपलामूल, चव्य, चीता और सोंठ इनका काढ़ा-कफवात रोग नाशक, अग्निप्रदीपक, पाचक, शीतनाशक, रुचिकारक तथा संग्रहणी और कंठरोगको दूर करै है ॥ २३९ ॥ २४० ॥

क्षुद्रादिः ।

क्षुद्रामृतापुष्करनागराह्वैः
कृतःकषायःकफमारुतोद्भवे ।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरेत्रिदोषप्रभवेऽपिशस्यते ॥ २४१ ॥

इतिवातकफे ।

अर्थ-कटेरी, गिलोय, पोहकरमूल और सोंठ इनका क्काथ पीनेसे कफवातज्वर, श्वास, खासी, अरुचि और पसलीकी पीडायुक्त ज्वर दूर होताहै और यह क्षुद्रादिकषाय सन्निपातज्वरमेंभी हितकारीहै ॥२४१॥

अथ सन्निपातचिकित्सामाह ।

अकस्माच्छीतविकृतिरकस्मात्पुरुषोत्तमः ।
अकस्मादिन्द्रियोत्पत्तिःसन्निपाताग्रलक्षणम् ॥ २४२ ॥
गीतनर्तनहास्यादिविकृतेहाप्रवर्त्तनम् ।
चिरात्पाकश्चदोषाणांसन्निपातज्वराकृतिः ॥ २४३ ॥
संगतानिचितादोषाःपातयन्तिकलेवरम् ।
ससन्निपातितायस्मात्सन्निपातःसउच्यते ॥ २४४ ॥

इतिचरकः ।

लंघनंवालुकास्वेदोनस्यंनिष्ठीवनंतथा ।
अवलेहोञ्जनश्चैवप्राक्प्रयोज्यंत्रिदोषजे ॥ २४५ ॥
श्लेष्मनिग्रहमेवादौकुर्याद्व्याधौत्रिदोषजे ।
पश्चाच्छ्लेष्मणिसंक्षीणेशमयेत्पित्तमारुतौ ॥ २४६ ॥

त्रिरात्रंपंचरात्रंवासप्तरात्रमथापिवा ।
लंघनंसन्निपातेषुकुर्यादारोग्यदर्शनात् ॥ २४७ ॥
दोषाणामेवसाशक्तिर्लंघनेयासहिष्णुता ।
नतुदोषक्षयेकश्चित्सहतेलंघनंमहत् ॥ २४८ ॥

अर्थ–अब सन्निपातकी चिकित्सा कहतेहैं। अकस्मात् शीत लगने लगे, अकस्मात् देह भारी होजाय, और अकस्मात् इन्द्रियोंमें अधिक चेष्टा उत्पन्न होजावै, यह सन्निपातके पूर्वलक्षण हैं ॥ २४२ ॥ जिसमें गीत, नृत्य, हास्यादि विकृतक्रिया, पार्श्वपरिवर्त्तन और बहुत कालमें दोषोंका पाकहो, उसको सन्निपातज्वर कहतेहैं ॥ २४३ ॥ संचित तथा बढे हुए त्रिदोष शरीरको पातन करदेते हैं, इसकारण उसको सन्निपात कहतेहैं। ऐसा चरकसंहितामें लिखाहै ॥ २४४ ॥ लंघन, वालुकाखेद, नस्य, निष्ठीवन, अवलेह और अंजन, यह सब सन्निपातमें प्रथम प्रयोग करने चाहिये ॥ २४५ ॥ सन्निपातमें प्रथम कफको दूर करै, जब कफ दूर होजावै तत्पश्चात् पित्त और वायुको दूर करना चाहिये ॥ २४६ ॥ तीनरात्रि या पाँचरात्रि अथवा सातरात्रि या आरोग्य होनेपर्यन्त सन्निपातमें लंघन कराने चाहिये ॥ २४७ ॥ जितने दिनौं तक रोगी लंघन सहसकै उतने दिनोंपर्यन्त दोषोंका बल जानना चाहिये, क्योंकि दोषोंके नाश होनेपर ऐसा कौन मनुष्य है जो लंघनको सहलेवै ? ॥ २४८ ॥

आर्द्रकस्वरसोपेतंसैन्धवंसकटुत्रिकम् ।
आकण्ठंधारयेदास्येनिष्ठीवेच्चपुनःपुनः ॥ २४९ ॥
तेनास्यहृदयाच्छ्लेष्मामन्यापार्श्वशिरोगलात् ॥
निश्चितंकृष्यतेशुष्कोलाघवश्चास्यजायते ॥ २५० ॥
पर्वभेदोज्वरोमूर्च्छाकासश्वासज्वरामयाः ।
मुखाक्षिगौरवंजाड्यमुत्क्लेशश्चोपशाम्यति ॥ २५१ ॥
कवलग्रहःमातुलुंगार्द्रकरसंकोष्णंत्रिलवणान्वितम् ।
अन्यद्वासिद्धिविहितंनस्यंतीक्ष्णंप्रयोजयेत् ॥ २५२ ॥
तेनप्रभिद्यतेश्लेष्माप्रभिन्नश्चप्रसिच्यते ।

शिरोहृदयकण्ठस्यपार्श्वरुक्चोपशाम्यति ॥ २५३ ॥
सैंधवंश्वेत[1]मरिचंसर्षपंकुष्ठमेवच ।
बस्तमूत्रेणपिष्ट्वातुनस्यंतन्द्राविनाशनम् ॥ २५४ ॥

नस्यम् ।

शिरीषबीजगोमूत्रकृष्णामरिचसैंधवैः ।
अंजनंस्यात्प्रबोधायसरसोनशिलावचैः ॥ २५५ ॥
मातुलुंगरसस्तस्यहिंगुशुंठीयुतंमुखे ।
दद्यात्प्रबोधनंतीक्ष्णंकटुतिक्तोपसंहितम् ॥ २५६ ॥
कृतेक्रियावरेचास्मिन्यस्यसंज्ञानजायते ।
पादयोश्चललाटेवादाहंलोहशलाकया ॥ २५७ ॥

अर्थ–सैंधानोन, सोंठ, मिरच, पीपल, इनका चूर्णकर अदरखके रसमें मिला मुखमें रख वारंवार थूकता रहै ॥ २४९ ॥ इसप्रकारकरनेसे हृदयका श्लेष्मा, तथा मन्या, पसली, शिर और गलेका कफ बाहर निकलजाता है, देहमें लघुता आजाती है ॥ २५० ॥ तथा संधियोंमें दर्द, ज्वर, मूर्च्छा, खाँसी, श्वाँस, ज्वरके विकार, मुख और नेत्रोंकी गुरुता, शरीरकी जड़ता और ग्लानि दूर होजातीहै ॥ २५१ ॥ विजौरेका रस और अदरखका रस किंचित् गरम कर उसमें सैंधानोन, और विरियासंचरनोन मिलाके, कुल्ले करनेसे, अथवा तीक्ष्ण नस्य लेनेसे कफ खंडित होकर शरीरसे बाहिर निकलजाताहै और शिर, हृदय, कंठ, मुख, और पसलीकी पीड़ा शान्त होजातीहै ॥ २५२ ॥ २५३ ॥ सैंधानोन, सैजिनेकेबीज, सरसों और कूठ, इनसबको बकरेके मूत्रमें पीसकर नास लेनेसे तन्द्रा दूर होजातीहै ॥ २५४ ॥ सिरसके बीज, पीपल, कालीमिरच, सैंधानोन, लहसुन, मैनशिल और वच, इनसबको गोमूत्रमें पीसकर अंजन बना आँखोंमें लगानेसे मूर्च्छा नष्ट होतीहै ॥ २५५ ॥ बिजौरेके रसमें हींग और सोंठका चूरन मिलाकर मुखमें रखनेसे अथवा तीक्ष्ण, कटु और तिक्तपदार्थ मुखमें रखनेसे मूर्च्छा नष्ट होजाती है ॥ २५६ ॥ यदि उपरोक्त करनेसेभी मूर्च्छा नष्ट

१ श्वेतमरिचं शोभांजनबीजम् ।

अर्थात् संज्ञा न उत्पन्न हो, तब लोहेकी सलाईको अग्निमें तपा रोगी-के दोनो पाँव और ललाटमें दाग देवै ॥ २५७ ॥

किरातंसकणाशृंगीवासंकट्फलपौष्करम् ।
मधुनासन्निपातघ्नोलेहःकार्यःपुनःपुनः ॥ २५८ ॥

इति किराताद्यवलेहः ।

अर्थ–चिरायता, पीपल, काकड़ाशिंगी, विसोंटा, कायफल, और पोह-करमूल, इनसबका चूरण कर सहत मिलाकै चाटनेसे सन्निपात दूरहोताहै.

अष्टांगावलेहिका ।

कट्फलंपौष्करंशृंगीव्योषंयासश्चकारवी ।
विचूर्ण्यलेहयेद्युक्त्याक्षौद्रेणार्द्ररसेनवा ॥ २५९ ॥
अष्टांगाख्यमिदंहन्तिसन्निपातंसुदुर्ज्जयम् ।
प्रमोहश्वासकासांश्चतन्द्राहिक्कागलग्रहान् ॥ २६० ॥
ऊर्द्धगश्लेष्महरणेउष्णेस्वेदादिकर्मणि ।
निरुध्योष्णेमधुत्यक्त्वाकार्य्यैषार्द्रकजे रसैः ॥ २६१ ॥

अर्थ–कायफल, पोहकरमूल, काकडाशिंगी, सोंठ, मिरच, पीपल, जवासा और हिंगुपत्री, इन सबको समानभाग लेकर चूरण बना तिसमें सहत या अदरखका रस मिलाकै चाटनेसे दुर्जयसन्निपात, मोह, श्वास, कास, तन्द्रा, हिक्का और गलग्रह नष्ट होतेहैं ॥ २५९ ॥ २६० ॥

ऊर्द्धगकफ हरनेके लिये तथा उष्ण उष्ण स्वेदादि कर्ममें मधुको त्याग अदरखके रसमें यह अष्टांगावलेहव्यवहार करना चाहिये ॥२६१॥

स्विन्नमामलकंपिष्ट्वाद्राक्षाशुंठीसमन्वितम् ।
मधुनालेहयेन्मूर्च्छाकासश्वासोपशान्तये ॥ २६२ ॥

इतिआमलक्याद्यवलेहः ।

अर्थ–सीजे हुए आमले, दाख और सोंठ इन सबको पीस सहतके साथ चाटनेसे मूर्च्छा, खासी और श्वास शान्त होताहै ॥ २६२ ॥

दशमूलीकषायस्तुपौष्करेणावचूर्णितम् ।
सन्निपातज्वरेदेयंकाशश्वासतृषान्विते ॥ २६३ ॥

अर्थ-दशमूलका क्वाथ पुष्करमूलके चूरनके साथ पनिसे खाँसी, श्वास और तृषायुक्त सन्निपातज्वर नष्ट होताहै ॥ २६३ ॥

अर्थ-चारमासे पारेको काँजीमें और चीतेके रसमें तथा त्रिफलाके काढेमें भावना देकर शोषणकरै, पश्चात् दोमासे गंधकको भाँगरेके रसमें मर्द्दन करै, इस प्रकार शुद्धकिये हुए गंधकको मिलाकर कज्जलीकरै, फिर सह्मालू, मण्डूकपर्णी, सफेदकोयल, पाढ़, भांगरा, कुकुरभाँगरा, जयन्ती, भाँग और दालचीनी, इन प्रत्येकके चार चार मासे रसमें खरलकर सरसोंकी समान गोलीबनावै। यह गोली-संग्रहणीरोगमें, आमवातमें, मन्दाग्निमें, ज्वरमें, प्लीहा और उदररोगमें, वातकफविकारोंमें और कफरोगमें देनी चाहिये।पथ्य-अम्लरस और बहुतसा तक्र जितना जी-चाहै उतनाही पीना चाहिये। यह गोली वैद्यनाथकी कही हुईहै ॥२७॥ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

जयारुबुककाकमाचीशृंगवेररसैःपृथक् ।
सप्तधामूर्च्छितःशैलेरसोभवतिनिर्मलः ॥ ३४ ॥
सूक्ष्मपत्रीकृतंताम्रंगंधचूर्णेनयोजितम् ।
पुटयित्वान्धमूषायांचूर्णंतक्रेणयोजयेत् ॥ ३५ ॥
तच्चर्णंत्रिकटूपेतंयोजयेन्मधुसर्पिषा ।
ग्रहणीक्षयरोगेषुहितःसोपद्रवेषुच ॥ ३६ ॥
अम्लपित्तेचकुष्ठेचज्वरेमेहेचकामले ॥ ३७ ॥

ग्रहण्यादौताम्रयोगः ।

अर्थ-अरणी, अंड, मकोय और अदरखके रसमें सातवार मूर्छित किया हुआ पारा, ताँबेके बारीक कियेहुए पत्र और गंधकका चूर्ण इन तीनोंको मिलाकर मूषामें धरै, फिर गजपुटमें फूँक देवै, तत्पश्चात् तिसमें सोंठ, मिरच और पीपलका चूर्ण मिलाकर छाछके साथ अथवा मधु

और घृतकेसाथ खानेसे- उपद्रवयुक्तसंग्रहणी, क्षय, अम्लपित्त, कोढ़, ज्वर, प्रमेह, और कामलारोग दूर होताहै ॥३४॥३५॥३६॥३७॥

रसगंधकयोःकर्षंप्रत्येकंशोधयेद्भिषक् ।
ततःकज्जलिकांकृत्वानैपालंताम्रपत्रकं ॥ ३८ ॥
कण्टवेध्यंविधातव्यंसर्वमेकत्रकारयेत् ।
पात्रेहिमृत्तिकोद्भुतेपरंदद्याद्रसंशुभम् ॥ ३९ ॥
पंचजम्बीरसंभूतंयथाप्लावितमेवतत् ।
आतपेस्थापयेत्पश्चाद्यावत्पंकोपमंभवेत् ॥ ४० ॥
पाणिनामर्द्दयित्वातुवटिकांकारयेत्ततः ।
विशोष्यभक्षयेद्रक्तिद्वयंतस्मान्महौषधात् ॥ ४१ ॥
दिनत्रयान्तरेणैवरक्तिरक्तिविवर्द्धयेत् ।
परिहारविधिस्तेनधान्यजीरानुपानतः ॥ ४२ ॥
प्रातरेतद्विधातव्यंहन्तिपित्ताम्लसंभवम् ।
ग्रहण्यामुद्भवंशूलमम्लपित्तञ्चदारुणम् ॥ ४३ ॥
अजीर्णरक्तपित्तंचक्षयंकुष्ठंविशेषतः ॥ ४४ ॥

इतिताम्रयोगः ।

अर्थ-पारा दोतोले, गंधक दोतोले, इन दोनोंको अलग अलग शोधै, फिर दोनोंकी कज्जली करै, तदनंतर ताँबेको कण्टकवेधी बनाकर कज्जली मिलादेवै, फिर मट्टीके बरतनमें रख पकेहुए जम्भीरी नीबुओंके रसमें भिजोवै, तत्पश्चात् जबतक गारेकीसमान न होजावै तबतक धूपमें रक्खा रहने देवै, फिर हाथसे मलकर गोली बनावै और उनगोलियोंको छायामें सुखादेवै, फिर दोरत्ती प्रमाण भक्षण करै और तीन तीन दिनके पश्चात् एक एक रत्ती बढ़ाता जाय और इसीप्रकार बहुतकालके बाद एकएकरत्ती घटाता जावै । इसका अनुपान-धनिया और जीरा है । इसको प्रातःकाल सेवन करै । यह ताम्रयोग-अम्लपित्त, संग्रहणी, शूल, अम्लपित्तोद्भवशूल, अजीर्ण, रक्तपित्त, क्षय और कुष्ठको नष्ट करै है ॥ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

लवंगातिविषामुस्तंपिप्पलीमरिचानिच ।
सैन्धवंहपुषाधान्यंकट्फलंपौष्करंतथा ॥ ४५ ॥
जातिकोषफलाजाजीसौवर्चलरसांजनम् ।
धातुमोचरसंपाठापत्रंतालीसकेशरम् ॥ ४६ ॥
चित्रकंचविडंचैवतुम्बुरुबिल्वमेवच ।
त्वगेलापिप्पलीमूलमजमोदायवानिका ॥ ४७ ॥
समंगावत्सकंविश्वंदाडिमंयावशूकजम् ।
भूनिम्बंसर्जिकाक्षारंसामुद्रंटंगणाभ्रकम् ॥ ४८ ॥
ह्रीबेरंकुटजंचैवअम्लकंकटुरोहिणी ।
एतानिसमभागानिसूक्ष्मचूर्णानिकारयेत् ॥ ४९ ॥
अनुपानंप्रदातव्यंबुद्ध्वादोषबलाबलम् ।
सर्वदोषभवंचैवग्रहणीमतिदुस्तराम् ॥ ५० ॥
वातिकंपैत्तिकंचैवश्लैष्मिकंसान्निपातिकम् ।
सर्वातिसारशमनंसर्वशूलनिषूदनम् ॥ ५१ ॥
प्लीहगुल्मोदरानाहसूतिकारोगनाशकम् ।
आमवातंतथाजीर्णसंग्रहग्रहणीगदम् ॥ ५२ ॥
लवंगादिबृहच्चेदंधन्वंतरिप्रकाशितम् ॥ ५३ ॥

बृहल्लवंगादिचूर्णम् ।

इतिग्रन्थान्तरे ।

अर्थ-लौंग, अतीस, नागरमोथा, पीपल, कालीमिरच, सैंधानोन, हाऊबेर, धनिया, कायफल, पोहकरमूल, जायफल, जीरा, कालानोन, रसौत, धायकेफूल, मोचरस, पाठ, तेजपात, तालीशपत्र, नागकेशर, चीता, वायविडंग, तुम्बुरु, बेल, दालचीनी, इलायची, पीपरामूल, अजमोद, अजवायन, लज्जावंती, कुडेकी छाल, सोंठ, अनारदाना, जवाखार, चिरायता, सज्जी, समुद्रफेन, सुहागा, मोथा, सुगंधवाला,

इन्द्रजव, अमलवैंत, और कुटकी इन सब औषधियोंको समान भाग लेकर कूट बारीकचूर्ण करले, इसपै बलाबलका विचारकर अनुपानदेवै. यह चूर्ण—सर्व दोषोंसे उत्पन्नहुई अत्यन्तदुस्तरसंग्रहणी, वातातिसार, पित्तातिसार, कफातीसार, त्रिदोषजअतिसार, सर्वप्रकारके अतिसार, सर्वप्रकारके शूल, प्लीहा गुल्म, उदररोग, आनाह, सूतिकारोग, आमवात, अजीर्ण और संग्रहणीरोगको नष्ट करताहै । यह बृहल्लवंगादिचूर्ण श्रीमान् धन्वन्तरिजीने प्रकाशित कियाहै ॥ ४५ ॥ ४६ ॥ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

अथरसरत्नाकरे।

टंकणक्षारगन्धाश्मरसंजातीफलानिच ।
बिल्वंखादिरसारंचजीरकंश्वेतधूनकम् ॥ ५४ ॥
कपिहस्तकबीजंचतथैवावाकपुष्पिका ।
एषांशाणंसमादायश्लक्ष्णचूर्णञ्चकारयेत् ॥ ५५ ॥
बिल्वपत्रककार्पासफलंशालिंचदुग्धिका ।
शालिञ्चमूलंकुटजत्वचंकंचकपत्रकम् ॥ ५६ ॥
सर्वेषांस्वरसेनैववटिकांकारयेद्भिषक् ।
रक्तिकैकप्रमाणेनखादयेद्दिवसत्रयम् ॥ ५७ ॥
दधिमण्डस्ततःपेयःपलमात्रप्रमाणतः ।
अपियोगशताक्रान्तांग्रहणीमुद्धतांत्यजेत् ॥ ५७ ॥
आमशूलंज्वरंकासंश्वासंशोथंप्रवाहिकाम् ।
रक्तस्रावकरंद्रव्यंकार्यंनैवात्रयुक्तितः ॥ ५८ ॥
कृष्णावार्त्ताकुमत्स्यञ्चदधितैलंचशस्यते ।
ज्ञात्वावायोर्गतिस्तत्रजलंतैलंप्रदापयेत् ॥ ६० ॥
ग्रहणीकपाटनामाऽयंकवाटघटनादिव ॥ ६१ ॥

इतिग्रहणीकपाटः ।

अर्थ—सुहागा, गन्धक, शिलारस, जायफल, बेल, खैरसार, जीरा,

सफेदराल, कौंछकेबीज, और सोंफ, इनसब औषधियोंको चारचारमासे लेकर बारीक चूर्ण करले, पीछै उस चूर्णको बेलपत्र, कपासकेफल शालिच, दुद्धी, शालिचमूल, कुडेकी छाल और कंचकशाकके पत्तोंके रसमें भावना देकर एक रत्तीभरकी गोली बनावै, प्रतिदिन एक गोली खाय इसप्रकार तीनदिन पर्यन्त खावै और ऊपरसे चारतोले दहीका पानी पी लेवै । यह ग्रहणीकपाटरस–जिस संग्रहणीको सैंकड़ों योगोंसे आराम न हुआ होय उसको, आमशूल, ज्वर, खाँसी, श्वास, सूजन और प्रवाहिकारोगको दूरकरै । इसके ऊपर रक्तस्राव (रुधिरको गिरानेवाली) औषधी नहीं खानी चाहिये । कालिवैगुन, मछली, दही और तेल इसपै पथ्यहै, किंतु वैद्यको चाहियेकि वायुकी गतिको जानकर तेल देवै । जिसप्रकार मनुष्योंको किवाडै रोक देतीहै, उसीप्रकार यह ग्रहणीकपाटरस संग्रहणीरोगको रोक देताहै ॥ ५४ ॥ ५५ ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

लवंगातिविषामुस्तंबिल्वंपाठाथशाल्मली ।
जीरकंधातकीपुष्पंलोध्रेन्द्रयववालकम् ॥ ६२ ॥
धान्यकंसर्जकंशृंगीपिप्पलीविश्वभेषजम् ।
समंगायावशूकंचसैन्धवंसरसांजनम् ॥ ६३ ॥
समभागानिचैतानिभक्षयेत्प्रातरुत्थितः ।
शमयेदग्निमान्द्यञ्चसंग्रहग्रहणीगदम् ॥ ६४ ॥
नानावर्णमतीसारंसशोथंपाण्डुकामलम् ।
इदमष्ठीलिकांहन्तिकुष्ठंकोष्ठगतंज्वरम् ॥ ६५ ॥

इतिलवंगादिचूर्णम् ।

अर्थ–लौंग, अतीस, नागरमोथा, बेल, पाढ़, सेमल, जीरा, धायकेफूल, लोध, इन्द्रयव, सुगंधवाला, धनिया, राल, काकड़ाशिंगी, पीपल, सोंठ, लज्जावंती, जवाखार, सैंधानोन और रसौत समानभाग लेकर पीस चूर्ण करले, इसचूर्णको प्रातःकाल उठकर खावै । यह चूर्ण–मंदाग्नि, संग्रहणी, नानावर्णका अतिसार शोथातीसार, पाण्डुरोग, कामला, अष्ठीलिकावात, कुष्ठ और कोष्ठगत ज्वरको नष्ट करै ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥

रसगंधकयोश्चैवजातीफलविडंगकम् ।
प्रत्येकंशाणमात्रन्तुश्लक्ष्णचूर्णानिकारयेत् ॥ ६६ ॥
सूर्यावर्त्तरसैश्चैवबिल्वपत्ररसैस्तथा ।
शृंगाटकस्यपत्राणां रसैःप्रत्येककंपलैः ॥ ६७ ॥
चण्डातपेनसंशोध्यवटिकांकारयेद्भिषक् ।
बिल्वपत्ररसेनैवभक्षयेद्रक्तिकाद्वयम् ॥ ६८ ॥
दध्नापिभोजनीयञ्चग्रहणीरोगनाशनम् ।
पाण्डुरोगमतीसारंशोथदुर्नामनाशनम् ॥ ६९ ॥
ग्रहणीकपाटनामाऽयंकपाटघटनादिव ॥ ७० ॥

इतिग्रहणीकपाटरसः ।

अर्थ-पारा, गंधक, जायफल और वायविडंग, इन प्रत्येकको चार चारमासे लेवै, फिर सबको एकत्रकर बारीक चूर्ण करले, पीछे हुल-हुल, बेलपत्र और सिंघाड़ेके पत्ते, इन प्रत्येकके चार चार तोले रसमें भिजोवै, पश्चात् दोदो रत्तीकी गोली बनाकर तीक्ष्णधूपमें धरदे; एक गोली बेलपत्रके रसकेसाथ भक्षण करै, और दहीभातका भोजन करै तौ-संग्रहणीरोग, पाण्डुरोग, अतीसार, सूजन, और बवासीर दूर होजावै ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

विशुद्धसूतस्यचगंधकस्यप्रत्येकशोमासचतुष्टयंच ।
विधायशुद्धोपलपात्रमध्येसुकज्जलींवैद्यवरःप्रयत्नात् ७१
जातीफलंशाल्मलिवेष्टमुस्तंसटंगणंसातिविषंसजीरम् ।
प्रत्येकमेतन्मरिचस्यशाणप्रमाणमेकंविषमासकञ्च ७२
विचूर्ण्यसर्वैंरवमर्द्यपश्चाद्विभावयेत्पत्ररसैरमीषाम् ।
वंशाम्रभद्रोत्काटानामिन्द्रानिकेन्द्राशकसजम्बु ॥ ७३॥
जयन्तिकांदाडिमकेशराजंसावित्रकर्णोपिचभृंगराजः ।
विभाव्यसम्यग्वटिकाविधेया
कोलास्थिमानाथयथानुपानम् ॥ ७४ ॥

सोमंनिहंत्यत्रबहुप्रकारंसूतीविकारंश्वयथुंसमग्रम् ।
कासंचपंचात्मकमम्लपित्तमियंनिहन्याद्ग्रहणींप्रवृद्धाम् ॥
अभ्यस्यजीयाद्बुदजानसाध्यानामानुबंधंह्यतिसारमुग्रम् ।
श्वासंतथापाण्डुगदंनिहान्ति चिरोद्भवांचग्रहणींप्रदुष्टाम् ॥
जयेद्भृशंयोगशतैरसाध्यांविवर्जनीयाइहदुष्टमत्स्याः ।
मत्स्यास्तथापाण्डववर्णकाश्चरम्भाफलंमूलमथोदलंच ॥
बुधैर्विधेयंनकदाचिदत्रजातीफलाद्यावटिकाचहृद्या ।
यशोर्थिनोवैद्यवरस्यविद्याह्यनेकसंभावितमर्त्यलोके ७८
नानाविधव्याधिपयोधिनौका ।
जातीफलाद्यावटिकाप्रसिद्धा ॥ ७९ ॥

इतिजातीफलाद्यावटिका ।

अर्थ-पारा चारमासे, गंधक चारमासे, इन दोनोंकी उत्तम खरलमें कज्जली करै, पश्चात् जायफल, मोचरस, नागरमोथा, सुहागा, अतीस, जीरा और कालीमिरच यह सब चार चारमासे लेवै, विष एकमासा लेवै फिर इन सबका चूर्णकर कज्जलीमें मिला, बाँसके पत्ते, आमकेपत्ते, नीमके पत्ते, जलपीपलके पत्ते, इन्द्रायन,भाँग, जामन, अरणी, अनार, कुकुरभाँघरा, पाढ़ और भाँगरा, इन सबके रसमें भावना देकर बेरकी गुठलीकी बरावर गोली बनावै, यह गोली अनुपानके साथ खानेसे-बहुतप्रकारके सोमरोग, सूतिकारोग, सर्वप्रकारकी सूजन, पांच प्रकारकी खाँसी, अम्लपित्त, उग्रसंग्रहणी, उग्र अतीसार, श्वाँस, पाण्डुरोग, प्राचीन संग्रहणी और असाध्यसंग्रहणीरोग दूर होते हैं । इसपै पाण्डुवर्णकी मछली, केलेकीफली, केलेकी जड और पत्र, शाक भक्षणकरना निषेधहै । यह जातीफलादिवटिका वैद्योंको यशदेनेवाली है, और यह नानाप्रकारके रोगरूपसमुद्रमें नौकारूप होकर रोगीको पार कर देतीहै ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥

शुद्धसूतंसमंगंधंसूतपादंविषंक्षिपेत् ।
सर्वतुल्यंमृतश्चाभ्रंमर्द्यंधुस्तूरजैर्द्रवैः ॥ ८० ॥

सर्पाक्ष्याश्चद्रवैर्यामंकषायेणाथभावयेत्।
धातक्यतिविषामुस्ताशुण्ठीजीरकवालकम्॥ ८१॥
यवानीधनिकाबिल्वंपाठापथ्याकणान्विता।
कुटजस्यत्वचंबीजंकपित्थंदाडिमंवचा॥ ८२॥
प्रत्येकंकर्षमात्रंस्यात्कल्कितंक्काथयेज्जलैः।
कल्कंचतुर्गुणंग्राह्यंकषायंपादमात्रकम्॥ ८३॥
अनेनात्रिदिनंभाव्यंपूर्वोक्तादिकृतंरसम्।
रुद्धातंवालुकायंत्रेक्षणंमृद्वग्निनापचेत्॥ ८४॥
मृतसंजीवनोनामरसोगुंजाचतुष्टयम्।
दातव्योह्यनुपानेनअसाध्यंसाधयेद्ध्रुवम्॥ ८५॥

इतिमृतसंजीवनोरसः।

अर्थ-शुद्धपारा, गंधक, यह दोनो समानभाग लेवै, विष पारेसे चौथाभाग लेवै और सबकी समान अभ्रककी भस्मलेवै, फिर इन सबको मिलाकर धतूरेके रसमें और सर्पाक्षीके रसमें एकप्रहर खरल करै, फिर धायके फूल, अतीस, नागरमोथा, सोंठ, जीरा, सुगंधवाला, अजवायन, धनिया, वेलगिरी, पाढ, हरड, पीपल, कुडेकी छाल, इन्द्रयव, कैथ, अनार और वच प्रत्येक दोदो तोले लेकर कल्क अथवा क्वाथ बनावै, कल्कमें तौ पानी चारगुणा ग्रहण करै और क्वाथमें एकगुणा ग्रहण करै, पीछै इसमें पूर्वोक्तचूर्णको तीन दिन भावना देकर वालुकायंत्रमें रख मुख बन्द करै, क्षणभर मृदुअग्निसे पचावै। इस मृतसंजीविनीरसको चार रत्तीभर अनुपानकेसाथ देनेसे असाध्यसंग्रहणीआदि रोगोंको दूर करैहै॥ ८०॥ ८१॥ ८२॥ ॥ ८३॥ ८४॥ ८५॥

नागरातिविषामुस्तदेवदारुकणावचा।
यवानीवालकोधान्यंकुटजस्यत्वचाभया॥ ८६॥
धातकीन्द्रयवंबिल्वंपाठामोचरसंसमम्।

चूर्णैःसमधुनालेह्यमनुपानंसुखावहम् ॥ ८७ ॥

इतिमृतसंजीवनीरसः ।

अर्थ–सोंठ, अतीस, नागरमोथा, देवदारु, पीपल, वच, अजवायन, सुगंधवाला, धनिया, कुडेकिछाल, धायकेफूल, इन्द्रयव, बेलगिरी, पाढ़ और मोचरस, इन सबको समानभाग लेकर चूर्णकरै, इस चूर्णको सहतकेसाथ खानेसे संग्रहणीरोग दूर होताहै ॥ ८६ ॥ ८७ ॥

अष्टौगंधकतोलकान्रसपलंलोहंतदर्द्धंशुभं
लोहार्द्धंबकुलाभ्रकंसुविमलंशुल्वस्यमासद्वयम् ।
पात्रेलोहमयेचमर्दनविधौचूर्णीकृतंचैकतो-
दार्व्याबादरवह्निनाचमृदुनापक्वंविदित्वादले ॥ ८८ ॥
रंभायालघुचालयेत्पुटैरियंपंचामृतपर्पटी
ख्याताक्षौद्रघृतान्विताप्रतिदिनंगुंजात्रयंवृद्धितः ।
लोहेमर्दनयोगतःसुविमलंभक्ष्यांक्रियालोहवद्
गुंजाष्टाविहनाधिकंत्रिकचतुःसप्तद्वयंयुग्मतः ॥ ८९ ॥
नानावर्णातिसारग्रहणीपरिगदेदुर्निवारेऽग्निमान्द्ये
छर्द्यांचैवाम्लपित्तेप्रबलगुदगदेरक्तपित्तेक्षयेच ।
श्रेष्ठापुष्टिप्रदायावलिपलितहरानेत्ररोगैकहन्त्री
तीक्ष्णंदीप्तिंस्थिराग्निंपुनरपिचनरंदिव्यदेहंकरोति ॥ ९० ॥

इतिपंचामृतपर्पटी ।

अर्थ–गंधक आठ तोले, पारा चार तोले, लोहा दो तोले, अभ्रक एक तोला और ताँबा दो मासे, इन सबको लोहेके पात्रमें एकत्रमर्दन करै, पश्चात् इसको लोहेके बरतनमें रख चुलेपै चढा बेरीकी लकडियों-से मंदमन्द पकावै, और लोहेकी करछीसे चलावै,पकजानेपर बरतनमें-से लौटकरके केलेकेपत्तेपर ढाललेवै, इस प्रकार पंचामृतपर्पटी बनतीहै। मात्रा तीन रत्तीकीहै, इसको लोहेके बरतनमें पीस सहत और घृतके साथ सेवनकरै, तीन रत्तीसे आठ रत्तीतक बढावै, आठ रत्तीसे अधिक एकदिनमें नहीं खाय; इसप्रकार इस पंचामृतपर्पटीको सेवनकरनेसे

अनेकरंगका अतीसार, नानाप्रकारकी संग्रहणी, असाध्यमंदाग्नि वमन, अम्लपित्त, प्रबल गुदरोग, रक्तपित्त और क्षयरोगका नाश होताहै । यह पंचामृतपर्पटी–पुष्टिकारक, वलि (शरीरमें वल पड़ने) पलित (विनाही अवस्थावालोंका धवल होजाना) नाशक, नेत्ररोगोंको दूर करनेवाली, तीक्ष्णता, दीप्ति, जठराग्निको स्थिर और देहको दिव्यस्वरूप करतीहै ॥ ८८ ॥ ८९ ॥ ९० ॥

कृष्णाभ्रलोहमलशुद्धविडंगसारं
प्रत्येकमेकपलिकंविधिवद्विधाय ।
चव्यंकटुत्रयफलत्रयकेशराज-
दन्तीपयोदचपलानलघण्टकर्णाः ॥ ९१ ॥
मानोरुबूकबृहतीत्रिवृताथसूर्या-
वर्त्तपुनर्नविकयासहितस्त्वमीषाम् ।
चूर्णप्रतिप्रतिसुशोधितमक्षमेकं
चूर्णात्तदर्द्धरसगंधकमेकसंस्थम् ॥ ९२ ॥
संपिष्यतस्यगुडिकाविधिवत्कृतासा
हन्त्यम्लपित्तमरुचिंग्रहणीमसाध्याम् ।
दुर्नामकामलभगन्दरशोथगुल्मान्
शूलञ्चपाकजनितंसततान्निमान्द्यम् ॥ ९३ ॥
सद्यःकरोत्युपचितंचिरमन्दमग्निं
कुष्ठंनिहन्तिपलितञ्चवलींप्रवृद्धाम् ।
श्वासंचकासमपिपाण्डुगदंनिहन्ति
वार्यन्नमांसदधिकांजिकमत्स्यमांसम् ॥ ९४ ॥
वृक्षाम्लतैलपरिपक्वभुजोयथेष्टं
शृंगाटबिल्वगुडकंचटनारिकेलम् ।
दुग्धादिसर्वविदलानिविवर्जयेच्च ।

मुद्गमकुष्टचनककलायाढ्कीभिराख्यातः।
वैदलइतिवर्गोयंविष्टम्भीपवनशूलकरः॥ ९५ ॥

इति ग्रन्थान्तरस्य ।

अर्थ-कृष्णाभ्रक, लोहमल और विडंगसार, यह प्रत्येक चार चार तोले लेवै, चव्य, त्रिकुटा, त्रिफला, कुकुरभाँगरा, दन्ती, नागरमोथा, पीपल, चीता, घंटकर्ण, मानकन्द, अंड, कटाई, निसोत, हुलहुल और पुनर्नवा, इन प्रत्येकका चूर्ण दो दो तोले लेवै, और शुद्धपारा, शुद्धगन्धकचूर्णसे आधाभाग लेवै, इनसबको मिला बारीक पीसकर विधिपूर्वक गोली बनावै, इनगोलियोंको सेवनकरनेसे-अम्लपित्त, अरुचि, असाध्यसंग्रहणी, बवासीर, कामला, भगन्दर, सूजन, गुल्म, पाकजनितशूल, मन्दाग्नि, कोढ़, वलिपलित, श्वाँस, खाँसी और पांडुरोग, नष्ट होताहै। जल, अन्न, माँस, दही, कांजी, मछलीका मांस, विषांविल नींबू और तैलसे बना हुआ भोजन यह सब इसपै पथ्य हैं। सिंघाडे, बेल, गुड़, कंचटशाक, नारियल, दूध और वैदलअन्नादि अपथ्य हैं। मूंग, सोंठ, चने, मटर, अरहर, इन सबको वैदल अन्न कहतेहैं, यह वैदल अन्न-विष्टम्भकारक, वात और शूलको उत्पन्न करैहै ॥ ९१ ॥ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥

रसगंधकयोःकृत्वाकज्जलंसमभागयोः।
लौहचूर्णंरससमंदत्त्वासंश्लिष्यपर्पटी ॥ ९६ ॥
कार्यासाविधिनासेव्यारोगिभिःपथ्यभोजिभिः।
अनुपानंशृतंक्वाथ्यंधान्यजीरकनागरम् ॥ ९७ ॥
लौहेनपर्पटीचैवसिद्धालोकस्यसिद्धिदा।
रक्तिकैकंसमारभ्यवर्द्धयेद्रक्तिकाक्रमात् ॥ ९८ ॥
सप्ताहैकंद्वयंवापियावदारोग्यदर्शनात्।
ग्रहणींदुस्तरांहन्तिशूलातीसारसूतिकाम् ॥ ९९ ॥
अंगमर्दोज्वरःकम्पःपिपासागुरुगात्रता।
शोथःशूलातिसारौचसूतिकारोगलक्षणम् ॥ १०० ॥

प्लीहाग्निमान्द्यशोथार्शःपाण्डुदावर्त्तकामलाः ।
तथामवातकुष्ठानिरोगाण्येवंविधानिच ॥ १०१ ॥
भवेच्चायसवपुर्निर्वलीपलितोऽनया ।
पथ्यापथ्यविधिश्चात्रसर्वलौहविधानवत् ॥ १०२ ॥
गणाध्यायोक्तचरकोक्तवर्चःसंग्रहगणेन ।
तथालोहोक्तसंग्रहग्रहणीहरः ।
जम्बादिविशेषभेषजैःपुटितंलोहंग्राह्यमेवं ।
ग्रहाणांसर्वंतस्मादिदमपिपुटनियम् ।

इतिलौहपर्पटी ।

अर्थ–पारा और गन्धकको समानभाग लेकर कज्जली करै, पश्चात् पारेकी समान उस कज्जलीमें लोहेका चूर्ण मिलाकर पूर्ववत् पर्पटी बनाले । यह लोहपर्पटी–पथ्यसेवनकरनेवाले मनुष्यको सेवन करनी चाहिये, इस पर्पटीको धनिया, जीरा और सोंठके क्वाथके साथ सेवनकरना उचित है । इसको एक एक रत्तीसे बढ़ावै सात वा चौदह अथवा जबतक आरोग्य नहो तबतक सेवन करै । यह पर्पटी–घोरसंग्रहणी, शूल,अतीसार, सूतिकारोग, अंगमर्द्द, ज्वर, पियास, शरीरकी गुरुता, प्लीहा, मन्दाग्नि, सूजनयुक्तबवासीर, पाण्डुरोग, उदावर्त्त कामला, आमवात, और कुष्ठरोगको नष्ट करैहै, तथा नानाप्रकारके रोगोंको हरैहै, शरीरको लोहेके समान दृढकरनेवाली; वलिपलितनाशक है । इसपै लोहेकी समान पथ्यापथ्य सेवन करै, और इस लोहपर्पटीमें पुटपाकसे पकाया हुआ लोहा मिलाना चाहिये ॥९६ ॥ ९७ ॥ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥

क्वाथेपचेत्कंचटतालमूल्योः सितार्द्धप्रस्थःशृतपादशेषे ।
ततोऽक्षमानेनसमंप्रदद्याच्चूर्णानिधीरोविधिवत्तथैषाम् १०३
समंगाधातकीपाठाबिल्वंमुस्ताथपिप्पली ।
शक्रकातिविषाक्षारसौवर्चलरसांजनम् ॥ १०४ ॥

शाल्मलीवेष्टकंचैवसर्वंसिद्धेनिधापयेत् ।
शीतेचमधुनश्चात्रकुडवार्द्धंक्षिपेत्ततः ॥ १०५ ॥
अस्यमात्रांप्रयुञ्जीतयथाकालप्रमाणवित् ।
अम्लपित्तकृतंदोषमौदरंसर्वरूपिणम् ॥ १०६ ॥
सर्वातीसारशमनंसंग्रहग्रहणींजयेत् ।
एकजंद्वन्द्वजंचैवदोषत्रयकृतंचयत् ॥ १०७ ॥
विकारंकोष्ठजंचैवहन्याच्छूलमरोचकम् ।
एषकंचटकोलेहोविधेयोगुडपाकवत् ॥ १०८ ॥

कञ्चटावलेहः ।

अर्थ-कंचट (जलचौलाई) बत्तीस तोले, मुसली बत्तीस तोले, इन दोनोंको १६ सेरजलमें पकावै, जब जल जलकर चारसेर बाकी रहै तब उतारले, पश्चात् इस क्वाथमें बत्तीसतोले मिश्री मिलावै, फिर मजीठ, धायके फूल, पाढ़, बेलगिरी, नागरमोथा, पीपल, इन्द्रयव, अतीस, जवाखार, कालानोन, रसोत और मोचरस, इन प्रत्येकका दोदो तोले चूर्ण मिलावै, शीतलहोनेपर आधशेर सहत मिलावै, इस अवलेहको समय विचारकर खावैतौ-अम्लपित्तविकार, सर्वप्रकारके उदररोग, सर्व प्रकारके अतीसार, संग्रहणी, एकदोषसे उत्पन्नहुआ विकार, दो दोषोंका विकार, तीन दोषोंसे उत्पन्नहुआ विकार, कोष्ठगत विकार, शूल और अरुचि दूरहोवै । यह कंचटावलेह गुड़पाककी तरह बनाना चाहिये ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८

धान्यकंधातकीलोध्रसमंगातिविषाशिवा ।
उशीरंमुस्तकंचैवजलमोचरसांजनम् १०९ ॥
बिल्वंनीलोत्पलंपत्रंकेशरंपद्मकेशरम् ।
गुडूचीन्द्रयवश्यामापद्मकंकटुरोहिणी ॥ ११० ॥
तगरंजटिलाभृंगकेशराजंपुनर्नवा ।
आम्रजम्बूकदम्बानांत्वचंकुटजवल्कलम् ॥ १११ ॥

यवानीजीरकंचैवकार्षिकाणिप्रकल्पयेत् ।
तैलप्रस्थंपचेत्तेनतक्रेणान्यतमेनवा ॥ ११२ ॥
कुटजत्वक्कषायेणधन्याकंक्काथितंनवा ।
बुद्ध्वादोषगतिंवैद्योयथास्वौषधवारिणा ॥ ११३ ॥
एतद्रसायनंतैलंवलीपलितनाशनम् ।
हन्तिसर्वानतीसारान्ग्रहणींसर्वजामपि ॥ ११४ ॥
ज्वरंतृष्णांतथाश्वासंतथाहिक्कांवमिंभ्रमिम् ।
सोपद्रवांकोष्ठरुजंनाशयेत्सद्यएवाहि ॥ ११५ ॥
ग्रहणीमिहिरंनामतैलंभुवनदुर्लभम् ॥ ११६ ॥

इतिग्रहणीमिहिरतैलम् ।

इतिग्रंथान्तरस्य ।

अर्थ–धनिया, धायकेफूल, लोध, मजीठ, अतीस, हरड, खस, नागरमोथा, सुगंधवाला, मोचरस, रसौत, बेल, नीले कमलके पत्ते, नागकेशर, कमलकेशर, गिलोय, इन्द्रजो, अनन्तमूल, पद्माख, कुटकी, तगर, जटामांसी, भाँगरा, कुकुरभाँगरा, पुनर्नवा, आमकी छाल, जामनकीछाल, कदम्बकी छाल, कुडेकीछाल, अजवायन, और जीरा, ये प्रत्येक दो दो तोले लेवै, पीछै इन सबका कल्क करै, इस कल्कको और चोसठतोले तेलको तक्रमें अथवा काँजीमें वा कुडेकी छालके क्काथमें अथवा धनियेके क्काथमें मिलाके दोषोंका बलाबल विचार तेलको सिद्ध करै। यह ग्रहणीमिहिरतेल रसायन, बलिपलितनाशक, तथा सर्वप्रकारके अतीसार, सर्व प्रकारकी संग्रहणी, ज्वर, तृषा, श्वाँस, हिचकी, वमन, भ्रम और उपद्रवयुक्त-कोष्ठरोगको दूर करै है। यह ग्रहणीमिहिरतेल त्रैलोक्यदुर्लभ है। ॥ १०९ ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥

प्रस्थत्रयेणामलकीरसस्यशुद्धस्यदत्त्वार्द्धतुलांगुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्यव्योषेभकृष्णाहपुषाजमोदैः ११७
विडंगासिन्धुत्रिफलायवानीपाठाग्निधान्यैश्चपलप्रमाणैः ।

दत्त्वात्रिवृच्चूर्णपलानिचाष्टावष्टौचतैलस्यपचेद्यथावत् ११८
तंभक्षयेदक्षफलप्रमाणंयथेष्टचेष्टंत्रिसुगन्धियुक्तम्।
अनेनसर्वेग्रहणीविकाराःसश्वासकासस्वरभेदशोथाः ॥ ११९॥
शाम्यन्तिचायंचिरमन्दवह्नेर्हतस्यपुंस्त्वस्यचवृद्धिहेतुः।
स्त्रीणांचवन्ध्यामयमाहहन्यात्कल्याणकोनामगुडःप्रदिष्टः१२०
त्रिवृतांभर्ज्जयन्त्यत्रमनाक्केचिच्चिकित्सकाः।
अत्रोक्तमानसाधर्म्यात्त्रिसुगंधिपलंपृथक् ॥ १२१ ॥

इतिकल्याणगुडः।

अर्थ-अडतालीसपल आमलेके रसमें पचास पल शुद्धगुड़ मिलावै, पीच्छै पीपरामूल, जीरा, चव्य, त्रिकुटा, गजपीपल, हाऊवेर, अजमोद, वायविडंग, सैंधानोन, त्रिफला, अजवायन, पाढ़, और धनिया, इन प्रत्येकका चूर्ण चार चार तोले मिलावै, तदनंतर निसोतका चूर्ण बत्तीस तोले और तिलका तेल बत्तीस तोले लेकर सबको मिला गुड़ सिद्ध करै, सिद्ध होजानेके पश्चात् त्रिसुगधका चूर्ण मिलाकर बहेड़ेके फलकी समान भक्षण करे तौ-सर्वप्रकारके संग्रहणीरोग, श्वाँस, खांसी स्वरभेद और सूजन दूर होय।तथा बहुतदिनोंकी मन्दाग्नि दीपन होतीहै,पुंस्त्वता बढतीहै और स्त्रियोंका वन्ध्यापन नष्ट होताहै।इस कल्याणगुडमें कितनेक भिषक् निसोतको भूनकर डालतेहैं, और यहाँ त्रिसुगंधि अर्थात् इलायची, दालचीनी और तेजपात, इनप्रत्येकका चार चार तोले अलग अलग चूर्ण मिलाना चाहिये ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥ १२१ ॥

नागरंपिप्पलीमूलंचित्रकोहस्तिपिप्पली।
श्वदंष्ट्रापिप्पलीधान्यंबिल्वंपाठायवानिका ॥ १२२ ॥
चांगेरीस्वरसेसर्पिःकल्कैरेतैर्विपाचितम्।
चतुर्गुणेनदध्नाचतद्घृतंकफवातनुत् ॥ १२३ ॥
अर्शांसिग्रहणीदोषंमूत्रकृच्छ्रंप्रवाहिकाम्।
गुदभ्रंशार्तिमानाहंघृतमेतद्व्यपोहति ॥ १२४ ॥

हन्तिपिप्पलीचविकातन्त्रान्तरात् ।
दधिसाहचर्याच्चांगेरीस्वरसोपिचतुर्गुणः १२५ ॥

इतिचांगेरीघृतम् ।

अर्थ-सोंठ, पीपरामूल, चीता, गजपीपल, गोखरू, पीपल, धनिया, बेल, पाढ़, और अजवायन, इन सबका चूर्ण चार चार तोले लेवै, और घृत चौसठपल और चांगेरी (नोनिया) का रस दोसौ छप्पनपल लेवै और दोसौछप्पन पल दही लेवै, फिर सबको यथाविधिसे मिलाकर घृत सिद्ध करै । यह घृत-वात, कफ, सर्वप्रकारका अर्श (बवासीर) रोग, संग्रहणी, मूत्रकृच्छ्र, प्रवाहिका, गुदभ्रंश और आनाहरोगको दूर करै है ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥

रसगंधकलोहानिशंखटंकणरामठाः
शठीतालीशमुस्तानिधान्यजीरकसैन्धवाः ॥ १२६ ॥
धातक्यातिविषाशुण्ठीगृहधूमंहरीतकीम् ।
भल्लातंतेजपत्रञ्चजातीफललवंगके ॥ १२७ ॥
त्वगेलावालुकंबिल्वंमेथीशक्राशनंसमम् ।
छागीदुग्धेनवटिकारसवैद्येनकारिता ॥ १२८ ॥
गहनानन्दनाथेनभाषितेऽयंरसायने ।
ग्रहणीगजेन्द्रसंज्ञोऽयंश्रीमतालोकरक्षणे ॥ १२९ ॥
ग्रहणींविविधांहन्तिज्वरातिसारनाशिनी ।
शूलगुल्माम्लपित्तानिकामलांचहलीमकम् ॥ १३० ॥
बलवर्णाग्निजननीसेविताचचिरायुषी ।
कुष्ठंकण्डूंविसर्पञ्चगुदभ्रंशंक्रामिंजयेत् ॥ १३१ ॥
मासद्वयंवटीभक्ष्याछागीदुग्धानुपानतः ।
बलाऽग्निबलमावेक्ष्ययुक्त्यावात्रुटिवर्द्धनम् ॥ १३२ ॥

इति ग्रहणीगजेन्द्रवटिका ।

अर्थ-पारा, गंधक, लोहा, शंखचूरा, सुहागा हींग, कचूर, तालीसपत्र,

नागरमोथा, धनिया, जीरा, सैंधानोन, धायकेफूल, अतीस, सोंठ, गृहधूम, हरड़, भिलावा, तेजपात, जायफल, लोंग, दालचीनी, इलायची, सुगंधवाला, बेल और भाँग, इन सबको समानभाग लेकर बकरीके दूधमें पीसकर गोली बना लेवै । यहगोली गहनानन्दनाथने रसायनप्रकरणमें कही हैं । इसको ग्रहणिगजेंद्रवटिका कहते हैं । यहगोली—अनेकप्रकारकी संग्रहणी, ज्वरातीसार, शूल, गुल्म, अम्लपित्त, कामला और हलीमकरोगको नष्ट करैहै । बल-वर्ण-और अग्निजनक है, तथा कोढ़, कण्डू, विसर्प, गुदभ्रंश और कृमिरोगको दूर करैहै । इसको सेवनकरनेसे मनुष्य दीर्घायु होतेहैं । यह दो दो मासेकी गोली बनाकर बकरीके दूधके साथ सेवनकरनी चाहिये, और अग्नि तथा बलको विचारकर मात्राको घटानी बढ़ानीभी चाहिये॥ १२६॥ १२७॥ १२८॥ १२९॥ १३०॥ १३१॥ १३२

इति ग्रहणीरोगचिकित्सा समाप्ता ।

अथार्शश्चिकित्सामाह ।

दुर्नाम्नांसाधनोपायश्चतुर्धापरिकीर्तितः ।
भेषजक्षारशस्त्राग्निसाध्यत्वादाद्यउच्यते ॥ १ ॥
यद्वायोरनुलोम्याययदग्निबलवृद्धये ।
अनुपानौषधंद्रव्यंतत्सेव्यंनित्यमर्शसैः ॥ २ ॥
शालिषष्टिकगोधूमयवान्नसंस्कृतैर्घृतैः ।
दद्यात्क्षीरेणवानित्यंपटोलानांरसेनवा ॥ ३ ॥
मांसैर्मांसरसैर्वापिकन्दवार्ताकुमूलकैः ।
जीवन्त्यपोदिकाशाकैस्तण्डुलीयकवास्तुकैः ॥ ४ ॥
क्षारचित्रकबिल्वानांतैलेनाभ्यज्यबुद्धिमान् ।
यवकोलकुलत्थानांतक्राम्लनवनीतयोः ॥ ५ ॥
शस्त्रैर्वाथजलौकाभिस्तेषांरक्तंचनिर्हरेत् ।
शुष्कार्शसांप्रलेपादिक्रियातीक्ष्णाविधीयते ॥ ६ ॥
स्राविणांरक्तमालोक्यक्रियाकार्यास्रपैत्तिकी ।

स्नुक्क्षीररजनीयुक्तंलेपाद्दुर्नामनाशनम् ॥ ७ ॥
अर्कक्षीरंस्नुहीक्षीरंतिक्ततुम्ब्याश्चपल्लवाः ।
करंजोबस्तमूत्रेणलेपनंश्रेष्ठमर्शसाम् ॥ ८ ॥

करंजस्यत्वक् ।

ज्योत्स्निकामूलकल्केनलेपोवाताऽर्शसांहितः ।
जम्बीरजमौद्भिदंतुकांजिकपिष्टंगुडीत्रयम् ॥ ९ ॥
अर्शोहरंगुदस्थंस्याद्दधिमाहिषमश्नतः ।
शिरीषस्यतुमूलानिलांगलक्यास्तथैवच ॥ १० ॥
एतेननाभिलेपेनसर्वतश्चतुरंगुलात् ।
पतन्त्यर्शांसिसर्वाणिसप्तरात्रान्नसंशयः ॥ ११ ॥
नृकेशाःसर्पनिर्मोकावृषदंशस्यचर्मच ।
अर्कमूलंशमीपत्रंधूपोऽर्शःशूलशान्तये ॥ १२ ॥
विड्बिन्धेर्हिंगुतक्रंयवानीविडसंयुतम् ।
वातश्लेष्मार्शसांतक्रात्परंनास्तीहभेषजम् ॥ १३ ॥
पित्तश्लेष्मप्रशमनीकण्डूकच्छूरुजापहा ।
गुदजान्नाशयत्याशुयोजितासगुडाभया ॥ १४ ॥
तिलभल्लातकंपथ्यागुडश्चेतिसमांशिकम् ।
दुर्नामश्वासकासघ्नंप्लीहपाण्डुरुजापहम् ॥ १५ ॥

अर्थ-औषध, क्षार, शस्त्र और अग्नि, इन चार प्रकारसे अर्शरोगकी चिकित्सा करनी कहीहै, तहाँ साध्य और सरलहोनेसे औषधका उपाय कहतेहैं । जो औषध वायुको अनुलोमनकरनेवाली, तथा अग्निके बलको बढ़ानेवालीहै, वह अर्शरोगीको सेवनकरनी चाहिये । शालिधान्य, साठीधान्य, गेहूँ, और जौ, इनका भोजन घीके साथ, दूध, पटोलरस, मांस, मांसरस, जिमींकन्द, वैंगुन, मुली, जीवंति-

१ ज्योत्स्निका घोषकः । २ औद्भिदं साम्बरिलवणम् । ३ वृषदंशो बिडालः ।

का शाक, पोईका शाक, चोलाईका शाक, वथुएका शाक, जवाखार, चीता, बेल, तेलसे पकायेहुए द्रव्य, जौ, बेर, कुलथी, तक्र और माखन, यह सब अर्शरोगीके लिये हितकारक जानने। अर्शांकुर होनेपर शस्त्र अथवा जोंकके द्वारा रुधिर निकलवाना चाहिये। शुष्क अर्शरोगमें प्रलेपादि तीक्ष्णक्रिया प्रयोगकरनी योग्यहै। रक्त-वहनेवाले अर्शरोगमें रुधिरका विचारकर रक्तपित्तनाशक क्रिया करनी चाहिये। थूहरके दूधमें हलदी मिलाकर लेपकरनेसे बवासीर दूर होतीहै। आकका दूध, थूहरका दूध, कडवीतौबीके पत्ते, और करंजकी छालको बकरेके मूत्रमें पीसकर लेप करनेसे अर्शरोग आराम होताहै। तोरईकी जडको पीसकर लेपकरनेसे बादीकी बवासीर दूर होतीहै। जंभीरी नीबू और सामरको काँजीमें पीसकर तीन गोली बनावै, एकगोली भैंसके दहीके साथ रोज खानेसे बवासीर दूर होतीहै। शिरसकी जड और कलिहारीकी जड़को पीसकर नाभिपर चार अंगुल चारों ओर लेपकरनेसे निःसन्देह सातदिनमें सर्वप्रकारकी बवा-सीरके मस्से गिर जातेहैं। मनुष्यके बाल, साँपकी कैचली, बिलावकी खाल, आककी जड और छोंकरके पत्ते इन सबको एकत्र कर धूप देनेसे अर्शरोगका शूल शांत होताहै। मलबद्ध अर्शरोगमें अजवायन, हींग, विड्नोन, इनको तक्रमें मिलाकर पीना चाहिये, वात तथा कफकी बवासीरमें तक्रसे उत्तमऔषध नहीं है. गुबके साथ हरड़को भक्षण-करनेसे पित्तकफार्श, कण्डू, कच्छू और वेदना नाश होतीहै। तिल, भिलावा, हरड और गुड़, इन सबको समान भाग लेकर सेवनकरनेसे बवासीर, श्वाँस, खासी, ज्वर, प्लीहा और पाण्डुरोग दूर होताहै॥ १ ॥ ॥ २ ॥३॥४॥५॥६॥७॥८॥९॥१० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

व्योषाग्न्यरुष्करविडंगतिलाभयानां
चूर्णंगुडेनसहितंतुसदोपयोज्यम् ॥
दुर्नामशोथगरकुष्ठविकृद्विबन्धा-
नर्शोंजयत्यबलतांक्रिमिपाण्डुताञ्च ॥ १६ ॥
चूर्णेचूर्णसमोदेयोमोदकेद्विगुणोगुडः।

इतिव्योषादिचूर्णम्।

अर्थ-सोंठ, मिरच, पीपल, चीता, भिलावा, वायविडंग, तिल और हरड़,इन सबका चूर्ण बनावै,उस चूर्णमें गुड़ मिलाकर खानेसे बवासीर, सूजन, विषविकार, कोढ़, मलविबन्ध, बवासीर, निर्बलता, कृमि और पांडुरोग नाश होताहै ॥ १६ ॥

चूर्णमें समानभाग और मोदकमें दुगुना गुड़ मिलाना चाहिये।

त्रिवृत्तेजोवतीदन्तीश्वदंष्ट्राचित्रकंशठी ।
गवाक्षीमुस्तविश्वाव्हदविडंगानिहरीतकी ॥ १७ ॥
पलोन्मितानिचैतानिपलान्यष्टावरुष्करात् ।
षट्पलंवृद्धदारस्यसूरणस्यतुषोडश ॥ १८ ॥
जलद्रोणद्वयेक्वाथ्यंचतुर्भागावशेषितम् ।
पूतन्तुरसंभूयःक्वाथ्यंस्यात्रिगुणोगुडः ॥ १९ ॥
पचेल्लेहन्तुतंतावद्यावद्दर्वीप्रलेपनम् ।
अवतार्यततःपश्चाच्चूर्णानीमानिदापयेत् ॥ २० ॥
त्रिवृत्तेजोवतीकन्दचित्रकान्द्विपलांशकान् ।
एलात्वङ्मरिचंचापिगजाह्वश्चापिषट्पलम् ॥ २१ ॥
द्वात्रिंशच्चपलान्येवंचूर्णंदत्वानिधापयेत् ।
ततोमात्रांप्रयुंजीतजीर्णेक्षीररसाशनः ॥ २२ ॥
पंचगुल्मान्प्रमेहांश्चपाण्डुरोगंहलीमकम् ।
जयेदर्शांसिसर्वाणितथासर्वोदराणिच ॥ २३ ॥
दीपयेद्ग्रहणींमन्दांयक्ष्माणंचापकर्षति ।
पीनसेचप्रतिश्यायेआढ्यवातेतथैवच ॥ २४ ॥
अयंसर्वगदेष्वेवकल्याणोलेहउत्तमः ।
दुर्नामारिरयंनाम्नादृष्टोवारसहस्रशः ॥ २५ ॥
भवत्यनेनंप्रयुञ्जानःशतवर्षंनिरामयः ।
आयुष्योदैर्घ्यजननोवलीपलितनाशनः ॥ २६ ॥

रसायनवरश्चैवमेधाजननउत्तमः।
गुडःश्रीबाहुशालोऽयंदुर्नामारिःप्रकीर्त्तितः ॥ २७ ॥

इतिश्रीबाहुशालोगुडः।

अर्थ-निसोत, तेजबल, दन्ती, गोखुरु, चीता, नरकचुर, इन्द्रायण, नागरमोथा, सोंठ, मोथा, वायविडंग और हरड, यह सब चार चार तोले लेवै, भिलावे बतीस तोले, विधारा चौवीस तोले, और जिमीकन्द चौसठतोले लेवै, पीछे इन सबको ६४चौंसठ सेर अर्थात् ५१२ पांचसौं बारहपल, जलमें पकावै, जब चौथाभाग अर्थात् १६ सोलह सेर (१२८ एकसौ अठाईसपल) जलकर शेष रहै तब उतार लेवै, पश्चात् काथको वस्त्रमें छान रसको फिर चूलेपै चढ़ादेवै, और उसमें तिगुना गुड़ मिलाकर पकावै, जब लेहवत् अर्थात् करछीसे चिपटने लगजाय तब उतारकर निसोत, तेजबल, जमीकन्द और चीता, यह प्रत्येक आठ आठ तोले और इलायची, दालचीनी, कालीमिरच और गजपीपल यह प्रत्येक चौवीस चौवीस तोले लेवै, पीछे इन सबका चूर्णकर मिलादे, इसको अनुमानमाफिक भक्षण करै। औषधिके जीर्णहोनेपर दूध और मांसरस (सोरुआ) का भोजन करै. यह गुड-पाँचप्रकारके गुल्म, सर्व प्रकारके प्रमेह, पांडुरोग, हलीमक, सर्वप्रकारकी बवासीर, सर्व प्रकारके उदररोग, संग्रहणी, राजयक्ष्मा, पीनस, प्रतिश्याय, और आढ्यवातको नष्ट करै है। यह सर्वप्रकारके रोगोंमें हितकारी है। और बवासीरको विशेषकरके विध्वंस करैहै, ऐसे हजारोंवार अजमायाहै। इसको सेवन करनेसे-मनुष्य रोगोंसे छूट १०० सौवर्ष पर्यन्त जीताहै। तथा यह गुड़ आयुको बढ़ानेवाला, वलीपलितनाशक, अवस्थास्थापक, रसायनमें श्रेष्ठरसायन, मेधाजनक और उत्तम है। इसको श्रीबाहुशाल गुड़ कहते हैं और इसका दूसरा नाम 'दुर्नामारि' भीहै ॥ १७ ॥ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७॥

कौटजंकल्कमादायपिष्टातक्रेणबुद्धिमान्।
पीत्वारक्तार्शसोरक्तस्रुतिमाशुनियच्छति ॥ २८ ॥
कुटजत्वक्पलशतंजलद्रोणे विपाचयेत्।
अष्टभागावशेषन्तुकषायमवतारयेत् ॥ २९ ॥

वस्त्रपूतंपुनःक्काथ्यंपचेल्लेहत्वमागतम् ।
भल्लातकविडंगानित्रिकटुत्रिफलास्तथा ॥ ३० ॥
रसांजनंचित्रकंचकुटजस्यफलानिच ।
वचामतिविषांबिल्वंप्रत्येकंचपलंपलम् ॥ ३१ ॥
गुडात्पलानित्रिंशच्चचूर्णीकृत्यानिधापयेत् ।
मधुनःकुडवंदद्याद्घृतस्यकुडवन्तथा ॥ ३२ ॥
लेहोऽयंशमयत्यर्शांयस्यरक्तसमुद्भवम् ।
वातिकंपैत्तिकश्चैवश्लैष्मिकंसान्निपातिकम् ॥ ३३ ॥
येचदुर्नामजारोगास्तान्सर्वान्नाशयत्यपि ।
अम्लपित्तमतीसारंपाण्डुरोगमरोचकम् ॥ ३४ ॥
ग्रहणीमार्दवंकार्श्यंश्वयथुंकामलामपि ।
अनुपानंघृतंदद्यान्मधुतक्रंजलंपयः ॥ ३५ ॥
रोगानीकविनाशायकौटजोलेहउच्यते ॥ ३६ ॥
पलस्थानेफलमपिकेचित्पठन्तिअतस्त्वक्फल-
योर्मिलित्वापलशतम् ।फलन्तुरक्तेतियोगिकं दृष्टफलञ्च।

इति कुटजलेहः ।

अर्थ–कुड़ेकी छालको पीसकर मट्ठेके साथ सेवनकरनेसे–रक्तार्श (खूनी बवासीर) दूर होतीहै ॥ २८ ॥ कुडेकी छाल सौपल लेकर चौसठसेर (५१२ तोले) जलमें पकावै, जब जलकर आठमा भाग अर्थात् सोलहसेर क्वाथ शेषरहै, तब उतारले, पीछे वस्त्रमें छानकर फिर चूलेपै चढ़ादेवे, जब पकते पकते लेहकी समान हो जावे, तब भिलावा, वायविडंग, त्रिकुटा, त्रिफला, रसौत, चीता, इन्द्रजौ, वच, अतीस, बेलगिरी, यह प्रत्येक चार चार तोले लेकर चूर्ण बनाकर मिला-देवै, फिर गुड तीसपल, सहत बत्तीसतोले, और घृत बत्तीसतोले, इन सबको मिलादेवै तौ कुटजलेह सिद्ध होजाताहै। यह कुटजलेह–रुधिरकी बवासीर, वातजबवासीर, पित्तज बवासीर, कफजबवासीर, सन्निपातकीबवासीर,सर्वप्रकारकी बवासीर, अम्लपित्त, अतीसार, पाण्डु-

रोग, अरुचि,संग्रहणी, मृदुता, कृशता, सूजन और कामलारोगको दूर करैहै। इसको घृत, मधु, तक्र, जल और दूधके साथ सेवनकरना चाहिये। यह रोगोंके विनाशके अर्थ कुटजलेह कहाहै ॥ २९ ॥ ३० ॥ ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

इसमें कोई कोई वैद्य पलके स्थानमें फल पढतेहैं इसकारण कुडेकी छाल फलको मिलाकर चारसौ तोले लेते हैं॥

शुद्धसूतंपलैकन्तुद्विपलंशुद्धगंधकम्।
मृतंताम्रंमृतंलौहंप्रत्येकञ्चपलत्रयम् ॥ ३७ ॥
त्र्यूषणंलांगलीदन्तीचित्रकंपुष्करन्तथा।
प्रत्येकंद्विपलंयोज्यंयवक्षारंचटंकणम् ॥ ३८ ॥
उभौपंचपलौयोज्यौसैन्धवंपलपंचकम्।
द्वात्रिंशत्पलगोमूत्रंस्नुहीक्षीरंचतत्समम् ॥ ३९ ॥
मृद्वग्निनापचेत्सर्वंयावत्तच्चसुपिण्डितम्।
मासद्वयंसदाखादेद्रसोह्यर्शःकुठारकः ॥ ४० ॥

इति अर्शःकुठारकोरसः।

अर्थ-शुद्धपारा चारतोले, शुद्धगंधक आठ तोले, ताँबेकी भस्म बारह तोले, लोहेकी भस्म बारह तोले, त्रिकुटा, कलिहारी, दन्ती, चीता, पोहकरमूल, यह प्रत्येक आठ आठतोले, जवाखार,सुहागा और सैंधानोन,यह प्रत्येक वीस वीस तोले, गोमूत्र बत्तीस पल और थूहरका दूध बत्तीस पल, इनसबको एकत्रकर मृदुअग्निसे पकावै, जब पकते २ पिंडकी समान गाढ़ा होजाय तब दोमासेभर सदैव सेवनकरै, इससे सर्व प्रकारकी बवासीर नष्ट होती हैं ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

मृतसूतस्यचत्वारिपंचगंधकटंकणम्।
त्रिदिनंमर्दयेत्सर्वंद्रवैःश्वेतपुनर्नवैः ॥ ४१ ॥
मूषायांगोलकंतन्तुक्षिप्त्वाताम्रस्यचक्रिके।
रसगन्धसमोरुद्ध्वाचान्धमूषापुटेपचेत् ॥ ४२ ॥
चक्रिकांचूर्णयेत्पश्चादभयाभृंगजैर्द्रवैः।

दिनैकंभावयेत्तस्मिन्सिद्धश्चक्रेश्वरोरसः ॥ ४३ ॥
द्विगुंजंभक्षयेन्नित्यंजयेद्वाताशंसांक्षणात्।
सिन्धूत्थंमागधंवह्निशुण्ठीतक्रैःपिबेदनु ॥ ४४ ॥
भोजनंस्निग्धमूष्णञ्चमर्द्दनञ्चप्रशस्यते।
संजातेह्यतिविष्टम्भेस्नुहीक्षीरेणभावयेत् ॥ ४५ ॥
मरिचात्सततंयुक्तान्निशायाञ्चप्रयोजयेत्।
विडंगंत्रिफलाव्योषंत्रिवृन्मूषिकपर्णिका ॥ ४६ ॥
कम्पिल्लंनलिनीचूर्णंतुल्यंक्षौद्रेणसोलयेत्।
गुडेनसितयावाथवातरोगाणिवैजयेत् ॥ ४७ ॥

इतिचक्रेश्वरोरसः।

अर्थ–पारेकी भस्म चारभाग, गंधक और सुहागा पाँचभाग, इन सबको एकत्रकर तीन दिन विषखपराके रसमें खरलकरै, पश्चात् गोला बनाकर मूषामें रख ताम्रचक्रिकामें मूषाकोधर, अंधमूषापुटमें पकावै, फिर चूर्णकर हरड और भाँगरेके रसमें एकदिन भावना देवैतौ चक्रेश्वररस सिद्ध होवै, इस रसको दो गुंजा प्रमाण नित्यप्रति, भक्षण करनेसे बादीकी बवासीर दूर होतीहै। सैंधानोन, पीपल, चीता और सोठका चूर्ण तक्रमें मिलाकर पीना इसका अनुपान है। इसमें स्निग्ध और उष्णभोजन तथा मर्दनकरना हितकारी है। जो यह रस अत्यन्त विष्टम्भ होजायतो थूहरके दूधमें भिजोकर भक्षण करै, और वायविडंग, त्रिफला, त्रिकुटा, निसोत, मूषाकर्णी, कवीला और कमलिनीका चूर्ण सहतके साथ अथवा गुडके साथ वा मिश्रीके साथ खानेसे वातार्शरोग दूर होता है ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

मृतसूताभ्रहेमाह्वतीक्ष्णमुण्डञ्चगंधकम्।
मण्डूरस्यसमंताप्यंमर्द्यंकन्याद्रवैर्दिनम् ॥ ४८ ॥
अंधमूषागतंपश्चात्त्रिदिनन्तुतुषाग्निना ॥ ४९ ॥
चूर्णितंसितयामासंखादेत्पित्तार्शसांजयेत्।

रसस्तीक्ष्णमुखोनामअनुस्यान्मधुरत्रयम् ॥ ५० ॥

इतितीक्ष्णमुखरसः।

अर्थ–पारेकी भस्म, अभ्रक, सोना, तीक्ष्णलोहा, मुंडलोहा, गंधक और मण्डूर तथा सोनामाखी इन सबको समानभाग लेकर घीकुवारके रसमें एक दिन मर्दन करै, पीछे अंधमूषापुटमें भूसीकी आगसे तीन दिन पर्यन्त पकावै, फिर चूर्णकरै, उसको एकमासाभर मिश्रिके साथ खावेतौ पित्तकी बवासीर दूरहो, इस तीक्ष्णमुखरसका अनुपान–मिश्री, घृत और सहतहैं ॥ ४८ ॥ ४९ ॥ ५० ॥

रसवैक्रान्तशुद्धाभ्रकान्तभस्मसगंधकम्।
तुल्यांशंमर्दयेच्चार्द्रदाडिमोत्थैरसैस्ततः ॥ ५१ ॥
भक्षयेन्माषमेकन्तुअर्शसांनाशनोरसः।
अपामार्गस्यबीजानिवह्निशुंठीहरीतकी ॥ ५२ ॥
मुस्ताभूनिम्बतुल्यांशंसर्वतुल्यंगुडम्भवेत्।
कर्षैकंभक्षयेच्चानुजीर्णान्नंभक्तभोजनम् ॥ ५३ ॥

इतिअर्शोहररसः।

अर्थ–पारा, वैक्रान्तमणि, शुद्धअभ्रक, कान्तलोहेकी भस्म, और गंधक यह प्रत्येक समानभाग लेकर अदरख और अनारके रसमें मर्दन करै। इसकी मात्रा एकमासेकी है। अनुपान–चिरचिटेके बीज, चीता, सोंठ, हरड़, नागरमोथा, चिरायता, यह प्रत्येक समानभाग और सबकी समान गुड मिलाकर दो तोले प्रमाण देनेसे सर्वप्रकारकी बवासीर दूर होती है। पथ्य पुराना अन्न और भात है ॥ ५१ ॥ ५२ ॥ ५३ ॥

शुद्धसूतंसमंगन्धंतालसिन्धूत्थलाङ्गली।
फलंतुम्बीफलैकैकंलशुनञ्चचतुष्पलम् ॥ ५४ ॥
कारवेल्याद्रवैर्मर्द्यंदिनैकंवटकीकृतम्।
गुंजामात्रंसदाखादेत्पायुजञ्चापिनाशयेत् ॥ ५५ ॥
रक्तवातकफोत्थानिअर्शांसिनाशयेद्ध्रुवम्।
वटीकनकवतीनामअनुपानंचकथ्यते ॥ ५६ ॥

भल्लातत्रिफलादन्तीवह्निचूर्णसमंसमम्।
सैन्धवंसर्वतुल्यंस्याद्भर्जयेत्खर्परेचिरम्॥ ५७॥
मृद्वग्निनाभवेत्सिद्धंकर्षंतक्रंपिबेन्नरः॥ ५८॥

इति कनकावतीवटी।

अर्थ-शुद्धपारा, शुद्धगन्धक, हरिताल, सैंधानोन, कलिहारीका फल, और तुम्बी, यह प्रत्येक एक एक पल लेवै, और लहसुन चार पल लेवै, पीछै इनसबको करेलेके रसमें एक दिन मर्द्दनकर एक एक रत्तीभरकी गोली बनावै, एक गोली नित्य खानेसे गुदाके रोग, रुधिरकी बवासीर, वातकी बवासीर, और कफकी बवासीर दूर होतीहै। भिलावा, त्रिफला, दन्ती और चीता इनसबका चूर्ण समानभागले और सबकी बराबर सैंधानोन लेवै, पीछे सबको एकत्रकर खिपड़ेमें मृदु अग्निसे बहुतसमयतक भूनकर सिद्धकरै, पश्चात् दो तोले प्रमाण इसको तक्रके साथ भक्षण करै यह अनुपानहै॥ ५४॥ ५५॥ ५६॥ ५७॥ ५८॥

शुद्धसूताभ्रलोहानांमृतगन्धार्कसंयुताम्।
सर्वेषांसमभागन्तुभल्लातंसर्वतुल्यकम्॥ ५९॥
पलमेकंसमादायद्रवैःसूरणकन्दजैः।
मर्द्दयेद्दिनयुग्मञ्चमाषमात्रंदिनेदिने॥ ६०॥
भक्षणाद्धन्तिसर्वेषामर्शांसिचनसंशयः।
असाध्यान्याशुसर्वाणिरसःपंचामृतात्मकः॥ ६१॥
कुष्ठरोगंनिहन्त्याशुमृत्युरोगकुलान्तकः।
मरिचंपिप्पलीशुण्ठीवह्निक्रमगुणोत्तरम्॥ ६२॥
सर्वेषांद्विगुणंयोज्यंसूरणंपेषयेद्दृढम्।
सर्वतुल्योगुडोयोज्यःकर्षैकंभक्षयेदनु॥ ६३॥

इतिपंचामृतरसः।

अर्थ-शुद्धपारा, अभ्रक, लोहा, गंधक, और ताँबा यह सब समान भागलेवै, और भिलावेके बीज सबकी बराबर लेवै, पीछै सबको जिमीकन्दके रसमें दो दिन खरल करै, इसको एकमासेभर प्रतिदिन खानेसे

सर्वप्रकारके अर्शरोग निःसन्देह दूर होते हैं । तथा यह पंचामृतरस असाध्य बवासीर, कोढ, और मृत्युरोगकोभी दूर करै है। इस औषधी-के भक्षणकरनेके बाद एकभाग कालीमिरच, दोभाग पीपल, तीन भाग सोंठ, चारभाग चीता और वीसभाग जमीकन्द लेकर खूब मर्दन करै, पीछै चालीसभाग गुड़ मिलाकर सेवन करै। यह अनुपानहै ॥५९॥ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

क्रिमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बम् ।
मागधिमूलंमुस्तंशठीवचाधातुमाक्षिकंचैव ॥ ६४ ॥
लवणक्षारनिशायुक्कुस्तुम्बुरुगजकणातिविषा ॥ ६५ ॥
कार्षिकान्येवसमानिकुर्यात्पलाष्टकंचाश्मजतोर्विदध्यात् ।
निष्पत्रशुद्धस्यपुरस्यधीमान्पलद्वयंलोहरजस्तथैव ॥६६॥
शिलाचतुष्कंपलमत्रवास्यान्निकुम्भकुम्भात्रिसुगन्धियुक्तम् ।
चन्द्रप्रभेयंगुटिकाप्रयोज्याअर्शांसिनिर्णाशयतिषडेव॥६७॥
भगन्दरंपाण्डुचकामलाश्चनिर्णष्टवह्नेःप्रकरोतिदीप्तिम् ।
हन्त्यामयान्पित्तकफानिलोत्थान्नाडीगतेमर्मगतेव्रणेच६८
ग्रन्थ्यर्बुदेविद्रधिराजयक्ष्मणोमेहेभगाख्येप्रबलेचयोज्या ।
शुक्रक्षयेचाश्मरिमूत्रकृच्छ्रेशुक्रप्रवाहेऽप्युदरामयेच ॥ ६९॥
भक्तस्यपूर्वंसततंप्रयोज्यातक्रानुपानंत्वथमस्तुपानम् ।
आजोरसोजाङ्गलिकोरसोवापयोथवाशीतजलानुपानम्७०
बलेननागस्तुरगोजवेनदृष्ट्यासुपर्णःश्रवणैर्वराहः ।
नपानभोज्येपरिहार्यमस्तिनशीतवातातपमैथुनेच ॥ ७१ ॥
शम्भुंसमभ्यर्च्यकृतप्रणामंप्राप्तागुटीचन्द्रमसःप्रसादात्७२॥
शुक्रदोषान्निहंत्यष्टौप्रमेहानपिविंशतिम् ।
वलीपलितनिर्मुक्तोवृद्धोऽपितरुणायते ॥ ७३ ॥

शिलाजतुशोधनंयथा ।

दशमूलक्वाथउष्णेनालोड्यप्रचण्डातपेप्रस्तरभाज-

नेकांस्येवास्थापयेत् । जर्द्धभूतंदधिसरवन्म-
स्तालिकाग्रहणंकर्त्तव्यम्।तदनुशिवागुटिको-
क्तकाकोल्याद्यष्टविंशतिद्रव्यक्काथेभावनीयम् ।
तदनुसालसारादिगणक्काथेभाव्यम् ।
तदनुत्रिफलाक्काथेभाव्यम् ।
तदनुधान्यपटोलादिक्काथेभाव्यम् ।
तदनुगुलञ्चक्काथेभाव्यम् । तदनुयष्टीमधुक्काथेभाव्यम्।
तदनुलोहचूर्णशिलाजतुगुग्गुलुमिश्रयित्वा
काकोल्यादिशालसारादिक्काथे । तदनुवि-
डंगादिचूर्णैःसंयोज्यधान्यपटोलक्काथेविसृ-
ज्यशिलायांपिष्ट्वाछायाशुष्कावटिकाकार्या ।
भक्षणंरक्तिकांपंचक्रमशः माषकद्वयंयावत् ॥ ७४ ॥

इति चन्द्रप्रभावटिका।

अर्थ-वायविडंग, चीता, सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, देवदारु, चव्य, चिरायता, पीपरामूल, नागरमोथा, अमियाहलदी, वच, सोनामाखी, सैंधानोन, जवाखार, हलदी, दारुहलदी, धनिया और अतीस, यह प्रत्येक दोदो तोलेले, शिलाजीत बत्तीसतोले, शुद्ध-गूगल आठ तोले, लोहेका चूर्ण आठ तोले, मिश्री सोलह तोले, वंशलोचन चार तोले, दन्ती, निसोत और त्रिसुगंधि, यह प्रत्येक दोदो तोले लेवै, पीछै सबको एकत्रकर गोली बनावै, इन गोलियोंको चन्द्र-प्रभा कहते हैं। यह चन्द्रप्रभावटिका छैप्रकारकी बवासीर, भगन्दर, पाण्डु, कामला, मन्दाग्नि, पित्तरोग, कफरोग, वातरोग, नाडीव्रण, मर्म-गतव्रण, ग्रंथिरोग, अर्बुदरोग, विद्रधि, राजयक्ष्मा, प्रमेह, योनिरोग, शुक्र-क्षय, पथरी, मूत्रकृच्छ्र, शुक्रप्रवाह और उदररोगको दूर करै है। इसको भोजनसे प्रथम भक्षण करै और भक्षणकरनेके बाद ऊपरसे तक्र तथा दहीका पानी पीवै, वा बकरीका सोरुआ, अथवा जांगलदेशके जीवोंके मांसका रस, या दूध, अथवा शीतलजलका अनुपान करै इसको सेवन

करनेसे—मनुष्य बलमें हाथीकीसमान, वेगमें घोडेकी समान, दृष्टिमें गरुडकी समान और सुननेमें वराहकी समान, होजाता है। इसपै भोजन तथा पीनेका कुछ परहेज नहीं है तथा शीतपवन, आतप और मैथुनकाभी कुछ परहेज नहींहै।

यहगोली—आठप्रकारके शुक्रदोष वीसप्रकारके प्रमेह, और वलीपलित रोगको दूर करैहै,और इसको सेवनकरनेसे वृद्धमनुष्यभी तरुण होजाताहै ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥७३॥ अब शिलाजीतके शोधनेकीविधि कहतेहैं। शिलाजीतको दशमूलके काढेमें आलोडनकर तीक्ष्णधूपमें पत्थरके अथवा कांसीके बरतनमें करके रखदेवै, जब दहीकी सरकी समान ऊपरको उठकर आजाय तब ग्रहण करै, पीछै काकोली आदि अट्ठाईस औषधियोंके क्वाथमें सातदिन भावना देवै, तदनंतर सालसारादि गणके क्वाथमें भावना देवै, पश्चात् त्रिफलेके क्वाथमें भावनादेवै, तदनंतर धनिये और परवलके क्वाथमें भावना देवै, फिर गुलंछकन्दके क्वाथमें भावना देवै, तत्पश्चात् मूलैठीके क्वाथमें भावना देवै, फिर लोहेका चूरन और गूगल मिलाकर काको-ल्यादि और सालसारादिगणके क्वाथमें भावनादेकर वायविडंगका चूरण मिलाले, पीछे धानिये और परवलके क्वाथमें भावनादेकर सिद्धकरै, इसप्रकार शिलाजीतको शुद्धकर उपरोक्त चन्द्रप्रभावटीमें मिलावै, शिलाजीतको शिलापै पीसकर छायामें सुखाकर गोली बनावै, इन गोलियोंको पाँच रत्तीसे लेकर दोमासे तक भक्षण करै ॥ ७४ ॥

प्रणम्यशंकरंरुद्रंदण्डपाणिमहेश्वरम्।
जितरोगंमनुष्यस्यनारदःपृच्छतेगुरुम् ॥ ७५ ॥
सुखोपायेनहेनाथ शस्त्रक्षाराग्निभिर्विना।
दुर्बलानांचभीरूणांचिकित्सांवक्तुमर्हसि ॥ ७६ ॥
तच्छिष्यवचनंश्रुत्वालोकानांहितकाम्यया।
अर्शसांनाशनंश्रेष्ठंभैषज्यमिदमीरितम् ॥ ७७ ॥
मुण्डवज्रादिलोहानांलोहमन्यतमंशुभम्।
कृत्वानिर्मलमादौतुकुनट्यामाक्षिकेणच ॥ ७८ ॥

पत्तूरमूसकल्केनस्वरसेनाहतस्ततः ।
वह्नौनिक्षिप्यविधिवच्छालांगारेणनिर्धमेत् ॥ ७९ ॥
ज्वालाचतस्यबोद्धव्यात्रिफलायारसेनच ।
ततोविज्ञायगलितंशंकुनोर्द्धेविनिक्षिपेत् ॥ ८० ॥
त्रिफलायारसेपूतेतदाकृष्यविनिर्वपेत् ।
नसम्यग्गलितंयच्चतेनैवविधिनापुनः ॥ ८१ ॥
ध्मातंनिर्वापयेत्तस्मिँल्लोहंतात्रिफलारसे ।
ततःसंशोष्यविधिवच्चूर्णयेल्लोहभाजने ॥ ८२ ॥
लोहेनैवतथापिस्याद्दृशादिश्लक्ष्णचूर्णितम् ।
कृत्वालोहमयेपात्रेमार्गेवालिप्तरन्ध्रके ॥ ८३ ॥
रसैःपंचोपमंकृत्वापाचयेद्गोमयाग्निना ।
पुटानिक्रमशोदद्यात्पृथगेषांविधानतः ॥ ८४ ॥
त्रिफलार्द्रकभृंगाणांकेशराजस्यबुद्धिमान् ।
कन्दमाणकभल्लातवह्नीनांसूरणस्यच ॥ ८५ ॥
हस्तिकर्णपलाशस्यकुलिशस्यतथैवच ।
पुटेपुटेचूर्णयित्वालोहात्षोडशिकंपलम् ॥ ८६ ॥
तन्मानंत्रिफलायाश्चपलेनाधिकमाहरेत् ।
अष्टभागावशिष्टेतुरसेतस्याःपचेद्बुधः ॥ ८७ ॥
अष्टौपलानिदत्त्वाचसर्पिषोलोहभाजने ।
ताम्रेवालौहदर्व्यातुचालयेद्विधिपूर्वकम् ॥ ८८ ॥
ततःपाकविधानज्ञःस्वच्छेचोर्द्धेचसर्पिषि ।
मृदुमध्यादिभेदेनगृह्णीयात्पाकमानतः ॥ ८९ ॥
अभिमंत्र्यविधानेनकृतकौतुकमंगलम् ।
भ्रामरंघृतसंयुक्तंलिहेद्द्वारक्तिकाक्रमात् ॥ ९० ॥
वर्द्धमानानुपानंचगव्यंक्षीरोत्तमंमतम् ।

गव्याभावेऽप्यजायाश्चस्निग्धवृष्यादिभोजनम् ॥ ९१ ॥
सद्योवह्निकरंचैवभस्मकञ्चनियच्छति ।
हन्तिवातंतथापित्तंकुष्ठानिविषमज्वरान् ॥ ९२ ॥
गुल्माक्षिपाण्डुरोगांश्चतन्द्रालस्यमरोचकम् ।
शूलंसपरिणामञ्चप्रमेहमवबाहुकम् ॥ ९३ ॥
श्वयथुंरक्तस्रावञ्चदुर्नामादिविशेषतः ।
बलकृद्बृंहणंचैवभ्रान्तिदंस्वरवर्द्धनम् ॥ ९४ ॥
लाघवंचमनोज्ञञ्चआरोग्यंपुष्टिवर्द्धनम् ।
आयुष्यंश्रीकरञ्चैववयस्तेजस्करस्तथा ॥ ९५ ॥
सश्रीकपुत्रजननंवलीपलितनाशनम् ।
दुर्नामारिरयंनाम्नाहृष्टोवारसहस्रशः ॥ ९६ ॥
निर्मूलंदह्यतेशीघ्रंयथातूलञ्चवह्निना ।
सौकुमार्यस्वकायत्वान्मद्यसेवीसदानरः ॥ ९७
जीर्णमद्यानियुक्तानिभाजनैःसहपाययेत् ॥ ९८ ॥
लावस्तित्तिरिगोंधामयूराःशशकादयः ॥ ९९ ॥
चटकःकलविंकश्चवर्त्तकोहारितालकः ।
श्येनकश्चबृहल्लावोवनाविष्किरकादयः ॥ १०० ॥
पारावतमृगादीनांमांसंजांगलजंतथा ।
मद्गुरोरोहितःश्रेष्ठःशकुलश्चविशेषतः ॥ १०१ ॥
मत्स्यराजाइमेप्रोक्ताहितमत्स्याश्चयेनवा ।
प्रशस्तंवार्ताकफलंपटोलंबृहतीफलम् ।
प्रलम्बाभीरुवेत्राग्रंतातकंतण्डुलीयकम् ।
वास्तुकंकालशाकञ्चकर्णालुकपुनर्नवम् ।
नारिकेलंचखर्जूरंदाडिमंलवलीफलम् ।

शृंगाटकश्चपक्काम्रंद्राक्षातालफलानिच ॥ १०३ ॥
जातीकोषंलवंगंचपूगंताम्बूलपत्रकम् ।
नाश्नीयाल्लकुचंकोलककन्धुबदराणिच ॥ १०४ ॥
जम्बीरंबीजपूरंचकरमर्दकतिन्तिडी ।
आनुपानिचमांसानिकुवरःपुत्तदादयः ॥ १०५ ॥
हंससारसदात्यूहमद्गुकाकबलाहकाः ।
मकन्दकरवीराणिचरणकश्चकलम्बुकम् ॥ १०६ ॥
कूष्माण्डकश्चककोंटकेबुकश्चविशेषतः ।
कञ्चटश्चकदलकंकशेरुंककर्कटीन्तथा ॥ १०७ ॥
विदलानिचसर्वाणिककारादींश्चवर्जयेत् ।
लोहराजस्तथाचायंस्वयंरुद्रेणभाषितः ॥ १०८ ॥
जनानामुपकारायदुर्नामारिरयंध्रुवम् ।
स्थानादपैतिमेरुश्चपृथ्वीपर्योतिवापुनः ॥ १०९ ॥
पतन्तिचन्द्रताराश्चमिथ्यानैववदाम्यहम् ।
ब्रह्मघ्नाश्चकृतघ्नाश्चक्रूराश्चासत्यवादिनः ॥ ११० ॥
वर्जनीयाविदग्धेनभैषज्यगुरुनिन्दकाः ।
रक्तीद्वादशकादूर्द्ध्वंवृद्धिरस्यभयप्रदा ॥ १११ ॥
अत्रजारितस्थालीपुटपाकादिसिद्धंलौहचूर्णं ग्राह्यम् ॥

इतिशंकरमतं लौहम् ।

अर्थ–एकसमय कल्याणरूप, खलोंको रुलानेवाले, दण्डधारी, मनुष्योंके रोगोंके हरनेवाले, जगद्गुरु, महेश्वर ऐसे श्रीमान् शिवजीको नारदजी प्रणामकर पूछते हुए कि–हेनाथ ! शस्त्रक्रिया, क्षारकर्म और अग्निको छोड़कर सुखसहित उपायसे दुर्बल और भीरु (भयभीत) अर्श-रोगवाले रोगियोंकी चिकित्सा कृपाकरके कहिये, तब शिष्य (नारदजी)के वचनोंको सुनकर संसारके प्राणियोंपै अनुग्रहकर शिवजीने अर्शरोगको दूरकरनेवाली यह औषधि कहीहै । मुण्डादि लोहोंमेंसे

एक कोईसा लोहा लेवै, उसको सोनामाखी तथा मैनशिलके द्वारा शुद्ध और निर्मल करै, पछि शालिचशाककी जडके कल्कके स्वरसमें भिजोकर मारे, फिर आगमें रख सालके अंगारोंसे फूंके, पश्चात् फूंककर त्रिफलेके रसमें बुझावै, फिर आगमें रख सालके अंगारोंसे फुंकै, पश्चात् फुंककर त्रिफलेके रसमें बुझावै, इसप्रकार वारंवार आगमें रखकर फुंकै और वारंवार बुझाता जाय, जब गलजाय, तब शंकुसे ऊपरको उठाकर त्रिफलेके रसमें छोड़देवै, जो अच्छे प्रकार नहीं गलेतौ फिर इसी विधिसे वारंवार गलावै, और त्रिफलेके रसमें बुझावै. पीछे, भलेप्रकार सुखाकर लोहेके बरतनमें चूर्णकरै और जो लोहेके बरतनमें अच्छेप्रकार चूर्ण न बनैतौ पत्थरपै पीसकर चूर्ण करै, पश्चात् लोहेके बरतनमें रख मुखबंदकर बरतनको मट्टीके गारेसे लीप सुखावै, फिर उपलोंकी अग्निसे गजपुटमें पचावै, तदनंतर त्रिफला, अदरख, भांगरा, कुकुरभांगरा, मानकन्द, भिलावा, चीता, जिमीकन्द, हस्तिकर्ण, पलाश और थूहर इन प्रत्येकके रसमें अलग अलग भावना देकर गजपुटमें पकावै, और प्रतिपुट चूर्ण बनाता जाय, और सोलहपल लोहेके चूर्णको सोलहपलसे अधिक त्रिफलेके रसमें पुटदेवै, आठभाग बाकी रहे हुए उस त्रिफलेके क्वाथमें फिर इस लोहेको पकावै, फिर इस लोहेके चूर्णको लोहेकी कढ़ाई अथवा तांबेकी कढ़ाईमें चढ़ाकर और उस कढ़ाईमें बत्तीसतोले घी डालकै पकावै, और लोहेकी करछीसे चलाता रहै, इसप्रकार पाकको जाननेवाला वैद्य अच्छेप्रकारसे पकावै, जब तैरकर स्वच्छघी ऊपरको आजाय तब सिद्धजानकर उतार लेवै, इसप्रकार जब लोहा सिद्ध होजाय तब मंत्र पढ़कर और अनेकप्रकारके मंगलरूप उत्सवादिकार्य करकै सहत और घीमें मिलाय एकरत्तीभरके क्रमसे बढ़ाता हुआ खावै और ऊपरसे गायके दूधको पीवै, यह अनुपान है। और जो गायका दूध न मिलै तौ बकरीके दूधको पीवै और वृष्य तथा स्निग्ध भोजन करै। यह लोह–मन्दाग्नि, भस्मकरोग, वातपित्त, कुष्ठ, विषमज्वर, गुल्म, नेत्ररोग, पाण्डुरोग, निद्रा, आलस्य, अरुचि, शूल, परिणामशूल, प्रमेह, अपबाहुक, वात, सूजन, रक्तस्राव, और विशेषकरके बवासीरको दूर करै है। तथा बलको करनेवाला, पुष्टिको करनेवाला, शरीरको हलका करनेवाला, आरोग्य और पुष्टिको बढ़ानेवाला, आयुवर्द्धक, लक्ष्मीदायक, तेजजनक

कांतियुक्तपुत्रोंको उत्पन्न करनेवाला, वली और पलितको हरैहै । यह दुर्नामारिलोह हजारोंवार अजमाया हुआहै । इससे बवासीर ऐसे नाश होतीहै जैसे आगसे रुई जलजातीहै । इसके ऊपर मद्यपान करना निषेधहै परंतु जो मद्यको सदैव सेवन करतेहैं और सुकुमार्य तथा अल्पशरीरवालेहैं वह जीर्णमदिराको भोजनके साथ सेवनकरते रहैं । लवा, तीतर, गोधा, मोर, शशक, चटक, कलविंक, वत्तक, हरियल, श्येणक, बडालवा, और वनमें रहनेवाले विष्किरपक्षी परेवा, जंगलीजीवोंका मांस, मदगुरु, रौहित, शकुल, वैगुन, परवल, कटेरीकाफल. लंबाकद्दू, शतावर, वैंतका अग्रभाग, देवदाड़, चौलाईका शाक, वथुवा, कालशाक, कर्णाल, पुनर्नवा, नारियल, खजूर, अनार, हरफकेवडी, सिंघाड़े, पक्केआम, दाख, ताड़के फल, जायफल, लौंग, सुपारी, और पान, यह सर्वपदार्थ लोहेके सेवनकरनेवाले मनुष्यको हितकारी है और वड़हर, बेर, बडेबेर (पोंडे), झड़वेर, जम्भीरीबीबु, बिजोरानीबू, करोंदा, और इमली, कुरव और पुत्तदाको आदि लेकर अनूपदेशके जीवोंका मांस, हंस, सारस, दात्यूह, सहु, काक, बलाहक, मानकन्द, कनेर, चने, कलम्बुक, पेठा, ककोड़ा, केबुक, कंचट, केला, कसेरु, ककडी, सर्वप्रकारके विदलअन्न, और सर्वप्रकारके ककारादि अन्न, यह सब द्रव्य इस लोहेके सेवनकरनेवालेको त्यागने चाहिये । यह दुर्नामारिलोहराज लोकोंके कल्याणकरनेके लिये श्रीमान् शिवजीने स्वयं कहाहै। श्रीमहादेवजी कहते हैं कि-अपने स्थानसे सुमेरुपर्वत हटजाय, पृथ्वी लौटजाय, चंद्रमा औ नारायण आकाशसे पतित होजाय, जो इस लोहके सेवनकरनेसे बवासिर दूर न होवै तौ । ब्रह्मघाती, कृतघ्नी, क्रूर, असत्यवादी और गुरुनिन्दक ऐसे मनुष्योंको यह लोहा कदापि नहीं देना चाहिये । बारहरत्तीसे अधिक इस लोहेको सेवनकरनेसे भय उत्पन्न होताहै, इसकारण यह बारह रत्तीसे कम सेवनकरना चाहिये, इसमें स्थालीपुटपाकमें सिद्धकिया तथा जारितकिया लोहा लेना चाहिये ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥ ११० ॥ १११ ॥

त्रिवृच्चित्रकनिर्गुण्डीस्नुहीमुण्डितिकाजटाः ।
प्रत्येकशोऽष्टपलिकाजलद्रोणेविपाचयेत् ॥ ११२ ॥
पलत्रयंविडंगस्यव्योषंकर्षत्रयंपृथक् ।
त्रिफलायाःपलंपंचशिलाजतुपलंन्यसेत् ॥ ११३ ॥
दिव्यौषधिहतस्यापिवैकङ्कतहतस्यवा ।
पलद्वादशकंदेयंरुक्मलौहस्यचूर्णितम् ॥ ११४ ॥
घृताच्चतुर्विंशतिभिर्मधुशर्करयोरपि ।
घनीभूतेषुशीतेचदापयेदवतारिते ॥ ११५ ॥
एतदग्निमुखन्नामदुर्नामान्तकरंपरम् ।
मन्दमग्निंकरोत्याशुकालाग्निसमतेजसः ॥ ११६ ॥
पर्वताअपिजीर्यन्तिप्राशनादस्यदेहिनः ।
गुरुवृष्यानुपानानिपयोमांसरसोघृतम् ॥ ११७ ॥
दुर्नामपाण्डुश्वयथुकुष्ठप्लीहोदरापहम् ।
अकालपलितंचैवआमवातगुदामयम् ॥ ११८ ॥
नसरोगोऽस्तियश्चापिनहिहन्यादिदंक्षणात् ।
करीरकांजिकादीनिककारादींश्चवर्जयेत् ॥ ११९ ॥
स्रवत्यतोऽन्यथालोहंलोहात्किट्टंचदुर्जयम् ॥ १२० ॥

इति अग्निमुखलोहमिति ख्यातम् ।

अर्थ–निसोत, चीता, निर्गुण्डी, थूहर, गोरखमुण्डी, और भुईआमला

१ मुण्डितिकाभण्डिरी जटाभूम्यामलकी त्रिवृदादीनां रसेनापि व्यवहारः क्वाथः पादावशिष्टत्वात् पाकावतारणकाले प्रक्षेपार्थं विडंगादीनां चूर्णम् । त्रिफलाया मिलित्वा पंचपलानि । शिलाजतु शिवागुड़िकोक्तविद्याशोधितम् । दिव्यौषधिः स्वर्णमाक्षिकमनःशिले । शालिंचाशूकशिम्बी वैकङ्कतो वनपालकः । रुक्मलौहं वज्रपाण्डवादितश्च रसायनोक्तक्रमेण जारणपुटनादिसूक्ष्मचूर्णितम् । घृताच्चतुर्विंशतिपलानि मधुशर्करयोश्चतुर्विंशतिमिलित्वा तप्तघृते लौहं ददवा पश्चात् ॥
शर्करासहितंक्वाथंदत्त्वापाकः । अवतारणसमयेविडंगादिचूर्णप्रक्षेपः । पर्युषितेमधु दत्त्वाविसृज्यलौहपात्रेघृतपात्रेवास्थाप्यम् ततोविश्राम्यपश्चादुपविश्यअमृतसारतत्त्वंप्रयोज्यमितिनिश्चलकरः ॥

यह प्रत्येक आठपल लेवै, पीछै चौसठसेर जलमें पकाकर चतुर्थांश काथ बनावै, फिर वायविडंग १२ बारह तोले, सोंठ ६ छै तोले, मिरच छै तोले, पीपल छै तोले, त्रिफला वीस तोले, शिलाजीत ४ चार तोले, सोनामाखी वा मैनशिलसे माराहुआ तथा विंकतके रससे माराहुआ तीक्ष्ण लोह १२ बारह पल लेवै, घृत चौंवीसपल, चीनी २४ चौवीसपल और सहत चौवीसपल लेवै। अब इसके बनानेकी विधि कहतेहैं। प्रथम घृतको कढ़ाईमें गरम करै, पीछै उसमें लोहा मिलाकर पकावै, फिर निसोतादिके काथमें चीनी मिलाकर उपरोक्त लोहेकी कढ़ाईमें छोड़-देवै,पीछै चूलेपैसे उतारकर वायविडंगादिका चूर्ण मिलादेवै, जब बहुत-देर रखनेसे शीतल होजाय तब सहत मिलादेवै, तदनन्तर इसको लोहेके बरतनमें अथवा मिट्टीके चिकने बरतनमें भरकै रख देवै, इसप्रकार यह अग्निमुखलोह बनताहै। यह लोह–बवासीरको विशेषकरकै विध्वंस करै, मन्दाग्निको दीपनकरै, पत्थरको भी जीर्ण करदेवै । इसपै भारी, वृष्य, दूध, मांसरस और घृत यह भोजनकरने चाहिये । यह लोह–बवासीर पाण्डुरोग, सूजन, कोढ़, प्लीहा, उदररोग, अकालमें बालोंका सफेद होजाना, आमवात और गुदारोगको दूर करैहै। संसारमें ऐसा कोईभी नहींहै जो इसके सेवनकरनेसे शांत नहीं होवै। इसपै करीर (बाँसकी कोपल), काँजी और ककारादि सर्वपदार्थ त्यागने चाहिये ॥ ११२ ॥ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२०॥

चव्याःपलाष्टकंदेयंखदिरंचार्द्धमेवच ।
चित्रकस्यपलंपंचतालमूलीचतत्समा ॥ १२१ ॥
त्रिफलाप्रस्थसंयुक्तंजलद्रोणेविपाचयेत् ।
अष्टभागावशेषेणकषायमवतारयेत् ॥ १२२ ॥
आज्यात्पलाष्टकंदेयंरुक्मलौहस्यषोडश ।
पचेत्ताम्रमयेपात्रेसुशीतेचावतारयेत् ॥ १२३ ॥
त्रिवृद्दन्तीविडंगानिपथ्याचामलकानिच ।
शुण्ठीविभीतकीकृष्णाएषांदेयंपलार्द्धकम् ॥ १२४ ॥
शर्करामधुचत्वारिस्निग्धेभाण्डेनिधापयेत् ।

गुरुवृष्यान्नपानानिपयोमांसरसोहितः ॥ १२५ ॥
दुर्नामकुष्ठश्वयथुपाण्डुप्लीहोदरापहम् ।
हृच्छूलेगुदशूलेचपरिणामकृतेहितम् ॥ १२६ ॥
बलवर्णकरंवृष्यमग्निसन्दीपनंपरम् ।
करीरकांजिकंचैवकाकमाचींविवर्जयेत् ॥ १२७ ॥

इतिचव्यादिलोहम् ।

अर्थ—चव्य बत्तीस तोले, खैर सोलह तोले, मुसली वीस तोले और त्रिफला चौसठतोले लेवै, पश्चात् बत्तीससेरजलमें पकावै, जब जलकर क्वाथ आठसेर बाकी रहै तब उतारले, फिर इस क्वाथको तांबेके बरतनमें करले, तिसमें बत्तीसतोले घी और चौसठ तोले तीक्ष्णलोह मिलाकर पकावै, जब पककर शीतल होजाय तब उतारले, पीछे निसोत, दन्ती, वायविडंग, हरड, आमला, सोंठ, बहेडा और पीपल, इन प्रत्येकका चूर्ण दोदो तोले, बूरा सोलह तोले, और सहत सोलह तोले मिलादेवै, पश्चात् चिकने बरतनमें भरके रखदेवै । इसके ऊपर भारी वृष्यभोजन, पान, दूध और मांसरस (सोरुआ) हितकारीहै। यह लोह, बवासीर, कोढ, सूजन, पाण्डु, प्लीहा, उदरोग, हृदयशूल, गुदशूल और परिणामशूलको निर्मूल करैहै, तथा बल, वर्ण और वीर्यको उत्पन्न करैहै, और अग्निको दीपन करै है । इसपै करीर, काँजी और काकमाची (मकोय) त्यागनी चाहिये ॥ १२१ ॥ १२२ ॥ १२३ ॥ ॥ १२४ ॥ १२५ ॥ १२६ ॥ १२७ ॥

स्वच्छपत्रीकृतंलोहंलिप्तंलिप्तंचनिर्वपेत् ।
लवणैर्माक्षिकोपेतैस्त्रिफलाकार्षिकोदके ॥ १२८ ॥
सुसिक्तंलोहमादायपूतंसंचूर्णयेत्नतः ।
पुटैर्यथाव्याधिहरंद्रव्यंसंपादितैःपचेत् ॥ १२९ ॥
पिण्डेनशर्कराक्काथःकलम्ब्याबहुपत्रतः ।
करिकर्णपलाशकलवणैरप्यरुष्करैः ॥ १३० ॥
चतुर्गुणेफलरसेलोहार्द्धघृतयोजितम् ।

पाचयेन्निपुणस्तावद्यावत्सर्पिर्विमुंचति ॥ १३१ ॥
षोडशांशंक्षिपेत्तत्रततःसंशोधितंरसम् ।
राजिकापिण्डमध्येतुव्योषपिंडस्यमध्यगम् ॥ १३२ ॥
गवांमलतुषाम्नौचवस्त्रवत्त्वश्चकांजिकैः ।
सिद्धंसप्ताहमेवन्तुततःसंचूर्णयेत्पुनः ॥ १३३ ॥
चिञ्चाकषायज्येष्ठाम्बुक्षीरानिर्वापितेनतु ।
द्विगुणेनगंधकशिलासुश्लक्ष्णरजसापुनः ॥ १३४ ॥
पादंविडंगमुस्ताग्नित्रिफलाव्योषजंरसः ।
लोहादेकीकृतंपिष्टमनुगुप्तंनिधापयेत् ॥ १३५ ॥
ततोमात्रांप्रयुंजीतयथादोषंयथावयः ।
आहारपरिहारौचलौहान्तरसमानवित् ॥ १३६ ॥
कुलत्थश्चकपोतश्चकरमर्दककांजिके ।
करीरंकारवेल्लंचषट्ककाराणिवर्जयेत् ॥ १३७ ॥
विद्याद्विद्याधरमतंलोहंसर्वगदापहम् ।
नसोऽस्थिरोगःकुक्षिस्थोयामिदंननिहन्तिच ॥ १३८ ॥
नलोपकारान्यर्शांसिसर्वोपद्रववन्तिच ।
अम्लकंग्रहणीमहान्गुल्मानुदरमष्टकम् ॥ १३९ ॥
गुरुपादप्रसादेनख्यातंभुविरसायनम् ।
अत्रस्वच्छामितिशाणादिनिर्मलीकृतम् ॥ १४० ॥
लवणैरितिसैन्धवादिभिः । रसशोधनमाह ।

राजिकेत्यादि । अयमर्थः ।

आदौपिष्टौषधमपिपिण्डमध्येगोलकःकर्त्तव्यः ।
तदनुबाह्यतोराजिकापिण्डकल्केनवेष्टयित्वागुडकःकर्त्तव्यः
तच्चवस्त्राच्छादितामितिवस्त्रेणवेष्टयित्वावस्त्रेणपोटलं

कुर्यात्। तदनुशरावेकृत्वातुषानलेमन्दपाकेपचनीयः।
उष्णःसन्पुनःकांजिकयापाचनीयः।
एवंसप्ताहंशोधनंकृत्वाशोधितश्लक्ष्णगंधकरजसारसान्
द्विगुणेनसहितंमूर्च्छयेत्।
कज्जलिकांकृत्वाइत्यर्थः। गंधकशोधनप्रकारमाह।
चिंचेत्यादि। अयमर्थः।
तत्रगंधकंचूर्णयित्वालौहपात्रेकृत्वाबदरीकाष्ठनिर्धूमाङ्गारे
विधृत्यभावयित्वाप्रथमंतिन्तिडीकषायेतदनुकांजिकेतद-
नुगव्येदुग्धेढालयित्वानिर्वाप्यंपुनरातपेतद्गन्धकंशिलायां
श्लक्ष्णरजःकृत्वातेनरजसामूर्च्छयेत्॥
इतिसम्बन्धः।
तदनुतंकज्जलीकावस्थीकृतरसंप्रक्षिपेत्।
विडंगादिनवद्रव्यानाम्।
इतिविद्याधरलौहम्।

अर्थ–लोहेके स्वच्छ पत्र बनाकर नोन और सहतका लेपकर करकै त्रिफलेके रसमें वारंवार बुझावै, इस प्रकार शुद्धकिया लोहा लेकर चूर्णकरै, उस चूर्णको पुटके द्वारा पकावै, पश्चात् बूराका क्वाथ, कलंबी, सतोना और हास्तिकर्ण, पलाशके पत्ते, नोन और भिलावेके रसमें भावना देकर वारंवार पुटदेवै, फिर चौगुने त्रिफलेके रसमें लोहेसे आधा घी मिलाकर पकावै,जबतक लोहा घृतको न छोड़दे तबतक पकाताही रहै, तदनन्तर उसमें शुद्धपारा सोलहभाग डालकर गोला बनाले, उस गोलेमें राई और त्रिकुटेका चूर्ण मिलाकर वस्त्रमें बाँध सम्पुटमें रख अन्य उपले और भुसकी आगसे पकावै, फिर कांजीमें पकावै, इस प्रकार सातदिनतक पकावै, पश्चात् इसका चूर्णकर और गंधकका चूर्ण इसमे मिला लोहेके पात्रमें रख बेरीकी लकडीकी अग्निसे पकाकर प्रथम इमलीके काढ़ेमें बुझावै, पश्चात् काँजीमें बुझावै, फिर दूधमें बुझावै, पश्चात् धूपमें सुखाकर सिलपै पीस पारेके साथ कज्जली करै, फिर इसमें वाय-

विडंग, नागरमोथा, चीता, त्रिफला और त्रिकुटेका चूर्ण मिलादेवै दोषोंका बलाबल विचारकर इसको देवै । इसपै कुलथी, कबुतर, करोंदा, काँजी, करीर, करेला, यह छैं ककार त्यागने चाहिये । यह विद्याधरलोहा सर्वप्रकारके रोगोंको दूर करैहै, और ऐसा मनुष्यकी कुक्षिमें स्थित कोईभी रोग नहींहै जो इससे दूर नहीं होताहै । इससे सर्वउपद्रवयुक्त बवासीर, अम्लपित्त, संग्रहणी, प्रमेह, गुल्म, और आठ-प्रकारके उदररोग दूर होते हैं । यह गुरुके चरनकमलोंके प्रसादसे उत्तमरसायन पृथिवीमें प्रसिद्ध है ॥ १२८ ॥ १२९ ॥ १३० ॥ ॥ १३१ ॥ १३२ ॥ १३३ ॥ १३४ ॥ १३५ ॥ १३६ ॥ १३७ ॥ १३८ ॥ ॥ १३९ ॥ १४० ॥

इतिअर्शरोगचिकित्सा समाप्ता ।

अथमन्दाग्निचिकित्सामाह ।

मन्दस्तीक्ष्णोऽथविषमःसमश्चेतिचतुर्विधः ।
कफपित्तादिनाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥ १ ॥
जाठरइतिधात्वग्निभूताग्निनिरासार्थम् ।
विषमोवातजोरोगास्तीक्ष्णःपित्तनिमित्तजान् ॥ २ ॥
करोत्यग्निस्तथामन्दोविकारान्कफसम्भवान् ।
समासमाग्नेरशितामात्रासम्यग्विपच्यते ॥ ३ ॥
स्वल्पापिनैवमन्दाग्नेर्विषमपाग्नेस्तुदेहिनः ।
कदाचित्सम्यक्पचतेकदाचिच्चनपच्यते ॥ ४ ॥
मात्रातिमात्राप्यशितासुखंयस्यविपच्यते ।
तीक्ष्णाग्निरितितंविद्यात्समाग्निःश्रेष्ठउच्यते ॥ ५ ॥
समस्यरक्षणंकार्य्यंविषमेवातनिग्रहः ।
तीक्ष्णपित्तप्रतीकारोमन्दश्लेष्मविशोधनम् ॥ ६ ॥
ग्लानिगौरवसाटोपभ्रममारुतमूर्छिता ।
विष्टम्भोऽतिप्रवृत्तिर्वासामान्याजीर्णलक्षणम् ॥ ७ ॥

प्रायेणाहारवैषम्यादजीर्णंजायतेनृणाम्।
तन्मूलोरोगसंघातस्तद्विनाशाद्विनश्यति ॥ ८ ॥

अर्थ-कफकी अधिकतासै मंदाग्नि, पित्तकी अधिकातासै तीक्ष्णाग्नि, वातकी अधिकतासै विषमाग्नि, और वात, पित्त, कफकी समतासै जठराग्निसम अर्थात् समाग्नि होती है; ऐसे चार प्रकारकी जठाराग्नि जाननी। विषमाग्नि वातके रोगोंको, तीक्ष्णाग्नि पित्तके रोगोंको और मन्दाग्नि कफके रोगोंको उत्पन्न करै है और समाग्निवाले मनुष्यके भक्षणकी हुई समान मात्रा भलेप्रकार पचजाती है। मन्दाग्निवाले मनुष्यके भक्षणकी हुई अल्पमात्राभी नहीं पचती है। विषमाग्निवाले मनुष्यके खाई हुई मात्रा कभी पकती है और कभी नहीं पचती है और तीक्ष्णाग्निवाले मनुष्यके अधिक भक्षण कीहुई भी मात्रा तत्काल पचजाती है। इन सर्वमें समाग्निश्रेष्ठ है.समाग्निकी सदैव रक्षा करनी चाहिये,विषमाग्निमें वातको दूरकरना उचित है, तीक्ष्णाग्निमें पित्तको प्रशमनकरना चाहिये और मन्दाग्निमें कफको दूरकरना चाहिये। ग्लानि, शरीरभारी, पेटमें गुडगुड शब्द,भ्रम,वात, मूर्छा, विष्टम्भ और डकारका बहुत आना, यह सब अजीर्णरोगके साधारण लक्षण जानने। आहारकी विषमतासै अजीर्णरोग उत्पन्न होताहै और अजीर्णरोगसे अनेकप्रकारके रोगोंका समूह उत्पन्न होताहै और उस अजीर्णके शांतहोनेसे सर्वरोग नष्ट होजाते हैं ८

त्रिकटुकमजमोदासैन्धवंजीरकद्वेसमधरणघृतानाष्टमोहिंगुभागः
प्रथमकवलभुक्तंसर्पिषाचूर्णमेतज्जनयतिजठराग्निंवातरोगांश्चहन्ति

इतिहिंग्वष्टकम्।

अर्थ-सोंठ, मिरच, पीपल, अजमोद सैंधानोन, जीरा, कालाजीरा, भुनीहुई हींग इन सबको समानभाग लेकर चूर्ण करे, उसचूर्णको घीमें मिलाकर भोजनके प्रथमग्रासमें खावै, इससै जठराग्नि दीपन होतीहै और वातरोग नाश होते हैं ॥ ९ ॥

अन्नमण्डंपिबेदुष्णंहिंगुसौवर्चलान्वितम्।
विषमोऽपिसमस्तेनमन्दोदीप्येतपावकः ॥ १० ॥
क्षुद्बोधनोबस्तिविशोधनश्चप्राणप्रदःशोणितवर्द्धनश्च।

ज्वरापहारीकफपित्तहन्तावातंजयेदष्टगुणोहिमंडः ॥ ११ ॥

इतिहिंगुमंडः।

अर्थ-भातके मांडमें हींग और कालानोन मिलाकर गरम गरमपीनेसे विषमाग्नि और मन्दाग्नि दीपन होजाती है। तथा यह माड-भूखको बढानेवाला, बस्तिशोधक, प्राणरक्षक, रक्तवर्द्धक, ज्वरनाशक, कफपित्त-निवारक और वातको दूर करे है, इसप्रकार इसमें यह आठ गुणहैं॥ ११॥

भोजनाग्रेहितंहृद्यंदीपनंलवणार्द्रकम् ।
हरीतकीभक्ष्यमाणानागरेणगुडेनवा ॥ १२ ॥
सैन्धवोऽपिहितोवापिसातत्येनाग्निदीपनः ।
हरीतकीकणाशुंठीत्रिसमंसमुदाहृतम् ॥ १३ ॥
अग्निसन्दीपनंनृणांत्रिदोषामयनाशनम् ॥ १४ ॥

अर्थ-भोजनकेपूर्व सैंधानोन और अदरखका खाना अग्निदीपन करैहै। हरडको सोंठके साथ अथवा गुड़के साथ वा सैंधवनोनके साथ सेवन-करनेसे जठराग्नि दीपन होतीहै। हरड, पीपल और सोंठ इन तीनोंको समानभाग लेकर चूर्ण करे, उस चूर्णको भक्षण करनेसे अग्निदीपन और त्रिदोष दूर होवे ॥ १४ ॥

सिन्धूत्थपथ्यमगधोद्भववह्निचूर्ण-
मुष्णाम्बुनापिबतियःखलुनष्टवह्निः ।
तस्यामिषेणसघृतेनवरंनवान्नं
भस्मीभवत्यशितमात्रमपिक्षणेन ॥ १५ ॥

इति सैंधवादिचूर्णम् ।

अर्थ-सैंधानोन, हरड़, पीपल, और चीता इनका चूर्ण समानभाग लेकर गरमपानीके साथ पीवे, मांस घृतके साथ नवीन अन्नका भोजन करे। इससे नष्टअग्नि दीपन होजातीहै और भारी भोजन भस्म होजाता है ॥ १५ ॥

अभयानिम्बसंयुक्ताभक्षितानलवृद्धिकृत् ।
दद्रुविस्फोटकांश्चैवनाशयत्याशुदेहिनाम् ॥ १६ ॥

अर्थ-हरडको नीमके साथ सेवनकरनेसे- जठराग्नि बढतीहै, तथा दाह, और विस्फोटक दूर होते हैं ॥ १६ ॥

हिंगुभागोभवेदेकोवचाचाद्विगुणाभवेत्।
पिप्पलीत्रिगुणाचैवशृंगवेरंचतुर्गुणम् ॥ १७ ॥
यवानिकापंचगुणाषड्गुणाचहरीतकी।
चित्रकंसप्तगुणितंकुष्ठंचाष्टगुणम्भवेत् ॥ १८ ॥
एतद्वातहरंचूर्णंपीतमात्रंप्रसन्नया।
पिबेद्दध्नामस्तुनावासुरयाकोष्णवारिणा ॥ १९ ॥
दोषाबद्धमजीर्णन्तुप्लीहानमुदरन्तथा।
अंगानियस्यशीर्य्यन्तिविषंवायेनभक्षितम् ॥ २० ॥
अर्शोहरंदीपनंचश्लेष्मघ्नंगुल्मनाशनम्।
कासंश्वासंनिहन्त्याशुतथैवक्षयनाशनम् ॥ २१ ॥
चूर्णमग्निमुखन्नामनक्वचित्प्रतिहन्यते ॥ २२ ॥

इतिस्वल्पाग्निमुखंचूर्णम्।

अर्थ-हींग एक भाग, वच दोभाग, पीपल तीनभाग, अदरख चारभाग अजवायन पांचभाग, हरड छैभाग, चीता सातभाग और कूठ आठ भागलेवै, पीछे इनसबको कूट पीस चूर्ण बनावे। इस वातनाशक अग्निमुखचूर्णको प्रसन्नानामक मदिराके साथ, अथवा दहीके साथ वा दहीके पानीके साथ, वा सुराके साथ अथवा किंचित् गरमजलके साथ पीनेसे दोषोंसे उत्पन्नहुआ अजीर्णरोग, प्लीहा, उदररोग, गलतेहुवे शरीरको विषका भक्षणकरना, बवासीर, कफ, गुल्म, खाँसी, श्वाँस, और क्षयरोगको, दूर करैहै तथा अग्निको दीपन करैहै ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

द्राक्षारौचित्रकंपाठाकरंजंलवणानिच।
सूक्ष्मैलापत्रकंभार्गीक्रिमिघ्नंहिंगुपुष्करम् ॥ २३ ॥
शठीदार्वीत्रिवृन्मुस्तंवचाचेन्द्रयवास्तथा।
धात्रीजीरकवृक्षाम्लंश्रेयसाचोपकुंचिका ॥ २४ ॥

अम्लवेतसमम्लीकायवानीसुरदारुच ।
अभयातिविषेइयामाहपुषारग्वधंसमम् ॥ २५ ॥
तिलमुष्ककशिग्रूणांकोकिलाक्षपलाशयोः ।
क्षाराणिलोहकिट्टञ्चतप्तंगोमूत्रसेवितम् ॥ २६ ॥
समभागानिसर्वाणिश्लक्ष्णचूर्णानिकारयेत् ।
मातुलुंगरसेनैवभावयेच्चदिनत्रयम् ॥ २७ ॥
दिनत्रयन्तुशुक्तेनआर्द्रकस्वरसेनवा ।
अत्यग्निकारकंचूर्णप्रदीताग्निसमप्रभम् ॥ २८ ॥
उपयुक्तंविधानेननाशयत्यचिराद्गदान् ।
अजीर्णकमथोगुल्मंप्लीहानंगुदजानिच ॥ २९ ॥
उदराण्यन्त्रवृद्धिञ्चअष्ठीलांवातशोणितम् ।
प्रणुदत्युल्बणान्रोगान्नष्टवह्निञ्चदीपयेत् ॥ ३० ॥
समस्तव्यञ्जनोपेतंभक्तंदत्त्वासभाजने ।
दापयेदस्यचूर्णस्यबिडालपदमात्रकम् ॥ ३१ ॥
गोदोहमात्रात्तत्सर्वंद्रवीभवतिसोष्मकम् ॥ ३२ ॥

इतिबृहदग्निमुखंचूर्णम् ।

अर्थ–सज्जी, जवाखार, चीता, पाड, करंज, पंचलवण, छोटी-इलायची, तेजपात, भारंगी, वायविडंग, हींग, पोहरमूल, कचूर, दारुहलदी, निसोत, मोथा, वच, इंद्रजों, आमला, जीरा, विषांविल, रास्ना, कलौंजी, अमलवैंत, इमली, अजवायन, देवदारु, हरड़, अतीस, पीपल, हाऊबेर, अमलतास, तिलोंकाखार, मोखेकाखार, सैंजिनेना खार, तालमखानेका क्षार, ढ़ाकका खार, और गोमूत्रमें शुद्ध कीई हुई लोहेकी कीट इन सबको समानभाग लेलर बारीक चूर्णबनावै, पीछे इस चूर्णको विजोरे नींबूके रसमें तीनदिन भावना देवै, फिर तीनदिन काँजी अथवा अदरखके रसमें भावना देवै तो बृहदग्निमुखचूर्ण बनजाताहै। यह बृहदग्निमुखचूर्ण–अत्यन्त अग्निकारक है।इसको उपयुक्त मात्राके अनुसार सेवनकरनेसे बहुतदिनोंके रोग नष्ट होते हैं, तथा अजीर्ण, गुल्म,

प्लीहा, गुदाकेरोग, उदररोग, अन्त्रवृद्धि, अष्ठीला, और वातरक्तरोग दूर होताहै। और नष्टअग्निकों दीपन करैहै। सम्पूर्णव्यञ्जनोंयुक्त भातको बरतनमें रख पश्चात् उसमें दोतोले भर इस चूर्णको डालकर खानेसे गोदोहनकाल अर्थात् शिघ्रखाया भोजन द्रवी अर्थात् पचजाता है ॥२३॥ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

पिप्पलीपिप्पलीमूलंधान्यकंकृष्णजीरकम्।
सैन्धवंचविडंचैवपत्रंतालीशकेशरम् ॥ ३३ ॥
एषांद्विपलिकान्भागान्पंचसौवर्चलस्यच।
मरीचाजाजीशुंठीनामेकैकस्यपलंपलम् ॥ ३४ ॥
त्वगेलाचार्द्धभागेनसामुद्रात्कुडवद्वयम्।
दाडिमात्कुडवश्चैवद्वेपलेचाम्लवेतसात् ॥ ३५ ॥
एतच्चूर्णीकृतंसूक्ष्मंगन्धाढ्यममृतोपमम्।
लवणंभास्करन्नामभास्करेणविनिर्मितम् ॥ ३६ ॥
जगतान्तुहितार्थायवातश्लेष्मभयापहम्।
वातगुल्मंनिहन्त्येतद्वातशूलानियानिच ॥ ३७ ॥
तक्रमस्तुसुरासीधुशुक्तकांजिकयोजितम्।
जांगलानान्तुमांसेनरसेषुविविधेषुच ॥ ३८ ॥
अर्शांसिग्रहणीदोषंकुष्ठामयभगन्दरान्।
हृद्रोगमामदोषांश्चविविधानुदरास्थितान् ॥ ३९ ॥
प्लीहानमश्मरीञ्चैवश्वासकासोदरक्रुमीन्।
विशेषतःशर्करादीन्रोगान्नानाविधानपि ॥ ४० ॥
पाण्डुरोगांश्चविविधान्नाशयत्यशनिर्यथा ॥ ४१॥

इतिभास्करलवणम्।

अर्थ–पीपल, पीपलामूल, धनिया, कालाजीरा, सैंधानोन, विडलोन, तेजपात, तालीशपत्र, नागकेशर, यह प्रत्येक आठ आठ तोले, काला लोन वीस तोले, कालीमिरच, जीरा, सोंठ, यह प्रत्येक चार चार तोले,

दालचीनी और इलायची दोदो तोले, समुद्रनोन बत्तीस तोले, अनार, दाना सौ तोले और अमलवैंत आठ तोले इन सबको महीन पीसकर चूर्ण बनावे तो भास्करलवण सिद्धहो । यह भास्करलवण श्रीमान् भास्कराचार्य्यजीने संसारके उपकारार्थ निर्माण कियाहै। यह भास्करलवण– वातरोग, कफरोग, वातगुल्म और वात-शूलको नष्ट करैहै । इसपै तक्र, दहीकापानी, सुरा, सीधु, शुक्त और कांजी, तथा जांगलदेशके जीवोंके मांसका रस यह अनुपानहै ।

यह लवणभास्कर-सर्वप्रकारकी बवासीर, संग्रहणीरोग, कोढरोग, भगन्दर, हृदयरोग, आमदोष, अनेकप्रकारके उदररोग, प्लीहा पथरी, श्वास, खासी, उदरोग, कृमि, विशेषकरकै शर्करादिरोग और पाण्डुरोगको दूर करै है ॥

शुंठीकणामरिचंनागदलत्वगेलं
चूर्णीकृतंक्रमवर्द्धितमूर्द्धमन्त्यात् ।
खादेदिदंसमशितंगुदजाग्निमान्द्य-
कासारुचिश्वसनकण्ठहृदामयेषु ॥ ४२ ॥

इति समशर्करचूर्णम् ।

अर्थ–सोंठ सातभाग, पीपल छै भाग, कालीमिरच पांचभाग, नागकेशर चार भाग, तेजपात तीनभाग, दालचीनी दोभाग और इलायची एकभाग लेवै पीछे सबको एकत्र कूट पीसकर चूर्णकरे, फिर सबचूर्णकी समान खांड़ मिलाकर खानेसे–मंदाग्नि, खाँसी, अरुचि, श्वाँस, कण्ठरोग और हृदयरोग दूर होता है ॥ ४२ ॥

हरीतकीधान्यतुषोदसिद्धासपिप्पलीसैन्धवहिंगुयुक्ता ।
सोद्गारधूमंभृशमप्यजीर्णविजित्यसद्योजनयेत्क्षुधाञ्च४३
विष्टम्भेस्वेदनंपथ्यंपेयञ्चलवणोदकम् ।
रसशेषेदिवास्वप्नोलंघनंवातवर्द्धनम् ॥ ४४ ॥
व्यायामप्रमदाऽध्ववाहनवतःक्लान्तानतीसारिणः
शूलश्वासवतस्तृषापरिगतान्हिक्कामरुत्पीडितान् ।
क्षीणान्क्षीणकफान्हिशूलजमदान्वृद्धान्रसाजीर्णितान्
रात्रीजागरितान्निरान्निरशनान्कामंदिवास्वापयेत् ॥४५॥

आलिप्यजठरंप्राज्ञोहिंगुसैन्धवत्र्यूषणैः।
दिवास्वप्नंप्रकुर्वीतसर्वाजीर्णप्रणाशनम् ॥ ४६ ॥
धान्यनागरसिद्धञ्चतोयंदद्याद्विचक्षणः।
आमाजीर्णप्रशमनंदीपनंबस्तिशोधनम् ॥ ४७ ॥
पथ्यापिप्पलिसंयुक्तंचूर्णसौवर्चलंपिबेत्।
मस्तुनोष्णोदकेनाथबुद्ध्वादोषगतिंभिषक् ॥ ४८ ॥
चतुर्विधमजीर्णञ्चमन्दानलमथारुचिम्।
आध्मानंवातशूलंचगुल्मंचाशुनियच्छति ॥ ४९ ॥
भवेदजीर्णंप्रतियस्यशंका स्निग्धस्यजन्तोर्बलिनोन्नकाले।
पूर्वंसशुंठीमभयामशंकोभुंजीतसंप्राश्यहितंहितार्थी ॥५० ॥
सिन्धूत्थहिंगुत्रिफलायवानीव्योषैर्गुडांशैर्गुटिकान्प्रकुर्य्यात्।
तैर्भक्षितैःसुतिमवाप्नुवन्वाभुञ्जीतमन्दाग्निरपिप्रभूतम् ॥५१॥
विडंगभल्लातकचित्रकामृताःसनागरास्तुल्यगुडेनसर्पिषा।
निहन्तियेमन्दहुताशनान्वाभवन्तितेवाडवतुल्यवह्नयः ॥५२

अर्थ–हरडको धान्यतुषोदक नामवाली काँजीमें सिद्धकर भक्षणकरनेसे अथवा पीपल, सैंधानोन और हींग इन तीनोंका एकत्र चूर्णकर खानेसे डकार और धुँआयुक्त अजीर्ण दूर होता है और भूँख उत्पन्न होतीहै। विष्टम्भाजीर्णमें स्वेद और लवणोदक प्रयोगकरना योग्यहै। रसशेषाजीर्णमें दिनमें सोना, लंघन और वातवर्द्धक द्रव्य सेवनकरने चाहिये. व्यायाम (दंडकसरत) स्त्रीप्रसंग, मार्गचलने और वाहन (सवारी) के दौडानासै थके हुवे मनुष्यको, अतिसार, शूल, श्वास, तृषा, हिक्का, और वातपीडित मनुष्यको, तथा क्षीण, क्षीणकफ,शूल और मदसै पीडित, वृद्ध, रसाजीर्णरोगी, रात्रीका जगाहुआ और लंघितमनुष्यको दिनमें सोना चाहिये। हींग, सैंधानोन, सोंठ मिरच, पीपल इन सबको बारीक पीस पेटपै लेपकरे और दिनमें सोवे तो सबप्रकारके अजीर्ण दूर होतेहैं।

धनिया और सोंठ डालकर औटाया हुवा जल पीनेसे आमाजीर्ण

शांत होता है और यह जल दीपन और बस्तिशोधक है। हरड, पीपल और कालानोन इनको कूट पीसकर चूर्णकरे, पीछे उस चूरनको दहीके पानीके साथ अथवा गरमजलके साथ दोषोंकी गतिको जानकर पीनेसे चारों प्रकारके अजीर्ण, मन्दाग्नि, अरुचि, आध्मान, वातशूल और गुल्मरोग दूर होता है। स्निग्ध और बलवान् मनुष्यके अन्नकालमें जो अजीर्णकी शंका होवेतो प्रथम सोंठ, हरड इनके चूर्णको शीतलजलके साथ पीकर पश्चात् हितकारी भोजन करेतो कुछ भय नहीं है। सैंधव, लवण, हींग, त्रिफला, अजवायन, त्रिकुटा, इनका चूर्ण बनावे, पीछे उसको गुडमें मिलाकर गोली बनाकर खानेसे, अजीर्ण और मन्दाग्नि दूर होती है। वायविडंग, भिलावा, चीता, हरड और सोंठ इनके चूरनको गुड और घीके साथ भक्षणकरनेसे मन्दाग्नि नष्ट होकर वडवानलकी समान जठराग्नि होजाती है ॥ ५१ ॥ ५२ ॥

रसरत्नाकरे।

शुद्धसूतंविषंगंधंप्रातिनिष्कंत्रयंत्रयम्।
मरिचंसर्वतुल्यंस्यात्कण्टकारिफलद्रवैः ॥ ५३ ॥
मर्दयेद्भावयेत्तेनभावनाचैकविंशतिः।
देयागुंजाद्वयंखादेत्सर्वाजीर्णप्रशान्तये ॥ ५४ ॥
विषूचिकांनिहन्त्याशुरसोह्यग्निकुमारकः ॥ ५५ ॥

इतिअग्निकुमाररसः।

अर्थ–शुद्धपारा, गंधक, विष, यह प्रत्येक बारह बारह मासे लेवे और काली मिरच सबकी बराबर लेवे, पीछे कटेरीके फलोंके रसमें २१ भावना देकर मर्दन करे तो अग्निकुमाररस सिद्धहो, इसको दोरत्तीभर भक्षण करे, इससै सर्वप्रकारके अजीर्णरोग और विषूचिका रोग नाश होतीहै ॥ ५३ ॥ ५४ ॥ ५५ ॥

रसगंधकमभ्रञ्चगुडूचीसत्त्वमेवच।
विडंगंमरिचंचैवसर्वमेकत्रकारयेत् ॥ ५६ ॥
आर्द्रकस्यरसेनापिगुटिकांकारयेद्बुधः।
भक्षयेन्मासमात्रन्तुअम्लतोयानुपानतः ॥ ५७ ॥

अग्निश्चकुरुतेदीप्तंसामाजीर्णप्रणाशनम् ॥ ५८ ॥

इतिवारिभक्तवटिका।

अर्थ-पारा, गंधक, अभ्रक, गिलोयका सत्व, वायविडंग और कालीमिरच इन सबका एकत्र चूर्ण करे, पीछे अदरखके रसमें मर्दनकर गोली बनावे। इसको एकमासेभर खावे और ऊपर कांजी पीलेवै तो अग्नि दीपनहो और आमाजीर्ण नष्ट होवे ॥ ५८ ॥

रसगंधकमभ्रंचत्र्यूषणंत्रिफलात्वचम्।
यवानीशतपुष्पाचचविकाजीरकद्वयम् ॥ ५९ ॥
प्रत्येकंपलमेकन्तुघण्टाकर्णपुनर्नवा।
माणकंग्रन्थिकन्दंचकेशराजःसुदर्शनः ॥ ६० ॥
दण्डोत्पलंत्रिवृद्दंतीसूर्य्यावर्त्तकचित्रकैः।
भृंगापामार्गकुलिशमण्डूराणांपलार्द्धकम् ॥ ६१ ॥
आर्द्रकस्यरसेनाथगुटिकाःसंप्रकल्पयेत्।
षण्माषप्रमिताश्चैकांभक्षयित्वाभवेदनु ॥ ६२ ॥
वारिभक्तजलंचैवप्रातरुत्थायमानवः।
वटीक्षुधावतीनामसर्वव्याधिविनाशिनी ॥ ६३ ॥
अग्निश्चकुरुतेदीप्तंभस्मकंचनियच्छति।
अम्लपित्तश्चशूलश्चपरिणामकृतंचयत् ॥ ६४ ॥
तत्सर्वनाशयत्याशुभास्करस्तिमिरंयथा ॥ ६५ ॥

इति क्षुधावतीवटिका।

अर्थ-पारा, गंधक, अभ्रक, त्रिकुटा (सोंठ, मिरच, पीपल,) त्रिफला (हरड, बहेडा, आमला) दालचीनी, अजवायन, सौंफ, चव्य, जीरा, कालाजीरा यह प्रत्येक एक एक पल अर्थात् चार चार तोले, घण्टाकर्ण, पुनर्नवा, मानकंद, ग्रन्थिकंद, कुकुरभांगरा, सुदर्शन, दण्डोत्पल, निसोत, दंती, सूर्य्यावर्त्त, चीता, भांगरा, चिरचिटा, हाड़जोडा और मण्डूर यह प्रत्येक दो दो तोले लेवे, पीछे इन सबको एकत्रकर अदरखके रसमें मर्दनकरके छै छै मासेकी गोली बनालेवे। इसको नित्य-

प्रति प्रातःकाल उठकर सेवनकरे। पश्चात् इसके ऊपर भातका माड पीवे यह क्षुधावतीनामावली वटी-सर्वव्याधिविनाशक, अग्निको दीपन-करनेवाली, भस्मकरोगको हरनेवाली, तथा अम्लपित्त, शूल और परिणामशूलको नष्ट करै है, जैसे सूर्य्य अंधकारको नष्ट करै हैं ॥६५॥

शुद्धसूतंमृतंगंधंत्रिक्षारंपटुपंचकम् ।
दशकंतुल्यतुल्यांशंभार्जितंविषयापिच ॥ ६६ ॥
दशानांतुल्यभागानांतस्यार्द्धंशिग्रुमूलकम् ।
तत्सर्वंविजयाद्रावैःशिग्रुचित्रकभृंगजैः ॥ ६७ ॥
द्रवैर्दिनद्वयंमर्द्यंरुद्धाभांडेपचेल्लघु ।
दीप्ताग्निनातुयामैकंशुद्धंपाच्यंसमुद्धरेत् ॥ ६८ ॥
सप्तधाचार्द्रकद्रावैश्चित्रकैर्भावयेद्भिषक् ।
दीप्यकोऽग्निकुमारोयंनिष्कैकंमधुनालिहेत् ॥ ६९ ॥
प्रातिकर्षंगुडंशुंठीमनुस्यादग्निदीपनः ॥ ७० ॥

इति अग्निकुमाररसः ।

अर्थ-शुद्धपारा, शुद्धगंधक,सज्जी,जवाखार,सुहागा,कालानोन,सैंधानोन, सामरनोन, विड्लोन खारीनोन, यह प्रत्येक एक एक भाग,अतीस दश भाग और सैजिनेकी जड़ पांचभाग लैवै, पीछे सबको एकत्र कर भांगके रसमें,सैजिनेके रसमें,चीतेके रसमें,और भांगरेके रसमें दोदो दिन खरलकरे, फिर लघुपुटमें दीप्ताग्निके द्वारा एक प्रहर पकावे,फिर उसमेंसे निकालकर अदरखके रसमें सातवार भावनादेवे और सातभावना चीतेके रसमें देवे तो अग्निकुमाररस तैय्यार हो। इसको चार मासे भर लेकर सहतके साथ चाटे, इससे सर्वप्रकारकी मन्दाग्नि आदि दोष नष्ट होतेहैं। इसके अन्तमें दो तोले गुड़ और दो तोले सोंठ दोनों मिलाकर खाने चाहिये ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

मृतसूतंचतुर्भागंभागैकंमृतहेमकम् ।
अष्टभागंशुद्धगन्धंदिनैकंचित्रकैर्द्रवैः ॥ ७१ ॥
मर्दितंशोधितंचूर्णंवराटींतेनपूरयेत् ।

टंकणेनमुखंरुद्धाभाण्डमध्येनिरोधयेत् ॥ ७२ ॥
शुष्कंगजपुटेपच्यात्स्वांगशैत्यंविचूर्णयेत् ।
चतुर्गुंजाकणाक्षौद्रंलेह्यमग्निप्रदीपनम् ॥ ७३ ॥
समंक्षौद्रार्द्रकद्रावैःपलार्द्धंपालयेदनु ।
वैरोचनोरसोनामसर्वरोगकुलान्तकृत् ॥ ७४ ॥

इतिवैरोचनरसः ।

अर्थ-पारेकी भस्म चारभाग, सोनेकी भस्म एकभाग, आठभाग शुद्ध गंधक इन तीनोंको एकदिन चीतेके रसमें मर्दन कर कौडीमें भरदेवे और कौडीका मुख सुहागेसै बंदकर देवे, पश्चात् उस कौडीको भांडमें रख मुखबंदकर धूपमें सुखा गजपुटमें पचावे, शीतलहोनेपर चूर्ण करले।इसको चाररत्ती भर लेकर पीपलका चूर्ण और सहत मिला चाटे, इससे अग्नि दीपन होतीहै। इसके अंतमें सहत दो तोले और अदरखकारस दो तोले मिलाकरपीवै, यह अनुपान है। यह वैरोचननामवाला रस सर्वरोगनाशकहै ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

रसेन्द्रगंधौसहटंकणेनसमंविषंयोज्यमिहात्रिभागम् ।
कपर्दकंशंखमिहात्रिभागंमरीचमत्राष्टगुणंप्रदेयम् ॥७५॥
सुपक्वजम्बीररसेनघर्त्रंसिद्धोभवेदग्निकुमारएषः ।
विषूचिकांजीर्णसमीरणार्त्तेदद्याद्विबन्धेग्रहणीगदेच ॥ ७६ ॥

इतिअग्निकुमाररसः ।

अर्थ-पारा,गंधक, सुहागा यह सब एक २ भागले, विष तीनभागले, कौड़ीकी भस्म और शंखकी भस्म तीनभागले, कालीमिरच आठ भागलेवे, पश्चात् सबको एकत्रकर पकेहुवे जम्भीरीनिबुओंके रसमें खरल करे तो अग्निकुमाररस तय्यार होताहै। यह अग्निकुमाररस-विषूचिका, अजीर्ण, वातरोग, विवन्ध, और संग्रहणीरोगमें देनाचाहिये ॥७५॥७६॥

शुद्धसूतंविषंगंधमजमोदाफलत्रयम् ।
स्वर्जिकाक्षारंयवक्षारंवह्निसैन्धवजीरकम् ॥ ७७ ॥

सुवर्चलंविडंगानिसामुद्रंत्र्यूषणंसमम् ।
विषमुण्डीसर्वतुल्यंजम्बीराम्लेनपेषयेत् ॥ ७८॥
मरीचाभंवटींखादेद्वह्निमान्द्यप्रशान्तये ।
पथ्याशुंठीगुडंचानुपलार्द्धंभक्षयेत्सदा ॥ ७९ ॥
कणामूलंकणावह्नित्रिवृद्दन्तीपलंपलम् ।
सर्वतुल्यामृताशुण्ठीगुडेनकृतमोदकम् ॥ ८० ॥
कर्षैकंगोलकंखादेद्दीपनंकुरुतेक्षणात् ।
रसभस्मसमंगन्धंधात्रीद्विगुणटंकणम् ॥ ८१ ॥
दिनंजम्बीरजैर्द्रावैर्मर्द्यंपूर्य्यावराटिका ।
रुद्धागजपुटेपच्याद्यथावैरोचनोरसः ॥ ८२ ॥
तथाकुर्य्याच्चरोगाणांफलंतद्वन्नसंशयः ।
कुमारीसैन्धवश्चानुलेहयेदग्निदीपनम् ॥ ८३ ॥
पलैकंमूर्च्छितंसूतंमरीचंहिंगुजीरकम् ।
प्रतिकर्षवचाशुंठीतत्सर्वंभृंगजैर्द्रवैः॥ ८४ ॥
दिनंमर्द्यंलिहेन्माषंमधुवह्निदिनेपिबेत् ।
कर्षैकंभक्षयेच्चानुदाडिमंनागरंगुडम् ॥ ८५ ॥
कणामूलंकणाशुंठीचव्यवह्निसमंसमम् ॥
सर्वतुल्यांपचेल्लाजांपेयांमन्दाग्निशूलनुत् ॥ ८६ ॥
मुस्तधन्याककर्षैकंपचेल्लाजाःपलैर्जलैः ।
दीपनीयाचपेयाचपथ्यंस्यादग्निमान्द्यके ॥ ८७ ॥
द्विपलंशुद्धताम्रन्तुशुद्धसूतंपलत्रयम् ।
पिष्टंजम्बीरजैर्द्रावैःकुर्य्यात्खल्वेभिषग्वरः ॥ ८८ ॥
गन्धकश्चमृतंतत्रप्रत्येकंपलपंचकम् ।
कज्जलीकृत्यसर्वंश्चभावयेन्निम्बकद्रवैः ॥ ८९ ॥

चूर्णितंपिष्टिकापृष्ठेक्षिपेच्चनिम्बकद्रवैः ।
घर्मेदिनाष्टकभाव्यंद्रवंदेयंपुनपुनः ॥ ९० ॥
भृंगाद्रावैरुयहंभाव्यंत्रिवारस्यार्द्रकद्रवैः ।
त्रिधामृतारसेभाव्यंरसमाग्निकुमारकम् ॥ ९१ ॥
रसंगुञ्जात्रयंखादेदग्निमान्द्यप्रशान्तये ॥ ९२ ॥

इतिअग्निकुमाररसः ।

अर्थ-शुद्धपारा, विष, गंधक, अजमोद, त्रिफला, सज्जी, जवाखार, चीता, सैंधानोन, जीरा, कालानोन, वायविडंग, समुद्रनोन और त्रिकुटा यह सब समान भाग,और कुचला सबकी बराबर लेवे, पीछै सबको एकत्र कर जम्भीरी नीबुके रसमें खरल करे, काली मिरचकी बराबर गोली बनावे, प्रतिदिन एकगोली खानेसे मंदाग्नि नष्ट होतीहै। इसके अंतमें हरड, सोंठ और गुड मिलाकर दोतोलेभर खाय यह अनुपानहै। पीपरामूल, पीपल, चीता, निसोत और दंती यह प्रत्येक चार चार तोले, गिलोय वीसतोले और सोंठ वीस तोले लेवे,पीछै सबको एकत्र कूट पीसकर चूर्ण करे, इस चूर्णमें गुड़ मिलाकर दोदो तोलेभरके लड्डू बनावे, एक लड्डू प्रतिदिन खानेसै अग्नि प्रदीप्त होतीहै। पारेकीभस्म, गंधक एक एकभाग, आमला, सुहागा दोदो भागलेवे, पछि इन सबको एकत्र-कर जम्भीरी नीबूके रसमें एकदिन मर्दन करकै कौडीमें भरदेवे, पश्चात् जिसप्रकार वैरोचनरसको पकावे उसीप्रकार इसको गजपुटमें पकावे, इसको सेवनकरनेसे अनेकप्रकारकेरोग निःसन्देह दूर होतेहैं।इसके अन्तमें घीकुवारके रसमें सैंधानोन मिलाकर लेहकी तरह बनाकर चाटै, यह अनुपानहै। इससै अत्यन्त अग्निदीपन होतीहै। मूर्छि-तपारा चार तोले, काली मिरच, हींग, जीरा, वच और सोंठ प्रत्येक दो दो तोले लेवै, पीछे इन सबको भांगरेके रसमें एक दिन मर्दन करे। इसको मासेभर लेकर चीतेके चूर्णके और मधुके साथ लेहकी तरह बनाकर चाटे। इस औषधिके अन्तमे अनार, सोंठ और गुड मिलाकर दो तोले खावे। इससे अग्निदीपन होतीहै। पीपलामूल, पीपल, सोंठ, चव्य, चीता, यह सब समानभाग लेवे, और खीलै सबकी बराबर लेवै, पश्चात् सबको मिलाकर पेया बनावे, इसको पीनेसे

मंदाग्नि और शूल नष्ट होताहै । नागरमोथा, धनिया यह प्रत्येक दोदो तोले, खीलै चार तोले इन सबको आठतोलेभर पानीमें मिलाकर पेया बनावे, यह पेया अग्निप्रदीपक और मन्दाग्निरोगमें हितकारीहै। आठतोले शुद्धतांबा, बारहतोले शुद्ध पारा इन दोनोंको जम्भीरीनीबुओंके रसमें खरलकर पश्चात् वीसतोले मृतगंधक मिलाकर कज्जली बनावे, फिर उस कज्जलीको कागजी नीबुके रसमें खरलकर आठदिनतक नीबुके रसमें भावना देता जाय और प्रतिभावना धूपमें सुखाता जाय, फिर तीनदिन भांगरेके रसमें भावना देवै, पश्चात् तीनवार अदरखके रसमें भावना देवे, फिर तीनवार गिलोयके रसमें भावनादेवेतो अग्निकुमाररस सिद्ध होता है । इसको तीनरत्तीभर खानेसे मन्दाग्नि दूरी होतीहै ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥८२॥ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥९२॥

पारदंगन्धकंलौहंताम्रमभ्रकमेवच ।
एषांमाषकमेकैकंजम्बरिद्रवभावितम् ॥ ९३ ॥
देयंत्रिकटुनातुल्यंसम्यग्गुञ्जाचतुष्टयम् ।
तप्ततोयानुपानेनवह्निमान्द्यहरंपरम् ॥ ९४ ॥

इतिपञ्चामृतचूर्णम्।

अर्थ–पारा, गंधक, लोहा, तांबा, अभ्रक यह प्रत्येक एक एक मासे लेकर जम्भीरी नीबूके रसमें भावना देवे, पश्चात् इसमें बराबरका त्रिकुटेका चूर्ण मिलाकर चार रत्तीभर खावै और ऊपरसे गरमजल पीलेवे, इससे मन्दाग्नि नष्ट होतीहै ॥ ९४ ॥

अभ्रकंपारदंताम्रंगन्धकंमरिचान्वितम् ।
समभागमिदंसर्वंचांगेरीरसभावितम् ॥ ९५ ॥
मर्दितन्तुरसेभूयोजयन्तीसिन्धुवारयोः ।
मर्दनेनैवकर्तव्यागुंजापरिमितावटी ॥ ९६ ॥
तप्ततोयेनसंयुक्ताश्वतस्रास्तिस्रएववा ।
अग्निमान्द्येप्रदातव्यावटयःपंचविधामताः ॥ ९७ ॥

इति पंचामृतवटी।

अर्थ-अभ्रक, पारा, ताँबा, गंधक और कालीमिरच यह सब समान भाग लेवे, पश्चात् इन सबको चांगेरी (छोटीनोनिया) के रसमें भावना देकर खरलकरे, फिर जयंती और सम्हालुके रसमें खरलकर एकरत्ती-भरकी गोलीबनावे। तीन ३ वा चार ४ गोलीखावे, उपरसै गरमपानी पीलेवे, इससें मन्दाग्नि नष्ट होती है ॥ ९५ ॥ ९६ ॥ ९७ ॥

करञ्जफलमज्जाथपथ्यावह्निविडंगकम् ।
कणाशुंठीसमंचूर्णंसर्वतुल्यासिताभवेत् ॥ ९८ ॥
अग्निदीप्तिकरंकर्षंभक्षयेद्वडवानलः ॥ ९९ ॥

इति वडवानल चूर्णम् ।

इत्यजीर्णाधिकारः ।

अर्थ-करंजके फलकीमींग, हरड़, चिता, वायाविडंग, पीपल और सोंठ इनसबको समानभाग लेकर चूर्ण करे और सब चूरनकी बराबर मिश्री मिलालेवे, इसवडवानल चूर्णको दो तोलेभर खानेसै अत्यन्त अग्नि दीपन होती है ॥ ९८ ॥ ९९ ॥

इति अजीर्णाधिकारसमाप्त ।

अथ कृमिचिकित्सामाह ।

अजीर्णभोजीमधुराम्लनित्योद्रवप्रियःपिष्टगुडोपभोक्ता ।
व्यायामवर्जीचदिवाशयानोनिरुद्धभुक्संभ्रमतेकृमींश्च ॥१॥
क्षीराणिमांसानिघृतानिचैवदधीनिशाकानिचपर्णवन्ति ।
समासतोऽम्लान्मधुरान्रसांश्चकृमीन्जिघांसुःपरिवर्जनीयात्२
अरुचिःस्यादबलत्वंपाण्डुत्वंछर्दनंभ्रमम् ।
ज्वरातीसारकृच्छूलंकृमिकोपेनजायते ॥ ३ ॥
अपकर्षणमेवादौकृमीणांभेषजंमतम् ।
ततोदोषचयंबुद्ध्वानिदानंपरिवर्जयेत् ॥ ४ ॥
विडंगपिप्पलीमूलशिग्रूभिर्मरिचेनवै ।
तक्रसिद्धायवागूःस्यात्कृमिघ्नंचसुवर्चिकाम् ॥ ५ ॥

विडंगंतंडुलव्योषयुक्तंमण्डंपिबेन्नरः ।
दीपनंकृमिनाशायवह्निंचकुरुतेभृशम् ॥ ६ ॥
मुस्ताखुपर्णीसुरदारुशिग्रु-
क्काथःसकृष्णाकृमिशत्रुकल्कः ।
मार्गद्वयेनापिचिरप्रवृत्तान्
कृमीन्निहन्यात्कृमिजांश्चरोगान् ॥ ७ ॥
रसेन्द्रेणसमायुक्तोरसोधत्तूरपत्रजः ।
ताम्बूलपत्रजोवापिलेपःकृमिविनाशनः ॥ ८ ॥

अर्थ–अजीर्णमें भोजनकरनेसे, मधुर, अम्ल, द्रव, पिट्ठी और गुड आदि द्रव्य सदैव सेवनकरनेसे तथा कसरत आदिको नहीं करनेसे, दिनमें सोनेसे और विरुद्धभोजन करनेसे मनुष्योंको कृमिरोग उत्पन्न होताहै । दूध, मांस, घृत, दही, पत्रशाक, अम्लपदार्थ और मधुरद्रव्य यह सब वस्तु क्रिमिरोगी त्याग देवे । अरुचि, दुर्बलता, पांडुता, वमन, भ्रम, ज्वर, अतीसार, और शूल यह सबलक्षण कृमिके कोपमें होते हैं । कृमिरोगमें प्रथम अपकर्षण, औषधियोंके द्वारा दोषोंकी गतिको जान निदानको त्यागकर चिकित्सा करनी चाहिये । वायविडंग, पीपलामूल, सैजिना, कालीमिरच और सज्जीखार इनके चूर्णको तक्रसे बनाई हुई यवागूमें मिलाकर पीवे तो कृमिरोग दूर होय, वायविडंग, सोंठ, मिरच और पीपल इनके चूर्णको माडमें मिलाकर पीनेसे कृमिरोग दूर होताहै और अग्निदीपन होती है । नागरमोथा, मूसाकानी, देवदारु और सैजिना इनके काढेमें पीपल और वायविडंगका चूर्ण मिलाकर पीनेसे क्रिमिरोग और कृमिरोगसे उत्पन्न हुवे रोग दूर होते हैं । पारेको धतूरेके पत्तोंके रसमें और पानके रसमें खरलकर लेपकरनेसे कृमिरोग दूर होता है ॥ ८ ॥

सविडंगगंधकशिलासिद्धंगोमूत्रजलेनकटु ।
तैलमाजन्मनयातिनाशंलिख्यासहिताश्चयूकाश्च ॥ ९ ॥

इति विडंगाद्यतैलम् ।

अर्थ-वायविडंग, गंधक, मनशिल इनके कल्कमें तथा गोमूत्रमें सरसोंके तेलको सिद्धकरे, फिर इस तेलसे लेपकरनेसे जूँए और लीखें दूर होती हैं ॥ ९ ॥

पारसीययवानीपीतापर्य्युषितवारिणाप्रातः।
गुडपूर्वाक्रिमिजातंकोष्ठगंतंपातयत्याशु ॥ १० ॥
क्वाथंखर्जूरपत्राणांसक्षौद्रमुषितंनिशि।
पीतंनिवारयत्याशुक्रुमीन्निरवशेषतः ॥ ११ ॥
लिह्यात्क्षौद्रेणवैडंगंचूर्णवाक्रिमिनाशनम् ॥ १२ ॥

अर्थ-खुरासानी अजवायनको बासी जलमें भिजोकर प्रातःकालमें गुड-मिलाकर पीनेसे कोष्ठगत क्रिमिरोग दूर होताहै। खजूरके पत्तोंके बासी क्वाथको रात्रिमें सहतके साथ पीनेसै सर्वप्रकारके कृमिरोग दूर होतेहैं। बायविडंगके चूरनको सहतकेसाथ चाटनेसै कृमिरोग दूर होताहै ॥ १२ ॥

त्रिफलात्रिवृतादंतीवचाकाम्पिलकस्तथा।
सिद्धमेभिर्गवांमूत्रेसर्पिःक्रुमिविनाशनम् ॥ १३ ॥
सर्वान्क्रुमीन्प्रणुदतिचक्रमुक्तमिवासुरान् ॥ १४ ॥

इतित्रिफलाघृतम्।

अर्थ-त्रिफला, निसोत, दंती, वच, कवीला इन सब औषधियोंका कल्क सेरभर, गायका घी चारसेर और गोमूत्र छे सेर लेवे, पीछे घृतको सिद्धकरे, इससे सर्वप्रकारके कृमिरोग दूरहोतेहैं।

लाक्षाभल्लातश्रीवासश्वेतापराजिताशिफा।
अर्जुनस्यफलंपुष्पंविडंगंसर्जगुग्गुलु ॥ १५ ॥
एभिःकृतेनधूपेनशाम्यन्तिनियतंगृहे।
भुजंगमूषिकालूताःपलायन्तेगृहात्सदा ॥ १६ ॥

अर्थ-लाख, भिलावा, श्रीवास (जिसके अभावमें लोवान लेते हैं), सफेदकोयलकी जड, अर्जुनवृक्षकेफल और फूल, वायविडंग, राल, गूगल इन सबको एकत्रकर धूप बना घरमें खेहनेसे-साँप, मूषा, मकडी, यह सब जीव भागजाते हैं ॥ १६ ॥

शुद्धसूतंचेन्द्रयवमजमोदामनःशिला ।
पलाशबीजतुल्यांशंदेवदाल्याद्रवैर्दिनम् ॥ १७ ॥
मर्दयेद्भक्षयेन्निष्कंमुद्गपर्णीकषायकम् ।
सितायुक्तंपिबेच्चानुकृमिपातोभवत्यलम् ॥ १८ ॥
अत्रशुद्धसूतंगंधकेनमूर्च्छितमापियवंरसयोगः ।

अर्थ-शुद्धपारा, इन्द्रजो, अजमोद, मनशिल, और ढाकके बीज इन सबको समानभाग लेकर देवदालीके रसमें एकदिन खरल करे। इसको चारमासेभर खावे और ऊपरसे मुगवनके काढेमें मिश्री मिलाकर पीलेवे तो कृमिरोग दूर हो ॥ १८ ॥

शुद्धसूतंशुद्धगंधमजमोदाविडंगकम् ।
विषमुंडीब्रह्मबीजंक्रमोत्तरगुणंभवेत् ॥ १९ ॥
चूर्णयेन्मधुनालेह्यंनिष्कैकंकृमिजिद्भवेत् ।
कीटभद्ररसोनाममुस्तातोयंपिबेदनु ॥ २० ॥

इति कीटभद्ररसः ।

इति कृमिरोगाध्यायः ।

अर्थ-शुद्धपारा, शुद्धगंधक, अजमोद, वायविडंग, कुचिला, और ढाकके बीज, यह सब एकोत्तर वृद्धिसैं अर्थात् पारा एकभाग, गंधकदो भाग, अजमोद तीनभाग, वायविडग चारभाग, कुचिला पांच भाग और ढाकके बीज छैभाग लेकर चूर्णकरे, पश्चात् चूर्णमें सहत मिलाकर चार मासे भर चाटे और ऊपरसैं नागरमोथेका क्वाथ पीवेतो कृमिरोग दूर होताहै, इसको कीटभद्ररस कहतेहैं ॥ २० ॥

इतिकृमिरोगाधिकारसमाप्त ।

अथपाण्डुरोगचिकित्सामाह ।

साध्यन्तुपाण्डुमायिनंसमीक्ष्यास्निग्धंघृतंनोर्द्ध्वमधश्चशुद्धम् ।
सम्पादयेत्क्षौद्रघृतप्रगाढैर्हरीतकीचूर्णमयैःप्रयोगैः ॥ १ ॥

विधिःस्निग्धस्तुवातोत्थेतिक्तशीतन्तुपैत्तिके।
श्लेष्मकेकटुरूक्षोष्णाःकार्य्यामिश्रस्तुमिश्रके ॥ २ ॥
द्विशर्करंत्रिवृच्चूर्णपलार्द्धंपैत्तिकेपिबेत्।
कफपाण्डुस्तुगोमूत्रयुक्तांस्विन्नांहरीतकीम् ॥ ३ ॥
नागरंलौहचूर्णवाकृष्णापथ्यामथाश्मजम्।
गुग्गुलुंक्काथमूत्रेणकफपाण्ड्वामयीपिबेत् ॥ ४ ॥
नागरंलौहचूर्णवाकृष्णापथ्याशिलाजतु ॥ ५ ॥
गग्गुलुनागोमूत्रेणयुक्ताश्चत्वारोयोगाःप्रकीर्त्तिताः।
लौहंपुटादिशब्दंतदभावेलौहपातिकापिशोधिताग्राह्या।
एवंसर्वत्रसकलंकफजेपाण्डौदशमूलीजलंपिबेत् ॥ ६ ॥
लौहपात्रेशृतंक्षीरंसप्ताहंपथ्यभोजनम्।
पिबेत्पाण्ड्वामयीशोषीग्रहणीदोषपीडितः ॥ ७ ॥
शृतचतुर्गुणजलेन।
सप्तवारंगवांमूत्रेभावितंवाप्ययोरजः।
पाण्डुरोगप्रशान्त्यैवपयसाथपिबेन्नरः ॥ ८ ॥

अर्थ–प्रथम साध्यपांडुरोगीको विचाकर पीछे घीके द्वारा स्निग्ध करे,फिर वमन आर विरेचनद्वारा शुद्ध करे,तदनन्तर हरडके चूर्णमें घी और सहत मिलाकर सेवन करावे।वातज पाण्डुरोगमें स्निग्ध क्रिया, पित्तज पांडुरोगमें तिक्त और शीतल क्रिया,कफजपाण्डुरोगमें कटु, रुक्ष,उष्णक्रिया और मिश्रितपाण्डुरोगमें मिश्रितक्रिया करे। पित्तजपांडुरोगमें दोभाग बूरा और एकभाग निसोतका चूरण मिलाकर भक्षण करे; कफज पांडुरोगमें हरडको गोमूत्रके द्वारा उसेकर देवे, अथवा सोंठ और लोहेका चूर्ण गोमूत्रके साथ तथा पीपल, हरड, शिलाजीत और गूगलको गोमूत्रके साथ; और सोंठ, लोहेका चूरन, पीपल, हरड, शिलाजीत, गूगल, इन सबको गोमूत्रके साथ सेवनकरनेसे कफजपांडुरोग दूर होताहै । दशमूलका क्काथ पीनेसे, कफजपांडुरोग दूर होताहै । लोहेके बरतनमें दूध औटाकर सात दिनपर्य्यंत पीवे, और हितकारी भोजन करे तो पांडु,

शौष, और संग्रहणीरोग दूर होय । लोहेके चूरणको चौगुने जलमें पकाकर पीछे गोमूत्रमें सात भावना देवे, इसको दूधके साथ सेवन करनेसे पांडुरोग शांत होताहै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः ।
क्काथःक्षौद्रयुतोहन्यात्पांडुरोगंसकामलम् ॥ ९ ॥

अर्थ-त्रिफला, गिलोय, अडूसा, कुटकी, चिरायता और नीमकी छाल इनका क्काथ बना तिसमें सहत मिलाकर पीवेतो पांडुरोग और कामला-रोग दूरहो ॥ ९ ॥

इतिफलत्रिकादिः ।

अयोमलन्तुसन्ततंभूयोगोमूत्रसेवितम् ।
मधुसर्पिर्युतंचूर्णंसहभक्तेनयोजयेत् ॥ १० ॥
दीपनश्चाग्निजननंशोथपाण्ड्वामयापहम् ॥ ११ ॥
अयोमलंपुराणलोहमलम् ।
शुद्धसूतंसासिन्दूरंपलैकैकंविमर्दयेत् ।
वासारसेनयामैकंतैलेकुर्य्याच्चपिष्टिकाम् ॥ १२ ॥

अर्थ-पुरानेलोहेको वारंवार आगमें तपाकर वारंवारगोमूत्रमें बुझावे, फिर चूर्णकर मधु और घीमें मिला भातके साथ सेवनकरनेसे अग्नि दीपन होतीहै, जठराग्नि उत्पन्न होतीहै तथा सूजन और पाण्डुरोग दूर होता है ॥ १० ॥ ११ ॥ १२ ॥

अपक्कांकारयेन्मूषामुन्नतांद्वादशाङ्गुलाम् ।
तन्मध्येगंधकंशुद्धंक्षिपेत्पलचतुष्टयम् ॥ १३ ॥
पूर्वोक्ताञ्चक्रियांचक्रेदत्त्वारुद्ध्वापुटेल्लघु ।
जीर्णगंधेसमुद्धृत्यचक्रिकांतांविचूर्णयेत् ॥ १४ ॥
चूर्णाद्दशगुणंयोज्यंमृतलोहंचमर्दयेत् ।
लशुनस्यदशांशेनचणमात्रावटीकृता ॥ १५ ॥
वातपाण्डुहरःसिद्धोरसःसिन्दूरभूषणः ।
पिबेच्चानुह्यपामार्गरुबुकस्यचमूलिकाम् ॥ १६ ॥

तक्रैःपिष्ट्वाचकर्षैकंहन्तिपाण्डुंसकामलम् ॥ १७ ॥

इतिसिन्दूरभूषणोरसः ।

अर्थ–शुद्धपारा चार तोले, सिन्दूर चार तोले इन दोनोंको बाँसाके रसमें एकप्रहर खरलकर तेलमें पिट्ठीबनावे, पश्चात् बारह अंगुलकी कच्चीघडीया बनाकर तिसके बीचमें चारपल शुद्धगंधक रखे,फिर पूर्वोक्त द्रव्य रक्खे, पश्चात् लघुपुटमें फूँकदेवे, जब गंधककी भस्म होजावे तब उसद्रव्यको निकाल कर चूर्ण करले, फिर इस चूर्णसे दसगुनी लोहेकी भस्म मिलाकर लहसुनके रसमें मर्दन कर चनेकी बराबर गोलीबनावे तो वातजपांडुरोगनाशक सिन्दूरभूषणरस सिद्धहो । इसको खाकर फिर ऊपरसे चिरचिटा और अंडकी जडको छाछमें पीसकर एक तोलेभर पीवे तो कामलासंयुक्तपांडुरोग दूर होवे ॥ १३ ॥ १४ ॥ ॥ १५ ॥ १६ ॥ १७ ॥

पंचकोलंसमरिचंदेवदारुफलत्रिकम् ।
विडंगमुस्तयुक्ताश्चभागास्त्रिपलसम्मिताः ॥ १८ ॥
यावत्येतानिचूर्णानिमण्डूराद्द्विगुणंततः ।
पक्त्वाचाष्टगुणेमूत्रेघनीभूतेतदुद्धरेत् ॥ १९ ॥
ततोमात्रान्वटकान्पिबेत्तक्रेणतक्रभुक् ।
पाण्डुरोगंजयत्येषमन्दाग्नित्वमरोचकम् ॥ २० ॥
अर्शांसिग्रहणीदोषमूरुस्तम्भमथापिवा ।
कृमीन्प्लीहानमुदरंगलरोगंचनाशयेत् ॥ २१ ॥
मण्डूरवज्रनामेदंरोगानीकप्रणाशनम् ॥ २२ ॥

इति मण्डूरवज्रम् ।

अर्थ–पीपल, पीपलामूल, चव्य, चीता, सोंठ, कालीमिरच, देवदारु, त्रिफला, वायविडंग, और नागरमोथा यह प्रत्येक बारह बारह तोले लेवे, फिर सबका चूरन कर चूर्णसे दुगुना मंडूर (लोहेकामल) मिलावे, तदनन्तर इसको आठगुने गोमूत्रमें पकावे,जब पकतेर गाढा होजावे तब उतारकर एक २ तोलेभरकी गोलीबनालेवे, एक गोली मट्ठेके साथखावै और मट्ठेहीको भोजनके साथ खावे तो पाण्डुरोग, मंदाग्नि, अरुचि, बवा-

सार, संग्रहणी, ऊरुस्तम्भ, कृमि, प्लीहा, उदररोग और गलरोग दूरहोवे। यह मंडूरवज्रनामवाला रस रोगोंके समूहोंको दूर करताहै ॥ २२ ॥

पुनर्नवात्रिवृच्छुण्ठीपिप्पलीमरिचानिच।
विडंगंदेवकाष्ठञ्चाचित्रकंपुष्कराह्वयम् ॥ २३ ॥
त्रिफलाद्वेहरिद्रेचदन्तीञ्चचविकान्तथा।
कुटजस्यफलंतिक्तापिप्पलीमूलमुस्तकम् ॥ २४ ॥
एतानिसमभागानिमंडूरंद्विगुणंततः।
गोमूत्रेऽष्टगुणेपक्त्वास्थापयेत्स्निग्धभाजने ॥ २५ ॥
पाण्डुशोथोदरानाहशूलार्शःकृमिगुल्मनुत् ॥ २६ ॥

इति पूनर्नवामंडूरः।

अर्थ-पुनर्नवा, निसोत, सोंठ, पीपल, कालीमिरच, वायविडंग, देवदारु, चीता, पोहकरमूल, त्रिफला, हलदी, दारुहलदी, दंती, चव्य, इन्द्रजव, कुटकी, पीपरामूल और नागरमोथा यह सब समानभाग और इन सबसै दुगुना मंडूर लेवे, पश्चात् सबको आठगुने गोमूत्रमें औटाकर चिकने बरतनमें भरके रखदेवे। यह रस-पाण्डु, सूजन, उदररोग, आनाह, शूल, बवासीर, क्रिमि और गुल्मको दूर करेहै ॥ २६ ॥

त्र्यूषणत्रिफलामुस्तविडंगचित्रकाःसमाः।
नवायोरजसोभागास्तच्चूर्णमधुसर्पिषा ॥ २७ ॥
भक्षयेत्पाण्डुहृद्रोगक्षयार्शःकामलापहम् ॥ २८ ॥

इतिनवायसंलौहम्।

अर्थ-त्रिकुटा, त्रिफला, नागरमोथा, वायविडंग, और चीता यह सब समान भाग लेवे, और नवीन लोहेका चूर्ण आठभाग लेवै, पश्चात् सबको एकत्रकर शहदके और घीके साथ खानेसे पांडुरोग, हृदयरोग, क्षय, बवासीर, और कामलारोग दूर होता है ॥ २८ ॥

त्रिफलायास्त्रयोभागास्त्रयस्त्रिकटुकस्यच।
भागाश्चित्रकमूलस्यविडंगानान्तथैवच ॥ २९ ॥
पंचाश्मजतुनोभागास्तथारूप्यमलस्यच।

माक्षिकस्यचशुद्धस्यलोहस्यरजसस्तथा ॥ ३० ॥
अष्टौभागाःसितायाश्चतत्सर्वंश्लक्ष्णचूर्णितम् ।
माक्षिकेणाप्लुतिस्थाप्यमायसेभाजनेशुभे ॥ ३१ ॥
उदुम्बरसमांमात्रांततःखादेद्यथाग्नि ना ।
दिनेदिनेप्रयोक्तव्यंजीर्णेभोज्यंयथेप्सितम् ॥ ३२ ॥
वर्जयित्वाकुलत्थांश्चकाकमाचीकपोतकान् ।
योगराजइतिख्यातोयोगोऽयममृतोपमः ॥ ३३ ॥
रसायनमिदंश्रेष्ठंसर्वरोगहरंपरम् ।
पाण्डुरोगंविषंकासंयक्ष्माणंविषमज्वरम् ॥ ३४ ॥
कुष्ठान्यजरकंमेहंश्वासंहिक्कामरोचकम् ।
विशेषाद्धन्त्यपस्मारंकामलांगुदजानिच ॥ ३४ ॥
त्रयोभागामिलित्वारूप्यमलम्।रजतनिर्गतशिलाजतु केचिदाह॥

इतिनिश्चलकरः ।

तल्लक्षणंरसायनेबोध्यम् । त्रिविक्रमदेवस्त्वाह ।
रूप्यमलाभावेलोहमलस्यव्यवहारः । तदुक्तं
सुवर्णमथवारूप्यंयोगयुक्तंनसम्भवेत् ।
तत्रलोहेनकार्यंचभिषक्कुर्याद्विचक्षणः ।

इतिरूप्याभावेलोहम् ।

तदातन्मलाभावेतन्मलंग्राह्यम् । माक्षिकस्यसुवर्णमाक्षिकस्य।
उदुम्बरंकर्षःमधूनान्तुमाषकचतुष्टयंभक्ष्यम् । नापुरुषः ।

इतियोगराजलोहम् ।

अर्थ—तीनभाग त्रिफला, तीनभाग त्रिकुटा, चीतेकी जड़ तीनभाग, तीनभाग वायविडंग, शिलाजीत, रूपेका मैल, शुद्धसोनामाखी और लोहेका चूर्ण प्रत्येक पांच भाग, और सफेद बूरा आठ भाग, सबको एकत्र पीस बारीक चूर्ण बनावे । पीछे इस चूर्णमें सहत मिलाकर उत्तमलोहेके बरतनमें भरकै रखदेवे, फिर एकतोलाभर प्रतिदिन

अग्निका बलाबलविचारकर भक्षण करे, और जीर्ण होजानेपर यथेष्ट भोजन करे, इसपै कुलथी, मकोय और कबुतरका मांस नखावे, यह योगराज अमृतकी समानहै, रसायन सर्वरोगनाशक, तथा पांडुरोग, विष, खाँसी, राजयक्ष्मा, विषमज्वर, कुष्ठ, अजीर्ण, प्रमेह, श्वाँस, हुचकी, अरुचि, विशेषकरकै अपस्मार, कामला और बवासीरको दूर करैहै ३५॥

मूर्वातिक्तानिशायासकृष्णचन्दनपर्पटैः ।
त्रायन्तीवत्सभूनिम्बपटोलाम्बुददारुभिः ॥ ३६ ॥
अक्षमात्रैर्घृतप्रस्थःसिद्धःक्षीरचतुर्गुणः ।
पाण्डुताज्वरविस्फोटश्रोत्राशोंरक्तपित्तनुत् ॥ ३७॥

इतिमूर्वाद्यंघृतम् ।

अर्थ-मूर्वा (चुरनहार), कुटकी, हलदी, जवासा, पीपल, चंदन, पित्तपापडा, त्रायमान, कुडेकीछाल, चिरायता, परवल, नागरमोथा और देवदारु यह सब समानभागलेवे, पश्चात् सबका कल्क बनावे, परंतु कल्क तोलमें सेरभरहो घृतचारसेर, और दूध १६ सोले सेर लेवे, फिर घृत सिद्ध करे । यह घृत-पांडुरोग,ज्वर विस्फोटक, कर्ण, बवासीर और रक्तपित्तको दूर करेहै ॥ ३७ ॥

दार्वीसत्रिफलाव्योषविडंगान्ययसोरजः ।
मधुसर्पिर्युतंलिह्यात्कामलापांडुरोगवान् ॥ ३८ ॥
सर्वचूर्णसमंलौहंसर्वनवायसादिवत् ॥ ३९ ॥

इतिदार्व्यादिलोहम् ।

अर्थ-दारुहलदी, त्रिफला, त्रिकुटा, वायविडंग और लोहेका चूर्ण इन सबका एकत्रकर चूर्णकरे, पश्चात् सहत और घृत मिलाकर चाटेतो कामला और पाण्डुरोग दूरहो । इसमें सर्वचूर्णकी बराबर लोहेका चूरन डाले ॥ ३८ ॥ ३९ ॥

धात्रीलोहरजोव्योषसिताक्षौद्राज्यशर्करा ।
लीढानिवारयत्याशुकामलामुद्धृतामपि ॥ ४० ॥
मधुघृतमवलेह्यंद्राव्यादिलौहवत् ॥ ४१ ॥

इतिधात्रिलोहम् ।

अर्थ-आमला, त्रिकुटा, शिलाजीत और शर्करा यह प्रत्येक एक एक भाग और लोहेका चूर्ण छै भाग लेवै, पीछे सबका चूर्णकर सहत और घृत मिलाकै चाटनेसे घोरकामलारोग दूर होताहै ॥४०॥४१॥

विडंगमुस्तात्रिफलादेवदारुषडूषणैः।
तुल्यमात्रमयश्चूर्णगोमूत्रेऽष्टगुणेपचेत् ॥ ४२ ॥
तैरक्षमात्रांगुटिकांकृत्वाखादेद्दिनेदिने।
कामलापाण्डुरोगार्तःसुखमाप्यतेचिरात् ॥ ४३ ॥
लोहात्सर्वत्रचूर्णादेवगोमूत्रमष्टगुणम्।
सिद्धेचूर्णप्रक्षेपइतिनिश्चलः।
दत्त्वाचपाकइतित्रिविक्रमः। लोहान्तरवत्कवलम्।

इतिविडंगादिलौहगुटिका।

अर्थ-वायविडंग, नागरमोथा, त्रिफला, देवदारू, सोंठ, मिरच, पीपल, पीपरामूल, चव्य, चीता यह सब समानभागलेवे और इन सबकी समान लोहेका चूर्णलेवे, पश्चात् सबको मिलाकर, आठगुने गोमूत्रमें पकावे, जब सिद्ध होजाय तो दोदो तोलभरकी गोली बनालेवे, एकगोली प्रतिदिन खावे। यह गोली कामला और पांडुरोगको दूर करेहै ॥४३॥

शुद्धसूतंसमंगन्धंमृतताम्रञ्चगुग्गुलुम्।
मृतायसञ्चगंधञ्चमृतताम्राभ्रगुग्गुलुम् ॥ ४४ ॥
जैपालबीजतुल्यांशंघृतेनगुटिकांकुरु।
भक्षयेद्बदराण्डाभांशोथपांडुप्रशान्तये ॥ ४५ ॥
पंचाननावटीख्याताअनुपानञ्चपूर्ववत् ॥ ४६ ॥

इति पंचाननावटी।

अर्थ-शुद्धपारा, गंधक, मृतताम्बा, गूगल, मृतलोहा यह सब समान-भाग लेवे और सबकी बराबर जमालगोटालेवे, पश्चात् सबको घीमें खरलकरकै गोली बनालेवे। इन गोलियोंको खानेसे सूजन और पांडु-रोग दूर होताहै ॥ ४६ ॥

मुस्तामृताकणायष्टीवह्निशुण्ठीफलत्रयम् ।
विडंगंचसमंचूर्णंसर्वांशंमृतलोहकम् ॥ ४७ ॥
मधुनाभक्षयेन्निष्कंपाण्डुरोगहरंपरम् ।
अयंलोहामृतंनामस्वयमग्निरसोपिवा ॥ ४८ ॥

इतिलोहामृतम् ।

अर्थ—नागरमोथा, गिलोय, पीपल, मुलेठी, चीता, सोंठ, त्रिफला और वायविडंग इन सबका चूर्ण समानभाग और सब चूर्णकी बराबर मृतलोहा लेवे, फिर सबको एकत्रकर मधुके साथ चारमासेभर खावेतो पांडुरोग दूर होता है, इसको लोहामृत और स्वयमग्निरस कहते हैं॥४८॥

कोकिलायाश्चबीजानिगुडूचीनागरैःसह ।
पयसाक्काथितंरात्रौपाचनंपांडुरोगिणाम् ॥ ४९ ॥

अर्थ—तालमखानेके बीज, गिलोय और सोंठ इनको दूधमें औटाकर रात्रिमें पीनेसे पांडुरोग आराम होताहै ॥ ४९ ॥

मण्डूरंचूर्णितंश्लक्ष्णंगोमूत्रेष्टगुणेपचेत् ।
त्र्यूषणंत्रिफलामुस्तंविडङ्गंश्चव्याचित्रकम् ॥ ५० ॥
दार्वीग्रान्थिदेवदारुतुल्यंसर्वंविचूर्णयेत् ।
चूर्णमण्डूरतुल्यंचपाककालेविमिश्रयेत् ॥ ५१ ॥
भक्षयेत्कर्षमात्रञ्चजीर्णान्तेतक्रभोजनम् ।
हलीमकंपांडुशोथमुरुस्तम्भञ्चकामलाम् ॥ ५२ ॥
अर्शांसिहन्तिशीघ्रञ्चहंसमण्डूरकोह्ययम् ॥ ५३ ॥

इति हंसमंडूरः ।

अर्थ—मंडूरको आठगुने गोमूत्रमें पकावे, जब पकते २ गाढा होजाय तब इसमें सोंठ, मिरच, पीपल, हड़, बहेडा, आमला, नागरमोथा, वायविडंग,चव्य, चीता, दारुहलदी, पीपरामूल और देवदारु इनसबका चूर्ण समानभाग और सबचूर्ण मंडूरकी समान मिलादेवे, दो तोलेभर खावे और इसके जीर्ण होजानेपर तक्रके साथ भोजनकरे । यह

हंसमंडूर- हलीमक, पांडु, सूजन, ऊरुस्तम्भ, कामला और बवासीरको दूर करैहै ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥

मुस्तैलापत्रकाणाश्चप्रतिसार्द्धपलंक्षिपेत् ।
त्र्यूषणंपिप्पलीमूलंविषंचैवपलंपलम् ॥ ५४ ॥
नागकेशरकर्षैकमेरण्डस्यपलन्तथा ।
पुरातनगुडेनैवतुल्येनैवविमिश्रयेत् ॥ ५५ ॥
मर्द्दयेत्कनकद्रावैर्यामैकंवाघृतान्वितम् ।
गुटिकांबदराण्डाभांकारयेद्भक्षयेन्निशि ॥ ५६ ॥
शोथपाण्डुहरःसोऽयंरसःकामेश्वरःस्वयम् ॥ ५७ ॥

इति कामेश्वररसः।

अर्थ-नागरमोथा,इलायची और तेजपत्र प्रत्येक छै छै तोले, पीपल, सोंठ, मिरच, पिपरामूल,और विष प्रत्येक चार चार तोले,नागकेशर दो तोले और अंडकी जड चार तोले लेवे, सबको एकत्रकर चूर्ण बना सब चूर्णकी बराबर पुरानागुड मिलाकर एकप्रहर धतूरेके रसमें अथवा घृतमें मर्दनकरकै बेरकी गुठलीकी बराबर गोली बनालेवे। इस कामेश्वररसको रात्रिमें खानेसै सूजन और पांडुरोग विनष्ट होता है॥५४॥५५॥५६॥५७

मंडूरस्यपलान्यष्टौगोमूत्रेष्टगुणेपचेत् ।
पुनर्नवात्रिवृद्व्योषंविडंगंदेवदारुकम् ॥ ५८ ॥
द्विनिशेपुष्करंवह्निर्दन्तीचव्यंफलत्रिकम् ।
कुटजस्यफलंतिक्तापिप्पलीमूलमुस्तकम् ॥ ५९ ॥
विषश्चप्रतिकर्षस्याच्चूर्णयित्वाविमिश्रयेत् ।
मण्डूरस्यचपाकान्तेअक्षमात्रावटीकृता ॥ ६० ॥
पांडुशोथज्वरानाहशूलार्शःकृमिगुल्मनुत् ।
इत्येवंसिद्धमण्डूरंसर्वरोगविनाशकृत् ॥ ६१ ॥

इति सिद्धमण्डूरः।

अर्थ-आठपल मंडूरको अठगुने गोमूत्रमें पकावे जब गाढा हाजाय

तब पुनर्नवा (सांठ) निसोत, सोंठ, मिरच, पीपल, वायविडंग, देवदारु, हलदी, दारुहलदी, पोहकरमूल, चीता, दंती, चव्य, हरड, बहेड़ा, आमला, इंद्रजव, कुटकी, पीपरामूल, नागरमोथा और विष प्रत्येक दोदो तोले लेवै, फिर सबका एकत्रचूर्णकर मिलादेवे, जब सिद्ध होजायतो दोदो तोलेभरकी गोली बनालेवे। प्रतिदिन एकगोली खावे यह सिद्धमंडूर-पांडु, सूजन, ज्वर, आनाह, शूल, बवासीर, कृमि, गुल्म और सर्वरोगनाशक है ॥ ६० ॥

विण्मूत्रनयनादीनांरूक्षकृष्णारुणाभता ।
वातपाण्ड्वामयेकम्पस्तोदानाहभ्रमादयः ॥ ६२ ॥

इतिवाते ।

पीतमूत्रशकृन्नेत्रदाहतृष्णाज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभःपित्तपाण्ड्वामयीनरः ॥ ६३ ॥

इतिपित्ते ।

कफप्रसेकःश्वयथुस्तन्द्रालस्यातिगौरवैः ।
पाण्डुरोगीकफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ ६४ ॥

इतिकफे ।

ज्वरारोचकहृल्लासतृष्णाछर्दिक्रमान्वितः ।
पाण्डुरोगीत्रिभिर्दोषैस्त्याज्यः क्षीणोहतेन्द्रियः ॥ ६५ ॥
पाण्डुदन्तनखोयस्तुपांडुरोगःसुदुःसहः ।
जायतेकृमिकुष्ठश्वसातिसारंकफंभ्रमम् ॥ ६६ ॥
शूनाक्षिकुटगंडभ्रूःशूनपान्नाभिमेहनः ।
कृमिकोष्ठोतिसार्य्यंतमलंसास्रकफान्वितः ॥ ६७ ॥

अर्थ-विष्ठा, मूत्र और नेत्र रूखे, काले और लालरंगकेहो, कम्प, पीड़ा, आनाह और भ्रम इत्यादि विकारोंकी उत्पत्तिहो तो वातजपांडुरोग जानना। विष्ठा, नेत्र और मूत्र यह सब पीलेरंगके होजाँय, दाह, तृष्णा, ज्वर और भेदहो, तथा शरीर पीतवर्णहो तो पित्तजपांडुरोग

जानना। कफस्राव, सूजन, तन्द्रा, आलस्य, शरीर भारीहो, और चर्म्म, मूत्र, नेत्र, और मुख श्वेतवर्णहो तो कफजपांडुरोग जानना। और ज्वर, अरुचि, हृल्लास, तृषा, वमन, ग्लानि, दुर्बलता और इन्द्रियें कमजोर होजावे तो असाध्य त्रिदोषजपांडुरोग जानना। जिस पांडुरोगीके नख और दाँत पांडुरंगके होजावे, कोठेमें कृमि पड़जाय, कफ और रुधिर-संयुक्त वारंवार पतला मल उतरे, भ्रमहो, नेत्रोंपै सूजनहो, कपोल और भ्रकुटी टेढ़ी होजावे, पांव, नाभि और लिंगपै सूजनहो, ऐसा पांडुरोगी असाध्य जानना ॥ ६७ ॥

शुद्धसूतंहेमतारंताम्रंतुल्यञ्चमर्दयेत् ।
जम्बीरनीरसंयुक्तमातपेमर्दयेद्दिनम् ॥ ६८ ॥
सर्वतुल्यंपुनःसूतंलिप्त्वापिष्टिंप्रकल्पयेत् ।
धत्तूरफलमध्यस्थंदोलायंत्रेत्र्यहंपचेत् ॥ ६९ ॥
धत्तूराच्छद्रवैरेवभांडेचूर्णंप्रपाचयेत् ॥
आदायबन्धयेद्वस्त्रेइष्टिकायंत्रगंपचेत् ॥ ७० ॥
जम्बीरैर्गंधकंपिष्ट्वाअधऊर्द्ध्वंप्रदापयेत् ।
तुल्यंतुल्यंपुनर्देयंरुद्ध्वालघुपुटेपचेत् ॥ ७१ ॥
शतधागंधकेजीर्णेतदुद्धृत्यविचूर्णयेत् ।
लोहभस्मसमांशंचदत्त्वामर्द्यंद्रवैर्दिनम् ॥ ७२ ॥
कण्टकार्य्याबृहत्याश्चतथाग्नीनांद्रवैरपि ।
प्रतिदिवैर्दिनंमर्द्यंपुटेत्पंचाभिरुपलैः ॥ ७३ ॥
एवंनवपुटंदेयंद्रावेद्रावेत्रिधात्रिधा ।
वह्न्यर्कचिरबिल्वानांद्रवैर्द्वित्रिपुटेपचेत् ॥ ७४ ॥
अन्धमूषागतंपच्यादादायचूर्णयेत्पुनः ।
दशांशेनविषंयोज्यंगुंजामात्रंप्रयोजयेत् ॥ ७५ ॥
कालविध्वंसनोनामरसःपाण्ड्वामयापहः ॥ ७६ ॥

इतिकालविध्वंसनोरसः ।

अर्थ-शुद्धपारा,सोना,रूपा,ताँबा यह सब समानभाग लेकर खरल करे, फिर धूपमें धरके एकदिन जम्भीरी नीबूके रसमें खरल करे, पश्चात् इन सबकी बराबर पारा मिलाकर पिट्ठी बनालेवे,फिर धतूरेके फलके बीचमें इस पिट्ठीको रख दोलायंत्रमें तीनदिन पकावे, पश्चात् चूर्णकर धतूरेके रसमें खरलकरके भांड़में रख पकावे, फिर वस्त्रमें बाँधकर इष्टिका-यंत्रमें पकावे, पीछे जम्बीरी नीबूके रसमें गंधकको मर्दनकर मूषाके ऊपर और नीचे रख उसके बीचमें उपरोक्तद्रव्यको रखे, तदनन्तर मूषाका मुख बंदकर लघुपुटमें पकावे, जब सौवार गंधक जीर्णहोजावे तब उस मूसामेंसे निकालकर चूर्ण करले, पश्चात् इस चूर्णमें बराबरकी लोहेकी भस्म मिलाकर कटेरी, कटाई और चीतेके रसमें एक एक दिन खरल करे, फिर पांच उपलोंकी पुटमें पकावे, ऐसी नोपुट देवे, तदनन्तर चीता, आक, करंज, और बेलके पत्तोंके रसमें खरलकर तीन पुट देवे, फिर अंधमूषामें पकावे, पश्चात् मूषामेंसे निकालकर चूर्ण बना लेवै, चूर्णमें दशमाभाग विष मिला देवे। मात्रा १ एक रत्तीकीहै । यह कालविध्वंसन रस-पाण्डुरोगको नष्ट करेहै ॥ ७६ ॥

टंकणंजारितंस्वर्णंशुल्वंशंखंमृतंरसः
दिनैकंचार्द्रकद्रावैर्मर्द्यंरुद्ध्वापुटेपचेत् ॥ ७७ ॥
त्रिनेत्राख्योरसोनामअसाध्यंश्वयथुंजयेत् ।
शूलगुल्ममथार्शांसिनाशयत्याशुदेहिनाम् ॥ ७८ ॥

इतित्रिनेत्राख्योरसः ।

अर्थ-भुनाहुवा सुहागा, सोना, तांबा, शंख और मराहुवा पारा इन सबको समानभाग लेकर एकदिन अदरखके रसमें खरलकर पुटपाक करेतो त्रिनेत्राख्यरस सिद्धहो, यहरस-असाध्य शोथ, शूल, गुल्म और बवासीरको दूर करेहै ॥ ७८ ॥

अथकामलाहलीमकयोश्चिकित्सामाह ।

निशागैरिकधात्रीभिरंजनंकामलापहम् ।
अपामार्गंशमीमूलंपिष्ट्वातक्रेणपाचयेत् ॥ ७९ ॥
कामलांश्वयथुंपांडुंकर्षमात्रंनिनहन्त्यलम् ।

शिलाजतुसगोमूत्रंमंडूरंवाथमाक्षिकम् ॥ ८० ॥
सुलोहभस्मस्यनिष्कंवासेवयेत्कुम्भकामली ॥ ८१ ॥
अंकोटमूलमर्कमूलंवातंडुलोदकेनापिष्ट्वानस्यंदेयं
कामलानश्यति।घोषफलेनवा। देवदाल्युदकं
रात्रौकार्य्यंप्रभातेनस्यंतत्कामलांहरति।
कुमारीकंदकंपिष्ट्वानस्यंशीतलवारिणा।
एवंसप्तदिनंकार्य्यंकामलांहन्तिदुस्तराम् ॥ २ ॥

इतिग्रन्थान्तरे।

अर्थ-हलदी, गेरू और आमला इनतीनोंका अंजन बनाकर नेत्रोंमें लगानेसै कामलारोग दूर होताहै। चिरचिटेकी जड और शमीकी जडको तक्रमें पीसकर पीनेसै कामला, सूजन और पांडुरोग नष्ट होताहै, इसकी मात्रा दोतोलेकी है। शिलाजीतको गोमूत्रके साथ, अथवा मंडूरको सहतके साथ वा लोहेकी भस्मको सेवनकरनेसै कुम्भकामलारोग दूर होताहै। अंकोलकी जडको अथवा आककी जडको चावलोंके जलमें पीसकर नास लेनेसै कामलारोग शांत होताहै।देवदालीके रसको रात्रिमें रखकर प्रभातके समय नास लेनेसै कामलारोग दूर होता है। घीकुवारको शीतलजलमें पीसकर सातदिनतक नास लेनेसै घोरकामला रोग दूर होताहै ॥ ८२ ॥

विडंगंत्रिफलांव्योषंशुद्धंलोहमलस्यच।
पुरातनगुडेनात्रलेहयेद्दिनपूर्वकम् ॥ ८३ ॥
श्वयथुंनाशयेत्क्षिप्रंपांडुरोगंहलीमकम् ॥।
मूलंसंगृह्यकाश्मर्य्याःपिष्ट्वातण्डुलवारिणा ॥ ८४ ॥
पानंतेनोदकेनैवकामलांहन्तिसज्वराम्।
अपामार्गमूलंतक्रेणपानात्कामलांहान्ति ॥ ८५ ॥
श्वेतापराजितामूलंमधुदुग्धेनापिष्ट्वापानात्कामलांहन्ति
विच्छातीमूलंपूर्वदिक्स्थंशनौनिमंत्र्यरवौआनीयरक्तसू-

त्रेणशिरसिबंधनाच्छोथकामलांहन्ति।त्रिफलामधुगुडं
आर्द्रकरसेनपानाच्छोथकामलांहन्ति।
गोरोचनाद्रोणपुष्पेणचक्षुरञ्जनात्तथा
विष्णुक्रान्तामूलपानात्सप्ताहेनकामलांहन्ति ॥ ८६ ॥

इति हरमेखलायाम्।

अर्थ–वायविडंग, त्रिफला,त्रिकुटा और शुद्धलोहेका मैल इनको पुराने गुडमें मिलाकर खानेसे-सूजन, पांडु और हलीमकरोग दूर होताहै।कुम्भेरकीजडको चावलोंके जलमें पीसकर चावलोंके जलके साथ पीनेसे ज्वरयुक्त कामलारोग दूर होता है। चिरचिटेकी जडको तक्रके साथ पीनेसै कामला रोग दूर होताहै।सफेदकोयलकी जडको सहत और दूधमें पीसकर पीनेसै कामलारोग नष्ट होताहै।पूर्वदिशामें स्थित विछाती (वंग भाषामें बिछाटी)की जडको शनैश्चरके दिन नौतआवे और रविवारके दिन जाकर उखाडलावे; फिर लालसूतके द्वारा शिरपै बांधे तो सूजनसंयुक्त-कामलारोग दूर होजाय। त्रिफला, मधु और गुडको अदरखके रसमें मिला कर सेवनकरनेसै सूजनसहित कामलारोग शांत होताहै। गोलोचन और गूमाको पानीमें पीसकर आंखोंमें लगानेसै कामलारोग आराम होताहै। अथवा कोयलकी जडको सातदिनपर्य्यंत पानीके साथ पीनेसै कामलारोग नाश होताहै ॥ ८६ ॥

मृतसूतार्ककान्ताभ्रतीक्ष्णंतालंसमाक्षिकम्।
देवदालीद्रवैःपिष्टंदिनैकंतत्समंसमम् ॥ ८७ ॥
पाचयेद्वालुकायंत्रेत्रिदिनान्तेसमुद्धरेत्।
अमृतोत्पलकन्दातिबलाक्षेत्रफलंयुतम् ॥ ८८ ॥
पिष्टंयष्ट्यम्भसायामंयामंक्षौद्रासितासमम्।
रसःपंचास्यनामायंसेवयेत्कुम्भकामली ॥ ८९ ॥

इति पंचास्यरसः।

अर्थ–पारेकीभस्म, तांबा,कान्तलोहा, अभ्रक, इस्पात, हरिताल और सोनामाखी इन सबको एकदिन देवदालीके रसमें पीसकर तीन दिन

वालुकायंत्रमें पकावे, फिर इसमें गिलोय, कुमुदकी जड, खिरैटी, और गूगलका चूर्ण मिलाकर मुलेठीके रसमें एकप्रहर मर्दनकरे, पीछे समानभाग मिश्री और सहत मिलालेवे, इस पंचास्यरसको सेवन करने से–कुम्भकामलारोग दूर होताहै ॥ ८७ ॥ ८८ ॥ ८९ ॥

इति पांडुरोगाधिकारसमाप्त ।

अथ रक्तपित्तचिकित्सामाह ।

नोतिक्रमादौसंग्राह्यंबलिनोऽप्यश्नतश्चयत् ।
हृत्पांडुग्रहणीदोषप्लीहगुल्मज्वरादिकृत् ॥ १ ॥
क्षीणमांसबलंबालंवृद्धंशोथानुबन्धिनम् ।
अवश्यमविरेच्यश्चस्तम्भनैःसमुपाचरेत् ॥ २ ॥
ऊर्द्धप्रवृत्तदोषस्यपूर्वंलोहितपित्तिनः ।
अक्षीणबलमांसाग्नेःकर्त्तव्यमपतर्पणम् ॥ ३ ॥
विनाशुण्ठींषडंगेनदद्याच्चार्द्धंशृतंजलम् ।
केवलंशृतशीतंवादद्यात्तोयंपिपासवे ॥ ४ ॥
ऊर्द्धगेतर्पणंपूर्वंकर्तव्यश्चविरेचनम् ।
प्रागधोगमनेपेयाश्मनश्चयथाबलम् ॥ ५ ॥
तर्पणंसघृतंक्षौद्रंलाजचूर्णैःप्रदापयेत् ।
ऊर्द्धगंरक्तपित्तन्तुपीतंकालेव्यपोहति ॥ ६ ॥
जलंखर्जूरमृद्वीकामधुकैःसपरूषकैः ।
शृतंशीतंप्रयोक्तव्यंतर्पणार्थंसशर्करम् ॥ ७ ॥
आरग्वधेनधात्र्यावात्रिवृतापथ्ययाथवा ।
विरेचनंप्रयोक्तव्यंशर्करामाक्षिकोद्भवम् ॥ ८ ॥
त्रिवृतात्रिफलाश्यामापिप्पलीशर्करामधु ।
मोदकःसन्निपातोर्द्धरक्तपित्तज्वरापहः ॥ ९ ॥
वमनंमदनोन्मिश्रंमन्थःसक्षौद्रशर्करः ।

शालियष्टिकनीवारकरदूषप्रशान्तिका ॥ १० ॥
श्यामाकश्चप्रियंगुश्चभोजनंरक्तपित्तिनाम् ।
मसूरमुद्गचणकाःसमकुष्टाढकीफलाः ॥ ११ ॥
प्रशस्तासूपयूषार्थंकल्पितारक्तपित्तिनाम् ।
शाकंपटोलवेतानतण्डुलीयादिकंहितम् ॥ १२ ॥
मांसंलावकपोतादिशशैणहारिणादिजम् ।
वृषपत्राणिनिष्पीडचरसंसमधुशर्करम् ॥ १३ ॥
पिबेत्तेनशमंयातिरक्तपित्तंसुदारुणम् ।
शतपर्व्यारसंक्षौद्रंखण्डश्चैवसमंसमम् ॥ १४ ॥
आज्येनपयसापीतंरक्तपित्तनिबर्हणम् ॥ १५ ॥
वासाकषायोत्पलमृत्प्रियङ्गुलोध्राञ्जनाम्भोरुहकेशराणि।
पीत्वासिताक्षौद्रयुतानिहन्यात्पित्तासृजोवेगमुदीर्णमाशु
प्रक्षेपणार्थंनीलोत्पलादीनांचूर्णानांमधु
शर्करयोश्चमिलित्वा ४ माषकाः ।
तालीशचूर्णसंयुक्तःपेयःक्षौद्रेणवासकःस्वरसः ।
कफपित्ततमकश्वासस्वरभेदास्रपित्तहरः ॥ १७ ॥
अभयामधुसंयुक्तादीपनीपाचनीमता ।
श्लेष्माणंरक्तपित्तंचहान्तिशूलातिसारनुत् ॥ १८ ॥

अर्थ–रक्तपित्तरोगमें बलवान् मनुष्यकोभी प्रथम तिक्तद्रवोंका सेवन नहीं करावे, कारण यह है कि तिक्तपदार्थोंके सेवनकरनेसे हृद्रोग, पांडु, संग्रहणी, प्लीहा, गुल्म और ज्वरादिरोग उत्पन्न होते हैं। क्षीणमांस, दुर्बल, बालक, वृद्ध और शोथसंयुक्तरक्तपित्तवाले रोगीको कदापि विरेचन (जुल्लाब) नहीं करावे, स्तम्भनक्रियाके द्वारा चिकित्सा करे। बल, मांस और अग्नियुक्त ऊर्द्धगदोषसंयुक्त रक्तपित्त-वाले रोगीको प्रथम लंघन करावे और तृषा लगेतो सोंठके विना अर्द्ध-शृत षडंगजल देवे, अथवा अर्द्धावशिष्ट पकायाहुवा जलदेवे। ऊर्द्धगत

रक्तपित्तरोगमें प्रथम तर्पण और पश्चात् विरेचन कराना चाहिये। अधोगतरक्तपित्तरोगमें प्रथम पेया और पश्चात् वमन करानी चाहिये। खीलोंका चूर्ण, घृत और सहत मिलाकर बनाया हुवा, अथवा पिंडखजुर, मुलैठी, दाख और फालसा इनके काढेमें बूरा डालकर बनाया हुवा तर्पण, ऊर्द्धगतरक्तपित्तरोगमें देना चाहिये। अमलतास और आमलेके काढेमें बूरा और सहत डालकर अथवा निसोत, और हरड़के काढेमें बूरा और सहत मिलाकर तैय्यार किया हुवा विरेचन देना चाहिये। निसोत, त्रिफला, कालीसर और पीपल इनके चूर्णमें बूरा और सहत मिला मोदक बनाकर खानेसे सान्निपातिक ऊर्द्धगतरक्तपित्त और ज्वर नष्ट होताहै। मंथमें मैनफल, सहत और बूराको मिलाकर सेवनकरनेसे वमन होकर रक्तपित्त दूर होजाताहै। शालिधान साठीधान्य, नीवार, कोदों, प्रशान्तिका, समा और कंगनी इनसबका भात, मसूर, मूग, चने, मोठ, अडहर इनकी दाल वा यूष, परवल, वैंतका अग्रभाग और चौलाई आदिशाक, लवा, कबूतर, खरगोस, हिरन और एणमृगादिका मांस रक्तपित्तरोगमें हितकारीहै। अडूसेके रसमें बूरा और सहत मिलाकर पनिसे रक्तपित्तरोग शांत होताहै। दूबके रसमें बूरा और सहत डालकर बकरीके दूधके साथ पीनेसे रक्तपित्तरोग दूर होता है। अडूसेके काढ़ेमें कुमुद, (बबूला) सोरठकीमट्टी, फूलप्रियंगु, लोध, रसोत और कमलकेशरका चूर्ण मिला पश्चात् शर्करा और सहत डालकरपनिसे रक्तपित्तरोग शमन होताहै। अडूसेका काढा, तालीसपत्रके चूर्णके साथ और मधुके साथ पीनेसै—कफ, पित्त, तमक श्वास, स्वरभेद और रक्तपित्तरोग आराम होताहै। हरड़के चूर्णमें सहत मिलाकर खाना—दीपन, पाचन, कफ, रक्तपित्त, शूल और अतिसार निवारकहै ॥ १८ ॥

एलापत्रत्वचोद्राक्षाःपिप्पल्यर्द्धपलंतथा।
सितामधुकखर्जूरमृद्वीकाश्चपलोन्मिताः ॥ १९ ॥
संचूर्ण्यमधुनायुक्तांगुटिकांकारयेद्भिषक्।
अक्षमात्रांततश्चैकांभक्षयेन्नादिनेदिने ॥ २० ॥
कासंश्वासंज्वरंहिक्कांछर्दिंमूर्च्छांमदंभ्रमम्।
रक्तनिष्ठीवनंतृष्णांपार्श्वशूलमरोचकम् ॥ २१ ॥

शोषंप्लीहामवातांश्चस्वरभेदंक्षतक्षयम् ।
गुटिकातर्पणीवृष्यारक्तपित्तञ्चनाशयेत् ॥ २२ ॥

इतिएलादिगुटिका ।

अर्थ-इलायची, तेजपत्र, दालचीनी, दाख और पीपल यह प्रत्येक दो दो तोले, मिश्री, महुवा, खजूर, और किसमिस यह प्रत्येक चार चार तोले लेवै, पीछे सबका चूर्णकर सहत मिलाकै दोदो तोलेभरकी गोली बनालेवे, एकगोली रोज खानेसे- खाँसी, श्वाँस, ज्वर, हिचकी, वमन, मूर्छा, मद, भ्रम, रुधिरका थूकना, तृषा, पार्श्वशूल, अरुचि, शोष, प्लीहा, आमवात, स्वरभेद, क्षतक्षय, और रक्तपित्तरोग विनष्ट होताहै । और यह गोली- तृप्तिकारक और वृष्य है ॥ २२ ॥

नासाप्रवृत्तंरुधिरंघृतमृष्टंश्लक्ष्णपिष्टमामलकम् ।
सेतुरिवतोयवेगंनिरुणद्धिमूर्ध्निलेपेन ॥ २३ ॥
काञ्जिकेनपिष्टामलकमिति ।
नस्यंदाडिमपुष्पोत्थोरसोदूर्वाभवोथवा ।
आम्रास्थिजःपलाण्डोर्वानासिकास्रुतरक्तजित् ॥ २४ ॥
मेढ्रगेतिप्रवृत्तेतुबस्तिरुत्तरसंज्ञितः ।
शृतंक्षीरंपिबेद्वापिपंचमूल्यातृणाह्वया ॥ २५ ॥
रक्तातिसारिणंकर्म्मरक्तंस्यात्पायुगामिनम् ।
पित्तप्रायेऽधिकंसर्वमेढ्रगेचनियोजयेत् ॥ २६ ॥

अर्थ-घीमें भुनेहुवे आमलेको काँजीमें बारीक पीसकर मस्तकपै लेपकरनेसै नासिकासै रुधिरका निकलना बंद होजाताहै, जैसे पुलसे जलका वेग बंद होजाताहै । अथवा अनारके फूलकारस, वा दूबकारस, अथवा आमलेकी गुठलीरस, या प्याजके रसके द्वारा नास लेनेसै नाशिकासै रुधिरका गिरना बंद होजाताहै । लिंगसै रुधिर निकलतारहै ऐसे रक्तपित्तरोगमें उत्तर बस्तिकर्म्म कराना चाहिये । तृण पंचमूलीको दूधमें औटाकर पीनेसै अथवा रक्तातिसारोक्त चिकित्सा करनेसै गुदासै निकलताहुवा रुधिर बंद होजाहै । मेढ्र (लिंग) गत रक्तपित्तरोगमें पित्तनाशक चिकित्सा करनी कही है ॥ २६ ॥

शतावर्य्यास्तुमूलानांरसंप्रस्थद्वयंमतम् ।
तत्समंचभवेत्क्षीरंघृतप्रस्थंविपाचयेत् ॥ २७ ॥
जीवकर्षभकौमेदामहामेदास्तथैवच ।
काकोलीक्षीरकाकोलीमृद्वीकामधुकस्तथा ॥ २८ ॥
मुद्गपर्णीमाषपर्णीविदारीरक्तचंदनम् ।
शर्करामधुसंयुक्तंसिद्धंविस्रावयेद्भिषक् ॥ २९ ॥
रक्तपित्तविकारेषुवातरक्तगदेषुच ।
क्षीणशुक्रेषुदातव्यंवाजीकरणमुत्तमम् ॥ ३० ॥
अंगदाहंशिरोदाहंज्वरंपित्तसमुद्भवम् ।
योनिशूलंचदाहंचमूत्रकृच्छ्रंश्चपैत्तिकम् ॥ ३१ ॥
एतान्रोगान्निहन्त्याशुच्छिन्नाभ्राणीवमारुतः ।
शतावरीसर्पिरिदं बलवर्णाग्निदीपनम् ॥ ३२ ॥
स्नेहःपादःशृतःकल्कःकल्कवन्मधुशर्करे ।
इतिवाक्यबलात्स्नेहेप्रक्षेप्यंपादिकंभवेत् ॥ ३३ ॥

इति शतावरीघृतम् ।

अर्थ–शतावरकी जड़का रस४सेर,दूध४सेर,घी४सेर जीवक, ऋषभक, मेदा, महामेदा, काकोली, क्षीरकाकोली, दाख, मुलैठी, मुगवन, मषवन, विदारीकंद और लालचंदन इन सबका कल्क १ सेर सहत और घृत मिलाहुवा सेरभर लेवे, पश्चात् विधिपूर्वक घृतको सिद्धकरे । इस घृतको रक्तपित्त , वातरक्त और शुक्रकी क्षीणतामें देनाचाहिये, यह अत्युत्तम वाजीकरण है । तथा यह घृत– अंगदाह, शिरोदाह, पित्तज्वर, योनिशूल, दाह और पित्तोद्भवमूत्रकृच्छ्ररोगको दूर करैहै । यह शतावरीघृत-बल, वर्ण और अग्निको दीपन करे है ॥ ३३ ॥

तथाचबिन्दुसारे ।

वासादाडिमपुष्पस्यदूर्वारससमन्वितः ।
अलक्तकरसोपेतःपथ्यारससमन्वितः ॥ ३४ ॥

योजितोनस्यतःक्षिप्रंत्रिदोषमपिदेहिनाम् ।
नासारक्तप्रवृत्तन्तुहन्यादितिकिमद्भुतम् ॥ ३५ ॥

अर्थ–अडूसा, अनारका फूल, दूब, आल और हरड इनसबके रसको मिलाकर नास लेनेसे त्रिदोषसे उत्पन्नहुवा नासागत रक्तपित्त दूर होताहै ॥ ३५ ॥

वासकस्वरसेसर्पिःपयसासहपाचयेत् ।
कल्कैर्भूनिम्बकुटजमुस्तयष्ट्याह्वचंदनैः ॥ ३६ ॥
उदीच्यमधुकानन्ताशिरीषोशीरपद्मकैः ।
त्रायन्त्युत्पलमूर्वाभिर्मदयन्त्याश्चपल्लवैः ॥ ३७ ॥
सिताक्षौद्रयुतोहन्याद्रक्तपित्तंसुदारुणम् ।
पित्तंकासंचशूलंचस्वरभेदंहलीमकम् ॥ ३८ ॥
रक्तपित्तकफोद्भूतान्रोगानन्यांश्चनाशयेत् ॥ ३९ ॥
स्वरसचतुर्गुणंपयःस्नेहसमम् ।

इति बृहद्वासाघृतम् ।

अर्थ–घृत ४ सेर, अडूसेका रस १६ सेर, दूध ४ सेर, चिरायता, कुडेकीछाल, नागरमोथा, मुलैठी, चंदन,सुगंधवाला, महुवा, अनन्तमूल, सिरस, खस, पद्माख, त्रायमान, कमोदिनी, मुर्वा, और मोतियाके पत्ते इनसबका मिलाहुवा कल्क सेरभर,बूरा आदसेर,और सहत आदसेर लेवे, पश्चात् इन सबको मिलाकर विधिपूर्वक घृतको सिद्धकरे । इस घृतको सेवनकरनेसे दारुणरक्तपित्त, पित्त, खांसी, शूल, स्वरभेद, हलीमक, रक्तपित्त और कफसे उत्पन्न हुवे रोग विनष्ट होते हैं ॥ ३९ ॥

अश्वगंधापलशतंतदर्द्धंगोक्षुरस्यच ।
शतावरीविदारीचशालपर्णीबलातथा ॥ ४० ॥
अश्वत्थस्यचशुंगानिपद्मबीजंपुनर्नवा ।
काश्मरीफलमेतच्चमाषबीजन्तथैवच ॥ ४१ ॥
पृथग्दशपलान्भागांश्चतुर्द्रोणेऽम्भसःपचेत् ।

चतुर्भागावशेषन्तुकषायमवतारयेत् ॥ ४२ ॥
मृद्वीकापद्मकंकुष्ठंपिप्पलीरक्तचन्दनम् ।
वालकंनागपुष्पञ्चशूकाशिम्बीफलंतथा ॥ ४३ ॥
नीलोत्पलंशारिवेद्वेजीवनीयंविशेषतः ।
पृथक्कर्षसमंचैवशर्करायाःपलद्वयम् ॥ ४४ ॥
रसस्यपौण्ड्रकेक्षूणामाढकेतत्रदापयेत् ।
चतुर्गुणेनपयसाघृतप्रस्थंविपाचयेत् ॥ ४५ ॥
रक्तपित्तक्षतक्षीणकामलावातशोणितम् ।
हलीमकंतथाशोथंवर्णभेदंस्वरक्षम् ॥ ४६ ॥
अरोचकंमूत्रकृच्छ्रंपार्श्वशूलंचनाशयेत् ।
एतद्राज्ञांप्रयोक्तव्यंबह्वन्तःपुरचारिणाम् ॥ ४७ ॥
स्त्रीणाञ्चैवह्यपत्यानांदुर्बलानांचदेहिनाम् ।
क्लीबानांनष्टशुक्राणांजीर्णानामल्परेतसाम् ॥ ४८ ॥
श्रेष्ठंबलकरंहृद्यंवृष्यंपेयंरसायनम् ।
ओजस्तेजःकरञ्चैवआयुष्प्राणविवर्द्धनम् ॥ ४९ ॥
संवर्द्धयतिशुक्रञ्चपुरुषंदुर्बलेन्द्रियम् ।
सर्वरोगविनिर्मुक्तस्तोयासिक्तोयथाद्रुमः ॥ ५० ॥
कामदेवइतिख्यातः सर्वर्तुषुप्रशस्यते ॥ ५१ ॥
जीवनीयंजीवनीयदशकम् ।

इति कामदेवघृतम् ।

अर्थ—असगंध१०० पल, गोखरू ५० पल, शतावर, विदारीकंद,शारिवन, खिरैटी, पीपलकी कोपल, कमलगट्टा, पुनर्नवा, कुम्भेरका फल और माषबीज यह प्रत्येक४०तोले भरले पश्चात् इनसबको ४ द्रोण अर्थात्१२८ सेर जलमें पकाव जब जलकर चौथाभाग बाकी रहै तब उतारले; फिर इसमें दाख, पद्माख, कूठ, पीपल, लालचंदन, सुगंधवाला, नागकेशर, कौंछके बीज, नीलोत्पल (जिसके अभावमें "नीलोफर" गेरतेहैं) शारिवा (गौरसिर, गौरीयावासाऊ ई०सालशापरेला) श्यामलता

(कालीसर, करियावासाऊ, अनन्तमूल), जीवक, ऋषभक, ऋद्धि, वृद्धि, मेदा, महामेदा, काकोली, क्षीरकाकोली, मुगवन, मषवन यह प्रत्येक २ तोले, बूरा आठ ८ तोले, पुंड्रकईखकारस ८ सेर, दूध ८ सेर डाले; तदनन्तर इन सबमें दो २ सेर घी डाल अच्छेप्रकार घृतको सिद्धकरे। यह घृत–रक्तापित, क्षतक्षीण, कामला, वातरक्त,हलीमक, सूजन, वर्णभेद, स्वरक्षय, अरुचि, मूत्रकृच्छ्र, और पार्श्वशूल (पसलीयोंमें दर्द) को नष्ट करेहै। और यह राजाओंके सेवने योग्यहै। तथा वंध्यास्त्री, दुर्बलमनुष्य, नपुंसक, नष्टशुक्रवाले, वृद्ध और अल्पवीर्य्यवाले मनुष्योंको अत्यन्त हितकारीहै, बलकारक, हृदयको हितकारी, वीर्य्यवर्द्धक, रसायन, ओजजनक, तेजवर्द्धक, आयु और प्राणवर्द्धक, और दुर्बलइन्द्रियोंवाले पुरुषको पुष्टिकारक, और सर्वरोगनाशकहै। यह कामदेवघृत–सर्वऋतुओंमें सेवना श्रेष्ठहै ॥ ५१ ॥

कूष्माण्डकात्पलशतंसुस्विन्नंनिष्कुलीकृतम्।
पचेत्तत्तेघृतप्रस्थेशनैस्ताम्रमयेदृढे ॥ ५२ ॥
यदामधुनिभःपाकस्तदाखण्डशतंन्यसेत्।
पिप्पलीशृंगवेराभ्यांद्वेपलेजीरकस्यच ॥ ५३ ॥
त्वगेलापत्रमरिचधान्यकानांपलार्द्धकम्।
न्यसेच्चूर्णीकृतंतत्रदार्व्यासंघट्टयेत्ततः ॥ ५४ ॥
तत्पक्वंस्थापयेद्भाण्डेदत्त्वाक्षौद्रंघृतार्द्धकम्।
तद्यथाग्निबलंखादेद्रक्तपित्तीक्षतक्षयी ॥ ५५ ॥
कासश्वासतमश्छर्दितृष्णाज्वरनिपीडितः।
वृष्यंपुनर्नवकरंबलवर्णप्रसादनम् ॥ ५६ ॥
उरःसन्धानकृद्बल्यंबृंहणंस्वरशोधनम्।
अश्विभ्यांनिर्मितंसिद्धंकूष्माण्डकरसायनम् ॥ ५७ ॥
खण्डामलकमानानुसारात्कूष्माण्डकद्रवात्।
पात्रंपाकायदातव्यंयावानत्ररसोभवेत् ॥ ५८ ॥

अत्रापिमुद्रयापाकोनिस्त्वचंनिष्कुलीकृतम् ॥ ५९ ॥

इतिखण्डकूष्माण्डः ।

अर्थ-प्रथम पेठेको लेकर उसेलेवे फिर उसको छीलकर टुकड़े कर लेवे, वह टुकडे तोलमे १०० पललेवे, पश्चात् उत्तम तांबेके बरतनमें ६४ तोले घृतको डालकर चूलेपै चढादेवे, जब घी खूब गरम होजाय तब उसमें वह पेठेके टुकडे गेरदेवे, फिर धीरे धीरे पकावे, जब वह पकते २ सहतकी समान होजाय तब उसमें १०० पल बूरा मिलादेवे, पश्चात् पीपल, सोंठ और जीरा यह प्रत्येक आठ तोले, दालचीनी, इलायची, कालीमिरच, और धनिया यह प्रत्येक दो २ तोले लेवे, इन सबका चूरन कर मिलादेवे, करछी चलातारहै, जब भलेप्रकारसै पकजावे तब उत्तमपात्रमें करकै ३२ तोले सहत मिलादेवे, । इसको अमिका बलाबल विचारकर भक्षणकरे । यह रक्तपित्त, क्षतक्षय, खाँसी, श्वास, तम, वमन, तृषा और ज्वरसै पीडितमनुष्योंको सेवन करना चाहिये । वृष्य, शरीरको फिरसै नवीन करनेवाला, बलकारक, वर्णको प्रसन्न करनेवाला, फटीहुई छातीको जोड़नेवाला, पुष्टिकारक, स्वरशोधक यह कूष्मांडरसायन श्रीमान् अश्विनीकुमारोंने निर्माण की है, इसको खण्डकूष्माण्ड कहतेहैं ॥ ५९ ॥

पञ्चाशच्चपलंस्विन्नंकूष्माण्डात्प्रस्थमाज्यतः ।
ग्राह्यंपलशतंखंडंवासाक्काथाढकेपचेत् ॥ ६० ॥
मुस्ताधात्रीशुभाभार्गीत्रिसुगन्धैश्चकार्षिकैः ।
ऐलेयविश्वधन्याकमरिचैश्चपलांशिकैः ॥ ६१ ॥
पिप्पलीकुडवञ्चैवमधुमानीप्रदापयेत् ।
कासंश्वासंक्षयंहिक्कांरक्तपित्तंहलीमकम् ॥ ६२ ॥
हृद्रोगमम्लपित्तञ्चपीनसंचव्यपोहति ॥ ६३ ॥
कूष्माण्डरसोऽत्रदेयः ॥

इति वासाखण्डकूष्माण्डः ।

अर्थ-प्रथम पेठेको उसेकर छीललेवे, फिर चकूसे बनारकर टुकडे करलेवे.

१ शुभावंशलोचना । २ ऐलेयकमेलवालुकम् ।

ऐसे टुकडे २०० पल, घृत ६४ तोले,बूरा१०० पल, पेठेकारस २५६ तोले, अडुसेका काथ २५६ तोले लेवे, पश्चात् इन सबको विधिपूर्वक मिलाकर पकावे, फिर नागरमोथा, आमला, वंशलोचन, भारंगी, तेजपात, इलायची, दालचीनी, यह प्रत्येक दोदो तोले लेवे, एलुआ, सोंठ, धनिया, कालीमिरच यह प्रत्येक चार तोले, पीपल १६तोले लेवे, फिर इनसबका चूर्णकर मिलादेवे और सहत ३२ तोले मिलादेवे,। यह खाँसी, श्वास, क्षय, हिचकी रक्तपित्त, हलीमक, हृदयरोग, अम्लपित्त, और पीनसरोगको दूरकरैहै ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ॥

मृतंसूतंमृतंतीक्ष्णंतुल्यवासाद्रवैर्दिनम् ।
मर्दितंमासमात्रन्तुभक्षयेन्मृगजंरसम् ॥ ६४ ॥
सर्पाक्षिमधुनालेह्याअनुस्याद्रक्तपित्तके ॥ ६५ ॥

इतिमृगजरसः ।

अर्थ–पारेकी भस्म और इस्पातकी भस्मको समानभाग लेकर अडूसेके रसमें एकदिन खरल करै। एक मासाभर खानेसै रक्तपित्तरोग दूर होताहै और इसके ऊपर सर्पाक्षीकी जड़को सहतके साथ भक्षणकरे, यह अनुपानहै ॥ ६४ ॥ ६५ ॥

नीलोत्पलंशिलाक्षौद्रंतुल्यांशंपद्मकेशरम् ।
तण्डुलोदकपानेनरक्तपित्तहरम्भवेत् ॥ ६६ ॥
शृंगाटकस्यमज्जायाःपलैकंशीतवारिणा ।
पीतंवाथगवांक्षीरैरक्तपित्तरुजापहम् ॥ ६७ ॥
नवनीतंसितालाजाद्राक्षयासहभक्षयेत् ।
मुस्तकेनघृतंदद्याद्रक्तपित्तहरंपरम् ॥ ६८ ॥
द्राक्षावासायुतंक्काथंपिबेच्चशर्करान्वितम् ।
वासारसंसिताक्षौद्रैर्वासावाशर्करासमा ॥ ६९ ॥
भक्षयेद्रक्तपित्तार्त्तस्तृष्णादाहज्वरंहरेत् ।
धात्रीचूर्णंसितातुल्यंभक्षयेद्रक्तपित्तनुत् ॥ ७० ॥

काकमाचीरसंक्वाथ्यंक्षीरैश्चतुर्गुणेनतत्।
पिबेन्मधुसिताभ्यांचद्वन्द्वोत्थंरक्तपित्तनुत्॥ ७१॥

अर्थ-नीलोत्पल (फा० नीलोफर), मैनशिल,कमलकेशर और सहत इन सबको समानभागेलकर चावलोंके जलके साथ पीनेसै-रक्तपित्तरोग दूर होताहै। चारतोले सिंघाडेकी मीगको लेकर शीतलजलके साथ अथवा गायके दूधके साथ पीवेतो-रक्तपित्तरोग नाश होय,। नवनीत (माखन), मिश्री, खील और दाख इन सबका एकत्र चूर्णकर खानेसै, अथवा नागरमोथेके चूरनको घृतके साथ मिलाकर चाटनेसै, तथा दाख और अडूसेके क्वाथमें बूरा मिलाकर पीनेसै,वा बिसोटेके रसमें सहत और मिश्री डालकर पीनेसै,अथवा अडूसेके रसमें बराबरकी बूरा मिलाकरपीनेसै-रक्तपित्त, तृषा, दाह और ज्वर दूर होताहै। आमलेके चूरनमें बराबरकी मिश्री मिलाकर खानेसे रक्तपित्त नष्ट होताहै। सोंठके चूरनमें सहत मिलाकर चाटनेसै-कफोत्पन्न रक्तपित्तरोग दूर होता है। मकोयके रसको चौगुने दूधमें औटाकर सहत और मिश्री मिलाके पीनेसे दो दोषोंसे उत्पन्नहुवा रक्तपित्तरोग दूर होताहै ॥ ६९ ॥ ७० ॥ ७१ ॥

मृतंवामूर्छितंसूतंकार्पासपुष्पजैर्द्रवैः।
मर्दयेद्दिनमेकन्तुतेनपूर्य्यावराटिका॥ ७२॥
निरुध्यचान्धमूषायांभांडेरुद्ध्वापुटेपचेत्।
उद्धृत्यचूर्णयेच्छ्लक्ष्णंमरिचैर्द्विगुणैःसह ॥ ७३॥
गुञ्जैकेकंघृतैर्लेह्यंरक्तपित्तंनियच्छति।
कपर्दकरसोनामसाध्यंचसाधयत्यलम्॥ ७४॥
उदुम्बरफलंपक्वंघृतैःपाच्यंसितायुतम्।
भक्षयेन्मरिचैर्युक्तमनुस्याद्रक्तपित्तनुत्॥ ७५॥

इतिकपर्दकरसः।

अर्थ-मृत वा मूर्छित पारेको कपासके फूलोंके रसमें एकदिन खरल करकै फिर कौड़ीमें भरदेवे, और कौड़ीका मुख बंदकर देवे, पश्चात् अंधमूषामें रख गजपुटमें फूँक देवे, जब अपने आप शीतल होजावे तब

निकालकर दुगुनी कालीमिरचोंके साथ पीसलेवे । एक गुंजाभर इसको घीके साथ चाटनेसै-रक्तपित्तरोग दूर होताहै । यह कपर्दकरस असाध्यरक्तपित्तरोगको भी साधताहै । इसपै पके हुवे गूलरोंको घी और बूरामें पकाकर फिर कालीमिरचोंको चूर्ण मिलाके भक्षण करे, यह अनुपानहै ॥ ७५ ॥

वासानिम्बपटोलंचत्रायमाणादुरालभा ।
धातकीपर्पटंमुस्तमुशीरंकटुरोहिणी ॥ ७६ ॥
निशादारुनिशातुल्यंतोयेदशगुणंपचेत् ।
पादशेषेहरेत्काथंगोघृतंकाथपादकम् ॥ ७७ ॥
त्रिफलात्रिकटुनिम्बंचन्दनञ्चपलोन्मितम् ।
कल्कंतंनिक्षिपेत्तत्रघृतशेषंविपाचयेत् ॥ ७८ ॥
घृतंमाहेश्वरंनामरक्तपित्तहरंपिबेत् ॥ ७९ ॥

इति माहेश्वरघृतम् ।

अर्थ-अडूसा, नीम, परवल, त्रायमान, जवासा, धायकेफूल, पित्तपापडा, नागरमोथा, खस, कुटकी, हलदी और दारुहलदी यह सब समान भाग-लेकर दशगुने पानीमें पकावे, जब पकते २ चौथाभाग शेषरहजाय तब काथसे चौथा भाग गायका घी, त्रिफला, त्रिकुटा, नीम और चंदन इन सबका कल्क चार चार तोले मिलाकर घृतको सिद्धकरे । यह माहेश्वर-घृत-रक्तपित्तनाशक है ॥ ७९ ॥

लोहाच्चतुर्गुणंक्षीरमाज्याद्द्विगुणमुत्तमम् ।
चूर्णपादन्तुवैडंगंदद्यान्मधुसितेसमे ॥ ८० ॥
ताम्रपात्रेशुभेपक्त्वास्थापयेद्घृतभाजने ।
माषकादिक्रमेणैवभक्षयेद्विधिपूर्वकम् ॥ ८१ ॥
अनुपानंप्रयुंजीतनारिकेलजलादिकम् ।
रक्तपित्तंजयेत्तीव्रमम्लपित्तंक्षतक्षयम् ॥ ८२ ॥
पुष्टिदंकान्तिजननमायुष्यंवृष्यमुत्तमम् ॥ ८३ ॥

इति समशर्करलौहम् ।

अर्थ-एकभाग लोहा, चारभागदूध, दोभागघी, लोहेसे चौथा भाग वायविडंगका चूरन लेवे, पहिले लोहेकी भस्म, दूध, और घृतको तांबेके बरतनमें पकाकर फिर वायविडंगका चूरन मिलादेवे, शीतल होजाय तब समान भाग सहत और मिश्री मिलाकर घीके बरतनमें भरकै धर देवे, क्रमसे माषादि बढाकर विधिपूर्वक सेवन करे। और ऊपरसे नारियलका जल पीवे, यह-तीव्ररक्तपित्त, अम्लपित्त, क्षतक्षय, इनको दूरकरे, पुष्टिको करे, कान्तिजनक, आयुवर्द्धक, और वीर्य्यवर्द्धक है ॥ ८० ॥ ८१ ॥ ॥ ८२ ॥ ८३ ॥

शतावरीछिन्नरुहावृषमुण्डातिकाबला ।
तालमूलीचगायत्रीत्रिफलायास्त्वचन्तथा ॥ ८४ ॥
भार्गीपुष्करमूलन्तुपृथक्पंचपलानिच ।
जलेद्रोणेविपक्तव्यमष्टभागावशेषितम् ॥ ८५ ॥
दिव्यौषधिहतस्यापिमाक्षिकेणहतस्यवा ।
पलद्वादशकन्देयंरुक्मलोहस्यचूर्णितम् ॥ ८६ ॥
खंडतुल्यंघृतंदेयंपलषोडशिकंबुधैः ।
पचेत्ताम्रमयेपात्रेगुडपाकोयथामतः ॥ ८७ ॥
प्रस्थार्द्धमधुनोदेयंशुभाश्मजतुकंत्वचम् ।
शृंगीविडंगकृष्णेचशुण्ठ्यजाजीपलंपलम् ॥ ८८ ॥
त्रिफलाधान्यकंपत्रंत्र्यक्षंमरिचकेशरम् ।
चूर्णंदत्त्वासुमथितंस्निग्धभाण्डेनिधापयेत् ॥ ८९ ॥
यथाकालंप्रयुंजीतबिडालपदकन्तुतत् ।
गवांक्षीरानुपानंचसेव्यंमांसरसंपयः ॥ ९० ॥
गुरुवृष्यानुपानानिस्निग्धमांसादिभोजनम् ।
रक्तपित्तंक्षयंकासंपक्तिशूलंविशेषतः ॥ ९१ ॥
वातरक्तंप्रमेहञ्चशीतापित्तंवमिंक्लमीन् ।
श्वयथुंपाण्डुरोगञ्चकुष्ठंप्लीहोदरंतथा ॥ ९२ ॥

आनाहंरक्तसंस्रावमम्लपित्तंनियच्छति ।
चक्षुष्यंबृंहणंवृष्यंमंगल्यंप्रीतिवर्द्धनम् ॥ ९३ ॥
आरोग्यंपुष्टिदंश्रेष्ठंकामाग्निबलवर्द्धनम् ।
श्रीकरंलाघवकरंखण्डखाद्यंप्रकीर्त्तितम् ॥
छागंपारावतंमांसंतित्तिरिःक्रकराःशशाः ॥ ९४ ॥
कुरंगाःकृष्णसाराश्चतेषांमांसानियोजयेत् ।
नारिकेलपयःपानंसुनिषण्णकवास्तुकम् ॥ ९५ ॥
शुष्कमूलकबीजाख्यंपटोलंबृहतीफलम् ।
फलंवार्त्ताकुपक्काम्रंखर्ज्जूरंस्वादुदाडिमम् ॥ ९६ ॥
ककारपूर्वकंयच्चमांसञ्चानूपसम्भवम् ।
वर्जनीयंविशेषेणखण्डखाद्यंप्रकुर्वता ॥ ९७ ॥
दिव्यौषधिर्मनःशिलाजीवाख्यंशाकमारिषम् ।
एतच्चपूर्वयुक्तिप्रयोगात्इदानीन्तुत्रिचतुः-
पंचरक्तिकाद्यारभ्यरक्तिवृद्ध्यलोहान्तरवत् ।

इतिखण्डखाद्यंलोहम् ।

अर्थ-शतावर, गिलोय, अडूसा, गोरखमुंडी, खिरैंटी, मुशली, खैर, त्रिफला, भारंगी, पोहकरमूल यह प्रत्येक २० वीस वीस तोले लेकर ३२ सेर जलमें पकावे, जब आठमा भाग काढा शेष रहै तब मैनसिलसे अथवा सोनामाखीसे माराहुवा तीक्ष्णलोहा ४८ तोले, खांड ६४ तोले, घृत ६४ तोले लेवे, फिर सबको मिलाकर तांबेके वासनमें, जिसप्रकार गुडका पाक बनताहै उसी प्रकार इसको पकावे, शीतलहोनेपर ३२ तोले सहत मिलावे और वंशलोचन, शिलाजीत, दालचीनी, काकडासिंगी, वायविडंग, पीपल सोंठ, और जीरा प्रत्येक चार चार तोले, त्रिफला, धनिया, तेजपात, कालीमिरच और नागकेशर प्रत्येक दो दो तोले लेवे, सबका चूर्णकर मिलादेवे, और चिकने बासनमें भरकै रखदेवे, इसको एक तोलेभर भक्षणकरै, और उपरसे गायका दूध पीवे, तथा मांसका रस (सोरुआ) दूध, भारीपदार्थ, वृष्यपदार्थ, स्निग्ध पदार्थ, और मांसादिका भोजन करे। यह-रक्तपित्त, क्षय, खाँसी, पक्तिशूल, वातरक्त, प्रमेह, शीतपित्त, वमन, कृमि, सुजन,

पांडुरोग, कोढ़, प्लीहा उदररोग, आनाह, रक्तसंस्राव और अम्लपित्तको दूर करैहै। नेत्रोंको हितकारी, पुष्टिकारक, वीर्य्यवर्द्धक, मंगलजनक, प्रीतिवर्धक, आरोग्यदायक, पुष्टिजनक, श्रेष्ठ, कामाग्नि और बलवर्द्धक, लक्ष्मीकारक और लघुताकारकहै । इसको खंडखाद्य कहते हैं। इसपै बकरा, परेवा तीतर, ककर, शशक, कुरंग, और कृष्णसारादि जीवोंका मांस खाना चाहिये। और नारियलकादूध, शिरिआरीशाक, वथुआ, सूखी मूलीके बीज, परवल, बृहतीके फल, वैंगुन, पक्के आम, खजूर, मीठा अनार, और जिन शाकोंके आदिमें ककारहै वह सब, और अनूपदेशमें होनेंवाले जीवोंका मांस यह सब, खंडखाद्य सेवनकरनेवाला त्याग देवे ॥ ९७॥

अमृतात्रिवृतादंतीश्रावणीखदिरीवृषम् ।
चित्रकोभृंगराजश्चकोकिलाक्षःसपुष्करः ॥ ९८ ॥
पुनर्नवाबलाकाशशिग्रुमोरटदारकाः ।
गवाक्षीवरुणैःकन्दश्चविकातालमूलिका ॥
नागबलाकणामूलंकुष्ठंब्राह्मणयष्टिका ।
पलोन्मितानिचैतानिजलद्रोणेविपाचयेत् ॥ ९९ ॥
अष्टभागावशेषन्तुकषायमवतारयेत् ।
त्रिफलायास्तथाप्रस्थंजलाष्टगुणपाचितम् ॥ १०० ॥
तस्मादष्टावशेषन्तुकषायंसुपरिस्रुतम् ।
माक्षिकेणहतस्यापिपुटितस्ययथाविधि ॥ १०१ ॥
अयसश्चूर्णितंपूतंपलषोडशसम्मितम् ।
पलान्यभ्रस्यचत्वारितावन्तिगंधकस्यच ॥ १०२ ॥
द्वेद्वेपलेरसस्यापिखल्लितस्यविधानतः ।
गुडस्यचपलान्यष्टौसितायावाथपैत्तिके ॥ १०३ ॥
रक्तपित्तेतुखंडेनमत्स्यण्डीवापिकासके ।
गुग्गुलोर्द्विपलंदत्त्वाप्रस्थमेकन्तुसर्पिषः ॥ १०४ ॥
एवंपाकविधिज्ञस्तुपचेल्लोहंसमाहितः ।

शीतेवतार्य्यमधुनःक्षिपेदष्टपलंभिषक् ॥ १०५ ॥
माक्षिकस्यविशुद्धस्यद्विपलंरजसःक्षिपेत् ।
शिलाजतुतथाचूर्णपलार्द्धसम्मितंभिषक् ॥ १०६ ॥
तथैषांप्रक्षिपेच्चूर्णपलमात्रंपृथक्पृथक् ।
एषलोहवरःश्रीमान्सर्वव्याधिप्रनाशनः ॥ १०७ ॥
यत्रयत्रप्रयुज्येततत्तदाशुविनाशयेत् ।
रक्तपित्तेह्यम्लपित्तेक्षयेकुष्ठेज्वरेऽरुचौ ॥ १०८ ॥
दुर्नाम्निचोदरेशूलेग्रहण्यामामवातके ।
वातरक्तेमूत्रकृच्छ्रेप्रमेहेशर्करागदे ॥ १०९ ॥
अस्योपयोगान्मनुजस्तारुण्यमधिगच्छति ।
ब्रह्मचर्य्येणकुर्वीतप्लुतंमाक्षिकसर्पिषा ॥ ११० ॥
मानकंराक्तिकारभ्ययावदष्टौचमाषकान् ।
संवर्ज्यवैदलंसूपंमांसञ्चानूपसम्भवम् ॥ १११ ॥
ककारपूर्वकंसर्वंयत्नेनपरिवर्जयेत् ।
अमृताख्योवरोलोहःसर्वत्रैवोपयुज्यते ॥ ११२ ॥
अनेनसर्वथास्वस्ताजन्तवःसन्तिःनान्यथा ॥ ११३ ॥

इतिअमृताख्यंलौहम् ।

इतिरक्तपित्ताध्यायः ।

गंधकशुद्धिविधिश्चयथा ।

गंधकन्तुसमानीयनवनीतामलच्छविः ।

---

१ दारकोवृद्धदारकः ।गवाक्षी गोरक्षकर्कटी नागबलागोरक्षतंडुला कुष्ठपुष्कराभ्यां काण्डग्रन्थिभेदेनग्रहणम् । अथवाभागद्वयग्रहणमेवम् । माक्षिकस्यहतस्यनिरुत्थ मारितस्येत्यर्थः । पुटितस्यसामान्यविशेषपुटितस्थ ।पलान्यभ्रस्येत्यत्रापिपुटितस्येतिसम्बध्यते ।तेनप्रथमपरिच्छेदोक्तक्रमेणरसायनाधिकारेवक्ष्यमाणबृहदमृतसारप्रोक्तलोहाभ्रसमभिहितविधिनैववा चूर्णितपुटितस्येत्यर्थः । तावन्ति गंधकस्येतिचत्वारि पलानीत्यर्थः ।

तत्सर्पिषिविपक्कव्यंयावत्तैलनिभंभवेत् ॥ १ ॥
वस्त्रेणान्तरितंकृत्वाढालयेत्त्रिफलाम्भसि।
एवंगंधाश्मसंशुद्धंतत्तत्कर्म्मसुयोजयेत् ॥ २ ॥

अथरसस्येतिपारदरसस्यपलद्वयं खल्लितस्यमूर्च्छितस्येत्यर्थः। मूर्च्छनंखल्वशिलादिषुऔषधचूर्णरसंवादत्त्वाविमर्द्यनिर्मलीकरणमभिधीयते। तत्रतावत्पारदेसिद्धदोषत्रयनिवारणार्थंत्रिभिर्द्रवैःप्रत्येकंसप्तधामूर्छनंकार्य्यं तदुक्तंरसहृदये। मलशिखिविषनामानोरसस्यनैसर्गिकास्त्रयोदोषाः।

मूर्छांमलेनकुरुतेशिखिनादाहंविषेणमरणंहि।
ग्रहकन्याहरतिमलंत्रिफलावह्निश्चचित्रकंचविषम् ॥३ ॥
तस्मादेभिर्वारान्संमूर्छयेत्सप्तसप्तैवेति।
अत्रग्रहकन्याघृतकुमारी तथायोगरत्नाकरेऽप्युक्तम्।
इष्टकाराजिकापटुनागारधुमालम्बुषाकिण्वगुडार्द्रकैः॥४॥
इष्टकादिरयंख्यातःसूतदोषहरोगणइति ॥
एतैरितियथासम्भवंयथायोगंचमूर्छनंकार्यम्। अत्र
पटुलवणम्। अलम्बुषःकुलाहलःकिण्वंसुराबीजम्।
तच्चउत्तमजात्यादिषुनप्रयोज्यंतस्यचरसस्यमूर्च्छितमात्रत्वात्पाकसमाप्तौप्रवेशः।

तदुक्तंयोगरत्नाकरे।

मूर्च्छितोयदिसूतःस्यात्क्षिपेत्पाकोत्तरन्तदा

एतदुक्तमेवप्रथमपरिच्छेदे।

माक्षिकस्यविशुद्धस्येतिस्वरूपतःशोधिततयाज्ञेयम्।

तदुक्तंयोगरत्नाकरे।

भंगेसुवर्णसंकाशोमनाक्कृष्णच्छविर्बहिः।

बृहद्वर्णइतिख्यातोमाक्षिकोत्रप्रशस्यतेइति ।
उक्तश्चान्यत्रशोधनमस्य ।
कालमारिषशालिंचक्काथेदोलाविधानतः ॥
तदधःपतितंग्राह्यमेवंशुद्ध्यतिमाक्षिकम् ॥

इत्यादिप्रथमपरिच्छेदंप्रोक्तम्। एषांचस्वर्णमाक्षिकाशिला जतुचूर्णादीनांलोहपाकसमाप्तौविश्राम्यमनाक्तत्तत्व दशायांप्रक्षेपः ।

तदुक्तंयोगरत्नाकरसमुच्चये ।
अवतार्य्ययदादर्व्यापरिघट्यपुनःपुनः ।
यदापाणिसहोभूतोनिक्षिपेदौषधन्तदेति ॥ ५ ॥
तावत्तच्छुतमितिवस्त्रच्छानितामित्यर्थः ।
चित्रकान्तचूर्णानिप्रत्येकंपलमात्राणि ।
चातुर्जातकादीनांप्रत्येकमर्द्धंपलसम्मितत्वम् ।
व्यक्तमन्यत् ।

अर्थ-गिलोय, निसोत, दंती, गोरखमुंडी, खैर, अडूसा, चीता, भांगरा, तालमखाना, पोहकरमूल, पुनर्नवा, खिरैटी, काँस, सैंजिना, अंकोलकेफूल, विधारा, इन्द्रायन, बरना, कमलकंद, चव्य, मुसली, गंगेरन, पीपरामूल, कूठ, भारंगी, यह प्रत्येक चार चार तोले लेकर ३२सेर जलमें पकावे,जब आठमा भाग अर्थात्४सेर शेषरहै जाय तब उतारले फिर त्रिफलेको आठगुने जलमें पकावे जब आठमाभाग शेषरहै तब उतारकर पूर्वोक्तमें मिलादेवे, तदनन्तर सोनामाखीसे माराहुवा और अच्छेप्रकारसे पुटिताकिया लोहेका चूरन १६पल लेवे, अभ्रक१६तोले,गंधक१६तोले शुद्धपारा आठ८तोले,गुड ८ पल, जो पित्तकी अधिकताहो तो बूरा मिलावे, रक्तपित्तके लिये इसमें खांड मिलावे, खाँसीकेलिये मिश्री, गूगल८ तोले, घी ६४ तोले इनसबको मिलाकर विधिपूर्वक पाककरे, शीतल होनेपर ३२ तोले सहत, शुद्धसोनामाखीका चूर्ण ८ तोले, शिलाजीत दो २ तोले मिलावे,चीतादि औषधियोंका चूर्ण चार २ तोले और दालचीनी, इलायची, तेजपात और नागकेशरादिका चूर्ण दो २ तोले मिलावे, तो

अमृताख्य लोहबने । यह सर्वलोहोंमें उत्तम और सर्वरोगनाशकहै। जिस २ रोगपर इसको देवे उसी उसी रोगको दूर करे, रक्तपित्त, अम्लपित्त, क्षय, कुष्ठ, ज्वर, अरुचि, बवासीर, उदररोग, शूल संग्रहणी, आमवात, वातरक्त, मूत्रकृच्छ्र, प्रमेह और शर्करारोगको हरेहै, इसको सेवनकरनेसे मनुष्य तरुण होजाताहै। इसको सेवनकरनेवाला ब्रह्मचर्य्यसे रहै। इसलोहेको घृत और सहतके साथ सेवनकरे। इसकी एकरत्तीसे लेकर आठमासेपर्य्यंत परम मात्राहै। इसपै विदल अन्न, दाल, आनूपदेशमें उत्पन्नहोनेवाले जीवोंका मांस तथा ककार जिनके आदिमें हैं ऐसै सर्वपदार्थ छोडदेवे, यह अमृताख्यलोहा सर्व योगोंमें प्रयोगकरना योग्य हैं, इससै मनुष्य रोगहीन होजाते हैं॥

इतिरक्तपित्ताधिकारः समाप्तः।

अथ रोगराजचिकित्सामाह।

अनेकरोगानुगतोबहुरोगपुरःसरः।
दुर्विज्ञेयोदुर्निवारःशोषोव्याधिर्महाबलः॥ १ ॥
सुशोषणाद्रसादीनांशोषइत्याभिधीयते।
क्रियाक्षयकरत्वाच्चक्षयइत्युच्यतेबुधैः॥ २ ॥
राज्ञश्चन्द्रमसोयस्मादभूदेषाकिलामयः।
तस्मात्तंराजयक्ष्मेतिकेचिदाहुर्मनीषिणः॥ ३ ॥
शुक्रायत्तंबलंपुंसांमलायत्तञ्चजीवनम्।
तस्माद्यत्नेनसंरक्षेद्यक्ष्मिणोमलरेतसी॥ ४ ॥
नित्यंस्वदेहपूजीभक्तोभैषज्यदेवतागुरुषु।
छागलमांसप्राशीजीवतियक्ष्मापरंधृतिमाकरम्॥ ५ ॥
बलिनोबहुदोषस्यपंचकर्म्माणिकारयेत्।
यक्ष्मिणःक्षीणदोषस्यकृतंतत्स्याद्विषोपमम्॥ ६ ॥
दोषाधिकानांवमनंशस्यतेसविरेचनम्।
स्नेहस्वेदोपपन्नानांसस्नेहंयत्वकर्षणम्॥ ७ ॥

कर्षणंदौर्बल्यकरंशुद्धकोष्ठस्ययुञ्जीत।विधिंबृंहणंदीपनं।
शालिषाष्टिकगोधूमयवमुद्गादयःशुभाः।
मद्यानिजांगलःपक्षिमृगाःशस्ताविशुष्यतः॥ ८॥
शुष्यतांक्षीणमांसानांकल्पितानिविधानवित्।
दद्यात्क्रव्यादमांसानिबृंहणानिविशेषतः॥ ९॥
छागमांसंपयश्छागंछागंसर्पिःसशर्करम्।
छागोपसेवाशयनंछागमध्येचयक्ष्मनुत्॥ १०॥
सपिप्पलीकंसयवंसकुलत्थंसनागरम्।
दाडिमामलकोपेतंस्निग्धमाजरसंपिबेत्॥ ११॥
तेनषड्विनिवर्त्तन्तेविकाराःपीनसादयः।
शतपुष्पाचमधुकंकुष्ठंतगरचन्दने॥ १२॥
आलेपनंस्यात्सघृतंतच्चपार्श्वांसशूलनुत्॥ १३॥

अर्थ—यह शोषरोग अनेकरोगानुगत,बहुतरोगोंमें श्रेष्ठ,दुर्ज्ञेय,महाबलवान् और दुर्निवार अर्थात् असाध्यहै,शरीरकी रसादिधातुओंको शोषण करेहै इसकारण इसको शोष कहतेहैं, क्रियाओंको क्षय करनेसे इसको क्षय कहतेहैं, और प्रथम राजा चन्द्रके यह उत्पन्न हुवाथा इस कारण इसको राजयक्ष्मा कहते हैं। बल शुक्रके अधीन और जीवन मलके अधीन है, इसकारण राजयक्ष्मावाले रोगीके यत्नपूर्वक वीर्य्य और मलकी रक्षा करनी योग्यहै। सदैव देहकी पूजाकरनेवाला औषध, देवता और गुरुमें भक्तिकरनेवाला और बकरेके मांसको सेवनकरनेवाला तथा धैर्य्यको धारण करनेवाला, ऐसा राजयक्ष्मारोगी आरोग्य होजाताहै। बहुतदोषोंसे युक्त बलवान् राजयक्ष्मावाले रोगीके पंचकर्म्म (वमन, विरेचन, नस्य, निरूहबस्ति और अनुवासनबस्ति) कराने चाहिये, परन्तु क्षीणदोषवाले राजयक्ष्मा रोगीके यह पंचकर्म्म विषकी समान अपकारी होतेहैं। दोषोंकी अधिकतावाले राजयक्ष्मा रोगीको वमन और विरेचन कराना हितकारीहै। स्नेह और स्वेदयुक्तराजयक्ष्मा रोगीको स्नेहयुक्त अकर्षण (अदौर्बल्यकारक) सेवन कराना चाहिये। शुद्धकोठेवाले मनुष्यको अग्निप्रदीपक और पुष्टिकारक द्रव्य सेवनकरने चाहिये।

शालि और साठीधान, गेहूं, जौ, और मूग आदि अन्न, तथा मदिरा, और जांगलदेशके पशुपक्षियोंका मांस यह सब राजयक्ष्मा रोगीको हितकारी हैं। मांसहीन शोषरोगीको मांसको खानेवाले पशुपक्षियोंका मांस तथा बृंहण पथ्य देना चाहिये। बकरेका मांस, बकरीका दूध, और बकरीका घी बूरा मिलाकर खाना, तथा बकरे, बकरियोंकी टहल करनी, और बकरे, बकरियोंके बीचमें सोनेसे राजयक्ष्मारोग दूर होताहै। पीपल, जव, कुलथी, सोंठ, अनार और आमले युक्त बकरी (रा) के मांसरस (सोरुआ) को पीनेसै-पीनसादि छै प्रकारके रोग दूर होते हैं। सोआ, मूलैठी, कूठ, तगर और चंदनको घृतके साथ पीसकर लेपकरनेसै-पार्श्वशूल और स्कन्धशूल नष्ट होताहै ॥ १३ ॥

धन्याकपिप्पलीविश्वदशमूलीजलम्पिबेत्।
पार्श्वशूलज्वरश्वासपीनसादिनिवृत्तये ॥ १४ ॥
क्वाथस्त्रयोदशांगस्यचातुर्जातकसंयुतः ।
कासज्वरादिशमनोबलपुष्टिविवर्द्धनः ॥ १५ ॥

इति त्रयोदशांगः।

अर्थ-धनिया, पीपल, सोंठ और दशमूल इनका क्वाथ बनाकर पीवेतो पार्श्वशूल, ज्वर, श्वास और पीनसादि रोग नष्ट होते हैं, और इसत्रयोदशांग क्वाथमें, दालचीनी, इलायची, नागकेशर, तेजपात इनका चूरन बुरक कर पीनेसै खांसी और ज्वरादिरोग शांत होतेहैं, तथा बल और पुष्टिकी वृद्धि होताहै ॥ १५ ॥

दशमूलीबलारास्नापुष्करसुरदारुनागरैःक्वथितम्।
पेयंपार्श्वांसशिरोरुक्क्षतकासादिविशान्तयेसलिलम् ॥ १६ ॥
अश्वगंधामृताभीरुदशमूलीबलावृषाः।
पुष्करातिविषेघ्नंतिक्षयंक्षीररसाशितः ॥ १७ ॥

क्वाथनयोगः।

कुकुभत्वङ्नागबलावानरीबीजानिचूर्णितंपयसि।
पक्कंघृतमधुयुतंससितंयक्ष्मादिकासहरम् ॥ १८ ॥

पारावतकपिच्छागकुरङ्गाणांपृथक्पृथक् ।
मांसचूर्णमजाक्षीरंपीतंक्षयहरंपरम् ॥ १९ ॥
दिनकरदीधितिशोधितपारावतमांसमनुदिनंनियतः ।
योलेढिमधुघृतयुक्तंसजयतियक्ष्माणमत्युग्रम् ॥ २० ॥
शर्करामधुसंयुक्तंनवनीतंलिहन्क्षयी ।
क्षीराशीलभतेपुष्टिमंगुल्येचाज्यमाक्षिके ॥ २१ ॥

अर्थ-दशमूल, खिरैटी, रसायन, पोहकरमूल, देवदारु, और सोंठ इनका काथ पार्श्वशूल, स्कन्धशूल, शिरोरोग, क्षतकासादिरोगोंको दूर करैहै। असगंध, गिलोय, सतावर, दशमूल, खिरैटी, अडूसा, पोहकर-मूल और अतीस इनका काढा पीवे और ऊपरसे दूध, मांसरस खावेतो क्षयरोग नाशहोवे। अर्जुनवृक्षकी छाल, गंगेरन, और कौंछके बीजोंका चूर्ण, इनको दूधमें पकाकर घृत, मधु और बूरा मिलाकै खानेसे खाँसी, यक्ष्मादिरोग विनष्ट होतेहैं। परेवा, वानर, बकरा, हिरन, इन प्रत्येकके मांसका चूरन अलग २ बकरीके दूधमें मिलाकर पीनेसे क्षयरोग नाश होताहै। परेवाके मांसको धूपमें सुखाकर चूरनबना प्रतिदिन मधु और सहतके साथ खानेसै अत्युग्रराजयक्ष्मारोग दूर होताहै। क्षयरोगी शर्करा और मधुसंयुक्त नौनीघीको खावे। दूध, घृत और मधुको खानेसै-राजयक्ष्मावाले रोगीके पुष्टि बढतीहै ॥ २१ ॥

एलात्वङ्मरिचंशुंठीपिप्पलीनागकेशरम् ।
यथोत्तरंभागवृद्ध्याचूर्णन्तुसितयासमम् ॥ २२ ॥
यक्ष्मार्शोग्रहणीगुल्मरक्तपित्तक्षयापहम् ।
कण्ठरोगारुचिहरंप्लीहरोगहरंपरम् ॥ २३ ॥

एलादिचूर्णम् ।

अर्थ-इलायची एकभाग, दालचीनी दोभाग, कालीमिरच तीनभाग, सोंठ चारभाग, पीपल पांचभाग, नागकेशर छैभाग, इन सबको एकत्र पीसकर चूरन करे और चूरनकी बराबर बूरा मिलावे, पश्चात् इस चूरनको खानेसै राजयक्ष्मा, बवासीर, संग्रहणी, गुल्म, रक्तपित्त, क्षय, कंठरोग, अरुचि, और प्लीहारोगको दूर करैहै ॥ २३ ॥

सितोपलतुगाक्षीरीपिप्पलीबहुलात्वचः ।
अन्त्यादूर्द्धंद्विगुणितंलेहयेत्क्षौद्रसर्पिषा ॥ २४ ॥
चूर्णितंप्राशयेद्वापिश्वासकासक्षयापहम् ।
हस्तपादांशदाहेषुज्वरेरक्तेतथोर्द्धगे ॥ २५ ॥
सुप्तजिह्वारोचकिनंमन्दाग्निंपार्श्वशूलिनम् ॥ २६ ॥

इतिसितोपलादिलेहः ।

अर्थ–मिश्री १६ भाग, वंशलोचन ८ भाग, पीपल ४ भाग, छोटी-इलायची २ भाग और दालचीनी १ भाग लेवे, सबका चूरन कर सहत और घृतमें मिलाकर चाटनेसे श्वास, खांसी, क्षय, हाथ, पांव और कन्धोंकी दाह, ज्वर, ऊर्द्धगतरक्त, सुप्तजिह्वा, अरुचि, मंदाग्नि और पार्श्वशूल दूरहोता है ॥ २६ ॥

लवंगकङ्कोलमुशीरचंदनंनतंसनीलोत्पलजीरकद्वयम् ।
त्रुटिःसकृष्णागुरुभृंगकेशरंकणासविश्वानलदंसहाम्बुदम्
अहीन्द्रजातीफलवंशलोचनासिताष्टभागंसमश्लक्ष्णचूर्णितम् ।
आरोचकंतर्पणमग्निदीपनंबलप्रदंवृष्यतमंत्रिदोषनुत् ॥ २८ ॥
उरोविबन्धंतमकंगलग्रहंसकासहिक्कारुचियक्ष्मपीनसम् ।
ग्रहण्यतीसारभगन्दरार्बुदंप्रमेहगुल्मांश्चनिहन्तिसत्वरम् २९
वातपित्ताधिकेवह्निबलेसर्वचूर्णापेक्षयाशर्कराष्टगुणा ।
कफाधिकेचाग्निमान्द्येचएकभागापेक्षयाष्टगुणेति ।

इतिलवंगादिचूर्णम् ।

अर्थ–लौंग, शीतलचीनी, खस, चंदन, तगर, नीलेकमल, जीरा, छोटी इलायची, कालीअगर, दालचीनी, नागकेशर, पीपल, सोंठ, बालछड, नागरमोथा, अनन्तमूल, जायफल, वंशलोचन, यह प्रत्येक समान भाग और मिश्री८भागलेकर बारीक चूर्णकरे।यह लवंगादि चूरन रुचिको करनेवाला, अग्निको दीपनकरनेवाला, तृप्तिकारक, बलप्रदायक

---

१ बहुला एलाबीजम् । २ त्रुटिरेलाबीजम् । ३ भृंगंगुड़त्वक् । ४ नलदं जटामांसी । ५ सहाम्बुदंसमुस्तकम् । ६ अहीन्द्रमनन्तमूलम् ।

वृष्य, त्रिदोषनाशक, तथा छातीकादर्द, विबध, तमक, गलग्रह, खांसी, हुचकी, अरुचि, पीनस, राजयक्ष्मा, संग्रहणी, अतिसार, भगन्दर, अर्बुद, प्रमेह, और गुल्मरोगको दूर करैहै ॥ २९ ॥

तालीशपत्रंमरिचंनागरंपिप्पलीशुभा ।
यथोत्तरंभागवृद्धयात्वगेलाचार्द्धभागिके ॥ ३० ॥
पिप्पल्यष्टगुणाचात्रप्रदेयासितशर्करा ।
कासश्वासारुचिहरंतचूर्णंदीपनंपरम् ॥ ३१ ॥
हृत्पांडुग्रहणीरोगप्लीहाशोषज्वरापहम् ।
छर्द्यतीसारशूलघ्नंमूढवातानुलोमनम् ॥ ३२ ॥
कल्पयेद्गुटिकाश्चैतच्चूर्णपक्त्वासितोपलाम् ।
गुटिकाह्यग्निसंयोगाच्चूर्णाल्लघुतरास्मृता ॥३३॥
पैत्तिकेग्राहयन्त्येकेशुभायावंशलोचना ॥

इतितालीशाद्योमोदकः ।

अर्थ-तालीसपत्र ५ भाग, कालीमिरच४ भाग, सोंठ ३ भाग, पीपल २ भाग, वंशलोचन १ भाग, दालचीनी और इलायची आधा २ भाग, और मिश्री१६भाग लेवे,पश्चात् सबको एकत्रकर मोदक बनावे,यह लड्डु-खाँसी, श्वाँस, अरुचि हृदयरोग, पांडु, संग्रहणी, प्लीहा, शोष, ज्वर, वमन, अतिसार, शूल, और मूढवातको हरेहै, तथा दीपन है । इन उपरोक्त औषधियोंका चूर्णभी येही गुण करता है, जो चूरन बनाना हो तो कूठ पीसकर बनाले और जो गुटिका (मोदक) बनानी हो तो पाककर बनावे ॥ ३३ ॥

बिल्वाग्निमन्थश्योनाककाश्मर्यःपाटलीबला ।
पर्ण्यश्चपिप्पल्यःश्वदंष्ट्राबृहतीद्वयम् ॥ ३४ ॥
शृंगीतामलकीद्राक्षाजीवन्तीपुष्करागुरु ।
अभयासामृताऋद्धिर्जीवकर्षभकौशठी ॥ ३५ ॥
मुस्तंपुनर्नवामेदेसूक्ष्मैलोत्पलचंदनम् ।
विदारीवृषमूलानिकाकोलीकाकनासिका ॥ ३६ ॥

एषांपलोन्मितान्भागान्शतान्यामलकस्यच ।
पंचदद्यात्तदैकध्यंजलद्रोणेविपाचयेत् ॥ ३७ ॥
ज्ञात्वागतरसान्येतान्योषधान्यथतंरसम् ।
तच्चामलकमुद्धृत्यनिष्कुलंतैलसर्पिषोः ॥ ३८ ॥
पलद्वाशकेभृष्ट्वादत्त्वाचार्द्धतुलांभिषक् ।
मत्स्यण्डिकायाःपूतायालेहवत्साधुसाधयेत् ॥ ३९ ॥
षट्पलंमधुनश्चात्रसिद्धशीतेप्रदापयेत् ।
चतुष्पलन्तुगोक्षीर्य्याःपिप्पल्याद्विपलन्तथा ॥ ४० ॥
पलमेकंनिदध्याच्चत्वगेलापत्रकेशरात् ।
इत्ययंच्यवनःप्राशःपरमुक्तोरसायनः ॥ ४१ ॥
कासश्वासहरश्चैवविशेषेणोपदिश्यते ।
क्षीणक्षतानांवृद्धानांबालानांचांगवर्द्धनम् ॥ ४२ ॥
स्वरक्षयमुरोरोगंहृद्रोगंवातशोणितम् ।
पिपासामूत्रशुक्रस्थान्दोषांश्चैवापकर्षति ॥ ४३ ॥
अस्यमात्रांप्रयुञ्जीतयोपरुन्ध्यान्नभोजनम् ।
अस्यप्रयोगाच्च्यवनःसुवृद्धोऽभूत्पुनर्नवः ॥ ४४ ॥
मेधांस्मृतिंकान्तिमनामयत्वमायुष्प्रकर्षंबलमिन्द्रियाणाम्।
स्त्रीषुप्रहर्षंपरमाग्निवृद्धिंवर्णप्रसादंपरमानुलोम्यम्॥४५॥
रसायनस्यास्यनरःप्रयोगाल्लभेतक्षीणोपिकुटीप्रवेशात् ।
ज्वराकृतंपूर्वमपास्यरूपंबिभर्त्तिरूपंनवयौवनस्य ॥४६॥
सितामत्स्यण्डिकालाभेधात्र्याश्चमृदुभर्जनम् ।
चतुर्भागजलेप्रायोद्रव्यंगतरसंभवेत् ॥ ४७ ॥

इति श्रीच्यवनप्राशः ।

अर्थ–बेल, अगेथु, सोनापाठा, कुम्भेर, पाढल, खिरैटी, मुगवन, मषवन, सरिवन, पिठवन, पीपल, गोखुरू, कटेरी, कटाई, काकड़ासिंगी,

भुँईआमला, दाख, जीवन्ती, पुष्करमूल, अगर, हरड, गिलोय, ऋद्धि, जीवक, ऋषभक, आमियाहलदी, नागरमोथा, पुनर्नवा, मेदा, महामेदा, छोटी इलायची, कुमुदिनी, चंदन, विदारीकंद, अडूसेकी जड़, काकोली और काकनासा (कौआठोडी) प्रत्येक चार तोले, और उत्तमआमले, ५०० लेवे, इन सबको एकद्रोण जलमें पकावे, जब चौथाभाग शेष रहै तब उतारले, पश्चात् इस काढेमेंसे आमलोंको अलग निकालकर आमलोंकी गुठली निकाल डाले, और काढ़ेको छानकर रखदेवे, फिर ४८ तोले घी और तेलमें इन आमलोंको भूनकर पीस लेवे, तदनन्तर ५० पल मिश्री पूर्वोक्तकाथमें मिला और यह आमले मिलाकर पकावे, जब लेहकी समान होकर शीतल होजाय, तब २४ तोले सहत मिलादेवे, वंशलोचन चारपल, पीपल आठ तोले, और दालचीनी, इलायची, नागकेशर, इनतीनोंका चूरन ४ तोले मिलादेवे, और सबको करछीसे एकमें एक करदेवे। यह च्यवनप्राश-परमरसायनहै, खाँसी और श्वासको विशेषकरके हरे हैं। क्षीणक्षत, वृद्ध और बालकोंके अंगोंको बढ़ावे, तथा स्वरक्षय, छातीका रोग, वातरक्त, पियास, मूत्रदोष और वीर्य्यदोषको दूर करेहैं। इस अवलेहको सेवनकरनेसे-वृद्ध च्यवन ऋषि फिरसे तरुण हुयेथे। यह च्यवनप्राश अवलेह-मेधा, स्मरणशक्ति, कान्ति, आरोग्यता, आयुकी वृद्धि, इंद्रियोंका बल, स्त्रीप्रसंगमें अत्यन्त आनन्द, जठराग्निकी वृद्धि, और शरीरकी सुन्दरताको उत्पन्नकरेहैं। इसको सेवनकरनेसे वृद्धमनुष्यभी तरुण होजाताहै ॥ ४७ ॥

छागमांसतुलांगृह्यसाधयेदुल्बणेऽम्भसि ।
पादशेषेणतेनैवसर्पिःप्रस्थंविपाचयेत् ॥ ४८ ॥
ऋद्धिर्वृद्धिश्चमेदेद्वेजीवकर्षभकौतथा ।
काकोलीक्षीरकाकोलीकल्कैःपृथक्पलोन्मितैः ॥ ४९ ॥
सम्यक्सिद्धेचावतार्य्यंःसितेतास्मिन्प्रदापयेत् ।
शर्करायाःपलान्यष्टौमधुनंकुडवंक्षिपेत् ॥ ५० ॥
पलंपलंपिबेत्प्रातर्यक्ष्माणंहान्तिदुर्जयम् ।
क्षतक्षयंचकासांश्चपार्श्वशूलमरोचकम् ॥ ५१ ॥

स्वरक्षयमुरोरोगंश्वासंहन्यात्सुदारुणम् ॥ ५२ ॥

इति छागलाद्यंघृतम्।

अर्थ-१२॥ सेर बकरेके मांसको लेकर बत्तीस ३२सेर जलमें पकावे,जब चौथा भाग जल शेष रहेजाय तब घी ६४ तोले, ऋद्धि,वृद्धि,मेदा, महामेदा, जीवक,ऋषभक, काकोली, क्षीरकाकोली,इन प्रत्येकका कल्क चार२ तोले मिलाकर विधिपूर्वक पकावे, जब भलेप्रकारसे पकजावे तब उतार लेवे, शीतलहोनेपर, ३२ तोले बूरा १६ तोले सहत मिलादेवे। इस घृतको प्रातःकाल चारतोले पीनेसे दुर्जयराजयक्ष्मारोग, क्षतक्षय खाँसी,पार्श्वशूल, अरुचि, स्वरक्षय, छातीकारोग, और दारुणश्वाँसको दूरकरेहै ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥

वासकस्यरसप्रस्थेमानिकासितशर्करा।
पिप्पलीद्विपलंदद्यात्सर्पिषश्चपचेच्छनैः ॥ ५३ ॥
लेहीभूतेततःपश्चाच्छीतेक्षीरपलाष्टकम्।
दत्त्वावतारयेद्वैद्योमात्रयालेहमुत्तमम् ॥ ५४ ॥
निहन्तिराजयक्ष्माणंकासंश्वासंचदारुणम्।
पार्श्वशूलञ्चहृच्छूलंरक्तपित्तंज्वरन्तथा ॥ ५५ ॥

इति वासावलेहः।

अर्थ-अडूसेकारस ६४ तोले, सफेदबूरा ३२ तोले, पीपल ८ आठ तोले, घी ८ आठ तोले लेवे, फिर सबको मिलाकर धीरे २ पकावे, जब लेहकी समान होकर शीतल होजाय तब ३२ तोले सहत मिलादेवे। यह लेह-राजयक्ष्मा, खाँसी, श्वास, पार्श्वशूल, हृदयकाशूल, रक्तपित्त और ज्वरको दूर करे है। ॥ ५५ ॥

भस्मसूताभ्रलोहानांशिलाजतुविषंसमम्।
गुडूचीत्रिफलाक्काथैःसंस्कृतंगुग्गुलुन्तथा ॥ ५६ ॥
मृतनेपालताम्रञ्चसूतस्थानेनियोजयेत्।
एकीकृत्यनिजोज्यंतद्विगुञ्जंराजयक्ष्मनुत् ॥ ५७ ॥
पञ्चामृतरसोह्येषअनुपानंचपूर्ववत् ॥ ५८ ॥

इति पंचामृतरसः।

अर्थ-पारेकीभस्म, अभ्रककी भस्म, लोहेकीभस्म, शिलाजीत, गिलोय और त्रिफलाके क्वाथसै शुद्धकिया गूगल, नेपाल, तांबेकी भस्म और विष इन सबको समानभाग लेवे, फिर सबको मिलाकर दोरत्तीभर खावे। इससै-राजयक्ष्मा रोग दूर होताहै। इसको पंचामृतरस कहतेहैं ॥ ५८ ॥

संकोचःस्कन्धपार्श्वानांस्वरभेदोज्वरोभ्रमः।
वातजेयक्ष्मणिज्ञेयंलक्षणंगात्ररुक्षता ॥ ५९ ॥
ज्वरोदाहोऽतिसारश्चरक्तवान्तिश्रमोमहान्।
वीर्य्यस्तम्भोऽरतिश्चापिलक्षणंपैत्तिकेक्षये ॥ ६० ॥
गुरुत्वंशिरसश्छर्दिःकासःकण्ठस्यचारुचिः।
ऊर्द्ध्वश्वासंचविज्ञेयंलक्षणंकफजेक्षये ॥ ६१ ॥

अर्थ-स्कंध और पसलीयोंमें संकोच, स्वरभेद, ज्वर, भ्रम और शरीरकी रुक्षता यह सबलक्षण वातजक्षयमें होतेहैं। ज्वर, दाह, अतीसार, रुधिरकी वमन, अत्यन्त श्रम, वीर्य्यस्तम्भ, और ग्लानि यह सब लक्षण पैत्तिकक्षयमें होतेहैं। मस्तकमें भारीपन, वमन, खाँसी, अरुचि, और ऊर्द्ध्वश्वास यह सब लक्षण कफक्षयमें जानने ॥ ५९ ॥ ६० ॥ ६१॥

रसंवज्रंहेमतारंगंधंलोहश्चताम्रकम्।
तुल्यांशंमरिचंयोज्यंमुक्तामालिकविद्रुमम् ॥ ६२ ॥
शंखंचपूर्ववद्भागंसप्ताहंचित्रकद्रवैः।
मर्दयित्वावचूर्ण्याथतेनपूर्य्यावराटिका ॥ ६३
टंकणंरविदुग्धेनपिष्ट्वातासांमुखंलिपेत्।
मृद्भाण्डेतान्निरुद्ध्याथमहागजपुटेपचेत् ॥ ६४ ॥
आदायचूर्णयेत्सर्वंनिर्गुण्ड्याःसप्तभावनाः।
संशोष्यचूर्णितंसर्वंवस्त्रवद्गणंदोलया ॥ ६५ ॥
अम्लवर्गविधिक्काथेततःसंशोष्यचूर्णयेत्।
आर्द्रकस्यद्रवैःसप्तचित्रकस्यैकविंशतिः ॥ ६६ ॥
द्रवैर्भाव्यंततःशोष्यंदेयंगुंजाचतुष्टयम्।

पिप्पलीदशकैःक्षौद्रैर्मरिचैकोनविंशतिः ॥ ६७ ॥
सघृतैर्दापयेद्राथक्षयरोगनिवृत्तये ।
महारोगाष्टकेचैवज्वरेचैवातिसारके ॥ ६८ ॥
पोटलीरत्नगर्भोऽयंयोगवाहेषुयोजयेत् ॥ ६९ ॥

इति रत्नगर्भपोटलीरसः।

अर्थ–पारा, हीरा, सोना, चांदी, गंधक, लोहा, ताँबा, कालीमिरच, मोती, सोनामाखी, मूगा, शंख यह सब समानभाग लेकर सातदिन चीतेके रसमें खरल करे, पश्चात् कौडीयोंमें भरके आकके दूधसे पिसे हुये सुहागेसे कौडियोंका मुख बंदकरदेवे, फिर कौडियोंको मिट्टीके बरतनमें रखके बरतनका मुख बंदकर गजपुटमें धर फूंक देवे, जब अपने आप शीतल होजाय तब उसमेंसे निकाल चूर्णकर सह्मालुके रसमें सात भावनादेवे, फिर सर्वचूर्णको सुखाकर वस्त्रमें बांध दोलायंत्रके द्वारा अम्लवर्गके क्काथमें पकाकर सुखावे, फिर चूर्णकर अदरखके रसमें सात भावना देवे, तदनन्तर चीतेके रसमें २१ भावना देवे, पश्चात् इसको सुखाकर चूर्णकरेतो रत्नगर्भपोटलीरस सिद्धहो। इसको चाररत्तीभरलेकर १० पीपल १९ काली मिरच, सहत अथवा घीमें मिलाकर चाटेतो- क्षयरोग दूर होवे, और अष्टमहारोग (वातव्याधि, अश्मरी, कुष्ठ, प्रमेह, उदररोग, भगन्दर, अर्श और संग्रहणी) को हरेहै। ज्वर और अतीसारादिरोग नष्टहोते हैं. यह रत्नगर्भपोटलीरस योगवाही योगोंमें प्रयोगकरना योग्य हैं ॥ ६९ ॥

रसभस्मस्वर्णभस्मनिष्कंनिष्कंप्रकल्पयेत् ।
शंखगंधकमुक्तानांद्वौद्वौनिष्कौतुचूर्णयेत् ॥ ७० ॥
मुक्ताभावेवराटीवारसपादंचटंकणम् ।
वह्न्यारनालक्काथेनमर्दयेत्प्रहरद्वयम् ॥ ७१ ॥
तद्गोलकंविशोष्याथभाण्डेलवणपूरिते ।
पचेद्यायामचतुष्कञ्चमृगाङ्कोयंमहारसः॥ ७२॥
रोगराजनिवृत्त्यर्थंचतुर्गुञ्जामितंघृतैः ।

दातव्यंमरिचैःसार्धंपिप्पलीमधुनापिवा ॥ ७३ ॥

इतिमृगांकरसः।

अर्थ-पारेकी भस्म चारमासेभर, सोनेकी भस्म चारमासेभर, शंख, गंधक, मोती प्रत्येक ८ मासे, अगर मोती न मिलेतो कौडीयोंकी भस्म लेवे, पारेसै चौथाभाग सुहागा लेवे, फिर इन सबको चीतेके काढेमें और कांजीमें दोप्रहर मर्दनकरे, पश्चात् गोला बनाकर धूपमें सुखा नोनसै भरे हुवे वासनमें रख चारप्रहरपर्य्यंत पकावेतो मृगांकरस तैय्यारहो। इसकीमात्रा ४ रत्तीकीहै। अनुपान-घृत, कालीमिरचोंका चूर्ण, पीपलका चूर्ण और सहतहै। यह मृगांकरस राजयक्ष्मारोगको दूर करेहै ॥ ७३ ॥

रसलोहामृतासत्वंमधुसर्पिःसमन्वितम्।
अमृतेश्वरनामायंषडंगक्षयरोगनुत् ॥ ७४ ॥

इतिअमृतेश्वरोरसः।

अर्थ-पारा, लोहा और गिलोयका सत्व इन तीनोंको घृत और मधुके साथ सेवनकरनेसे राजरोग शांत होताहै ॥ ७४ ॥

शंखस्यबलायानिष्कंचतुर्निष्कंवराटकम्।
तुर्य्यंचनीलतुत्थंचसर्वतुल्यञ्चगंधकम् ॥ ७५ ॥
गंधतुल्यंमृतंनागंनागतुल्यंमृतंरसम्।
टंकणंरसतुल्यंस्यान्मर्द्यंपाच्यंमृगांकवत् ॥ ७६ ॥
राजयक्ष्महरःसोऽयंनाम्नाशंखेश्वरोरसः।
षड्गुञ्जन्तुकणाक्षौद्रैर्लेह्यंवामरिचंघृतैः ॥ ७७ ॥

इतिशंखेश्वरोरसः।

अर्थ-शंखकीनाभी चारमासे, कौडीकी भस्म १६ मासे नीलाथोथा १६ मासे, सबकी बराबर गंधक, गंधककी बराबर सीसेकी भस्म, सीसे-की भस्मकी बराबर पारेकी भस्म और पारेकी बराबर सुहागा लेवे, फिर इन सबको मृगांकरसकी तरह खरलकर पचावेतो शंखेश्वररस सिद्धहो। इसकी मात्रा ६ रत्तीकीहै। अनुपान-पीपल, सहत, काली-मिरच, और घृत है ॥ ७७ ॥

वराटीतुल्यमण्डूरंचूर्णयित्वादिनंपचेत्।
चूर्णयेन्मरिचैस्तुल्यंनागवल्याविभावयेत् ॥ ७८ ॥
तत्पात्रेमधुनालेह्यंसघृतंनवनीतकैः।
निष्कपादंक्षयंहन्तियामेयामेचभक्षयेत् ॥ ७९ ॥
लोकनाथोरसोह्येषमण्डलाद्राजयक्ष्मनुत् ॥ ८० ॥

इतिलोकनाथरसः।

अर्थ-कौड़ी और मंडूरका समानभाग चूर्ण लेकर एकदिन पचावे, फिर बराबरका कालीमिरचोंका चूर्ण मिलाकर पानोंके रसमें भावना देवे। इस रसको एकमासेभर लेकर सहतमें, घृतमें अथवा नवनीतमें मिलाकर ४८ दिनतक चाटनेसे राजयक्ष्मारोग दूर होताहै ॥ ८० ॥

रसभस्महेमभस्मतुल्यंगुंजाद्वयंपृथक्।
पूर्ववदनुपानेनमृगांकोऽयंक्षयापहः ॥ ८१ ॥

इतिस्वल्पमृगांकरसः।

अर्थ-पारेकी भस्म, और सोनेकी भस्म समानभागलेवे।इसको दो २ रत्तीभर मधु, घृत वा नवनीतके साथ खानेसे क्षयरोग दूर होताहै॥८१॥

शिलाजतुविडंगानिह्यभयाहेममाक्षिकम्।
मृतलोहसमंक्षौद्रैर्निष्कंभुक्तंक्षयापहम् ॥ ८२ ॥
अयंलोहामृतोनाम्नासन्निपातंनियच्छति ॥ ८३ ॥

इतिलोहामृतः।

अर्थ-शिलाजीत,वायविडंग, हरड़, सोनामाखी, यह सब समान भागलेवे, और सबकी बराबर लोहेकी भस्म लेवे, पश्चात् सबको मिलाकर चारमासे सहतके साथ खानेसे क्षयरोग दूर होताहै, और यह लोहामृतरस सन्निपातको दूर करेहै ॥ ८३ ॥

टंकणंशुद्धगंधंतुसुवर्णमाक्षिकंपृथक्।
एकंद्वित्रिचतुःपंचक्रमाच्चशुद्धसूतकम् ॥ ८४ ॥
चांगेर्य्याश्चद्रवैर्मर्द्यंदिनैकंगोलकीकृतम्।

गंधकंताम्रपर्ण्याथगोलकांशंप्रमर्दयेत् ॥ ८५ ॥
गोलकंलेपयेत्तेनततोवस्त्रेणवेष्टयेत् ।
मृगांकंपाचयेत्स्थाल्यांबालुकाभिश्चपूरिते ॥ ८६ ॥
उद्धृत्यचूर्णयेच्छ्लक्ष्णंहरनेत्रोरसोत्तमः ।
मृगांकवत्क्षयंहन्तितद्वन्मात्रानुसारतः ॥ ८६ ॥

इतिहरनेत्रोरसः ।

अर्थ–सुहागा एक भाग, शुद्धगंधक दो भाग, सुवर्ण तीन भाग, सोनामाखी चार भाग और शुद्ध पारा पांच भाग लेकर चांगेरीके रसमें एक दिन खरलकर गोला बनावे, पश्चात् इस गोलेको गंधक और मजीठके रसमें खरलकरे, तदनन्तर गंधकका गोलेके ऊपर लेपकर गोलेको वस्त्रमें बाँधे, फिर वालुकायंत्रमें मृगांकरसकी तरह फूंकदेवे, जब स्वयंशीतल होजाय तब निकालकर बारीक चूर्णकरे तो हरनेत्ररस सिद्ध हो। यह रस–मृगांकरसकी मात्राके अनुसार खानेसे क्षयरोगको दूर करेहै ॥ ८७ ॥

रसभस्मचतुर्थांशंहेमभस्मप्रकल्पयेत् ।
तालकंरसकंतुल्यंमाक्षिकंगंधकंशिला ॥ ८८ ॥
रसमानानियुंजीतसूतपादंचटंकणम् ।
दिनैकैकंक्रमेणैवतत्सर्वंमर्दयेद्दृढम् ॥ ८९ ॥
अर्कक्षीरंजयन्तीचभृंगवासाचलांगली ।
अगस्तिचित्रकंपाठामद्यमेषांद्रवैःपृथक् ॥ ९० ॥
द्विगुंजंभक्षयेन्नित्यमनुपानंमृगांकवत् ।
क्षयंहन्तिमहातीव्रंरसःकनकसुन्दरः ॥ ९१ ॥

इति कनकसुन्दरः ।

अर्थ–मृतपारा, हारिताल,खपरिया, सोनामाखी, गंधक, मनशिल यह प्रत्येक एक एक भाग, सोनेकीभस्म चौथाभाग,सुहागा चौथाभाग लेवे, फिर इन सबको एकत्र खरलकर क्रमसे एक एक दिन आकके दूध, जयन्तीके रस, भांगराके रसमें, अडूसेके रसमें,करियारीके रसमें,अगथियाके

रसमें, चीतेके रसमें और पाढ़के रसमें अलग २ खरलकरे। इसको दो-रत्ती भर खावे, ऊपरसे मृगांकरसकी समान अनुपान करे तो महाती-व्रक्षयरोग दूरहो। इसको कनकसुंदर कहतेहैं ॥ ९१ ॥

विषंक्षुद्राउशीरञ्चहरिद्रागोक्षुरंमधु।
कुटजस्यत्वचंचूर्णसमांशंसर्वचूर्णकम् ॥ ९२ ॥
राजयक्ष्महरंखादेद्रसोऽयंनीलकण्ठकः ॥ ९३ ॥

अर्थ-विष, कटेरी, खस, हलदी, गोखुरू, सहत, और कुडेकी छालका चूर्ण इनसबको समान भाग लेकर विधिपूर्वक मिलावे। यह नीलकण्ठ-रस-राजयक्ष्मारोगको दूर करेहै ॥ ९२ ॥ ९३ ॥

कर्षंखर्परसत्वस्यसमांशेहेमविद्रुमे।
निक्षिपेच्चूर्णयेत्तद्वत्षड्‌निष्कंशुद्धगंधकम् ॥ ९४ ॥
अंकोलकंगुलीबीजंतुत्थंतालंचतुश्चतुः।
मुक्ताप्रवालचूर्णञ्चप्रतिनिष्काष्टकंक्षिपेत् ॥ ९५ ॥
मृतलौहस्यनिष्कौद्वौटंकणस्याष्टनिष्ककम्।
द्वौनिष्कौनीलकटुकीवराटीनांचविंशतिः ॥ ९६ ॥
सितानिष्कद्वयंयोज्यंसर्वंखल्वेविमर्दयेत्।
चांगेर्य्यम्लेनयामैकंजम्बीराम्लैर्दिनद्वयम् ॥ ९७ ॥
रुद्ध्वापुटाष्टकंदेयंदिनमेकंतुषाग्निना।
जम्बीरोत्थद्रवेणैवपिष्ट्वापिष्ट्वापुटेपचेत् ॥ ९८ ॥
ततोवनोपलैरेवदेयंगजपुटंमहत्।
आदायचूर्णयेच्छ्लक्ष्णंचूर्णार्द्धंशुद्धगंधकम् ॥ ९९ ॥
गंधार्द्धंमरिचंचूर्णमेकीकृत्याद्विमाषकम्।
लेहयेन्मधुनासार्द्धंनागवल्लीदलोत्थितम् ॥ १०० ॥
पथ्याशीप्रातियामेस्यादभुक्तेविषवद्भवेत्।
रसोवज्रेश्वरःख्यातःक्षयपर्वतभेदकः ॥ १०१ ॥

इति वज्रेश्वररसः।

अर्थ–खपरियाका सत्व दो तोले, सोना एक तोला, मूगा एक तोला इन तीनोंको लेकर खरलकरे फिर उसमें २४ मासेभर शुद्धगंधक मिलावे पश्चात् अंकोल, हिंगोटके बीज, नीलाथोथा और हरिताल यह प्रत्येक सोले २ मासे लेवे, मोती और मूगेका चूर्ण ३२ बत्तीस २ मासेलेवे, लोहेकी भस्म आठ ८ मासे लेवे, सुहागा ३२ मासेलेवे, नीलकुटकी आठ ८ मासे भरले, कौडीकी भस्म८०मासे और मिश्री ८ मासे भरलेवे, पश्चात् इन सबको खरलमें डालकर खरलकरे, फिर चांगेरीके रसमें एकप्रहर खरलकरे, तदनन्तर जम्भीरीनीबूके रसमें दोदिन खरल करे, फिर पात्रमें बंदकर एकदिनमें भुसकी आगसे आठ पुट देवे और प्रतिपुटमें जम्भीरी नीबूके रसमें पीसलेवे, तदनन्तर वनके अन्ने उपलोंकी अग्निके द्वारा महागजपुटमें खरलकर फूंकदेवे, जब स्वयंशीतल होजाय तब निकालकर बारीक चूर्ण करले, फिर चूर्णसे आधाभाग शुद्धगंधक और चौथाई भाग कालीमिरचोंका चूर्ण मिलावे, इसको दो उड़दोंकीबराबर लेकर सहत और नागरपानके रसमें मिलाकर चाटनेसे–क्षयरोग नाश होताहै, इसपै पथ्यसे रहै और विना पथ्य यह रस–विषकी समान अपकार करताहै । यह वज्रेश्वर रस–क्षयरूपी जो पर्वतहैं तिनको भेदनेवालाहै ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥

भस्मसूतमजाक्षीरैःकणानिष्कैःपलैःसह ।
व्योषगंधकक्षौद्रैर्वाभक्षयेद्भक्षयेत्क्षयम् ॥ १०२ ॥

इतिभस्मसूतरसः ।

अर्थ–चार मासे भर पारेकी भस्मको लेकर बकरीके दूधके साथ और पीपलके चूर्णके साथ खानेसे तथा त्रिकुटा, गंधक और सहतके साथ भक्षण करनेसे यह रस क्षयरोगको भक्षण करताहै ॥ १०२ ॥

वज्रहाटकसूतानांभस्मैकंद्वित्रिषट्क्रमात् ।
त्रिकण्टकरसैर्भाव्यंदिनान्तेताद्विचूर्णयेत् ॥ १०३ ॥
गुंजामात्रंप्रयोक्तव्यंसज्वरेराजयक्ष्मणि ।
स्नुहीमूलंचजम्बीरद्रवैःस्यादनुपानकम् ॥ १०४ ॥
साध्यासाध्यक्षयंहन्तिह्यनुपानंमृगांकवत् ।

अयमग्निरसंखादेद्त्रिनिष्कंराजयक्ष्मनुत् ॥ १०५ ॥

इतिअग्निरसः ।

अर्थ—हीरेकी भस्म २ भाग, सोनेकी भस्म ३ भाग, पारेकी भस्म ६ भागलेवे, पश्चात् इन तीनोंको गोखरूके रसमें एकदिन भावना देवे, दिनके अंतमें इसका चूर्ण करले । इसको एक गुंजाभर खावे तो ज्वरयुक्त राजयक्ष्मा रोग दूर होजाय, और ऊपरसे थूहरका दूध और जम्भीरी नीबूका रस पीवे, यह अनुपानहै । इसके ऊपर मृगांककी तरह अनुपान करै तो साध्यासाध्य राजयक्ष्मा दूर होवे । इस अग्निरसको १ तोलाभर खानेसे शीघ्रही राजयक्ष्मा दूर होवे ॥ १०४ ॥

त्रिकटुत्रिफलाचव्यंधान्यंजीरकसैन्धवाः ।
प्रत्येकंतोलकंग्राह्यंछागीदुग्धेनगोलयेत् ।
रसगंधकलोहानिप्रत्येकंकार्षिकंक्षिपेत् ॥ १०६ ॥
टंकणस्यपलंदत्त्वामरिचस्यपलार्द्धतः ॥
नवगुंजाप्रमाणेनवटिकांकारयेद्भिषक् ।
प्रातःकालेशुचिर्भुत्वाचिन्तयित्वामृतेश्वरीम् ॥ १०७ ॥
एकैकांवटिकांखादेद्रक्तोत्पलरसप्लुता ।
नीलोत्पलरसेनापिकुलत्थस्यरसेनवा ॥ १०८ ॥
छागीदुग्धेनमंडेनकैरवस्यरसेनवा ।
निहन्तिविविधंकासंवातपित्तसमुद्भवम् ॥ १०९ ॥
वातश्लेष्मोत्थितंदुष्टंपित्तश्लेष्मभवंचिरम् ।
वातिकंपैत्तिकंचैवगरदोषसमन्वितम् ॥ ११० ॥
सरक्तमथनीरक्तंज्वरश्वाससमान्वितम् ।
तृड्दाहभ्रमशूलघ्नीरुच्यावह्निप्रदीपनी ॥ १११ ॥
बलवर्णकरीवृष्याहीनगुल्मोदरापहा ।
आनाहक्रिमिपाण्डुघ्नीजीर्णज्वरविनाशिनी ॥ ११२ ॥
इयंचन्द्रामृतानाम्नाचन्द्रनाथेनानिर्मिता ।

वासागुडूचिकाभार्गीमुस्तकंकण्टकारिका ॥ ११३ ॥
भोजनान्तेप्रकर्त्तव्यंवटिकावीर्य्यवृद्धये ॥ ११४ ॥

इतिचन्द्रामृतरसः ।

अर्थ-त्रिकुटा, त्रिफला,चव्य, धनिया,जीरा, और सैंधानोन यह प्रत्येक तोले तोले भर लेकर बकरीके दूधमें खरलकरे,फिर पारा,गंधक और लोहा प्रत्येक दोदो तोले,सुहागा चार तोले और कालीमिरचोंका चूर्ण दो तोले यह सब पूर्वोक्तमें मिलाकर ९ रत्तीभर गोली बनालेवे । प्रातःकालमें पवित्र होकर अमृतेश्वरी देवीका ध्यानधर एक गोली लालकमलके रसमें अथवा नीलकमलके रसमें, वा कुलथीके रसमें, अथवा बकरीके दूधमें वा माडमें मिलाकर,अथवा कमोदिनीके रसमें मिलाकर रोज खावे। इससै विविधप्रकारकी खांसी, वातसै उत्पन्न हुई खांसी, पित्तसै उत्पन्न हुई खांसी, वातकफसै उत्पन्न हुई खांसी, पित्तश्लेष्मसै उत्पन्न हुई खांसी, विषोद्भव खाँसी, रुधिरयुक्त खाँसी,सूखी खाँसी,ज्वर और श्वास-युक्त खाँसी, तृषा, दाह, भ्रम और शूल दूर होताहै, तथा यह रुचिकारक, अग्निप्रदीपक, बलकारक,वर्णको सुंदरकरनेवाला, वीर्य्यवर्द्धक,और प्लीहा, गुल्म, उदररोग, आनाह, कृमि, पाण्डु, और जीर्णज्वरको दूर करैहै । यह चन्द्रामृतरस श्रीचन्द्रनाथसिद्धने निर्म्माण किया है । अडूसा, गिलोय, भारंगी, नागरमोथा कटेरी, इन सबको मिला गोली बनाकर भोजनके अंतमें खानेसे वीर्य्यकी वृद्धि होतीहै ॥११४॥

कांचनंरससिन्दूरंमुक्तिकंलौहमभ्रकम् ।
विद्रुममभयातारंकस्तूरीचमनःशिला ॥ ११५ ॥
प्रत्येकंबिन्दुमात्रंचसर्वंमर्द्यंप्रयत्नतः ।
वारिणावटिकाकार्याद्विगुंजाफलमानतः ॥ ११६ ॥
अनुपानंप्रयोक्तव्यंयथादोषानुसारतः ।
नानारोगप्रशमनंसर्वोपद्रवसंयुतम् ॥ ११७ ॥
क्षयंहंतितथाकासंश्लेष्मपित्तहरंतथा ।
प्रमेहान्विंशतिंचैवदोषत्रयसमुत्थितान् ॥ ११८ ॥
अशीतिवातजान्रोगान्नाशयेत्सद्यएवहि ।

बलवृद्धिंवीर्य्यवृद्धिंलिंगजाड्यंकरोतिच ॥ ११९ ॥
रसोऽयंसुश्रुतप्रोक्तोवाजीकरणमुत्तमम् ।
काञ्चनस्यसमाकान्तिर्मदनस्यसमंवपुः ॥ १२० ॥
भक्षयेत्प्रातरुत्थायरसोऽयंकांचनाभ्रकम् ॥ १२१ ॥

इतिकांचनाभ्ररसः ।

अर्थ-सोना, पारा, सिन्दूर, मोती, लोहा, अभ्रक, मूगा हरड, चांदी, कस्तूरी और मैनसिल यह सब समान भागले, जलमें खरलकर दोदो-रत्तीकी गोली बनालेवे। इसको दोषानुसार अनुपानके साथ देवे । यह गोली-सर्वोपद्रवयुक्त नानाप्रकारके रोगोंको शांतकरेहैं, तथा क्षय, खाँसी, कफ, पित्त, वीस २० प्रकारके प्रमेह, त्रिदोषोत्पन्न रोग और ८० प्रकारके वातरोगोंको दूर करेहै.बल और वीर्य्यकी वृद्धिकरे,लिंगकी जड-ताको उत्पन्नकरे.यह रस श्रीसुश्रुताचार्य्यने कहाहै और उत्तम वाजीकरणहै. यह काञ्चनाभ्ररस कांचनकी समान कांतिको देवे और कामदेवकी समान शरीरको करेहैं, इसको प्रातःकाल उठकर भक्षण करना चाहिये ॥१२१॥

रसभस्मत्रयोभागाभागैकंहेमभस्मकम् ।
मृतताम्रस्यभागैकंशिलागंधकतालकम् ॥ १२२ ॥
प्रतिभागद्वयंशुद्धमेकीकृत्यविचूर्णयेत् ।
वराटींपूरयेत्तेनअजाक्षीरेणटंकणम् ॥ १२३ ॥
पिष्ट्वातेनमुखंरुद्धामृद्भाण्डेतंनिरोधयेत् ।
श्लक्ष्णंगजपुटेपच्याच्चूर्णयेत्स्वांगशीतलम् ॥ १२४ ॥
वासाराजमृगांकोयंचतुर्गुंजंक्षयापहम् ।
पिप्पलीदशकंक्षौद्रैर्मरिचैकोनविंशतिः ॥ १२५ ॥
सघृतैर्दीपयेद्वाथवातश्लेष्मभवेक्षये ॥ १२६ ॥

इतिराजमृगांकरसः ।

अर्थ-पारेकी भस्म तीन भाग, सोनेकी भस्म एकभाग, ताँबेकी भस्म एक भाग, मनशिल दोभाग,गंधक दोभाग, हरिताल दोभाग, इनसबका चूर्णकर कौडियोंमें भरदेवे, और कौडियोंका मुख बकरीके दूधमें पीसे-

हुवे सुहागेसे बंदकर देवे, फिर कौडियोंको मट्टीके वासनमें रख गजपुट-में फूँकदेवे, जब स्वाँगशीतल होजाय तब बारीक चूर्ण करले, तो राज-मृगांकरस सिद्धहो। इसको चाररत्ती भर खानेसे क्षयरोग दूर होताहै. दसपपिलके चूर्णमें सहत मिलाकर अथवा उन्नीस कालीमिरचोंके चूर्णमें घी मिलाकर खावे, यह अनुपान है। और यह वातकफोत्पन्न क्षयरो-गका क्षयकरेहै ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥ १२६ ॥

स्वरभेदः कफःकण्ठशूलंकासश्वछर्द्दनम् ।
वातश्लेष्मभवेचिह्नंज्ञातव्यश्चाचिकित्सकैः ॥ १२७ ॥
स्वरभेदोज्वरोदाहःशूलंछर्दिररोचकम् ।
वातपित्ताधिकेज्ञेयोराजरोगेमहाबले ॥ १२८ ॥
आलस्यंबहुनिद्राचस्वल्पदाहोज्वरोभ्रमः ।
वान्तिःशोणितपित्तोत्थापित्तश्लेष्मभवेक्षये ॥ १२९ ॥
वातपित्तकफोत्थैश्चलक्षणैःसंहतोयदा ।
सन्निपातान्वितोज्ञेयःकष्टसाध्यःस्वयंस्मृतः ॥ १३० ॥

अर्थ–वातकफसे उत्पन्न हुवे क्षयरोगमें स्वरभेद, कफ कण्ठशूल, खाँसी और वमन यह सब लक्षण होतेहैं, । स्वरभेद, ज्वर, दाह, शूल वमन, और अरुचि यह लक्षण वातपित्तसे उत्पन्न हुवे क्षयरोग-में होतेहैं। आलस्य, बहुनिद्रा, स्वल्पदाह, ज्वर, भ्रम, वमन, और रक्त-पित्तमिश्रित वमन यह सब लक्षण होंतो पित्तकफसे उत्पन्न हुआ क्षय-रोग जानना। सन्निपातसे उत्पन्न हुवे क्षयरोगमें वात, पित्त और कफ इनतीनों दोषोंके मिले हुये लक्षण होतेहैं, और सन्निपातोद्भव क्षयरोग कष्टसाध्य है ॥

शंखनाभीगवांक्षीरैःपेषयेन्निष्कषोडशम् ।
तेनमूषाप्रकर्त्तव्यातन्मध्येभस्मसूतकम् ॥ १३१ ॥
निष्कार्द्धंगंधकास्त्रीणिचूर्णीकृत्याविनिक्षिपेत् ।
रुद्धातद्वेष्टयेद्वस्त्रेमृत्तिकांलेपयेद्बहिः ॥ १३२ ॥
शोष्यंगजपुटेपच्यान्मूषयासहचूर्णयेत् ।

गुंजैकमनुपानेनक्षयंहन्तिमृगांकवत् ॥ १३३ ॥
पोटलीशंखगर्भोयंयोजयेद्वातपित्तजित् ॥ १३४ ॥

इतिशंखगर्भपोटलीरसः ।

अर्थ-शंखकीनाभी ६४ मासे लेकर गायके दूधमें पीसके मूषा बनावे, उस मूषामें २ मासे पारेकी भस्म, और १२ मासे गंधक डाल कपरौटी कर धूपमें सुखा गजपुटमें फुकदेवे, जब अपनेआप शीतल होजाय तब उसको निकाल ऊपरकी कपरौटी अलगकर मूषासमेत खरलमें गेरकर पीसलेवे। इसकी मात्रा एकरत्तीकीहै, अनुपान मृगांकरसकी समान जानना । यह शंखगर्भपोटलीरस-राजयक्ष्मारोग, वात और पित्तको दूरकरैहै ॥ १३४ ॥

कांचनंरससिन्दूरंमौक्तिकंलौहमभ्रकम् ।
विद्रुमंमृतवैक्रान्तंतारंताम्रञ्चवंगकम् ॥ १३५ ॥
कस्तूरिकालवंगंचजातिकोषैलवालुका ।
प्रत्येकंबिन्दुमात्रंचसर्वंमर्द्यंप्रयत्नतः ॥ १३ ॥
कन्यानीरेतुसंमर्द्यकेशराजरसेनच ।
अजाक्षीरेणसंभाव्यप्रत्येकंदिवसत्रयम् ॥ १३७ ॥
चतुर्गुञ्जाप्रमाणेनवटिकांकारयेद्भिषक् ।
अनुपानंप्रदातव्यंयथादोषानुसारतः ॥ १३८ ॥
नानारोगप्रशमनंसर्वोपद्रवसंयुतम् ।
क्षयंहन्तितथाकासंयक्ष्माणंश्वासमेवच ॥ १३९ ॥
प्रमेहान्विंशतिश्चैवदोषत्रयसमुत्थितान् ।
सर्वान्रोगान्निहन्त्याशुभास्करस्तिमिरंयथा ॥ १४० ॥

इतिबृहत्काञ्चनाभ्रः ।

अर्थ-सोना, रससिंदूर, मोती, लोहा, अभ्रक, मूगा, वैक्रान्त, चांदी, ताँबा, और वंग इन सबकी भस्म, कस्तूरी, लौंग, जायफल और एलुआ यह सब समान भाग लेकर खरल करे, पश्चात् घीकुवारके रस, कुकुरभांगराके रस और बकरीके दूधमें तीन २ दिन खरलकर चार चार

रत्तीकी गोलीबना लेवे । इसको दोषानुसार अनुपानके साथ देवे । यहरस-सर्वोपद्रवयुक्त नानाप्रकारके रोगोंको दूर करैहै, तथा क्षय, खाँसी, राजयक्ष्मा, श्वास, वीसप्रकारके प्रमेह, त्रिदोषोद्भवरोग, और सर्व प्रकारके रोगोंको दूर करैहै ॥ १४० ॥

शुद्धसूतंद्विधागंधंसूततुल्यंचसैन्धवम् ।
शमीश्वेतादलद्रावैर्मर्दितंगोलकीकृतम् ॥ १४१ ॥
नागवल्लीदलैर्वेष्ट्यंपाच्यंपातालयंत्रके ।
दिनान्तेऊर्द्धलग्नंतंग्राह्यंभक्ष्यात्रिगुंजकम् ॥ १४२ ॥
पर्णखंडेनसंयुक्तंमासैकाद्राजयक्ष्मनुत् ।
रसश्चन्द्रामृतोनामह्यनुपानंमृगांकवत् ॥ १४३॥

इति चन्द्रामृतरसः ।

अर्थ-शुद्धपारा १ भाग, शुद्धगंधक २ भाग, सैंधानोन १ भाग इन तीनोंको छोंकर और सफेद्कोयलके पत्तोंके रसमें खरलकर गोला बनालेवे, फिर इसगोलेको पानोंसे वेष्टितकर पातालयंत्रमें एकदिन पकावे, जब अपने आप शीतल होजाय तब ऊपरके पात्रमें लगे हुवे द्रव्यको खुरचलेवे । इसको एकमहिनेपर्य्यंत पानके टुकडेपै तीन चोटलीभर लगाकर खानेसै राजयक्ष्मारोग दूर होजाताहै, इसको चंद्रामृतरस कहतेहै, अनुपान मृगांकरसकी समान जानना ॥ १४३ ॥

शुद्धसूतंस्वर्णभस्मजम्बीरैर्मर्द्दयेद्दिनम् ।
तयोर्द्विगुणितंताम्रंत्रिभिस्तुल्यन्तुगंधकम् ।
टंकणंगंधकार्द्धञ्चसर्वंजम्बीरजैर्द्रवैः ॥ १४४ ॥
मर्द्यंयामचतुर्गोलंवस्त्रेबद्ध्वाविपाचयेत्
दोलायंत्रेचारनालेयामादुद्धृत्यशोषयेत् ।
ततोमृन्मयभाण्डान्तर्लवणञ्चांगुलद्वयम् ॥ १४५ ॥
ऊर्द्ध्वाधःपृष्ठतःकृत्वागोलकंवस्त्रवेष्टितम् ।
लवणैःपूरयेद्भाण्डेऽन्धयित्वादिनंपचेत् ॥ १४६ ॥

चुल्ल्यांक्रमाग्निसिद्धोरसोमहामृगांकक: ।
अनेनैवप्रकारेणमृगांकान्पाचयेद्रसान् ॥ १४७ ॥
राजरोगनिवृत्त्यर्थंदेयंसिताघृतन्तुतैः ।
दशभिर्मरिचैःसार्द्धंपिप्पलीमधुनापिवा ॥ १४८ ॥

इति महामृगांकरसः ।

अर्थ-शुद्धपारा १ भाग, स्वर्णभस्म १ भाग इन दोनोंको लेकर जम्भीरी नीबूके रसमें एकदिन खरल करे, पश्चात् तांबा ४ भाग, गंधक ६ भाग, और सुहागा ३ भाग लेवे, फिर इन तीनोंको पूर्वोक्तमें मिलाकर जम्बीरी नीबूके रसमें चारप्रहर पर्य्यंत खरलकर गोला बनालेवे, पश्चात् गोलेको वस्त्रमें बांधकर काँजीमें दोलायंत्रके द्वारा दो प्रहर पकावे, तदनन्तर उसमेंसे निकाल कर गोलेको सुखालेवे, पश्चात् मट्टीके वासनमें दो अंगुल ऊंचा लवण स्थापितकर उसके ऊपर कपड़ेमें बँधे हुवे गोलेको रख ऊपर नोन भरदेवे, फिर बासनके मुखको बंदकर चूलेपै चढ़ा क्रमसे मन्द, मध्य, और तीक्ष्ण अग्निके द्वारा एकदिन पकावे तो, महामृगांकरस सिद्धहो । इसी विधिसै और सर्वप्रकारके मृगांकरस बनतेहैं । इससे रोगराज (राजयक्ष्मा)नष्टहोताहै, अनुपान-१०मिरच, बूरा, घृत, अथवा पीपल और मधु है ॥ १४८ ॥

विभ्रमंश्लेष्मदिग्धांगमतीसारेणपीडितम् ।
शूनमुष्कोदरंचैवयक्ष्मिणंपरिवर्जयेत् ॥ १४९ ॥
ऊर्द्ध्वश्वासोऽतिशुष्काक्षःकांस्यपात्रहतःस्वरः ।
मधुमेहीकृशोऽमल्लोहीनबुद्धिबलेन्द्रियः ॥ १५० ॥
व्रणांगःशुक्रमेहीचक्षयीयातियमालयम् ।
अथास्यापिप्रकर्त्तव्याचिकित्साजीवितावधि ॥ १५१ ॥

अर्थ-विभ्रमहो, कफसै अंग लिप्त होजाय, अतीसारकी पीडाहो,अंडकोश और उदरमें सूजनहो ऐसा राजयक्ष्मारोगी असाध्य जानना । ऊर्द्ध्वश्वासहो, नेत्र अत्यन्त सूखजाय, कांसीके बरतनकी समान स्वरहो, मधुमेहहो, कृशता आजाय, दुर्वलताहो, बल, बुद्धि और इन्द्रियोंमें हीनता उत्पन्नहो, शरीरमें व्रण होजाय और शुक्रमेहहो, ऐसा क्षयरोगी

निश्चय मृत्युको प्राप्त होताहै, किन्तु जबतक यह रोगी जीते रहैं तब तक चिकित्साकरे, असाध्य जानकर छोड न देवे ॥ १५१ ॥

लोहभस्मपलैकन्तुद्विपलंभृंगजद्रवात् ।
पलैकंत्रिफलाक्काथंसर्वंसम्मर्द्यखर्परे ॥ १५२ ॥
लोहांशंमाक्षिकंशुद्धंमर्द्यपूर्वोदितद्रवैः ।
रुद्ध्वात्रिभिःपुटेपाच्यंद्रवैर्मर्द्यंपुनःपुनः ॥ १५३ ॥
मृतंसूतंमृतंनागंनिष्कंनिष्कंविमिश्रयेत् ।
शुद्धगंधस्यद्वौनिष्कौवराटीनांचतुष्टयम् ॥ १५४ ॥
एकीकृत्यपुटेपच्यात्पूर्वेणैवविमिश्रयेत् ।
पूर्वोक्तैश्चद्रवैर्मर्द्यंपुटेनैकेनपाचयेत् ॥ १५५ ॥
चूर्णयेन्मरिचैःसप्ततुत्थटंकणयोर्दश ।
मेलयेच्चपृथङ्निष्कान्प्राणत्राणाह्वयोरसः ॥ १५६ ॥
भक्षयेन्निष्कपादार्द्धमसाध्यंराजयक्ष्मनुत् ।
शोथोदरार्शोग्रहणीपांडुगुल्महरञ्जयत् ॥ १५७ ॥

इतिप्राणत्राणरसः।

अर्थ-लोहेकी भस्म चार तोले,सोनामाखी४तोले,भंगराका रस८तोले, और त्रिफलाका काढा ४ तोले लेवै, इन सबको कढाईमें डालकर खूब घोटे, पश्चात् पात्रमें रख गजपुटमें तीनवार पकावे और प्रतिपुट पूर्वोक्त रसोंमें मर्दन करता जाय, तदनन्तर पारेकी भस्म४मासे, सीसेकी भस्म४ मासे,शुद्धगंधक ८ मासे और कौड़ीकी भस्म१६ मासे मिलाकर भांगरेके रस और त्रिफलेके काढ़ेमें खरल कर गजपुटमें फूंकदेवे, पश्चात् इस रस-में कालीमिरचोंका चूर्ण २८ मासे, तूतिया ४० मासे और सुहागा ४० मासे मिलादेवे। इसकी मात्रा तीनरत्तीकी है। यह असाध्यराजयक्ष्मा रोगको दूर करैहै तथा सूजन, उदररोग, बवासीर, संग्रहणी, पांडु और गुल्मरोगको दूर करैहै ॥ १५७ ॥

मृतंसूतंमृतंहेमशुद्धगंधकटंकणम् ।
प्रत्येकमर्द्धनिष्कंस्यान्मृतंशुल्वंद्विनिष्ककम् ॥१५८॥

शंखनिष्कद्वयंचूर्णंसर्वमेकत्रकारयेत्।
पूरयेत्पूर्वचूर्णेनपुटयेच्चमृगांकवत् ॥ १५९ ॥
ततश्चार्द्रकनिर्य्यासैःसार्द्धंरुद्धापुटेपचेत्।
आदायचूर्णयेच्छ्लक्ष्णंद्वात्रिंशन्मरिचैर्युतम् ॥ १६० ॥
चूर्णाच्चतुर्गुणंगंधमेकीकृत्यविचूर्णयेत्।
पंचमांशंघृतंलेह्यमसाध्यंराजयक्ष्मनुत् ॥ १६१ ॥
शोथोदरार्शोग्रहणीज्वरगुल्मांश्चनाशयेत्।
रसोहेममृगांकोऽयंह्यनुपानंमृगांकवत् ॥ १६२ ॥

इति हेममृगांकरसः।

अर्थ–पारेकी भस्म २ मासे, सोनेकीभस्म २ मासे, शुद्ध गंधक २ मासे, सुहागा २ मासे, तांबेकीभस्म ८ मासे और शंखका चूर्ण ८ मासे लेवे, फिर इन सबको मिलाकर मृगांकरसकी नाई गजपुटमें पकावे, पश्चात् अदरखके रसमें भावना देकर गजपुटमें फूंक देवे,जब स्वयं शीतल होजाय तब निकालकर बारीक चूर्ण करले, फिर इस चूर्णमें ३२ काली मिरचोंका चूर्ण, चौगुनागंधक मिलादेवे। इसमें पांचभाग घृत मिलाकर चाटनेसै–असाध्य राजयक्ष्मा रोग, सूजन, उदर, बवासीर, संग्रहणी, ज्वर और गुल्मरोगको दूर करताहै। इसपै अनुपान मृगांकरसकी समान जानना ॥ १५८ ॥ १५९ ॥ १६० ॥ १६१ ॥ १६२ ॥

कर्य्यालोहमयीमूषाऊर्द्धतोद्वादशांगुला।
मर्दितंस्वर्णवाराहीगृहकन्यारसैःसमम् ॥ १६३ ॥
लशुनैर्यामगात्रश्चापिण्डंकृत्वानिवेशयेत्।
पूर्वोक्तायाश्चमूषायांसूतपादश्चगंधकम् ॥ १६४ ॥
निर्गुण्डीरससंपिष्टंमूषायांतंविनिक्षिपेत्।
आच्छाद्यलौहचक्रेणवक्रयंत्रेणजारयेत् ॥ १६५ ॥
एवमष्टपुटेजीर्णंसमुद्धृत्यविचूर्णयेत्।
पंचगुञ्जामितंखादेदनुपानंमृगांकवत् ॥ १६६ ॥
देयःकालान्तकोनाम्नारसोऽयंराजयक्ष्मनुत्।

अर्थ-बारह अंगुल ऊँची लोहेकी मूषा बनावै, उसमें स्वर्ण और बाराहीकन्दको घीकुवार और लशुनके रसमें एकएक प्रहर मर्दन कर गोला बनावै, पश्चात् पारा और पारेसे चौथाभाग गंधकको सह्मालुके रसमें पीसकर मूषामें डालदेवै, और मूषाको लोहेके चक्रसे ढककर वक्रयंत्रद्वारा आठवार पकावै, जब जीर्ण होजाय तब निकालकर चूर्ण करले। इसकी मात्रा पांचरत्ती है। अनुपान मृगांककी समानहै। यह कालान्तक नामवाला रस-राज्ययक्ष्मारोगको दूरकरै है ॥ १६३ ॥ ॥ १६४ ॥ १६५ ॥ १६६ ॥

उपद्रवप्रशान्त्यर्थंपथ्यंवैकथ्यतेक्षये ।
घृतपक्वःप्रदातव्योलावकस्तित्तिरःशशः ॥ १६७ ॥
मरिचैर्जीरकेणैवसंस्कृतंपथ्यमाचरेत् ।
वर्जयेल्लवणंहिंगुतक्रंदधिविदाहितत् ॥ १६८ ॥
क्षीरमाजंदधिवाथपथ्यवर्गेयथोचितम् ।
वर्जयेत्तत्रवर्ज्यश्चरसश्चापिहिगुग्गुलोः ॥ १६९ ॥
पिबेद्वान्तिप्रशान्त्यर्थंक्षौद्रैश्छिन्नरुहारसम् ।
उशीरंतगरंशुण्ठींकंकोलंचन्दनद्वयम् ॥ १७० ॥
लवंगंपिप्पलीमूलंकृष्णैलानागकेशरम् ।
मुस्तामलककर्पूरंतुगाक्षीरंचपत्रकम् ॥ १७१ ॥
कृष्णागुरुसमंचूर्णंसितास्यादष्टमांशतः ।
रक्तवान्तिश्चसन्तापंनाशयेन्नात्रसंशयः ॥ १७२ ॥

अर्थ-घृतसे पकाया हुआ लवा, तीतर और खरगोसका मांस, तथा मिरच और जीरेसे संस्कृत किया हुआ पथ्य राजयक्ष्मारोगीको हितकारी है। लवण, हींग, तक्र, दधि, सर्वविदाही द्रव्य, और गूगलका रस यह सब राजयक्ष्मारोगीको अपथ्यहै। बकरीका दूध अथवा दही इनको यथोचित विचारकर सेवन करे। गिलोयके रसमें सहत डाल पीनेसै राजरोगमें उत्पन्न हुई वमन दूर होतीहै। खस, तगर, सोंठ, शीतलचीनी, चन्दन, लालचन्द, लोंग, पीपलामूल, पीपल, इलायची, नाग-

केशर, नागरमोथा, आमला, कपूर, वंशलोचन, तेजपात, और काली अगर, यह सब समान भाग और मिश्री आठभाग लेवै, सबको एकत्र पीस चूर्णबनावै। यह चूर्ण रक्तवान्ति और सन्तापको दूर करैहै ॥ १६७॥ ॥ १६८ ॥ १६९ ॥ १७० ॥ १७१ ॥ १७२ ॥

रास्नाकर्पूरतालीशभेकपर्णीशिलाह्वयैः ।
त्रिकत्रयसमायुक्तैर्लोहोयक्ष्मान्तकोमतः ॥ १७३ ॥
सर्वोपद्रवसंयुक्तमपिशम्भोःसुदुर्जयम् ।
हन्तिकासंस्वराघातंक्षयकासंक्षतक्षयम् ॥ १७४ ॥
बलवर्णाग्निपुष्टीनांवर्द्धनोदोषनाशनः ॥ १७५ ॥
त्रिकत्रयंत्रिकटुत्रिफलाचित्रकमुस्ताविडंगंसर्वचूर्णसमलौहम् ।

इतिरास्नादिलौहम् ।

अर्थ-रायसन, कपूर, तालीशपत्र, मण्डूकपर्णी, मैनशिल, त्रिकुटा, त्रिफला, चीता, वायविडंग और नागरमोथा, यह सब समान भाग और सबकी बराबर लोहा मिलावै । इस लोहेको सेवनकरनेसे सर्व उपद्रवयुक्त, दुर्जयराजरोग, खाँसी, स्वराघात, क्षय, कास और क्षतक्षयको क्षय करैहै । बल, वर्ण, अग्नि और पुष्टिको बढानेवाला और दोषनाशक है ॥ १७३ ॥ १७४ ॥ १७५ ॥

व्योषंशतावरीत्रीणिफलानिद्वेफलेतथा ।
सर्वमेहहरोयोगःसोऽयंलोहरुजान्वितः ॥ १७६ ॥
एषवक्षःक्षतंहान्तिकण्ठजांविविधांरुजाम् ।
राजयक्ष्माणमत्युग्रंबाहुस्तम्भार्दितन्तथा ॥ १७७ ॥
सर्वचूर्णसमंलौहम् ।

इतिविन्ध्यवासियोगलौहम् ।

अर्थ-त्रिकुटा, शतावरी, त्रिफला, जायफल, कायफल, यह सब समानभाग लेवे, और सबकी समान लोहेका चूर्ण मिलावे, । यहलोह-छातीकाक्षत, अनेकप्रकारके कंठके रोग, अत्युग्रराजयक्ष्मा, बाहुस्तम्भ और अर्दितरोग विनष्ट करताहै ॥ १७६ ॥ १७७ ॥

मधुताप्यविडंगाश्मजतुलोहघृताभयाः ।
घ्नन्तियक्ष्माणमत्युग्रंसेव्यंवानाहिताशिना ॥ १७८ ॥

अत्रमधुघृताभ्यांलेहः ।

इति श्रेष्ठत्वात्सर्वचूर्णसमंलोहम् ।

अर्थ-सहत, सोनामाखी, वायविडंग, शिलाजीत, घृत और हरड़, यह सब समान भाग लेवै, और सबकी बराबर लोहेका चूरन मिलावै। इसको सेवनकरनेसे अत्यन्त उग्र राजरोग शान्त होताहै ॥ १७८ ॥

शिलाजतुक्षौद्रविडंगसर्पिर्लेहोभिषक्सूतकताप्यभक्षः ।
आपूर्यतेदुर्बलदेहधातुस्त्रिपंचरात्रेणयथाशशाङ्कः ॥७९॥

इति शिलाजत्वादिलौहम् ।

अर्थ-शिलाजीत, वायविडंग, पारा और सोनामाखी, इन सबको समान भाग लेकर चूर्णकर सहत और घृतके साथ चाटनेसे आठ दिनमें राजयक्ष्मारोग नष्ट होकर शरीर चन्द्रमाकी समान दीतिमान् होजाती है ॥ १७९ ॥

अभ्रकंपुटितंताम्रंलोहंगंधकपारदम् ।
कुलटाटंकणक्षारंत्रिफलाचपलंपलम् ॥ १८० ॥
गरलञ्चतथामाषचतुष्कंचैवचूर्णितम् ।
दृढपाषाणपात्रेचभूयोभूयःसुचूर्णितम् ॥ १८१ ॥
तत्सर्वंभावयेदेषांरसैःप्रत्येकशःपलैः ।
देवराजाशनाख्यस्यकेशराजाख्यकस्यच ॥ ८२ ॥
सोमराजस्यभृंगाख्यराजस्यात्रिफलस्यच ।
पारिभद्राग्निमन्थस्यवृद्धदारकतुम्बुरो ॥ १८३॥
मण्डूकपर्णीनिर्गुण्डीपूतिकोन्मत्तकस्यच ।
ग्रीष्मसुन्दरकन्याटरूषकस्यक्रमेणतु ॥ १८४ ॥
रसश्चताम्रपर्ण्याश्चदलोत्थैर्भावितंभिषक्।
द्रवेकिंचितस्थितंचूर्णमरिचस्यपलंक्षिपेत् ॥ १८५ ॥

ततश्चैववटींकुर्याच्चतुस्त्रीण्येकरक्तिका ।
ज्वरेचैवातिसारेचकासेश्वासेक्षयज्वरे ॥ १८६ ॥
सन्निपातज्वरेचैवविविधेविषमज्वरे ।
क्षयरोगेषुसर्वेषुक्षीणशुक्रेषुयक्ष्मणि ॥ १८७ ॥
ग्रहण्यांचिरजातायांसूतिकायांविशेषतः ।
शोथेशूलेतथासाध्येस्थविरेचाममारुते ॥ १८८ ॥
मन्दानलेबलेचैवसकलेश्लेष्मजेगदे ।
पीनसेऽपीनसेचैवपक्केऽपक्केचशस्यते ॥ १८९ ॥
वातश्लेष्मणिवातेचविविधेद्वन्द्वजेतथा ।
आमदोषारतेपित्तेशस्तंबलावृतेऽपिवा ॥ १९० ॥
अष्टधैवोदरेचैवकोष्ठरोगेप्रशस्यते ।
अजीर्णकर्णरोगेचकृशस्थौल्येऽपिदेहिनि ॥ १९१ ॥
अयंसर्वगदोच्छेदीरसोयंपरिकीर्त्तितः ।
रसायनवरश्रेष्ठंवाजीकरणमुत्तमम् ॥ १९२ ॥
वृष्यंमधुरमाहारंप्रयोगेपरिकल्पयेत् ।
महाभ्रकमिदंब्रह्मकमनीयकमीरितम् ॥ १९३ ॥
यइहसकलकालंकल्पकामःकरोति
सर्षपपरिमाणैर्नित्यमभ्यासयोगैः ।
सखलुविगतरोगेभोगमुक्तोऽग्नियुक्तो
भवतिपलितहीनःसप्तकल्पान्तजीवी ॥ १९४ ॥

इति महाभ्रवटिका ।

अर्थ–पुटित अभ्रक, ताँबा, लोहा, गंधक, पारा, मैनशिल, सुहागा और त्रिफला, यह प्रत्येक चार चार तोले, और विषका चूर्ण चार मासेभरले, पीछे इन सबको भाँग, कुकुरभांगरा, बापची, भांगरा, त्रिफला, पारिभद्र, अग्निमन्थ, विधारा, तुम्बुरु, मण्डूकपर्णी, निर्गुण्डी, करंज,

धतूरा, ग्रीष्मसुन्दर, घीकुआर, अडूसा और मँजीठ इनके चार चार तोले रसमें अलग अलग भावना देकर चारतोले कालीमिरचोंका चूर्ण मिलावै, एक, दो, तीन, वा चारचाररत्तीकी गोली बनावै, इन गोलियोंको यथायोग्य मात्राके अनुसार भक्षण करे। यह गोली-ज्वर, अतिसार, खाँसी, श्वास, ज्वरयुक्तक्षय, सन्निपातज्वर, नानाप्रकारके विषमज्वर, सर्वप्रकारके क्षयरोग, क्षीणशुक्र, यक्ष्मारोग, बहुतदिनोंकी संग्रहणी, प्रसूतिकारोग, सूजन, शूल, पुरानाआमवात रोग, मन्दाग्नि, बलक्षय, सर्वप्रकारके कफरोग, पीनसरोग, अपीनस, पक्वपीनस, अपक्वपीनस, वातकफ, वात, द्वन्द्वजरोग, आमदोष, पित्तरोग, आठप्रकारके उदररोग, अजीर्ण, कर्णरोग, कृशता और स्थूलताको दूर करेहैं। यह रस सर्वरोगनाशक, सर्वरसायनोंमें श्रेष्ठ, उत्तम वाजीकरणहै। इसके ऊपर वृष्य और मधुर भोजनकरना चाहिये। इसको सरसोंकी समान सदा सेवनकरनेसे मनुष्य कल्पपर्यन्त जीते रहते हैं। तथा इसके सेवनसे सफेद बाल काले होजाते है॥ १८० ॥ १८१ ॥ १८२ ॥१८३॥१८४॥ ॥ १८५ ॥ १८६ ॥१८७॥१८८॥१८९॥१९०॥१९१॥१९२॥१९३॥१९४॥

चन्दनाम्बुनखंवाप्यंयष्टीशैलेयपद्मकम्।
मञ्जिष्ठासरलंदारुचव्यैलापूतिकेशरम् ॥ १९५ ॥
पत्रंतैलसुरामांसीकक्कोलंवनिताम्बुदम्।
हरिद्रेशारिवेतिक्ताल्वंगागुरुकुंकुमम् ॥ १९६ ॥
त्वग्रेणुनलिकाचैभिस्तैलंमस्तुचतुर्गुणम्।
लाक्षारससमंसिद्धंग्रहघ्नंबलवर्णकृत् ॥ १९७ ॥
अपस्मारज्वरोन्मादेहृत्याऽलक्ष्मीविनाशनम्।
आयुष्पुष्टिकरंचैववशीकरणमुत्तमम् ॥ १९८ ॥

इति चन्दनाद्यंतैलम्।

अर्थ-चन्दन, सुगन्धवाला, नख, कूठ, मूलैठी, शैलेय (भूरिछरीला), पद्माख, मजीठ, सरल, देवदारु, इलायची, चव्य, रोहिषतृण,नागकेशर, शिलारस, कपूरकचरी, शीतलचीनी, फूलप्रियंगू, नागरमोथा, हलदी, दारुहलदी, सारिवा, श्यामालता, कुटकी लोंग, अगर, केशर, दाल-

चीनी, रेणुका और नलिका, इन सबका कल्क सेरभर, तिलका तेल चारसेर, लाखका रस चारसेर और दहीका पानी सोलहसेर लेवे; पश्चात् सबको विधिपूर्वक मिलाकर तेलको सिद्धकरै । यह तेल ग्रहनाशक, बलकारक, वर्णको सुन्दर करनेवाला, तथा अपस्मार (मृगी) ज्वर, उन्माद और अलक्ष्मीविनाशकहै, हृदयको हितकारी, आयुवर्द्धक, पुष्टिकारक और उत्तम वशीकरणहै ॥ १९५ ॥ १९६ ॥ १९७ ॥ १९८ ॥

चन्दनागुरुतालीशनखमञ्जिष्ठपद्मकाः ।
मुस्तकंचशठीलाक्षाहरिद्रेरक्तचन्दनम् ॥ १९९ ॥
एषांप्रतिपलैश्चूर्णैस्तैलार्द्धपात्रकेपचेत् ।
भार्गीवासाकण्टकारीवाट्यालकगुडूचिका ॥ २०० ॥
एषांपलशतक्काथेसमभागेजडीकृते ।
पक्त्वातैलंप्रदातव्यंयक्ष्मरोगविनाशनम् ॥ २०१ ॥
कासघ्नंज्वरदोषघ्नंबलवर्णाग्निवर्द्धनम् ।
पापाऽलक्ष्मीप्रशमनंग्रहदोषनिवारणम् ॥ २०२ ॥
श्रीमद्गहननाथेनानिर्मितंविश्वसम्पादि ॥ २०३ ॥

इतिमहच्चन्दनाद्यंतैलम् ।

इतिराजयक्ष्मक्षतक्षीणाध्यायः ।

अर्थ–चन्दन, अगर, तालीशपत्र, नख, मजीठ, पद्माख, नागरमोथा, कचूर, लाख, हलदी, दारुहलदी, लालचन्दन, यह प्रत्येक चार चार तोले, तिलका तेल ९६ तोले लेवे, भारंगी, वाँसा, कटेरी, खिरैटी और गिलोय इनका क्काथ ४०० चारसौ तोले लेवै, पश्चात् क्काथमें पूर्वोक्त औषधियें और तेल डालकर पकावै; जब सिद्ध होजायतौ उतारले। यह तेल–राजयक्ष्मारोग, खाँसी, ज्वर, पाप, अलक्ष्मी, और ज्वरको दूर करैहै, बलको बढ़ानेवाला, वर्णको सुन्दर करनेवाला, अग्निवर्द्धक है, यह तेल श्रीमान् गहननाथने संसारके उपकारार्थ निर्माण कियाहै ॥ १९९॥ ॥ २०० ॥ २०१ ॥ २०२ ॥ २०३ ॥

इतिराजयक्ष्मक्षतक्षीणाधिकारःसमाप्तः ।

अथकासरोगचिकित्सामाह ।

कासाच्छ्वासात्क्षयच्छर्दिस्वरभेदादयोगदाः ।
भवन्त्युपेक्षयायस्मात्तस्मात्तंत्वरयाजयेत् ॥ १ ॥
केवलानिलजंकासंस्नेहैर्वासमुपाचरेत् ।
लेहैर्यूषैस्तथाभ्यंगैःस्नेहसेकावगाहनैः ॥ २ ॥
बास्तिभिरूर्द्ध्वंविड्घातंसपित्तंचोर्द्ध्वभक्तिकैः ।
घृतैःक्षीरैश्चसकलंजयेत्स्नेहविरेचनम् ॥ ३ ॥
वास्तुकोवायसीशाकंमूलकंसुनिषण्णकम् ।
स्नेहास्तैलादयोभक्ष्याःक्षीरेक्षुरसगौडिकाः ॥ ४ ॥
दध्यारनालाम्लफलप्रसन्नापानमेवच ।
शस्यतेवातकासेषुस्वाद्वम्ललवणानिच ॥ ५ ॥
ग्राम्यानूपोदकैःशालियवगोधूमयष्टिकान् ।
रसैर्माषात्मगुप्तानांयूषैर्वाभोजयेद्धितान् ॥ ६ ॥
कण्टकारिरसेसर्पिर्बुधायूषसुसंस्कृतम् ।
सगौरामलकःसाम्लःपंचकासान्व्यपोहति ॥ ७ ॥

सगौरामलकःपरिणताम्लकः ।

पंचमूलीकृतःक्काथःपिप्पलीचूर्णसंयुतः ।
रसार्थमश्नुतोनित्यंवातकासमुदस्यति ॥ ८ ॥

पंचमूलीस्वल्पा ।

शठीशृंगीकणाभार्गीगुडवारिदयासकैः ।
सतैलैर्वातकासघ्नोलेहोऽयमपराजितः ॥ ९ ॥

गुडतैलाभ्यांलेहः ।

चूर्णिताविश्वदुःस्पर्शाशठीद्राक्षासितोपला ।
लिह्यात्कर्कटशृंगंचकासेतैलेनवातजे ॥ १० ॥

भार्गीद्राक्षाशठीशृंगीपिप्पलीविश्वभेषजैः ।
गुडतैलयुतोलेहोहितोमारुतकासिनाम् ॥ ११ ॥

अर्थ-खाँसी और श्वाँसके होनेसे क्षय, वमन, स्वरभेदादिरोग, उत्पन्न होतेहैं,इसकारण खाँसी और श्वासरोगकी शीघ्र चिकित्सा करनी चाहिये । केवल वातसे उत्पन्न हुई खाँसीमें स्नेहद्वारा चिकित्सा करनी चाहिये । अवलेह, यूष, अभ्यंग, स्नेह, अवगाहन, बस्ति और ऊर्द्धभक्तिके द्वारा मलबद्ध पित्तज खाँसीकी और घृत, क्षीर तथा स्नेहके विरेचनद्वारा सर्वप्रकारकी खाँसीकी चिकित्सा करनी चाहिये । वथुआ, मकोय, मूली, शिरिआरीका शाक, तैलादिस्नेह, दूध, ईखकारस, गुड़के पदार्थ, दही, काँजी, अम्ल फल, प्रसन्नामदिरा, स्वादिष्ठ, अम्ल और नमकीन पदार्थ,यह सब वातकी खाँसीमें हितकारीहैं । ग्रामके जीव,अनूपके जीव और जलके जीव, इनसबका मांस, शालिधानके चावल, जौ, गेहूँ, साठीधानके चावल, उड़द और कौंछके यूषके साथ भोजनके पदार्थ सेवन करै । कटेरीका रस और घृतकेद्वारा संस्कृत किया हुआ आमलेका यूष अम्लरसमें भिजोकर पीनेसे वातज खाँसी दूर होती है । लघुपंचमूलके क्राथमें पीपलका चूरन डालकर पीनेसे वातज खाँसी नष्ट होतीहै । कचूर, काकड़ासींगी, पीपल, भारंगी, नागरमोथा, और जवासा इनके चूर्णमें गुढ़ और तेल मिलाकर बनायाहुआ अवलेह चाटनेसे वातकी खाँसी शान्त होतीहै । सोंठ, गोखरू, कचूर, दाख, मिश्री और काकड़ाशिंगी, इनका चूर्ण तेलमें मिलाकर चाटनेसे-वातज खाँसी दूर होती है । भारंगी, दाख, काकड़ाशिगी, कचूर, पीपल, और सोंठ, इनके चूरनमें गुड़ और तेल मिलाकर चाटनेसे वातकी खाँसी नष्ट होती है ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

पित्तकासेतनुकफेवमनंसर्पिषाहितम् ।
तथादमनकाश्मर्यमधुकक्राथजैर्द्रवैः ॥ १२ ॥
यष्टयाह्वफलकल्कैर्वाविदारीक्षुरसैर्युतैः ॥ १३ ॥
सर्पिषावमनद्रव्ययुक्तेन ।
द्राक्षामलकखर्जूरपिप्पलीमरिचान्वितम् ।
पित्तकासहरंह्येतल्लिह्यान्माक्षिकसर्पिषा ॥ १४ ॥

खर्ज्जूरपिप्पलीद्राक्षासितालाजाःसमांशिकाः ।
मधुसर्पिर्युतोलेहःपित्तकासहरःपरः ॥ १५ ॥

अर्थ—किंचित् कफयुक्त पित्तकी खाँसीमें घृत मिलाकर वमन करानी हितकारी है, तथा मैनफल, कुम्भेर, और महुआ इनके काढेमें, अथवा मुलेठीके कल्कमें वा विदारीकन्द और ईखके रसमें घृत मिलाकर वमन करानी चाहिये । दाख, आमला, खजूर, पीपल और कालीमिरच, इनके चूर्णमें सहत और घी मिलाकर चाटे । खजूर, पीपल, दाख, मिश्री और खीलै, यह सब समानभागले सहत और घी मिलाकर चाटनेसे पित्तकी खाँसी दूर होतीहै ॥ १२ ॥ १३ ॥ ॥ १४ ॥ १५ ॥

बलिनंवमनेनादौशोधितंकफकासिनम् ।
यवान्नैःकटुरूक्षोष्णैःकफघ्नैश्चाप्युपाचरेत् ॥ १६ ॥
पिप्पलीक्षारकैर्यूषैःकौलत्थैर्मूलकस्यच ।
लघुन्यन्नानिभुञ्जीतरसैर्वाकटुकान्वितैः ॥ १७ ॥
कट्फलंपौष्करंभार्गीविश्वपिप्पलिसाधितम् ।
पिबेत्काथंकफोद्रेकेकासेश्वासेगलग्रहे ॥ १८ ॥
स्वरसंशृंगवेरस्यमाक्षिकेणसमन्वितम् ।
पाययेच्छ्वासकासघ्नंप्रतिश्यायकफापहम् ॥ १९ ॥
पार्श्वशूलेज्वरेकासेश्वासेश्लेष्मसमुद्भवे ।
पिप्पलीचूर्णसंयुक्तंदशमूलीजलंपिबेत् ॥ २० ॥
तैलयुक्तश्चपिप्पल्याःकल्कार्थंससितोत्पलम् ।
पिबेद्वाकफकासघ्नंकुलत्थसलिलाप्लुतम् ॥ २१ ॥

अर्थ—जो बलवान् मनुष्यको कफकी खाँसी होतो वमन करावै, तथा यवान्न, कटु, रूक्ष, और कफनाशकद्रव्य सेवन करावै । कफकी खाँसी-में पिप्पलीका क्षार, कुलथीका यूष, मूलीकायूष, लघु अन्न और मरिचादियुक्त मांसरस हितकारीहै । कायफल, पोहकरमूल, भारंगी, सोंठ, और पीपल, इनका काढ़ा बनाकर पीनेसे—कफज खाँसी, श्वास

और गलग्रह दूर होताहै। अदरखके रसमें सहत मिलाकर पीनेसे-श्वास, खाँसी, प्रतिश्याय और कफका नाश होताहै। दशमूलके काढेमें पीपलका चूर्ण मिलाकर पीनेसे- पार्श्वशूल, ज्वर और कफसे उत्पन्न हुआ कास और श्वाँसरोग नष्ट होता है। पीपलका कल्क, मिश्री और कमल, इनको तेलमें पीसकर खानेसे अथवा कुलथीके क्काथमें मिलाकर पीनेसे कफकी खाँसी शान्त होतीहै ॥ १६ ॥ १७ ॥ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

कट्फलंचतथाभार्गीमुस्तंधान्यंवचाभया।
शृंगीपर्पटकंशुण्ठीसुराह्वञ्चजलेशृतम् ॥ २२
मधुहिंगुयुतंपेयंकासेवातकफात्मके।
कण्ठरोगेमुखेशूलेश्वासहिक्काज्वरेषुच ॥ २३ ॥

इति कट्फलादिः।

अर्थ-कायफल, भारंगी, नागरमोथा, धनिया, वच, काकड़ाशींगी, पित्तपापड़ा, सोंठ, और देवदारु, इनके काढ़ेमें सहत और हींग मिलाकर पीनेसे-खाँसी, वातज, कफज, कण्ठरोग, मुखरोग, शूल, श्वास, हिचकी और ज्वर दूर होताहै ॥ २२ ॥ २३ ॥

कण्टकारिकृतःक्काथःसकृष्णःसर्वकासहा।
तिंतिडीपत्रजःक्काथोहिंगुसैन्धवसंयुतः ॥ २४ ॥
दुष्टकासंजयेदाशुघनवृन्दमिवानलः।
बिभीतकंघृताभ्यक्तंगोशकृत्परिवेष्टितम् ॥ २५ ॥
स्विन्नमग्नौहरेत्कासंध्रुवमास्याविधारितम्।
वासकस्वरसःपेयोमधुयुक्तोहिताशिना ॥ २६ ॥
पित्तश्लेष्मकृतेकासेरक्तपित्तेविशेषतः।
कासेचक्षतजेचान्यैर्जीवनीयैश्चबृंहणैः ॥ २७ ॥
शमनंपित्तकासोक्तैरन्यैश्चमधुरौषधैः।
वातानुबन्धेवातघ्नैस्तेनस्वाभ्यंजनेहितम् ॥ २८ ॥
मंजिष्ठांजनमूर्वाग्निपाठाकृष्णानिशायुतः।

क्षतक्षयजकासघ्नंलीढंचमधुनासह ॥ २९ ॥
मधुकंपिप्पलीद्राक्षालाक्षाशृंगीशतावरी ।
द्विगुणाचतुगाक्षीरीसितासर्वैश्चतुर्गुणा ॥ ३० ॥
लिह्यात्तंमधुसर्पिर्भ्यांशतकासनिवृत्तये ।
पिप्पलीपद्मकंलाक्षासुपक्वंबृहतीफलम् ॥ ३१ ॥
घृतक्षौद्रयुतोलेपःक्षयकासनिबर्हणः ।
सन्निपातभवोह्येषक्षयकासःसुदारुणः ॥ ३२ ॥
सन्निपातहितंतस्मात्कार्यमत्रचिकित्सितम् ।
कुनटीसैन्धवव्योषविडंगामयहिंगुभिः ॥ ३३ ॥
लेहःसाज्यमधुःकासश्वासहिक्कानिबर्हणः ।
वचाहरिद्रासिन्धूत्थबिभीतककणारजः ॥ ३४ ॥
पुटेवद्धासुखेक्षिप्तंकासश्वासापहंनिशि ॥ ३५ ॥

अर्थ–कटेरीके काथमें पीपलका चूर्ण डालकर पीनेसे सर्वप्रकारकी खाँसी दूर होतीहै । इमलीके पत्तोंके काथमें हींग और सैंधानोनका चूर्ण डालकर पीनेसे दुष्ट खाँसी शीघ्र नष्ट होतीहै,जैसे पवनसे बादलोंका समूह नष्ट होताहै । बहेडेको घीमें भिजोकर पश्चात् गोबरसे लपेट धूपमें सुखा आगमें पकाकर मुखमें रखनेसे खाँसी दूर होजातीहै । अडू-सेके रसमें सहत डालकर पीवै तौ पित्तकफसे उत्पन्न हुई खाँसी और रक्तपित्त रोग दूरहो । काकोली, क्षीरकाकोली, जीवक, ऋषभक, ऋद्धि, वृद्धि, मेदा, महामेदा, जीवन्ती और मुलैठी, इन औषधियोंको सेवन करना तथा पित्तजकासनिवारक औषधियोंको सेवन करना और बृंहण तथा मधुरद्रव्योंको सेवनकरना चाहिये । वातकी खाँसीमें वातनाशक द्रव्योंका सेवनकरना और तैलादिका मालिस करना हितकारीहै । मजीठ, रसोत,मूर्वा, चीता, पाढ़, पीपल और हलदी इनके चूर्णमें सहत मिलाकर चाटनेसे क्षत क्षयज खाँसी दूर होती है । मुलैठी, दाख,पीपल, लाख, काकड़ासिंगी, और शतावर, यह प्रत्येक एक एक भाग, वंशलोचन बारह भाग और मिश्री सबसे चौगुनी लेवे, पश्चात् इन सबको बारीक पीस सहत और घीमें मिलाकर चाटनेसे

क्षतकी खांसी दूर होतीहै । पीपल, मुनाख, लाख और पका हुआ कटाईका फल, इनके चूर्णमें सहत और घृत मिलाकर चाटैतौ क्षयकी खांसी दूर होवे । सन्निपातसे उत्पन्न हुई क्षयकी खांसीमें सन्निपातनाशक क्रिया प्रयोगकरनी चाहिये । मनशिल, सैंधानोन, त्रिकुटा, वायविडंग, कूठ, और हींग, इनके चूर्णमें घी और सहत मिलाकर चाटनेसे खांसी, श्वास, और हिक्कारोग दूर होताहै । वच, हलदी, सैंधानोन, बहेडा, और पीपल, इन सबका चूर्ण एकत्रकर कपडेकी पोटलीमें बांध रात्रिके विषै मुखमें रखै तौ खासी और श्वास दूर होजाय ॥२४॥ २५ ॥ २६ ॥ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥

कर्षःकर्षार्द्धमथोपलंपलद्वयंतथार्द्धकर्षश्च ।
मरिचस्यचापिप्पलीनांदाडिमगुडयावशूकानाम् ३६ ॥
सर्वौषधैरसाध्यायेकासावैद्यविवर्जिताः ।
अपिपूयंछर्दयतांतेषामिदमौषधंपथ्यम् ॥ ३७ ॥

इतिमरिचाद्यंचूर्णम् ।

अर्थ—कालीमिरच दो तोले, पीपल एक तोला, अनारकी छाल चार तोले, गुड आठतोले, और जवाखार एकतोले लेवै, सबको पीसकर एकत्र चूर्ण करले । जो कासरोग अनेक प्रकारकी औषधियोंके सेवन करनेसे शान्त न हुआ होय तथा जिनको वैद्य असाध्य जानकर छोड़ बैठेहों वह कासरोग इसचूर्णसे निःसन्देह नष्ट होजाताहै, और यह चूर्ण राधयुक्त वमनको दूर करैहै ॥ ३६ ॥ ३७ ॥

लवंगजातीफलपिप्पलीनां
भागान्प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमेकंमरिचस्यदद्यात्
पलानिचत्वारिमहौषधस्य ॥ ३८ ॥

सितासमंचूर्णमिदंप्रसह्यरोगानिमानाशुबलान्निहन्यात् ।
कासज्वरारोचकमेहगुल्मान्श्वासाग्निमान्द्यग्रहणीप्रदोषान् ३९॥

इति समशर्करचूर्णम् ।

अर्थ-लोंग, जायफल, और पीपल, यह प्रत्येक एक एक तोला, काली मिरच दो तोले, सोंठ सोलह तोले और सबकी बराबर मिश्री लेवै, पश्चात् सबको पीसकर बारीक चूर्ण करले । इस चूर्णको सेवन करनेसै-खाँसी, ज्वर, अरुचि, प्रमेह, गुल्म, श्वास, मन्दाग्नि और संग्रहणी-रोग दूर होताहै ॥ ३८ ॥ ३९ ॥

हरीतकीकणाशुण्ठीमरिचंगुडसंयुतम् ।
कासघ्नोमोदकःप्रोक्तस्तृष्णारोचकनाशनः ॥ ४० ॥

इतिहरीतक्यादिमोदकः ।

अर्थ-हरड, पीपल, सोंठ कालीमिरच और गुड, इनसबको एकत्रकर मोदक बनाके खानेसे खाँसी, तृषा और अरुचि दूर होतीहै ॥ ४० ॥

हरीतकीनागरमुस्तचूर्णंगुडेनतुल्यंगुटिकाविधेया ।
निवारयत्यास्यविधारितेयंश्वासंप्रवृद्धंप्रबलञ्चकासम् ४१

इति हरीतक्यादिगुटिका ।

अर्थ-हरड, सोंठ, नागरमोथा, यह प्रत्येक एकएक भाग और गुड़ तीनभाग लेवै, फिर सबको मिलाकर गोली बनावै । इन गोलियोंको खानेसे बढाहुआ श्वाँस और प्रबल खाँसी दूर होतीहै ॥ ४१ ॥

तालीशवह्निदीप्यकचविकाम्लवेतसव्योषैः ।
तुल्यैस्त्रिसुगन्धियुतैर्गुडेनगुटिकाप्रकर्त्तव्या ॥ ४२ ॥
कासश्वासारोचकपीनसयकृत्कंठवाङ्निरोधेषु ।
ग्रहणीगुदभवेषुगुटिकाव्योषान्तिकानाम ॥ ४३ ॥
सर्वचूर्णस्यचतुर्थांशंत्रिसुगंधिचूर्णम् ।

इतिव्योषान्तिकागुटिका ।

अर्थ-तालीशपत्र, चीता, अजवायन, चव्य, अमलवैंत, और त्रिकुटा, यह सब समानभागले, और सबसे चौथाई भाग दालचीनी, इलायची, और तेजपात लेवै, और सबसे दुगुना गुड लेवै, पश्चात् सबको मिलाकर गोली बनावै, । यह गोली-खाँसी, श्वास, अरुचि, पीनस, यकृत्, कण्ठानिरोध, वाङ्निरोध, संग्रहणी और गुदाके रोगोंको दूर करैहै ॥ ४२ ॥ ४३ ॥

रम्यमाणस्यकासेनमुखश्वासेचशस्यते ।
श्वयथूद्गारकासेषुधूमपानंप्रयोजयेत् ॥ ४४ ॥
मनःशिलालमधुकंमांसीमुस्तैंगुदैःपिबेत् ।
धूमंत्र्यहश्चतस्यानुसगुडंचपयःपिबेत् ॥ ४५ ॥
एषकासान्पृथग्द्वन्द्वसर्वदोषसमुद्भवान् ।
शतैरपिप्रयोगाणांसाधयेदप्रसाधितान् ॥ ४६ ॥

ऐंगुदंपुत्रञ्जीवफलम् ।

ममःशिलालिप्तदलंबदर्याऽपशोषितम् ।
सक्षीरधूमपानाच्चमहाकासनिवारणम् ॥ ४७ ॥

क्षीरमनुपानम् ।

अर्कच्छदाशिलेतुल्येततोऽर्द्धंनकटुत्रिकम् ।
चूर्णितंवह्निनिक्षिप्तंपिबेद्धूमञ्चयोगवित् ॥ ४८ ॥
भक्षयेदथताम्बूलंपिबेद्दुग्धमथाम्बुवा ।
कासाःपंचविधायान्तिनाशमाशुनसंशयः ॥ ४९ ॥
मरिचशिलार्कक्षीरैरर्कत्वचमाशुभावितांशुष्काम् ।
कृत्वाविधिनाधूमंपिबतःकासाःशमंयान्ति ॥ ५० ॥

अर्थ–मुखश्वास, हिचकी, उद्गार और कासरोगमें धूमपान करना हितकारीहै । मनशिल, हरताल, मुलैठी, बालछड, नागरमोथा और पतजिया, इनका तीनदिन धूमपान करै, गुड और दूधके साथ भोजन करै तौ सर्वप्रकारकी खाँसी और श्वास दूर होताहै । मनशिलको पीस बेरीके पत्तोंपै लेपकर धूपमें सुखा धूमपान करै और ऊपर दूध पान करै तौ महाकासरोग नष्ट होताहै । आकके पत्ते और मैन-शिलको समान भाग लेवे, और इनसे आधाभाग त्रिकुटेका चूर्ण लेवै, पीछे सबको मिलाकर चिलममें रख धूमपान करनेसे पाँच प्रकारकी खाँसी दूर होती है, इसके ऊपर पान और दूध सेवन करै, अथवा जल पीवै, यह अनुपान है । कालीमिरच, मनशिल, और आककी छाल, इनको आकके दूधमें भिजो धूपमें सुखावै, फिर चिलममें

रख धूमपान करनेसे खाँसी दूर होती है ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ॥ ४८ ॥ ४९ ॥ ५० ॥

दशमूलाढ़कैःप्रस्थंघृतस्याक्षसमैःपचेत्।
पुष्कराह्वशठीबिल्वसुरसाव्योषहिंगुभिः ॥ ५१ ॥
पयोऽनुपानंतत्पेयंकासेवातकफात्मके।
श्वासरोगेषुसर्वेषुहिक्कायांचप्रशस्यते ॥ ५२ ॥
बिल्वस्यमूलम् ।

इति दशमूलघृतम् ।

अर्थ-घृत चारशेर, दशमूलका क्वाथ १६ सोलहसेर, और पोहकर-मूल, कचूर, बेलकी जड़, तुलसी, त्रिकुटा, हींग, इन प्रत्येकका कल्क दो दो तोले लेवे, पश्चात् विधिपूर्वक घृतको सिद्ध करै। इसके सेवन करनेसे वात और कफकी खाँसी, सर्वप्रकारके श्वासरोग, और हिक्का-रोग दूर होता है, इसघीके ऊपर दूध पीवे, यह अनुपान है ॥५१॥५२॥

हिंगुलंमरिचंव्योषंटंकणंगंधकंसमम्।
जम्बीररससंयुक्तंमर्दयेद्याममात्रकम् ॥ ५३ ॥
कासंश्वासमतीसारंग्रहणींसान्निपातिकम्।
अपस्मारामयंमेहमजीर्णंचाग्निमान्द्यताम् ॥ ५४ ॥
गुंजामात्रप्रदानेनसर्वंनाशयातिक्षणात् ॥ ५५ ॥

इति कालान्तकोरसः।

अर्थ-सिंग्रफ, कालीमिरच, त्रिकुटा, सुहागा, और गंधक, यह सब समान भाग लेकर जम्बीरी नीबूके रसमें एक प्रहर खरल करै। इसकी मात्रा एक रत्तीकीहै। इससे खाँसी, श्वास, अतीसार, संग्रहणी, सान्निपातिकअपस्माररोग, प्रमेह, अजीर्ण, और मन्दाग्नि, नष्ट होती है ॥ ५४ ॥ ५५ ॥

त्रिकटुत्रिफलाचव्यधान्यजीरकसैन्धवाः।
प्रत्येकंतोलकंग्राह्यंछागीदुग्धेनगोलयेत् ॥ ५६ ॥
रसगंधकलोहानिप्रत्येकंकार्षिकंक्षिपेत्।

टंकणस्यपलंदत्त्वामरिचस्यपलार्द्धतः ॥ ५७ ॥
नवगुंजाप्रमाणेनवटिकांकारयेद्भिषक् ।
प्रातःकालेशुचिर्भूत्वाचिन्तयित्वामृतेश्वरीम् ॥ ५८ ॥
एकैकांवटिकांखादेद्रक्तोत्पलरसप्लुताम् ।
नीलोत्पलरसेनापिकुलत्थस्यरसेनवा ॥ ५९ ॥
छागीदुग्धेनमण्डेनकैरवस्यरसेनवा ।
निहन्तिविविधंकासंवातपित्तसमुद्भवम् ॥ ६० ॥
वातश्लेष्मोत्थितंदुष्टंपित्तश्लेष्मभवंचिरम् ।
वातिकंपैत्तिकंवापिगरदोषसमन्वितम् ॥ ६१ ॥
सरक्तमथनीरक्तंज्वरश्वाससमन्वितम् ।
तृड्दाहभ्रमशूलघ्नीरुच्यावह्निप्रदायिनी ॥ ६२ ॥
बलवर्णकरीवृष्याप्लीहगुल्मोदरापहा ।
आनाहकृमिपाण्डुघ्नीजीर्णज्वरविनाशिनी ॥ ६३ ॥
इयंचन्द्रामृतानामचंद्रनाथेननिर्मिता ।
वासागुडूचिकाभार्गीमुस्तकंकण्टकारिका ।
भोजनान्तेप्रयोक्तव्यावटिकावीर्यवर्द्धनी ॥ ६४ ॥

इति चन्द्रामृतरसः ।

अर्थ-त्रिकुटा, त्रिफला, चव्य, धनिया, जीरा और सैंधानोन, यह प्रत्येक एक एक तोला लेकर बकरीके दूधमें खरल करै, फिर पारा, गंधक और लोहा, यह प्रत्येक दो दो तोले, सुहागा चार तोले, और काली मिरच दो तोले लेवै, पीछे इन सबको पूर्वोक्तमें मिलावै और खूब मर्दन करै, तदनन्तर नौ नौ रत्तीकी गोलियां बनालेवै, पश्चात् प्रातः-काल पवित्रहो अमृतेश्वरी देवीका ध्यान धर एकगोली नित्यप्रति लाल-कमलके रसमें, अथवा नीलकमलके रसमें, वा कुलथीके रसमें, या बकरीके दूधमें, वा माडमें अथवा कमोदिनीके रसमें मिलाकर भक्षण करै। यह गोली नानाप्रकारकी खाँसी, वातपित्तकी खाँसी, वातकफकी खाँसी, दुष्टखाँसी, पित्तकफकी खाँसी, बहुतदिनोंकी खाँसी, वातकी खाँसी,

पित्तकी खाँसी, विषके विकारोंसे उत्पन्न हुई खाँसी, रुधिरयुक्त खाँसी, रुधिररहित खाँसी, ज्वर और श्वाससंयुक्त खाँसी, तृषा, दाह, भ्रम, प्लीहा, गुल्म, उदररोग, आनाह, कृमि, पाण्डु, और जीर्णज्वरको दूर करेहैं, तथा रुचिकारक, अग्निप्रदीप, बलकारक, वर्णको सुन्दर करनेवाली, और वीर्यवर्द्धकहै। यह चन्द्रामृतरस, श्रीचन्द्रनाथने निर्माण कियाहै। अडूसा, गिलोय,भारंगी, नागरमोथा, और कटेरी, इनकी गोली बनाकर, भोजनके अन्तमें खानी चाहिये। इससे वीर्यकी वृद्धि होतीहै ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१॥ ६२ ॥ ६३ ॥ ६४ ॥

रसगंधकतुल्यांशौद्वौभागौटंकणस्यच।
मौक्तिकंविद्रुमंशंखंमारणीयाःसमांशतः ॥ ६५ ॥
हेमभस्मार्द्धभागंचसर्वंखल्वेविमर्द्दयेत्।
निम्बुद्रवस्ययोगेनपिण्डकांकारयेद्भिषक् ॥ ६६ ॥
पश्चाद्गजपुटंदद्याच्छीतलंचसमुद्धरेत्।
हेमभस्मसमंतीक्ष्णंतीक्ष्णार्द्धंदरदोमतः ॥ ६७ ॥
एकीकृत्यसमस्तानिसूक्ष्मचूर्णानिकारयेत्।
ततःपूजांप्रकुर्वीतरसस्यादिवसेशुभे ॥ ६८ ॥
सर्वांगसुंदरोह्येषरोगराजनिकृन्तनः।
वातपित्तज्वरेघोरेसन्निपातेसुदारुणे ॥ ६९॥
अर्शस्संग्रहणीरोगेमेहेगुल्मेभगन्दरे।
निहन्तिवातजान्रोगान्श्लैष्मिकांश्वविशेषतः ॥ ७० ॥
पिप्पलीचूर्णसंयुक्तंघृतयुक्तमथापिच।
भक्षयेत्पर्णखंडेनासितयाचार्द्रकेणवा ॥ ७१ ॥
गुडूचीसत्वसहितंप्रमेहेऽपिविशेषतः।
रसरत्नाकरेप्रोक्तःसिद्धयोगेरसोत्तमः ॥ ७२ ॥
राजिकातैलहिंगवम्ललवणाढ्यंचवर्जयेत् ॥ ७३ ॥

इतिसर्वांगसुन्दररसः।

अर्थ–पारा और गंधक समान भाग, सुहागा दो भाग, मोती-मूंगा-

शंख, इनकी भस्म एक एक भाग, और सोनेकी भस्म आधा भाग लेवै, सबको खरलमें डाल नीबूके रसमें घोटकर गोला बना लेवै, फिर इस गोलेको गजपुटमें फूंक देवै, जब शीतल हो जाय तब निकालकर चूर्ण करले, पश्चात् इसमें सोनेकी भस्मकी बराबर तीक्ष्णलोहेकी भस्म, और लोहेकी भस्मसे आधा भाग सिंग्रफ मिलावै, फिर सबको पीस बारीक चूर्ण करले। फिर इस रसकी शुभदिनमें पूजाकर पीपलके चूर्णमें मिला, वा घीमें मिला, अथवा पानमें मिला, या मिश्रीमें मिला, अथवा अदरखके रसमें मिलाकर खावै तौ राजरोग, वातपित्तज्वर, दारुणसन्निपात ज्वर, बवासीर, संग्रहणी, प्रमेह, गुल्म, भगन्दर, वातके रोग और कफके रोग दूरहों, और इसको गिलोयके सत्वके साथ खावै तौ सर्वप्रकारके प्रमेहरोग दूर होवैं। इस सर्वांगसुन्दर रसपै राई, तैल, हींग, खटाई, और लवणके पदार्थ नहीं खाने चाहिये ॥ ६५ ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥

समूलपत्रशाखायाःकण्टकार्यारसाढके।
घृतप्रस्थंबलाव्योषविडंगशठिचित्रकैः ॥ ७४ ॥
सौवर्चलयवक्षारबिल्वामलकपुष्करैः।
वृश्चीरबृहतीपथ्यायवानीदाडिमस्तथा ॥ ७५ ॥
द्राक्षापुनर्नवाचव्यादुरालभाम्लवेतसैः।
शृंगीतामलकीभार्गीरास्नागोक्षुरकैःपचेत् ॥ ७६ ॥
कल्कोऽयंसर्वकासेषुहिक्काश्वासेचशस्यते।
कण्टकारीघृतंसिद्धंकफव्याधिविनाशनम् ॥ ७७ ॥

इति बृहत्कण्टकारीघृतम्।

अर्थ-मूल, पत्र और शाखायुक्त कटेरीके ८ आठसेर रसमें दोसेर घृत, चिरैटी, त्रिकुटा, वायविडंग, कचूर, चीता, कालानोन, जवाखार, बेल, आमला, पोहकरमूल, विषखपरा, कटाई, हरड, अजवायन, अनार, दाख, पुनर्नवा, चव्य, धमासा, अमलवैत, काकडाशिंगी, भुई-आमला, भारंगी, रास्ना और गोखरू इनसबका कल्क समान भाग मिलाके विधिपूर्वक घृतको सिद्ध करै। यह कण्टकारीघृत सर्वप्रकारकी

खाँसी, हिक्का और श्वासरोगमें अत्यन्त हितकारी है, तथा कफव्याधिविनाशकहै ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥

समूलपुष्पच्छदकण्टकार्यास्तुल्यांजलद्रोणपरिप्लुताश्च ।
हरीतकीनाञ्चशतंनिदद्यादथार्द्रपक्काचरणावशेषम् ॥७८॥
गुडस्यदत्त्वाशतमेवचाग्नौविपक्कमुत्तार्यततःसुशीते ।
कटुत्रिकञ्चद्विपलप्रमाणंपलानिषट्पुष्परसस्यतत्र ॥ ७९ ॥
क्षिपेच्चतुर्जातपलंयथाग्निप्रयुज्यमानोविधिनावलेहः ।
वातात्मकंपित्तकफोद्भवञ्चद्विदोषकासानपियत्त्रिदोषम्॥८०
यक्ष्माणमेकादशमुग्ररूपंभृगूपदिष्टंहिरसायनंस्यात्॥ ८१ ॥

इति व्याघ्रीहरीतकी ।

अर्थ—कटेरीका पंचांग १२॥ साडेबारहसेर, हरड १०० एकसौ, इनको बत्तीससेर जलमें औटावै, जब चौथाभाग जल शेष रहै तब १२॥ साडेबारह सेर गुड डालकर पकावै, जब अच्छेप्रकार पकजावै तब उतारले, शीतलहोनेपर त्रिकुटेका चूर्ण आठ तोले, सहत चौवीस तोले और चतुर्जातकका चूर्ण चार तोले मिलादेवै । अग्निका बलाबल विचारकर इसको भक्षण करै तौ वातज, पित्तज, कफजन्य, द्विदोषज और त्रिदोषज खाँसी, तथा ग्यारहप्रकारेक राजयक्ष्मारोगको दूर करै है । यह रसायन भृगुजीने प्रकाशित कीहै ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥

दशमूलंस्वयंगुप्तांशंखपुष्पींशठींबलाम् ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ॥ ८२ ॥
भार्गीपुष्करमूलंचाद्विपलांशंयवाढकम् ।
हरीतकीशतञ्चैकंजलपंचाढकेपचेत् ॥ ८३ ॥
यवैःस्विन्नैःकषायन्तंप्लुतंतच्चाभयाशतम् ।
पचेद्गुडतुलांदत्त्वाकुडवञ्चपृथग्घृतात् ॥ ८४ ॥
तैलात्सपिप्पलीचूर्णात्सिद्धशीतेचमाक्षिकात् ।
लेह्याद्वेचाभयेनित्यमतःखादेद्रसायनात् ॥ ८५ ॥

तद्वलीपलितंहन्याद्वर्णाग्निबलवर्द्धनम्।
पंचकासान्क्षयंश्वासंहिक्कांसविषमज्वरम् ॥ ८६ ॥
हन्यात्तथाग्रहण्यर्शोहृद्रोगारुचिपीनसान्।
अगस्त्यविहितंधन्यमिदंश्रेष्ठंरसायनम् ॥ ८७ ॥
यवहरीतक्योःश्लक्ष्णपोटलींबद्ध्वानिक्षिपेत्।
पश्चात्स्विन्नहरीतकींघृततैलाभ्यांभर्जयेदिति ॥
रसरत्नाकरोक्तंयथा।

इतिअगस्त्यहरीतकी।

अर्थ–दशमूल, कौंछके बीज, शंखपुष्पी, कचूर, खिरैटी, गजपीपल, चिरचिटा, पीपरामूल, चीता, भारंगी, और पोहकरमूल, यह प्रत्येक सोलै सोलै तोले लेकर ८० सेर जलमें पकावे, फिर आठसेर जौ और एकसौ हरड़, इनको बारीक कपड़ेकी पोटलीमें बांधकर पूर्वोक्त क्वाथमें डालदेवै, जब २० वीस सेर जल शेष रहे तब उतारकर काढ़ेको छान लेवै, और हरडोंको अलग निकालकर उनकी गुठली निकाल डाले, फिर घी और तेलमें हरडोंको भूने, तदनन्तर पूर्वाक्त छने हुए क्वाथमें १२॥ साडेबारह सेर गुड़ उपरोक्त भुनी हुई एकसौ हरड, सोलह तोले घी, १६ सोलह तोले तेल, और सोलह तोले पीपलका चूर्ण मिलाकर पकावे, शीतल होनेपर सोलह तोले सहत मिला देवै। दोहरडैं नित्यप्रति खावै तौ वलीपालितरोग, पांचप्रकारकी खाँसी, क्षय, श्वास, हिक्का, विषमज्वर, संग्रहणी, बवासीर, हृदयरोग, अरुचि, और पीनसरोग दूरहोवै। यह श्रेष्ठरसायन अगस्त्यजीने कहीहै ॥ ८२ ॥८३॥८४॥८५ ॥८६॥८७॥

वातान्हृच्छंखयोःशूलंमूर्धिपार्श्वोदरेऽपिच।
क्षामाननंबलंक्षीणंभिन्नकांस्यस्वरस्तथा ॥ ८८ ॥

इतिवातकासे।

अर्थ–हृदय, कनपटी, मस्तक, पसली, और उदर, इनसबमें शूल चले, मुख क्षीण और बलहानि होवै, तथा फूटे कांसीके वासनके शब्दकी समान स्वर होजावै तो वातकी खाँसी जाननी ॥ ८८ ॥

शुद्धसूतंद्विधागंधंद्रवैःपुनःपुनःपचेत् ।
वातारिचार्द्रकंभृंगीकाकमाच्यद्रिकर्णिका ॥ ८९ ॥
दिनैकंमर्दयेत्खल्वेपाचयेत्पर्पटींयथा ।
द्वयोःपादंमृतंताम्रंपिष्ट्वामृद्वग्निनापचेत् ॥ ९० ॥
रक्तवर्णंभवेद्यावत्तावद्दर्व्याप्रचालयेत् ।
प्रक्षिपेत्कदलीपत्रेऽथवास्निग्धपुटेपुनः ॥ ९१ ॥
अब्दाद्यतेनयोगेनततश्चोर्द्धंचगोमयम् ।
देयंविचूर्णयेत्पश्चाच्चूर्णपादंविषंक्षिपेत् ॥ ९२ ॥
रुद्रपर्पटिकाह्येषादेयंगुंजाद्वयंतथा ।
चूर्णितंकटुनिर्गुण्ड्यामूलंनिष्कद्वयंपिबेत् ॥ ९३ ॥
भृंगराजरसेनैवलिहेद्वामधुनासह ।
वातकासंनिहन्त्याशुरसोवानन्दभैरवः ॥ ९४ ॥

कटुस्त्रिकटुः ।

इति रुद्रपर्पटी ।

अर्थ-शुद्धपारा एक भाग, शुद्धगंधक दो भाग, इन दोनोंको अंड, अदरख, अतीस, मकोय, और कोयल, इनके रसमें एक दिन खरल करै, और पर्पटीकी तरह पकावे, पश्चात् पारे और गंधकसे चौथा भाग तांबेकी भस्म मिलाकर मृदु अग्निसे पकावे, जब पकते पकते लाल होजाय तब उतारकर केलेके पत्तेके नीचे गोबर बिछाय उसपै ढाल देवे और ऊपरसे दूसरे पत्तेसे दबाकर पपडीकी तरह बनालेवे, फिर इसका चूर्णकर चूर्णसे चौथाभाग विष मिलालेवे तौ रुद्रपर्पटीरस सिद्धहो। मात्रा दो रत्तीकी है। इस औषधिके अन्तमें त्रिकुटा और सह्मालुकी जड़के चूर्णको भांगरेके रसमें अथवा सहतमें मिलाकर सेवन करे। यह रस शीघ्रही वातकी खाँसीको दूर करै है ॥ ८९ ॥ ९० ॥ ९१ ॥ ॥ ९२ ॥ ९३ ॥ ९४ ॥

रास्नाविडंगत्रिफलारसगंधंकटुत्रयम् ।
अमृतापद्मकंक्षौद्रंविषतुल्यंसुचूर्णितम् ॥ ९५ ॥

द्विगुंजंवातकासार्त्तःसेवयेदमृतार्णवम् ॥ ९६ ॥

इति अमृतार्णवरसः।

अर्थ-रास्ना, वायविडंग, त्रिफला, पारा, गंधक, त्रिकुटा, गिलोय, पद्माख, सहत और विष, इन सबको समान भाग लेकर चूर्ण करै। इसको दो रत्तीभर खानेसे-वातकी खाँसी दूर होतीहै। इसको अमृतार्णवरस कहते हैं ॥ ९५ ॥ ९६ ॥

शुद्धसूतस्यभागैकंद्विभागंशुद्धगंधकम्।
भागद्वयंमृतंताम्रंमरिचंदशभागकम् ॥ ९७ ॥
मृताभ्रस्यचतुर्भागंभागमेकंविषंक्षिपेत्।
भूतांकुशस्यभागैकंसर्वमम्लेनभावयेत् ॥ ९८ ॥
योयंभूतांकुशोनामयामैकंवातकासजित्।
अनुपानंलिहेत्क्षौद्रविभीतकफलत्वचम् ॥ ९९ ॥

इति भूतांकुशरसः।

अर्थ-शुद्धपारा एकभाग, शुद्धगंधक दो भाग, ताँबेकी भस्म दो भाग कालीमिरच दश भाग, अभ्रककी भस्म चार भाग, विष एक भाग, और भूतांकुशरस एक एक भाग लेवै, सबको एक प्रहर नीबूके रसमें भावना देकर एक एक मासेकी गोली बनावै।एक गोली खानेसे वातकी खांसी दूर होतीहै। अनुपान- बहेडेकी छालको पीस सहतमें मिलाकर चाटै ॥ ९७ ॥ ९८ ॥ ९९ ॥

उरोदाहोरक्तशोषस्तिक्तास्यश्चज्वरंतथा।
कटुपित्तंवमत्येवपाण्डुत्वंपित्तकासके ॥ १०० ॥

इति पित्तकासः।

अर्थ-वक्षस्थलमें दाहहो, रुधिर सूख जावै, मुख कड़वा हो, ज्वरहो, कटु पित्त वमनमें गेरै, और शरीर पाण्डुवर्ण हो जाय, यह सब लक्षण पित्तकी खाँसीमें होते हैं ॥ १०० ॥

भस्मताम्राभ्रतीक्ष्णानांकासमर्दत्वचोरसैः।
सालजैर्वेतसाम्लेनादिनंमर्द्यंसुपिण्डतम् ॥ १०१ ॥

द्विगुंजांपित्तकासार्त्तोभक्षयेच्चत्रिनेत्रकम् ॥ १०२ ॥
इति त्रिनेत्ररसः।

अर्थ-ताँबेकी भस्म, अभ्रककी भस्म, लोहेकी भस्म, इन तीनोंको समान भाग लेकर कसौंदीकी छालके रसमें, सालके रसमें, और अमलवैंतके रसमें एक दिन खरलकर गोला बनालेवै,फिर दो रत्तीकी गोलियें करले। एक गोली खानेसे पित्तकी खाँसी दूर होतीहै, इसको त्रिनेत्ररस कहतेहैं ॥ १०१ ॥ १०२ ॥

रसोलोकेश्वरोप्यत्रपिप्पलीमधुनासह।
देयंगुंजाचतुष्कंचसघृतैर्मरिचैःसह ॥ १०३ ॥
कासश्वासाग्निमान्द्यश्चक्षयकासंचनाशयेत् ॥ १०४ ॥

अर्थ-चार रत्ती लोकेश्वररसको पीपलके चूर्णके साथ सहत मिलाकर खावैतौ, अथवा कालीमिरचोंके चूर्णके साथ घी मिलाकर खावै तौ- खाँसी, श्वास, मन्दाग्नि, और क्षयकी खाँसी दूर होती है ॥ १०४॥

शिरोऽर्त्तिःकफपूर्णास्यतारुजिगौरवंज्वरः।
कासेत्सान्द्रकफःकण्ठेश्लेष्मकासस्यलक्षणम् ॥ १०५ ॥

अर्थ-शिरमें पीड़ा, कफसे मुख भराहै, अरुचि, शरीर भारी और ज्वरहो, वारंवार खाँसी उठे, और कण्ठमें गाढ़ा कफ होय, यह लक्षण कफकी खाँसीके जानने ॥ १०६ ॥

रसगंधकताम्राणांशंखटंकणलोहकम्।
मरिचंकुष्ठतालीशंजातीफललवङ्गकम् ॥ १०६ ॥
कार्षिकंचूर्णमादायद्रवैरेषांचमर्दयेत्।
भेकपर्णीकेशराजानिर्गुण्डीकाकमाचिका ॥ १०७ ॥
द्रोणपुष्पीचशालश्चाग्रीष्मसुन्दरएवच।
भार्गीहरीतकीवासाकार्षिकैःपत्रजैरसैः ॥ १०८ ॥
वटिकांकारयेद्वैद्यःपंचगुंजाप्रमाणिकाम्।
पित्तजंवातजंकासंद्वन्द्वजंचिरकालजम् ॥ १०९ ॥

श्रीमद्गहननाथेनकाससंहारभैरवः ।
रसोऽयंनिर्मितोयत्नाल्लोकरक्षणहेतवे ॥ ११० ॥
वासाशुंठीकंटकारीक्वाथेनपाययेद्बुधः
कासनाशनवज्रोऽयंरसःश्वासपाण्डुजित् ॥ १११ ॥

इति काससंहारभैरवः ।

अर्थ-पारा, गंधक, ताँबा, शंख, सुहागा, लोहा, कालीमिरच, कूठ, तालीसपत्र, जायफल और लौंग, ये प्रत्येक दो दो तोले लेकर मंडूकपर्णी, कुकुरभांगरा, सह्मालु, मकोय, द्रोणपुष्पी, शालिचशाक, ग्रीष्मसुन्दरशाक, भारंगी, हरड़, अडूसा, इन प्रत्येक पत्तोंके दो दो तोले रसमें भावना देकर पांच पांच रत्तीकी गोलियें बनालेवै। इसको अडूसा, सोंठ और कटेरीके काढेमें मिलाकर पीवैतौ पित्तज, वातज, द्वन्द्वज और बहुतदिनोंकी खाँसी, तथा श्वास और पाण्डुरोग दूरहोवै। यह काससंहारभैरवरस श्रीमान् गहननाथने संसारकी रक्षाके अर्थ निर्माण कियाहै ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥ ११० ॥ १११ ॥

कटुत्रयंपाठकदेवदारुरास्नाविडङ्गत्रिफलावृषाणाम् ।
चूर्णसमांशंसितयाविमिश्रंकासंजयेद्विष्णुरिवातिपापम् ॥ ११२ ॥

इतित्रिकट्वादिचूर्णम् ।

अर्थ-त्रिकुटा, पाढ, देवदारु, रास्ना, वायविडङ्ग, त्रिफला और अडूसा इनसबको समान भागलेकर चूर्णकरै, और सब चूर्णकी बराबर मिश्री मिलावै, यह खाँसीको दूर करैहै ॥ ११२ ॥

कुमारीत्रिफलाचूर्णचित्रकस्वरसैःक्रमात् ।
शोधयित्वापुनाराजीगृहधूमहरिद्रया ॥ ११३ ॥
पक्केष्टकारजश्चैवजलम्बूपरसेनच ।
भृंगराजरसेनापिशोधयित्वापुनःपुनः ॥ ११४ ॥
प्रक्षालयेत्पुनःपश्चाच्छानयेद्वसनेघने ।
कर्षद्वयंरसेन्द्रस्यभावयेद्विजयाद्रवैः ॥ ११५ ॥
शिलायांखलयेच्चापियावत्पिण्डत्वमागतम् ।

जलकर्णीकाकमाचीरसाभ्यांभावयेत्पुनः ॥ ११६ ॥
सौगन्धिकपलंशुद्धमर्द्धमरिचटंकणम् ।
माक्षिकंचाशिखिग्रीवतालकंचाभ्रकन्तथा ॥ ११७ ॥
एतांस्तुमिलितान्कृत्वाभावयेच्चार्द्रकद्रवैः ।
रक्तिद्वयप्रमाणेनकारयेद्गुटिकांभिषक् ॥ ११८ ॥
जीर्णान्नोभक्षयेदेकांक्षीरमांसरसाशनः ।
पंचकासंक्षयंश्वासंरक्तपित्तविनाशनम् ॥ ११९ ॥
पाण्डुकृमिज्वरहरंकृशानांपुष्टिवर्द्धनम् ।
वाजीकरणनिर्दिष्टमम्लपित्तहरंपरम् ॥ १२० ॥
वह्निसंदीपनंश्रेष्ठमरोचकविनाशनम् ।
नागार्जुनाख्यमुनिनाभाषितंतत्त्ववेदिना ॥ १२१ ॥

इति रसेन्द्रगुटिका ।

अर्थ–घीकुवार और त्रिफलेके चूर्णमें, चीतिके रसमें, राई, घरका धुआ और हलदीके रसमें, तथा ईटके चूर्णमें, लज्जालुभेदके रसमें और भांगरेके रसमें क्रमसे पारेको अलग अलग शोधकर पानीसे धोकर वस्त्रमें छानले, ऐसा पारा दो तोले लेकर भांगके रसमें भावनादेवै, फिर खरलमें घोट गोला बनाके उस गोलेको कर्णमोरट लताके रसमें और मकोयके रसमें भावनादे, चारतोले शुद्धगंधक, तथा कालीमिरच, सुहागा, सोनामाखी, तुतिया और हारिताल तथा अभ्रक ये प्रत्येक चार तोले मिलाकर अदरखके रसमें भावना देवै, फिर दोरत्तीकी गोलियें बनालेवै, एकगोली रोज भोजनके जीर्ण होनेपर भक्षण करै । इसके ऊपर दूध और मांसरसका भोजन करै । यह रसेन्द्रगुटिका पांचप्रकारकी खाँसी, क्षय, श्वास, रक्तपित्त, पाण्डुरोग, कृमिरोग, ज्वर, अम्लपित्त, और अरुचिको दूर करैहै, तथा कृशमनुष्योंके पुष्टिको बढानेवाला, वाजीकरण, अग्निप्रदीपक और अति उत्तमहै । यह रस–श्रीमान् नागार्जुनऋषिने निर्म्माण कियाहै ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥ ११८ ॥ ॥ ११९ ॥ १२० ॥ १२१ ॥

कर्षंशुद्धरसेंद्रस्यगंधकस्याभ्रकस्यच ।

लौहचूर्णस्यताम्रस्यतालकस्यविषस्यच ॥
मनःशिलायाःक्षाराणांबिजंधुस्तूरकस्यच ।
मरिचस्यापिसर्वेषांचूर्णंतुल्यंप्रदापयेत् ॥ १२३ ॥
जयन्तीचित्रकौमानघण्टाकर्णोऽथमण्डुकी ।
शक्राशनंकेशराजभृंगापामार्गकस्यच ॥ १२४ ॥
सिन्धुवारस्यचरसैःकर्षमात्रैश्चमर्दयेत् ।
हन्तिपंचविधंकासंश्वासश्चैवसुदारुणम् ॥ १२५ ॥
कफवातमयंरोगमानाहंविड्विबन्धताम् ।
अग्निमान्द्यारुचिश्चैवउदरंपाण्डुकामलाम् ॥ १२६ ॥
रसायनीचवृष्याचबलवर्णप्रदायिनी ।
बृंहणंमधुरंस्निग्धंमत्स्यंमांसञ्चजांगलम् ॥ १२७ ॥
घृतपक्कंसदाभक्ष्यंरूक्षणंतीक्ष्णंचवर्जयेत् ॥ १२८ ॥

इति बृहद्रसेंद्रगुटिका ।

अर्थ-शुद्धपारा, शुद्धगंधक, अभ्रक, लोहेकाचूर्ण, तांबा, हरिताल, विष, मनशिल, जवाखार, सज्जी, सुहागा, धतूरेके बीज, और कालीमिरचोंका चूर्ण, यह प्रत्येक दो दो तोले लेकर जयन्ती, चीता, मानकंद, घण्टाकर्ण, ब्रह्ममण्डूकी, भांग, कुकुरभांगरा, भांगरा, चिरचिटा, और सह्मालू, इन प्रत्येकके दो दो तोले रसमें खरलकर मटरकी बराबर गोली बनालेवै । इनको भक्षणकरनेसे-पाँचप्रकारकी खाँसी, श्वाँस, कफ, वातरोग, आनाह, विड्विबन्ध, मन्दाग्नि, अरुचि, उदररोग, पाण्डुरोग, और कामलारोग दूर होता है । यह गोली-रसायन, वीर्यवर्द्धक, बलकारक, वर्णको सुन्दर करनेवाली है । इसके ऊपर पुष्टिकारक, मधुर, स्निग्ध, मत्स्य, जांगलदेशके जीवोंका मांस घीमें भुना हुआ सदैव खाना चाहिये, तथा रूक्ष और तीक्ष्णपदार्थ इसके ऊपर नहीं भक्षण करै ॥ ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥ १२६ ॥ १२७ ॥ १२८ ॥

सूतकंगंधकंलौहंविषमभ्रकमेवच ।
विडंगंबिल्वकंमुस्तमेलाग्रन्थिककेशरम् ॥ १२९ ॥

...कटुत्रिफलाचित्रंशुद्धजैपालबीजकम्।
एतानिसमभागानिगुडोद्विगुणउच्यते॥ १३०॥
तिन्तिडीबीजमानेनप्रातःकालेतुभक्षयेव।
श्वासंकासंक्षयंगुल्मंप्रमेहंविषमज्वरम्॥ १३१॥
अजीर्णग्रहणीदोषाञ्छूलंपार्श्वामयांस्तथा।
अपानेहृदयेशूलेवातरोगेगलग्रहे॥ १३२॥
अरुचौचातिसारेचसूतिकाविषनाशनः।
जयाक्षनिर्मितोह्येषब्रह्मादित्रिदिवेश्वरैः॥ १३३॥

इति विजयभैरवरसः।

अर्थ–पारा, गंधक, लोहा, विष, अभ्रक, वायविडंग, बेलगिरी, नागरमोथा, इलायची, पीपरामूल, नागकेशर, त्रिकुटा, त्रिफला, चीता, और शुद्ध जमालगोटेके बीज, यह सब समान भाग, और सबसे दुगुना गुड़ लेवै, सबको मिलाकर इमलीके चीयेकी समान गोलियां बनालेवै, एक गोली रोज प्रभातके समय भक्षण करैतौ–श्वास, खांसी, क्षय, गुल्म, प्रमेह, विषमज्वर, अजीर्ण, संग्रहणी, शूल, पशलियोंका शूल, अपान शूल, हृदयका शूल, वातरोग, गलग्रह, अरुचि, अतिसार, सूतिका, विष, इनको दूर करैहैं। यह विजयभैरव रस ब्रह्मादि देवोंने निर्माण किया है॥ १२९॥ १३०॥ १३१॥ १३२॥ १३३॥

पर्वभेदोज्वरश्वासतृषावैस्वर्य्यपीडितम्।
सपूर्वंकासतेशुष्कंततःष्ठीवेत्सशोणितम्॥ १३४॥
पारावतइवाकूजन्कासवेगात्क्षतोद्भवात्॥ १३५॥

अर्थ–शरीरकी संधियोंमें हड़फूटनहो, ज्वर, श्वाँस, तृषा, स्वरभेद इनसे पीड़ित हो, प्रथम सूखा खाँसे, पश्चात् रुधिर थूके और कबूतरकी समान शब्द कहै तौ जानिये क्षतकी खांसी है॥ १३४॥ १३५॥

रसपादंमृतंतारंशिलातालंचतुर्गुणम्।
वासागोक्षुरसत्वाभ्यांमर्दयेत्प्रहरद्वयम्॥ १३६॥
द्वियामंवालुकायन्त्रेस्वेद्यमादायचूर्णयेत्।

गुंजाद्वयंनिहंत्याशुकासंश्वासंक्षतोद्भवम् ॥
रसस्तालेश्वरोनाम्नाअनुपानंचकथ्यते ।
वचाकुष्ठहरिद्राभिःसैंधवंटंकणंविषम् ॥ १३८ ॥
सपाठालांगलीव्योषंचाक्षंप्रत्येकभागकम् ।
भावितंभृंगराजेनदिनैकंतंचभक्षयेत् ॥ १३९ ॥
माषंतालेश्वरोनाम्नाहिक्कावैस्वर्यकासजित् ॥ १४० ॥

इति तालेश्वररसः ।

अर्थ-पारा एक भाग, चांदीकी भस्म, मैनशिल और हरिताल, इसे प्रत्येक चार चार भाग लेकर अडूसे और गोखरूके सत्वमें दो प्रहर खरल करै, पश्चात् दो प्रहरतक वालुकायंत्रमें पकावै, जब स्वयं शीतल हो जाय तब निकालकर चूर्ण करले, इसको दो गुंजाभर खावै तौ-क्षतसे उत्पन्न हुए खांसी और श्वाँस दूर हो जाते हैं। इसको तालेश्वररस कहतेहैं. वच कूट हलदी, सैंधानोंन, सुहागा, विष, पाढ़, कलिहारी, त्रिकुटा यह प्रत्येक दो दो तोले लेकर, भांगरेके रसमें एक दिन भावना देकर, अनुपान करै। इसको एकमासेभर रोज खाय तौ हिचकी, स्वरभेद और कासरोग दूर हो ॥ १३६ ॥ १३७ ॥ १३८ ॥ १३९ ॥ १४० ॥

गात्रशूलंज्वरोदाहोमोहःश्वासश्चयस्यवै ।
शुष्कंनिष्ठीवयेत्कृच्छ्रात्सपूयंशोणितंचयः ॥ १४१ ॥
इत्येषक्षयजःकासःसाध्योबलवतांक्वचित् ।
क्षीणानांदेहनाशायसएकःसाध्यतांव्रजेत् ॥ १४२ ॥

इति क्षयकासः ।

अर्थ-शरीरमें शूल हो, ज्वर, दाह, मोह और श्वास, उत्पन्न हो, अत्यन्त कष्टके साथ सूखा खाँसे, पश्चात् राधयुक्त रुधिर थूके तौ क्षयकी खाँसी जाननी । यह खाँसी-बलवान् मनुष्योंको कुछ कुछ साध्य होती है और क्षीणमनुष्योंकै असाध्य जाननी ॥ १४१ ॥ १४२ ॥

शुद्धसूतंद्विधागंधंकुर्याद्यत्नेनकज्जलीम् ।
तयोःसमंतीक्ष्णचूर्णंमर्दयेत्कनकद्रवैः ॥ १४३ ॥
द्वियामान्तेकृतंगोलंताम्रपात्रेविनिक्षिपेत् ।

...छाद्येरण्डपत्रेणयामार्द्धेऽप्युष्णताभवेत् ॥ १४४ ॥
धान्यराशौन्यसेत्पश्चाद्वियामान्तेसमुद्धरेत् ।
संपेष्यगोलयेद्वस्त्रेसद्योवारितरंभवेत् ॥ १४५ ॥
त्रिकटुत्रिफलाचैलाजातीफललवंगकम् ।
एषाश्वपरभागानांसमपूर्वरसोभवेत् ॥ १४६ ॥
संचूर्ण्यालोडयेत्क्षौद्रैर्भक्ष्यंनिष्कद्वयंद्वयम् ।
अयमग्निरसोनाम्नाक्षयकासनिकृन्तनः ॥ १४७ ॥
इन्द्रवारुणिकामूलंभृंगंकृष्णातिलैःसह ।
भक्षयेत्क्षयकासार्त्तोनिष्कमात्रंप्रशान्तये ॥ १४८ ॥

इति अग्निरसः ।

इति कासाध्यायः ।

अर्थ–शुद्धपारा एकभाग, गंधक दोभाग, इन दोनोंकी कज्जली करै, पश्चात् दोनोंकी समान इस्पात्का चूर्ण मिला धतूरेके रसमें खरल करै, दोप्रहरपर्यन्त खरलकर गोला बनालेवै, उस गोलेको तांबेके वासनमें रख ऊपर अंडके पत्ते ढक चारघडीतक रहनेदेवै, जब गरम होजाय तब दोप्रहरतक धानोंके ढेरमें रखदेवै, पश्चात् निकालकर महीन पीस वस्त्रमें छानलेवै, वह छनाहुआ ऐसा होजाय कि–पानीमें डालनेसे तिरनेलगै, फिर उसमें त्रिकुटा, त्रिफला, इलायची, जायफल, लांग, इनसबको समानभागलेकर चूर्णबना मिलादेवै, पश्चात् सहत मिलाके आठमासेभर नित्यप्रति भक्षण करै । यह अग्निरस–क्षयकी खाँसीको दूर करैहै । इसके सेवनके अन्तमें इन्द्रायनकी जड, दालचीनी और कालेतिल, इनको एकत्रमिलाकर चारमासेभर भक्षणकरै ॥ १४३ ॥ ॥ १४४ ॥ १४५ ॥ १४६ ॥ १४७ ॥ १४८ ॥

इति कासाधिकारःसमाप्तः ।

अथ हिक्काश्वासयोश्चिकित्सामाह ।

हिक्काश्वासार्त्तयोःपूर्वंतिलाक्तःस्वेदइष्यते ।
स्निग्धैर्लवणयोगैश्चमूर्द्ध्ववातानुलोमनम् ॥ १ ॥

ऊर्द्धाधःशोधनंशक्तेदुर्बलेशमनंमतम्।
प्रस्वापयेद्दिवायत्नान्नरंहिक्कातुरंभिषक्॥ २॥
मधुकंमधुसंयुक्तंपिप्पलीशर्करान्विता।
नागरंगुडसंयुक्तंहिक्काघ्नंलावणत्रयम्॥ ३॥
लावणंनस्यम्।
स्तन्येनमाक्षिकाविष्ठानस्यंवालक्तकाम्बुना।
योज्यंहिक्काभिभूतायस्तन्यंवाचन्दनान्वितम्॥ ४॥

अर्थ-हिक्का और श्वाससे पीडितमनुष्यको प्रथम तिलयुक्त द्रव्योंका स्वेदप्रयोग कराना चाहिये। और चिकने तथा निमकीनपदार्थोंसे ऊर्द्धवातको अनुलोमन करना चाहिये। हिक्का और श्वासरोगी जो बलवान् होयतौ वमन और विरेचन करावै,और जो दुर्बल होयतौ शमन-औषधि सेवन करावै। हिक्कारोगीको दिनमें शयन करावै। मुलैठीमें सहत मिलाकर अथवा पपिलके चूर्णमें बूरा मिलाकर वा सोंठके चूर्णमें गुड मिलाकर नासलेनेसे हिक्कारोग शान्त होताहै। मक्खीकी विष्ठाको पीसकर नास लेनेसे वा दूधको चन्दनमें मिलाकर नास लेनेसे हिक्कारोग शान्त होताहै॥ १॥ २॥ ३॥ ४॥

पिप्पल्यामलकीद्राक्षाकोलास्थिमधुशर्कराः।
विडंगपुष्करैर्युक्तोलोहोहन्तिसुदुर्जयाम्॥ ५॥
छर्दितृष्णांतथाहिक्कांत्रिरात्रेणनसंशयः॥ ६॥
सर्वचूर्णसमंलोहम्।
इति पिप्पल्यादिलोहम्।

अर्थ-पीपल, आमला, दाख, बेरकी मींग, सहत, बूरा, वायविडंग और पोहकरमूल, यह सब समानभाग लेवै, और सबकी बराबर लोहेका चूर्ण लेवै। इसको सेवनकरनेसे दुर्ज्जयहिक्कारोग, वमन, तृषा, तीन रात्रियोंमें दूर होजातेहैं॥ ५॥ ६॥

कूश्माण्डप्रभवंमूलंपीत्वाभक्तस्यवारिणा।
अजस्रमुत्थिताहिक्काशान्तिर्भवतितत्क्षणात्॥ ७॥

आष्ठीलकदलीकन्दरसखण्डविमिश्रितम् ।
पीत्वाहिक्कांजयत्युग्रांवातापित्तसमुद्भवाम् ॥ ८ ॥
हिक्काश्ववासीभजेत्सर्वपानार्थकफवातनुत् ।
दशमूल्याकुलत्थैर्वासिद्धंजांगलजैरसैः ॥ ९ ॥
भुंजीतशालिगोधूमयवान्नंजीर्णमेवच ।
हिक्काश्वासीपिबेदुष्णंदशमूलीकृतंजलम् ॥ १० ॥
देवदारुश्टृतंवापिभार्गीश्टृतमथापिवा ।
सनागराभयातुल्याकासश्वासौव्यपोहति ॥ ११ ॥
अभयानागरंवल्कंपौष्करयावशूकमरिचकल्कंवा ।
तोयेनोष्णेनापिबेच्छ्वासीहिक्कीचतच्छान्त्यै ॥ १२ ॥
गुडंकटुकतैलेनमिश्रयित्वाऽसमंलिहेत् ।
त्रिसप्ताहप्रयोगेणश्वासंनिर्मूलतांनयेत् ॥ १३ ॥
कृष्णासैन्धवसंयुक्तंचूर्णस्वरसेनशृंगवेरस्य ।
योलेढिशयनकालेसजयातिसप्ताहतःश्वासान् ॥ १४ ॥
कृष्णामलकशुण्ठीनांचूर्णमधुसिताघृतम् ।
मुहुर्मुहुःप्रयोक्तव्यंहिक्काश्वासनिवारणम् ॥ १५ ॥
अमृतानागरंफञ्जीव्याघ्रपर्णीसुसाधितः ।
क्वाथःपीतःसकणाचूर्णःकासश्वासाञ्जयन्त्याशु ॥ १६ ॥
बिल्वाटरूषदलवारिसमूलशुक्त-
दण्डोत्पलदलजलंकटुतैलमिश्रम् ।
भार्गीगुडादिरपियत्रहतप्रभाव-
स्तंश्वासमाशुविनिहन्तिमहाप्रभावम् ॥ १७ ॥
बिल्ववासापत्ररसःसमूलपत्रशुक्तदंडोत्पलरसश्च ।

इति कटुतैलेनसह योगः ।

अर्थ-पेठेकी जड़को चावलोंके जलमें पीसकर पीनेसे-तत्काल हिक्का

रोग शान्त होताहै। केलेके कन्दके रसको खांडके साथ पीनेसे वातपैत्तिक हिक्कारोग दूर होताहै, हिक्का और श्वासरोगी सब पीनेके द्रव्य कफवातनाशक पान करै तथा दशमूल, कुलथी और जंगलदेशोंके जीवोंके मांसका यूष सेवन करै, और पुराने चावलोंका भात, गेहूं और जौके अन्नका भोजन करै। गरमागरम दशमूलका क्काथ, देवदारुका क्काथ, और भारंगीका क्काथ पीनेसे हिचकी और श्वास नष्ट होता है। सोंठ और हरड़ समानभाग लेकर सेवनकरनेसे श्वास और खासी दूर होतीहै। हरड, सोंठ, दालचीनी, पोहकरमूल, जवाखार और कालीमिरच, इनको गरमजलमें पीसकर सेवन करनेसे श्वास और हिक्का रोग दूर होताहै। गुडमें सरसोंका तेल मिलाकर तीन सप्ताहतक सेवन करनेसे श्वासरोग शान्त होता है। सोनेके समय पीपल और सैंधानोंनका चूर्ण अदरखके रसके साथ सेवनकरै तो एकसप्ताहमें श्वासरोग शान्तहो। पीपल, आमला, और सोंठका चूर्ण, सहत, बूरा और घीके साथ वारंवार सेवनकरनेसे हिचकी और श्वासरोग नष्ट होता है। गिलोय, सोंठ, भारंगी, कटेरी, और जलकुम्भी, इनके काढ़ेमें पीपलका चूर्ण डालके पीनेसे श्वास और खांसी दूर होतीहै। बेलगिरी, अडूसा और मूल तथा पत्रसमेत सफेद दण्डोत्पलका रस सरसोंके तेलके साथ पीनेसे अथवा भारंगीको गुड़ादिके द्वारा पीनेसे—असाध्य श्वासरोग शान्त होता है॥७॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

श्रृंगीकटुत्रयफलत्रयकण्टकारी-
भार्गीसपुष्करजटालवणानिपंच।
चूर्णंपिबेदपिशिवेनजलेनहिक्का-
श्वासोर्द्ध्ववातकसनाऽरुचिपीनसेषु ॥ १८ ॥

इति श्रृंग्यादिचूर्णम्।

अर्थ—काकड़ाशिंगी, त्रिकुटा, त्रिफला, कटेरी, भारंगी, पोहकरमूल, पंचलवण, इनका चूर्ण बना, जलके साथ पीनेसे—हिक्का, श्वास, ऊर्द्ध्ववात खासी, अरुचि और पीनसरोग दूर होताहै ॥ १८ ॥

कुलत्थाद्दशमूलाच्चभार्ग्याःप्रस्थंपृथक्पृथक्।
क्काथयित्वाजलद्रोणेपादशेषेविपाचयेत् ॥ १९ ॥

द्विक्षीरंसर्पिषःप्रस्थंसक्षारैःपंचकोलकैः ।
पलिकैस्तज्जयेत्सिद्धंश्वासंकासंसपीनसम् ॥ २० ॥
प्लीहहिक्काग्रहण्यर्शोगुल्मांश्चविषमज्वरान् ।
कुलत्थषट्पलंसर्पिर्बलवर्णाग्निदीपनम् ॥ २१ ॥

इति कुलत्थषट्पलंघृतम् ।

अर्थ–कुलथी, दशमूल, और भारंगी, प्रत्येक चौसठ चौसठ तोले लेकर १०२४ एक हजार चौवीस तोले जलमें पकावै जब चौथा भाग जल शेष रहै तब उसमें २५६ दोसौ छप्पन तोले दूध, ६४ चौसठ तोले घी, जवाखार, सज्जीखार, सुहागा, चीता, चव्य, सोंठ, पीपल और पीपलामूल, यह प्रत्येक चार चार तोले मिलाकर घृतको सिद्ध करै। यह घृत श्वास, खाँसी, पीनस, प्लीहा, हिचकी, संग्रहणी, बवासीर गुल्म और विषमज्वरको दूर करै। यह कुलत्थषट्पल घृत–बल, वर्ण और अग्निको दीपन करै है॥ १९ ॥ २० ॥ २१ ॥

कुलत्थोदशमूलञ्चतथैवद्विजयष्टिका ।
शतंशतञ्चसंगृह्यजलद्रोणेविपाचयेत् ॥ २२ ॥
पादावशेषेतस्मिश्चगुडस्यार्द्धतुलांक्षिपेत् ।
शीतीभूतेचपक्केचमधुनोऽष्टौपलानिच ॥ २३ ॥
षट्पलञ्चतुगाक्षीर्य्याःपिप्पल्याश्चपलद्वयम् ।
त्रिसुगन्धिसुगंधंतत्खादेदग्निबलंप्रति ॥ २४ ॥
श्वासंकासंज्वरंहिक्कांनाशयेत्तमकन्तथा ।
क्वाथत्रयेजलद्रोणत्रयमेव ।
पिप्पलीमानसान्निध्यात्त्रिसुगंधिपलद्वयम् ॥ २५ ॥

इति कुलत्थगुडः ।

अर्थ–कुलथी, दशमूल और भारंगी, यह प्रत्येक ४०० चारसौ तोले लेकर तीन द्रोण पानीमें पकावै,जब चौथा भाग जल शेष रहै तब२००दो सौ तोले गुड़ मिलाकर फिर पकावै, शीतल होनेपर ३२ बत्तीस तोले सहत, वंशलोचन २४ चौवीस तोले, पीपल आठ तोले और त्रिसुंग-

न्धिका चूर्ण ८ आठ तोले मिला, इसको अग्निका बलाबल विचार कर खावै तौ–श्वास, खांसी, ज्वर, हिचकी और तमकश्वास, दूर होवै ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

चतुष्पलंमूलकशुण्ठिकायास्तथैवशुद्धस्यकुलत्थकस्य।
तुलांप्रदद्याद्दशमूलकस्यद्रोणेम्भसःसर्वमिदंपचेच्च ॥ २६ ॥
पूतेरसेपादचतुर्थशेषेप्रस्थप्रमाणंरसमार्द्रकस्य।
दत्त्वाहविस्तैलपलाष्टकञ्चगुडस्यशुद्धस्यतुलांपचेच्च ॥२७॥
चूर्णैर्युतंजीरकचव्यशृंगीभार्गीत्रिसौगन्धिककट्फलैश्च।
मुस्तायवानीशठिपुष्करैश्चसव्योषकैरर्द्धपलप्रमाणैः ॥२८॥
अर्द्धांक्षिपेन्माक्षिकप्रस्थमात्रांपथ्याशनःस्यादुपयोगकाले।
कफोद्भवायेचविकारजाताःश्वासःसकासोहृदयक्षतश्च ॥२९॥
हृत्पार्श्वशूलज्वरवान्तितृष्णास्वरक्षयारोचकवह्निसादाः।
तेनाशमायान्त्युपयोगकालेकुलत्थसंज्ञस्यगुडस्यशीघ्रम् ३०

इति बृहत्कुलत्थगुडः ॥

अर्थ–पीपरामूल १६ सोलह तोले, सोंठ १६ सोलह तोले, कुलथी १६ सोलह तोले, और दशमूल ४०० चारसौ तोले लेवै, इन सबको १०२४ एकहजार चौबीसतोले जलमें पकावै, जब चौथा भाग शेष रहै, तब अदरखका रस चौसठ तोले, घृत बत्तीस तोले, तेल बत्तीस तोले, गुड चारसौ तोले मिलादे, फिर जीरा, चव्य, काकडासिंगी, भारंगी, दालचीनी, इलायची, तेजपात, कायफल, नागरमोथा, अजवायन, कचूर, पोहकरमूल, सोंठ, मिरच, और पीपल यह सब दो दो तोले मिला देवै, पश्चात् चौंसठतोले सहत मिलाकै, सेवनकरै और ऊपरसे पथ्य भोजन करै। यह कुलत्थगुड–कफ, श्वास, हृदयक्षत, हृदयशूल, पसलीशूल, ज्वर, वमन, तृष्णा, स्वरक्षय, अरुचि, और मन्दाग्नि दूर होती है ॥ ३० ॥

सूतार्द्धगंधकंमर्द्यंयामैकंकन्यकाद्रवैः।
द्वयोस्तुल्यंताम्रपत्रंपूर्वकल्केनलेपयेत् ॥ ३१ ॥

दिनैकंहण्डिकायंत्रेपक्कमादायचूर्णयेत् ।
सूर्य्यावर्त्तोरसोनामद्विगुंजंश्वासजिद्भवेत् ॥ ३२ ॥
इन्द्रवारुणिकामूलंदेवदारुकटुत्रिकम् ।
शर्करासहितंखादेदूर्द्ध्वश्वासप्रशान्तये ॥ ३३ ॥
निष्कैकंलेहयेद्वापिक्षौद्रेणकटुरोहिणीम् ।
श्वासश्चारोचकंहन्तिमरिचंदाडिमंगुडम् ॥ ३४ ॥

इति सूर्य्यावर्त्तोरसः ।

अर्थ-पारा दो भाग, गंधक एक भाग, इन दोनोंको घीकुवारके रसमें एक प्रहर खरल करै, फिर दोनोंकी बराबर तांबेके पत्रले उनपै पूर्वोक्त कल्कका लेप करै, पश्चात् उन पत्रोंको हण्डिकायंत्रमें एक दिन पकावै, शीतल होनेपर चूर्ण करले । इसको दोरत्ती प्रमाण खावै तौ श्वास रोग दूर होवे । इन्द्रायणकी जड, देवदारु, त्रिकुटा, इनके चूर्णमें बूरा मिलाकर खावै तौ ऊर्द्ध्वश्वास दूर होवै । दो तोले कुटकीके चूर्णमें सहत मिलाकर खानेसे अथवा कालीमिरचोंका चूर्ण, अनारदाना, और गुड मिलाकर खानेसे-श्वास और अरुचि दूर होती है ॥ ३१ ॥ ॥ ३२ ॥ ३३ ॥ ३४ ॥

धान्याभ्रंसूतकंगंधंश्वेतापामार्गजद्रवैः ।
तुल्यांशंमर्दयेच्चापियन्त्रेपातालकेपचेत् ॥ ३५ ॥
ऊर्द्ध्वलग्नन्तुसंग्राह्यंरसोह्युदयभास्करः ।
श्वासंपञ्चविधंहन्तिद्विगुंजमनुपानतः ॥ ३६ ॥

इति उदयभास्कररसः ।

अर्थ-धान्याभ्रक, पारा और गंधक, इनको समानभाग लेकर सफेद कोयल, और चिरचिटेके रसमें खरलकर पातालयन्त्रमें पकावै, फिर ऊपरके पात्रमें उडकै लगे हुए द्रव्यको सुखाकर दो रत्ती प्रमाण अनुपानके साथ खावै तौ पांचप्रकारके श्वास दूर होवैं ॥ ३५ ॥ ३६ ॥

दाडिमंनागरंहिंगुसर्जंसैन्धवपौष्कराः ।
रास्नाचात्रसमंचूर्णंकर्षंघृतेनसंपिबेत् ॥ ३७ ॥

कासश्वासहरंचूर्णंदाडिमाद्यंनसंशयः ॥ ३८ ॥

इतिदाडिमाद्यंचूर्णम् ।

अर्थ-अनार, सोंठ, हींग, राल, सैंधानोन, पोहकरमूल, रास्ना इन सबको समान भाग लेकर चूर्णबना दोतोले घीके साथ पिवैतौ यह दाडिमाद्यचूर्ण निःसन्देह खाँसी और श्वासको दूर करैहै ॥ ३७ ॥ ३८ ॥

विडंगपिप्पलीचैलात्वचश्चप्रतिकार्षिकम् ।
त्रिकर्षमरिचस्यापिनागराच्चचतुष्फलम् ॥ ३९ ॥
सर्वतुल्यासितायोज्याकर्षमात्रंचभक्षयेत् ।
कासश्वासज्वरप्लीहपाण्डुरोगक्षयापहम् ॥ ४० ॥

इति विडंगादिचूर्णम् ।

अर्थ-वायविडंग, पीपल,इलायची, दालचीनी, यह प्रत्येक दोदो तोले लेवै, कालीमिरच छैतोलेलेवै, सोंठ सोलह तोले लेवै, सबका चूर्णबना फिर सबकी बराबर बूरा लेवै, सबको मिलाकर दोतोलेप्रमाण खावै तौ खाँसी, श्वास, ज्वर, प्लीहा, पाण्डुरोग और क्षयरोग दूरहोवै॥३९॥४०॥

गंधकंमरिचंसाज्यंपिबेद्वातकफापहम् ।
गंधकंघृतपानेनश्वासयक्ष्मक्षयापहम् ॥ ४१ ॥

अर्थ-गंधक,कालीमिरच और घी इनको मिलाकर पीवैतौ वात और कफ दूर होवै, अथवा केवल गंधकको घृतके साथ पीवैतौ श्वास, यक्ष्मा और क्षयरोग नष्ट होताहै ॥ ४१ ॥

तण्डुलीयद्रवैःपिष्टंसूततुल्यश्चगंधकम् ।
वज्रमूषाघृतंपच्याद्भूधरेभस्मतांनयेत् ॥ ४२ ॥
दशमूलकषायेणभावयेत्प्रहरद्वयम् ।
गुंजाद्वयंजयत्याशुहिक्काश्वासज्वरप्रणुत् ॥ ४३ ॥
अनुपानेनदातव्यंरसोऽयंमेघडम्बरः ।
अभयापिप्पलीभार्ङ्गीपुष्करंकर्कटीशठी ॥ ४४ ॥
शर्करायुग्गुडंयोज्यमनुपानंप्रयोजयेत् ॥ ४५ ॥

इति मेघडम्बररसः ।

अर्थ-पारे और गंधकको समानभाग लेकर चौलाईके रसमें पीस वज्रमूषामें रख भूधरयंत्रके द्वारा फूँककेवै, फिर दोप्रहरपर्य्यन्त दशमूलके काढेमें भावनादे, पश्चात् इस मेघडम्बर रसको दोगुंजाप्रमाण अनुपानके साथ सेवनकरनेसे-हिचकी, श्वास, और ज्वरको हरैहै। हरड, पीपल, भारंगी, पोहकरमूल, काकड़ाशिंगी और अमियाहलदी, इनका चूर्ण समान भागले और आठगुनी बूरालेवे, सबको मिला अनुपान करे ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४६ ॥

पाषाणभेदीमत्स्याक्षीद्रवैःपिष्टन्तुमर्दयेत् ।
तद्गोलंलेपयेद्वाह्यकल्कैःपाषाणभेदकैः ॥ ४६ ॥
मत्स्याक्ष्याश्चदलंलेप्यंदत्त्वापातालयंत्रके ।
स्वेदयेद्यामत्रंचरसोऽयंयोगवाहकः ॥ ४७ ॥
गुंजाद्वयंप्रदातव्यंहिक्कावैस्वर्यश्वासजित् ।
दशमूलेपिबेच्चानुसकुलत्थैःकषायकम् ॥ ४८ ॥

इति योगवाहकः ।

अर्थ-पाखानभेदको मत्स्याक्षी (मछेछी) के रसमें घोटकर गोला बनालेवै, पश्चात् उस गोलेके ऊपरके भागको मत्स्याक्षी और पाखान-भेदके कल्कसे लेपकर पातालयन्त्रमें एकप्रहरतक पकाकर चूर्णकरले। इसको दो गुंजाभर खानेसे हिक्का, स्वरभेद और श्वास दूर होताहै। इसके ऊपर दशमूल और कुलथीके काढेका अनुपान करै॥४६॥४७॥४८

द्वाभ्याञ्चरसगंधाभ्यांकज्जलींकारयेद्बुधः ।
निशाभांकारयेन्मूषांकज्जलींतांविनिक्षिपेत् ॥ ४९ ॥
पलैकंशुद्धताम्रस्यपात्रिकांतत्रनिक्षिपेत् ।
सम्यङ्निरुध्यसंशोष्यंक्षिपेत्कुक्कुटकेपुटे ॥ ५० ॥
स्वांगशीतलमुद्धृत्यधमेट्टंगणसंयुतम् ।
काचटंकणयोगेनधमेत्तंचाष्टधापुटे ॥ ५१ ॥
ईषद्वंगसमायोगःसमावर्त्तिततारकम् ।
सार्द्धंतेनैवभावेननिष्कमात्रेणयोजयेत् ॥ ५२ ॥

गोजलैरष्टधाभिन्नंस्वल्पगंधकसंयुतम् ।
मूषिकायांविनिक्षिप्यरुद्ध्वातंप्रधमेत्ततः ॥ ५३ ॥
द्वित्रिवारंकृतेह्येवंतंतारंतत्रजीयति ।
जीर्णसुवर्णमानञ्चतत्रनागंनियोजयेत् ॥ ५४ ॥
तद्गोलंतत्रचादायकटुत्रितयकट्फलैः ।
चूर्णितैःसहसंयोज्यतुलामात्रंनिषेवितम् ॥ ५५ ॥
श्वासंकासंक्षयंशूलंप्लीहगुल्माग्निमन्दताम् ।
वातरोगमशेषञ्चकफरोगमनेकधा ॥ ५६ ॥
ज्वरंनानाविधंचैवपीडामुदरसम्भवाम् ।
ग्रहणींश्वयथुञ्चैवअर्शांसिचभगन्दरम् ॥ ५७ ॥
यकृद्वृद्धिंतथाप्लीहमेदोवृद्धिञ्चविद्रधिम् ।
एवमन्यान्हरेद्व्याधींस्तमःसूर्योदयेयथा ॥ ५८ ॥
तत्तद्रोगहरैर्योगैर्योजनीयःसदारसः ।
चन्द्रिकाबद्धसूतोऽयंजलदोषनिवारणः ॥ ५९ ॥
स्वस्थानंनित्यमेवात्रदेहलाघवकारकम् ॥ ६० ॥
रसगंधकयोःपलमेकंग्राह्यंनिशाभांनिशाकारमूषाम् ।

इति चन्द्रिकाबद्धरसः ।

इति हिक्काश्वासाध्यायः ।

अर्थ-पारा और गंधक समान भागलेकर कज्जली करै. फिर रातमें मूषा बनावै, कज्जलीको मूषामें रख उसके ऊपर चारतोले शुद्ध तांबेके पत्र रखै, पश्चात् मूषाको अच्छेप्रकार बंदकर कुक्कुटपुटमें पकावै. शीतल होनेपर बराबरका सुहागा मिलाकै फिर पकावै, तदनंतर काँच और सुहागा समानभाग मिलाकर आठवार पुटपाक करै, फिर दोतोले वंग और दो तोले चाँदी मिलाके आठवार गोमूत्रमें भावना देवै, फिर कुछ थोडासा गंधक मिलाकर सम्पुटमें रख दो या तीनवार अग्निमें पकावै,

इसप्रकारकरनेसे चाँदी जीर्ण होजाती है । पश्चात् चान्दीकी बराबर सोनेकी भस्म और सीसेकी भस्म मिलाकर गोला बनालेवै, पश्चात् गोलेमें सोंठ, मिरच, पीपल और कायफलका चूरन मिलाकर सेवन करै तौ श्वाँस, खाँसी, क्षय, शूल, प्लीहा, गुल्म, मन्दाग्नि, सर्वप्रकारके वातरोग, नानाप्रकारके कफरोग, अनेकप्रकारके ज्वर, उदरकी पीडा, संग्रहणी, सूजन, बवासीर, भगंदर, यकृत् अंडवृद्धि, प्लीहा, मेदवृद्धि, विद्रधिरोग, इत्यादिरोग दूर होवैं, जैसे-सूर्यसे अंधकार दूर होताहै। यह रस यथारोगोक्त अनुपानके साथ सेवनकरना चाहिये । यह चंद्रिकाबद्धरस-जलदोषविनाशक है, तथा शरीरको हलका करता है ॥ ४९ ॥ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७॥५८॥५९॥६०॥

इति हिक्काश्वासाधिकारः समाप्तः ।

अथ स्वरभेदचिकित्सामाह ।

वातेसलवणंतैलंपित्तेसर्पिःसमाक्षिकम् ।
कफेसक्षारकटुकंक्षीरंकवडइष्यते ॥ १ ॥
गलेतालुनिजिह्वायांदन्तमूलेषुचाऽनुतः ।
तेननिष्कुप्यतेश्लेष्मास्वरश्चास्यप्रसीदति ॥ २ ॥
पथ्यापिप्पलीसंयुक्तानागरेणगुडेनवा ।
बदरीपत्रकल्कंवाघृतभृष्टंससैन्धवम् ॥ ३ ॥
स्वरोपघातेकासेचलेहमेनंप्रयोजयेत् ।
अजमोदांनिशांधात्रींक्षारंवह्निंविचूर्णयेत् ॥ ४ ॥
मधुसर्पिर्युतंलीढ्वास्वरभेदंव्यपोहति ॥ ५ ॥
कलितरुफलसिन्धुकणाचूर्णंतक्रेणलीढमपहरति ।
स्वरभेदंगोपयसापिबतिवामलकचूर्णम् ॥ ६ ॥
शर्करामधुमिश्राणिशृतानिमधुरैःसह ।
पिबेत्पयांसियस्योच्चैर्वदतोहिहतःस्वरः ॥ ७ ॥

अर्थ-वातसे उत्पन्न हुए स्वरभेदमें तेलकेसाथ नोन पीना चाहिये ।

पित्तसे उत्पन्न हुए स्वरभेदमें घीकेसाथ सहत मिलाकर पीवै, कफके स्वरभेदमें जवाखार और त्रिकुटेका चूर्ण दूधमें मिलाकर कुल्लेकरै तौ गल, तालु, जिह्वा, और दन्तमूलका कफ निकलकर स्वर शुद्ध होजाताहै, हरड और पीपलके चूर्णको मिलाकर खावै, अथवा सोंठके चूर्णको गुडमें मिलाकर खावै, बाबेरीके पत्तोंके कल्कको घीमें भूजकर सैंधानोन मिलाकर खावै तौ स्वरभेद और खांसी दूर होवै। अजमोद, हलदी, आमला, जवाखार, और चीतेके चूर्णको सहत और घीमें मिलाकर खानेसे–स्वरभेदरोग दूर होताहै। बहेडा, सैंधानोन और पीपल, इनके चूर्णको छाछमें मिलाकर पीनेसे स्वरभेदरोग दूर होताहै। गायके दूधमें आमलोंका चूर्ण मिलाके पीनेसे स्वरभेदरोग नष्ट होताहै। मधुर औषधियोंको दूधमें औटाके बूरा और सहत मिलाकर पीनेसे ऊंचेस्वरसे भाषणकरनेका स्वरभेद दूर होजाताहै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥६॥७॥

चव्याम्लवेतसकटुत्रिकतिन्तिडीकं
तालीशबीजकतुगादहनैःसमांशैः।
चूर्णंगुडप्रमृदितंत्रिसुगंधियुक्तं
वैस्वर्यपीनसकफारुचिषुप्रशस्तम् ॥ ८ ॥

इति चव्यादिचूर्णम्।

अर्थ–चव्य, अमलवैंत, त्रिकुटा, इमली, तालीशपत्र, बिजोरेकी केशर, वंशलोचन, चीता, और त्रिसुगन्धि, इनका चूर्ण बना गुड मिलाके सेवनकरनेसे–स्वरभेद, पीनस, कफ और अरुचि दूर होतीहै ॥ ८ ॥

भृंगराजामृतावल्लीवासकदशमूलकासमर्दरसैः।
सर्पिःसपिप्पलीकंसिद्धंस्वरभेदकासजिन्मधुना ॥ ९ ॥
भृंगराजप्रभृतीनांचतुर्गुणःक्वाथःपिप्पल्याःपादिकःकल्कः।

इति भृंगराजाद्यंघृतम्।

अर्थ–भांगरा, पीपल, अडूसा, दशमूल, और कसौंदी, इनके रसमें घीको सिद्धकर, पीपलका चूर्ण और सहत मिलाकै खानेसे स्वरभेद और खाँसी दूर होतीहै ॥ ९. ॥

पथ्यापाठाकणाशुण्ठीसैन्धवंमरिचंवचा।

शिग्रुप्रतिपलंकल्कंघृतंद्वात्रिंशतंपलम् ॥ १० ॥
घृताच्चतुर्गुणंक्षीरमाजंसर्पिर्विपाचयेत् ।
घृतशेषंपिबेन्नित्यंवाङ्मेधास्मृतिबुद्धिकृत् ॥ ११ ॥

इति पथ्याद्यंघृतम् ।

अर्थ–हरड, पाढ, पीपल, सोंठ,सैन्धानोन, कालीमिरच, बच, और सैजिना, यह प्रत्येक चार चार तोले ले कल्क बना उसमें १२८ एक सौ अठाईश तोले बकरीका घी और ५१२ पांचसौ बारह तोले दूध मिलाकै घीको सिद्ध करै। इसघीको पीनेसे वाणी, मेधा और स्मरणशक्ति बढतीहै ॥ १० ॥ ११ ॥

अश्वगंधाजमोदाचपाठात्रिकटुकत्रिकम् ।
शतपुष्पंब्रह्मबीजंसैंधवञ्चसमंसमम् ॥ १२ ॥
एतदर्द्धंवचाचैवचूर्णितंमधुसर्पिषा ।
भक्षयेत्कर्षमात्रन्तुजीर्णानिक्षीरभोजनम् ॥ १३ ॥
सहस्रग्रन्थधारीस्यान्मृतोवावाक्पतिर्भवेत् ।
ब्रह्मबीजंपलाशबीजंसर्वचूर्णादर्द्धग्राह्यम् ॥ १४ ॥

इति अश्वगंधाद्यंघृतम् ।

अर्थ–असगंध, अजमोद, पाढ़, त्रिकुटा, त्रिफला, सोया, ढाकके बीज, और सैंधानोन, यह प्रत्येक समान भाग लेकर और सबसे आधा भाग वचका चूर्ण लेवै, सबको एकत्रकर घी और सहतमें मिलाकर दो तोले भर खानेसे १००० एक सहस्र ग्रन्थोंका धारणकरनेवाला होजाताहै, पश्चात् मरकर बृहस्पतिके अवतारको धारण करता है. इसके ऊपर दूधका भोजन करना चाहिये ॥ १२ ॥ १३ ॥ १४ ॥

सहरिद्रावचाकुष्ठंपिप्पलीविश्वभेषजम् ।
अजाजीचाजमोदाचयष्टीमधुकसैन्धवम् ॥ १५ ॥
एतानिसमभागानिश्लक्ष्णचूर्णानिकारयेत् ।
तच्चूर्णंसर्पिषालोड्यप्रत्यहंभक्षयेन्नरः ॥ १६ ॥
एकविंशतिरात्रेणभवेच्छ्रुतिधरोनरः ।

मेघदुन्दुभिनिर्घोषोमत्तकोकिलानिस्वनः ॥ १७ ॥
जडगद्गदमूकत्वंलेहःकल्याणकोजयेत् ॥ १८ ॥

इतिकल्याणावलेहः।

अर्थ-हलदी, बच, कूट, पीपल, सोंठ, कालाजीरा, अजमोद, मुलैठी और सैंधानोन, यह सब समानभागले एकत्र चूर्णकर घीमें मिला इकीस दिन खावै तौ अनेकशास्त्रोंको धारनकरनेवाला मनुष्य होजाताहै, यह कल्याणावलेह शब्दकोमेघकी समान और कोकिलकी समानकरदेताहै, तथा जडता, गदगदपन,और गूंगेपनको दूर करैहै॥१५॥१६॥१७॥१८॥

समूलपत्रमादायब्राह्मींप्रक्षाल्यवारिणा।
उलूखलेक्षोदयित्वारसंवस्त्रेणगालयेत् ॥ १९ ॥
रसेचतुर्गुणेतास्मिन्घृतप्रस्थंविपाचयेत्।
औषधानितुपेष्याणितानीमानिप्रदापयेत् ॥ २० ॥
हरिद्रामालतीकुष्ठंत्रिवृतासहरीतकी।
एतेषांपालकान्भागान्शेषांश्चकार्षिकानिह ॥ २१ ॥
पिप्पल्यथविडंगानिसैन्धवंशर्करावचा।
सर्वमेतत्समालोड्यशनैर्मृद्वग्निनापचेत् ॥ २२ ॥
एतत्प्राशितमात्रेणवाग्विशुद्धिश्चजायते।
अर्द्धमासप्रयोगेणसोमराजवपुर्भवेत्।
सप्तरात्रप्रयोगेणकिन्नरैःसहगीयते ॥ २३ ॥
मासमेकप्रयोगेणस्मृतमात्रन्तुधारयेत् ॥ २४ ॥
हन्त्यष्टादशकुष्ठानिअर्शांसिविविधानिच।
पंचगुल्मान्प्रमेहांश्चकासंपंचविधंजयेत् ॥ २५ ॥
वन्ध्यानाञ्चैवनारीणांनराणामल्परेतसाम्।
घृतंसारस्वतंनामबलवर्णाग्निवर्द्धनम् ॥ २६ ॥

इति ब्राह्मीघृतम्।

इति स्वरभेदाऽध्यायः।

अर्थ-मूल और पत्तों समेत ब्राह्मीको लेकर पानीसे धो डाले, फिर ओखलीमें कूट वस्त्रमें निचोडके रस निकालले, यह रस २५६ दोसौ छप्पन तोले और इसमें चौसठ तोले घी मिलाके पकावै, फिर हलदी, मालती, कूठ, निसोत, हरड, यह प्रत्येक चार २ तोले, पीपल, वायविडंग, सैंधानोंन, बूरा, और वच, यह प्रत्येक दो २ तोले मिलाकर धीरे धीरे मृदु अग्निसे पकावै, शीतल होनेपर उतार लेवै. इस घृतको सेवनकरनेसे-शब्द शुद्ध होजाता है । इसको सातरात्रिपर्यन्त खावै तौ किन्नरकी समान शब्द होजावै, इसको पंद्रहदिन सेवनकरनेसे शरीर चन्द्रमाकी समान निर्मल होजाता है, और इसको एक महिने सेवन करनेसे-सम्पूर्ण शास्त्रोंको धारणकरनेवाला मनुष्य होजाता है । तथा यह घी-अठारह प्रकारके कोड, अनेक प्रकारकी बवासीर, पांचों प्रकार-के गुल्म, सर्वप्रकारके प्रमेह, पांचों प्रकारकी खांसी, इन सबको दूर करे हैं और वंध्या स्त्री तथा अल्पवीर्यवाले पुरुषोंके यह तेल-बल, वर्ण और अग्निको बढ़ानेवाला है॥१९॥२०॥२१॥२२॥२३॥२४॥२५॥२६

इतिस्वरभेदाध्यायसमाप्तः ।

अथारोचकचिकित्सा ।

बस्तिसमीरणेपित्तेविरेकंवमनंकफे ।
कुर्याद्धृद्यानुकूलानिहर्षणंचमनोघ्नजे ॥ १ ॥
वान्तोवचाद्भिरनिलेविधिवत्पिबेत्तु
स्नेहोष्णतोयमदिरान्यतमेवचूर्णम् ।
कृष्णाविडंगयवभस्महरेणुभार्गी
रास्नैलहिंगुलवणोत्तमनागराणाम् ॥ २ ॥
सर्वत्रमदनफलयोगइतिबोद्धव्यः ।
पिबेद्गुडाम्बुमधुरैर्वमनंप्रशस्तं
लिहःससैन्धवसितामधुसर्पिरिष्टः ।
निम्बाम्बुछर्दितवतःकफजेचपानं
राजद्रुमाम्बुमधुनासहदीप्यकाढ्यम् ॥ ३ ॥

चूर्णंयदुक्तमथवानिलजेतदेव
सर्वैश्वसर्वकृतमेवमुपक्रमेच्च ॥ ४ ॥
पानानिचविचित्राणिभक्ष्याणिविविधानिच।
कर्पूरादिसुगंधीनिप्रयुंजीतयथाविधि ॥ ५ ॥
कुष्ठंसौवर्चलाजाजीशर्करामरिचंविडम्।
धात्र्यैलापद्मकोशीरपिप्पल्यश्चन्दनोत्पले ॥ ६ ॥
लोध्रंतेजोवतीपथ्यात्र्यूषणंसयवाग्रजम्।
आर्द्रदाडिमनिर्यासश्चाजाजीशर्करान्वितः ॥ ७ ॥
सतैललवणास्त्वेतेचत्वारःकवडग्रहाः।
चत्वारोऽरोचकान्हन्युर्वाताद्येकजसर्वजान् ॥ ८ ॥
आर्द्रकदाडिमफलस्वरसः।
अथवामांसीधान्यानिमुस्तमामलकत्वचः।
त्वक्चदार्वीयवान्यश्चपिप्पल्यस्तेजवत्यपि ॥ ९ ॥
यवानीतिन्तिडीकंचपंचैतेमुखशोधनाः।
श्लोकपादैरभिहिताःसर्वारोचकनाशनः ॥ १० ॥
विड्चूर्णमधुसंयुक्तोरसोदाडिमसम्भवः।
असाध्यमपिसंहन्यादरुचिंवक्त्रधारितः ॥ ११ ॥
अम्लिकागुडतोयंचत्वगेलामरिचान्वितम्।
अभक्तच्छन्दरोगेषुशस्तंकवडधारणम् ॥ १२ ॥

इति अम्लिकातिन्तिडीफलम्।

अर्थ-वात उत्पन्न हुई अरुचिमें बस्तिकर्म कराना चाहिये। पित्तसे उत्पन्न हुई अरुचिमें विरेचनकर्म कराना चाहिये। और कफसे उत्पन्न हुई अरुचिमें वमन करानी चाहिये। मनको नाश करनेवाले पदार्थोंसे उत्पन्न हुई अरुचिमें मनके अनुकूल और हर्षजनक पदार्थ सेवन करने उचित हैं। बचके क्वाथको पीनेसे वमन होकर वातज अरुचि रोग दूर होजाता है। घृत तैलादि स्नेह, गरमजल, मदिरा, इन तीनों-

मेंसे एक किसीको पीनेसे वातज अरुचि दूर होजाती है । पीपल, वायडंग, जवाखार, रेणुका, भारंगी, रास्ना, इलायची, हींग, सैंधानोंन और सोंठ,इनके चूर्णको सेवनकरनेसे अरुचि विनष्ट होजातीहै, इनसब योगोंमें वमन करानेके लिये मैनफलका चूर्ण मिलाना उचितहै । मधुर औषधियोंको गुडके सरबतके साथ पीनेसे वमन होकर अरुचिरोग दूर होजाताहै । सैंधानोंन, मिश्री सहत और घी मिलाकर खानेसे अरुचि दूर होती है, नीमके काढेको पीनेसे कफजअरुचि दूर होती है । अमलतासके रसमें अजमोदका चूर्ण और सहत मिलाकर खानेसे वातज अरुचि दूर होतीहै । त्रिदोषसे उत्पन्न हुए अरुचिरोगमें सब प्रकारकी चिकित्सा करनी चाहिये । विविधविचित्र अन्नपान तथा कर्पूरादि सुगंधिद्रव्य अरुचिरोगमें प्रयोग करने चाहिये । कूठ, कालानोन, जीरा, बूरा, कालीमिरच, विडनोन, आमला, इलायची, पद्माख, खस, पीपल, चंदन, और कमल अथवा लोध, तेजबल, हरड, त्रिकुटा और जवाखार या अदरखका रस, अनारकारस, जीरा और खांड, इनचार योगोंका तेलके साथ और सैंधेनोनके साथ कुल्ला करनेसे सर्वप्रकारकी अरुचि दूर होजातीहै । बालछड़ और धनिया अथवा नागरमोथा और आमला वा दालचीनी, दारुहलदी, और अजवायन या पीपल और चव्य अथवा अजवायन, और इमली, इन पाचों योगोंमेंसे एक किसी योगका चूर्ण करकै मुखमें धारणकरनेसे मुख शुद्ध होकर सर्व प्रकारकी अरुचि नष्ट होजातीहै । विरियासंचरनोनको सहत और अनारके रसके साथ अथवा इमली, गुड और जलके साथ दालचीनी; इलायची और कालीमिरचोंका चूर्ण मुखमें धारणकरनेसे सर्वप्रकारकी अरुचि दूर होजातीहै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

कारव्यजाजीमरिचंद्राक्षावृक्षाम्लदाडिमम् ।
सौवर्चलगुडक्षौद्रंसर्वारोचकनाशनम् ॥ १३ ॥
एभिश्चतुर्माषप्रमितागुटिकाकार्य्या ।

अर्थ-सौंफ, जीरा, कालीमिरच, दाख, इमली, अनार, कालानोन, गुड़, और सहत, यह सब द्रव्य एकत्र मिलाकर चारमासेकी गोलिया बनालेवै, इन गोलियोंको सेवनकरनेसे सर्वप्रकारकी अरुचि दूर होजातीहै ॥ १३ ॥

यवानीतिन्तिडीकश्चनागरश्चाम्लवेतसम् ।
दाडिमंबदरंचाम्लंकार्षिकाण्युपकल्पयेत् ॥ १४ ॥
धान्यसौवर्चलाजाजीवराङ्गंचार्द्धकार्षिकम् ।
पिप्पलीनांशतंचैकंद्वेशतेमरिचस्य च ॥ १५ ॥
शर्करायाश्चचत्वारिपलान्येकत्रकारयेत् ।
जिह्वाविशोधनंहृद्यंतच्चूर्णंभक्तरोचनम् ॥ १६ ॥
कासश्वासहरंग्राहिग्रहण्यर्शोविकारनुत् ॥ १७ ॥
पिप्पलीमरिचयोर्गुडकेनमानम् ।

इति यवानीषांडवः ।

अर्थ-अजवायन, इमली, सोंठ, अमलवैंत, अनार और बेर, यह प्रत्येक दोदो तोले, धनिया, कालानोन, जीरा, और दालचीनी यह प्रत्येक चारचार तोले, कालीमिरच २०० दोसौ, पीपल १०० एकसौ, तथा खांड चारपल लेवै, इन सबको एकत्र पीसकर सेवनकरनेसे सर्व-प्रकारकी अरुचि दूर होजातीहै, तथा यह रागषांडव जिव्हाको शुद्ध करनेवाला, हृदयको हितकारी, खाये हुएको जीर्ण करनेवाला, खाँसी, श्वास, संग्रहणी, और बवासीरको दूर करे है, और मल-रोधक है ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥

अष्टादशशिग्रुफलानिदशमरिचानिविंशतिश्चपिप्पल्यः ॥
आर्द्रकपलंप्रस्थत्रयमारनालस्य ।
विड्लवणसहितमेतत्स्वजाहतंसरतिगंधाढ्यम् ।
व्यंजनसहस्रघातिज्ञेयंसकलहंसकोनाम ॥ १८ ॥

इतिकलहंसकः ।

अर्थ-सैंजिनेके बीजोंका चूर्ण अठारह पल, कालीमिरचोंका चूर्ण दशपल, अदरखकारस एकपल, कांजीबारह सेर और विड़नोन, इन सब द्रव्योंकों एकत्र पकार त्रिसुगंधिका चूर्ण मिलाकै लेवै। इसको अनु-पान माफिक खानेसै अरुचि दूर होजातीहै ॥ १८ ॥

यवक्षारन्तुकर्षैकंद्वाविंशद्भृगकैर्जलैः ।

पादशेषंहरेत्क्वाथंश्लेष्मघ्नंमुखशुद्धिकृत् ॥ १९ ॥
कणापथ्याप्रियंगुश्चदार्वीतेजोवतीनिशा ।
लोध्रंचप्रतिकर्षैकंदत्त्वात्रिंशद्गुणैर्जलैः ॥ २० ॥
पादशेषंहरेत्क्वाथंपलैकञ्चमधुक्षिपेत् ।
गण्डूषाच्छ्वासकासञ्चमुखरोगञ्चनाशयेत् ॥ २१ ॥
पक्वदाडिमबीजञ्चग्राहयेच्चपलाष्टकम् ।
अजाजीभृष्टचूर्णञ्चकर्षांशंसितशर्कराः ॥ २२ ॥
पलंक्षौद्रेणसंयुक्तंपीतंरुचिकरंमुखे ।
शर्करादाडिमक्वाथद्राक्षाखर्जूरमेव वा ॥ २३ ॥
केशरंमातुलुंगस्यसैन्धवंमधुनापि वा ।
आस्यवैरस्यशान्त्यर्थंभक्षयेत्कर्षमात्रकम् ॥ २४ ॥
मुस्ताद्राक्षामृताशुंठीकिराततिक्तकंजलैः ।
क्वाथयित्वापिबेदुष्णमास्यवैरस्यशान्तये ॥ २५ ॥
कणातगरसौराष्ट्रीतुल्यतेजोवतीजले ।
मधुयुक्तंपिबेत्क्वाथंवैरस्यंश्लैष्मिकंजयेत् ॥ २६ ॥
कपित्थमज्जात्रिकटुचूर्णक्षौद्रसितायुतम् ।
अरोचकेषुसर्वेषुप्रसन्नंधारयेन्मुखे ॥ २७ ॥

इति अरोचकाऽध्यायः ।

अर्थ–एक तोले जवाखारको बत्तीस तोले जलमें पकावै, जब आठ तोले जल शेष रहे तब उतारले, यह क्वाथ कफनाशक और मुखशोधक है। पीपल, हरड, फूलप्रियंगू, दारुहलदी, तेजबल, हलदी, और लोध ये प्रत्येक एक एक कर्ष लेवे और ३२ कर्ष पानीमें काढा करे, चतुर्थांश शेषरहे तब एक पल सहत डालकर गंडूष करे, इससें श्वास, कास और मुखरोग नष्ट होतेहैं; पके अनारके बीजोंको आठपल लेकर उसमें अजमायनका भुना हुआ चूर्ण एक कर्ष डाले उसका काढा करके एक पल सहत डालके पीनेसें मुखमें रुचि आतीहै,

अनारके क्काथको खांडके साथ, अथवा दाख और खजूरके क्काथको वा बिजोरेकी केशरको सैंधानोनके साथ और सहतके साथ दोतोलेभर सेवन करनेसे-मुखकी विरसता दूर होतीहै । नागरमोथा, दाख, हरड, सोंठ और चिरायता इनके काढ़ेको गरम गरम पीनेसे मुखकी विरसता दूर होतीहै । पीपल, तगर, सोरठकी मिट्टी और तेजबल, इन सबको समानभाग लेकर काढ़ाकरे इसकाढेमें सहत मिलाकर पीवै तौ कफसे उत्पन्न हुई मुखकी विरसता दूर होतीहै । कैथकी मींग, त्रिकुटेका चूर्ण, सहत और मिश्री, इनसबको मिलाकै मुखमें धारणकरनेसे सर्वप्रकारकी अरुचि दूर होतीहै ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥२४॥ ॥ २५ ॥ २६ ॥ २७ ॥

इति अरोचकाधिकारः समाप्तः ।

अथ च्छर्दिचिकित्सामाह ।

आमाशयोत्क्लेशभवाहिसर्वाश्छर्द्योमतालंघनमेवतस्मात्
प्राक्कारयेन्मारुतजांविमुच्यसंशोधनंवाकफपित्तहारि १॥
हन्यात्क्षीरोदकंपीतंछर्दिंवमनसंभवाम् ।
ससैन्धवंपिबेत्सर्पिर्वातच्छर्दिनिवारणम् ॥ २ ॥
मुद्गामलकयूषंवाससर्पिष्कंससैन्धवम् ।
यवागूंमधुमिश्रांवापंचमूलीकृतांपिबेत् ॥ ३ ॥

पंचमूलीस्वल्पा ।

सोदीच्यंगैरिकंपेयंसेव्यंवातण्डुलाम्बुना ।
चन्दनञ्चमृणालञ्चवालकंनागरंवृषः ॥ ४ ॥
सतण्डुलोदकक्षौद्रःपीतःकल्कोवमिंजयेत् ।
क्काथःपर्पटजःपीतःसक्षौद्रश्छार्दिनाशनः ॥ ५ ॥
कषायोभृष्टमुद्गस्यसलाजमधुशर्करः ।
छर्द्यतीसारतृड्दाहज्वरघ्नःसंप्रकाशतः ॥ ६ ॥
गुडूचीत्रिफलानिम्बपटोलैःक्काथितंपिबेत् ।

क्षौद्रयुक्तंनिहन्त्याशुच्छर्दिंपित्ताम्लसंभवाम् ॥ ७ ॥
कोलामलकमज्जानौमाक्षिकाविट्सितामधु ।
सक्तुष्णातण्डुलोलेहश्छर्दिमाशुनियच्छति ॥ ८ ॥
अश्वत्थवल्कलंशुष्कंदग्ध्वानिर्वापितंजले ।
तज्जलंपानमात्रेणच्छर्दिंजयतिदुस्तराम् ॥ ९ ॥
लाजाकपित्थमधुमागधिकोषणानां
क्षौद्राभयात्रिकटुधान्यकजीरकाणाम् ।
पथ्यामृतामरिचमाक्षिकपिप्पलीनां
लेहास्त्रयःसकलवम्यरुचिप्रशान्त्यै ॥ १० ॥
कृतंगुडूच्याविधिवत्कषायंहिमसंज्ञितम् ।
तिसृष्वपिभवेत्पथ्यंमाक्षिकेणसमायुतम् ॥ ११ ॥

अर्थ–आमाशयके उत्क्लेश होनेसे छर्दि होतीहै, इसकारण वातकी छर्दिको छोडकै शेष छर्दियोंमें प्रथम लंघन अथवा कफपित्तनाशक जुल्लाबदेवै। दूध और जल अथवा घी और सैंधानोंनको मिलाकर पीनेसे वातकी वमन शमन होतीहै। मूग और आमलेके यूषको घृत और सैंधानोनके साथ अथवा स्वल्पपंचमूलकी बनाई हुई यवागूमें सहत मिलाके पीनेसे सर्वप्रकारकी वमन दूर होती है। सुगंधवाला, और गेरूको चावलोंके जलके साथ पीनेसें–अथवा लालचन्दन, कमलकीनाल, सुगंधवाला, सोंठ, और अडूसा, चावलोंके जलकेसाथ पीसकर मधुके साथ या पित्तपापडेके काढेको मधुके साथ पीनेसे वमन दूर होतीहै। भुनीहुई मूंगके काढेमें खीले सहत और बूरा मिलाकर पीनेसे–वमन, अतीसार, तृषा, दाह और ज्वर दूर होताहै। गिलोय, त्रिफला, नीम, और परवल, इनके काढेमें सहत डालकै पीनेसे अम्लपित्तसे उत्पन्नहुई वमन दूर होजातीहै। बेरकीमींग, आमलेकी मींग, मक्खीकी विष्ठा, मिश्री, सहत, पीपल और चावल, इनसबका अवलेह बनाकर चाटनेसे सर्वप्रकारकी वमन, दूर होजातीहै। पीपलके खारका नितरा हुआ जल पीनेसें छर्दि नष्ट होजाती है। खीलें, कैथ, सहत, पीपल और कालीमिरच, अथवा सहत, हरड, त्रिकुटा, धनिया और

जीरा, या हरड, गिलोय, कालीमिरच, सहत और पीपल, इनका अवलेह बनाकर चाटनेसे-वमन और अरुचि दूर होती है। गिलोयके शीतल क्काथमें मधु डालके पीनेसे सर्वप्रकारकी वमन दूर होती है ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

एलालवंगगजकेशरकोलमज्जा-
लाजाप्रियंगुवनचन्दनपिप्पलीनाम् ।
चूर्णानिमाक्षिकसितासहितानिलीढ्वा
छर्दिंनिहन्तिकफमारुतपित्तजाञ्च ॥ १२ ॥

इति एलादिचूर्णम् ।

अर्थ-इलायची, लौंग, नागकेशर, बेरकीमींग, खीलैं, फूलप्रियंगू, नागरमोथा, चन्दन, और पीपल,इनका चूर्ण बना तिसमें सहत मिलाकर खावैतौ-सर्वप्रकारकी छर्दि दूरहोवै ॥ १२ ॥

चन्दनंमधुकंक्षीरंपीतंरुधिरवान्तिजित् ।
पद्मकंगुडुचीनिम्बंधन्याकंरक्तचन्दनम् ॥ १३ ॥
कल्केक्काथेचहविषःशास्तंछर्दिनिवारणम् ।
तृष्णारुचिप्रशमनंदाहज्वरनिवारणम् ॥ १४ ॥

इति पंचकाद्यंघृतम् ।

खण्डनारिकेलखण्डकूष्माण्डच्यवनप्राशाद-
योऽत्रयोज्याः ।

इति छर्द्यधिकारः ।

अर्थ-चन्दन और मुलैठीके चूर्णको दूधमें मिलाकर पीनेसे रक्तवमन, दूर होतीहै। पद्माख, गुडूची (गिलोय), नीम, धनिया, लालचन्दन, इनके कल्कमें और क्काथमें घीको सिद्धकर खानेसे वमन, तृष्णा, अरुचि और दाहज्वर दूर होताहै ॥ १३ ॥ १४ ॥

नारिकेलखण्ड, खण्ड कूष्माण्ड, और च्यवनप्राशको सेवनकरनेसे सर्व प्रकारकी वमन विनष्ट होजाती है ॥

इति छर्द्यधिकारः समाप्तः ।

अथ तृष्णाचिकित्सा।

वान्तिःसर्वासुतृष्णासुक्षयादन्यत्रपूज्यये।
विलोडनञ्चसर्वासांप्रयोगैर्विविधैर्हितम् ॥ १ ॥
वातपित्तहरःकृत्स्नोविधिःप्रायोऽत्रशस्यते।
तृष्णायांपवनोत्थायांसगुडंदधिशस्यते ॥ २ ॥
रसाश्चबृंहणाःसितागुडूच्यारसएववा।
लाजोदकंमधुयुतंशीतंगुडविमर्दितम् ॥ ३ ॥
काश्मर्य्याःशर्करायुक्तंपिबेत्तृष्णार्दितोरसम्।
ओदनंरक्तशालीनांशीतंमाक्षिकसंयुतम् ॥ ४ ॥
भोजयेत्तेनशम्येतच्छर्दिस्तृष्णाचिरोत्थिता।
आम्रजम्बूकषायंवापिबेन्माक्षिकसंयुतम् ॥ ५ ॥
छर्दिंसर्वांप्रणुदतितृष्णांचैवापकर्षति।
मूर्च्छाछर्दितृषादाहस्त्रीमद्यभृशकर्षिताः ॥ ६ ॥
पिबेयुःशीतलंतोयंरक्तपित्तेमदात्यये।
दाडिमस्यतुबीजानिजीरकंनागकेशरम् ॥ ७ ॥
चूर्णसशर्करक्षौद्रोलेहस्तृष्णानिवारणम्
पैत्तेतृषिसितायुक्तःपक्वोदुम्बरजोरसः ॥ ८ ॥
तत्क्वाथोवाहिमस्तद्वच्छारिवादिगणाम्बुवा।
वटशुङ्गामयक्षौद्रलाजानीलोत्पलैर्दृढा ॥ ९ ॥
गुडिकावदनेन्यस्ताक्षिप्रंतृष्णामुदस्यति।
मुस्तकंचन्दनोशीरपद्मकंरक्तचन्दनम् ॥ १० ॥
एतैःशिरसिलेपेनक्षिप्रंतृष्णामुदस्याति।
शुष्कंन्यग्रोधकाष्ठञ्चदग्ध्वानिर्वापयेज्जले ॥ ११ ॥
तज्जलंपानमात्रेणक्षिप्रंतृष्णांविनश्याति।
पुनर्नवाह्यपामार्गमूलकंजीरकद्वयम् ॥ १२ ॥

तक्रपिष्टंपिबेद्यस्तुमुखशोषप्रशान्तये ।
खर्जूरंदाडिमंद्राक्षातिन्तिडीकंपरूषकम् ॥ १३ ॥
चित्रकामलकन्तोयैःक्वाथंपादावशेषितम् ।
संयुक्तंनिखिलंचैवतृष्णादाहहरंपरम् ॥ १४ ॥
पलैकंचन्दनंतोयैर्द्वात्रिंशद्भिस्तैःपचेत् ।
अर्द्धशेषंपिबेन्नित्यंदाहतृष्णाज्वरापहम् ॥ १५ ॥
द्राक्षाखर्जूरकोलानांप्रतिपंचपलंभवेत् ।
पचेदष्टगुणेतोयेपादशेषंसुशीतलम् ॥ १६ ॥
त्वगेलापत्रकंचूर्णंप्रतिनिष्कद्वयंक्षिपेत् ।
क्षौद्रञ्चपलचत्वारिपानात्तृष्णास्रशोषजित् ॥ १७ ॥
खर्जूरोशीरमृद्वीकापद्मकंपद्मकेसरम् ।
धात्रीपरूषकंव्याघ्रीबलायष्टिकचन्दनम् ॥ १८ ॥
मधूकपुष्पकाश्मर्य्यंतोयैश्चैवचतुर्गुणैः ।
पक्वंपर्युषितंरात्रौस्थितंभाण्डेनवेदृढे ॥ १९ ॥
लाजाचूर्णञ्चतद्युक्तंशर्करामधुसंयुतम् ।
तृष्णादाहहरंपानेजातीपुष्पाधिवासितम् ॥ २० ॥
मूर्च्छादाहभ्रमंहन्तितृष्णामत्यन्तदारुणाम् ।
तृषितोमोहमायातिमोहात्प्राणंप्रमुञ्चति ॥ २१ ॥
तस्मात्सर्वास्ववस्थासुनक्वचिद्वारिवार्य्यते ॥

इतितृष्णाध्यायः ।

अर्थ–क्षयजको छोडकर बाकीके सर्व तृषारोगोंमें वमन करानी चाहिये, तथा वातपित्तनाशक क्रिया तृषारोगोंमें हितकारीहै । वातकी तृषामें गुडके साथ दहीका खाना उत्तमहै । पुष्टिकारक रस, खाण्ड, और गिलोयका रस यह तृषारोगमें पीने चाहिये । खीलोंके शीतलजलमें सहत और गुड मिलाकर पीनेसे तृषा रोग दूर होताहै; कुम्भेरके

रसमें खाँड मिलाकर पीनेसे तृषा दूर होतीहै । लालधानके चावलोंके भातको सहतके संग खानेसे तृषा और वमन नष्ट होतीहै । आम और जामुनके काथमें सहत डालके पीनेसे, तृषा और वमन नष्ट होती है । मूर्च्छा, वमन, तृषा, दाह, स्त्रीप्रसंग और मद्यपानसे क्षीण हुए मनुष्यको तथा रक्तपित्त, और मदात्यय रोगीको शीतलजल पीनेको देना चाहिये । अनारकेबीज, जीरा और नागकेशर, इनके चूर्णमें बूरा और सहत मिलाकर चाटनेसे तृषारोग नाश होता है । पके हुए गूलर-केरसमें अथवा काथमें खाँड डालके पीनेसे पित्तकी तृषा दूर होतीहै । सारिवादिगणका काथ शीतलकर पीनेसे पित्तकी तृषा दूर होती है । वडके अंकूर, खीलै, सहत और नीलोत्पल (जिसके अभावमें फा०में नीलोफर लेतेहैं), इनकी बनाई हुई गोली मुखमें खानेसे तृषा दूर होजाती है । नागरमोथा, चन्दन, खस, पद्माख और लालचन्दन, इनको पीसकर शिरपै लेप करनेसे तृषा दूर होजातीहै । वडकी सूखी हुई लकडियोंको जलाकै क्षार बना उस क्षारको जलमें नितारके पीनेसे तृषा दूर होजातीहै । पुनर्नवा, चिरचिटा, मूली, सफेदजीरा और काला जीरा, इनको समानभाग लेकर मट्ठेमें पीस सेवनकरनेसे–मुखशोषरोग दूर होताहै । पिण्डखजूर, अनार, दाख, इमली, फालसा, चीता और आमला इनका चतुर्थांश काथ बनाकर पीनेसे–सर्वप्रकारकी तृषा और दाह दूर होतीहै । चारतोलेभर चन्दनको ३२ बत्तीसगुणे जलमें पकावै, जब आधाभाग जलजाय तब उतारकर पीवै तौ दाह, तृषा, और ज्वर दूर होवै । दाख खजूर और बेर, यह प्रत्येक वीसवीस तोले लेकर आठगुने पानीमें पकावै, जब चौथाभाग शेषरहै तब उतारले, शीतल होनेपर दालचीनी, इलायची, तेजपात, इनका चूर्ण चारचार मासेभर मिलादेवै और सोलह तोले सहत मिलादेवै, इसको सेवन करनेसे तृषा और रक्तशोष दूर होताहै । खजूर, दाख, खस, पद्माख, नागकेशर, आमला, फालसा, कटेरी, खिरैटी, मुलैठी, चन्दन, महुएके फूल, और कुम्भेर इनको चौगुने जलमें पकावै, जब काढा तयार होजाय तब उत्तम नवीन वासनमें करकै रात्रिभर धरा रहनेदेवै, फिर दूसरेदिन खीलोंका चूर्ण, बूरा और सहत मिलाके तथा चमेलीके फूलोंकी वासना देकर, सेवन करैतौ मूर्च्छा, दाह, भ्रम, और अत्यन्त दारुणतृषा दूर होवै । तृषासे पीडित मनुष्योंके मोह उत्पन्न होताहै, और मोहसे प्राण

नष्ट होतेहैं, इसकारण संपूर्ण अवस्थाओंमें तृष्णातुर मनुष्योंको जल पीनेको देना चाहिये ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ ॥ २० ॥ २१ ॥ २२ ॥

इतितृष्णाधिकारःसमाप्तः।

अथ मूर्च्छामाह।

सेकावगाहौमणयःसहाराःशीताःप्रदेहाव्यजनानिलाश्च।
शीतानिपानानिचगंधवन्तिसर्वासुमूर्च्छासुनिवारितानि॥१॥
कुर्याच्चनासावदनावरोधंक्षीरंपिबेद्वाथचमानुषीणाम्।
मूर्च्छाप्रशक्तान्तुशिरोविरेकैर्जयेदभीक्ष्णंवमनैश्चतीक्ष्णैः २॥
स्नेहस्वेदोपपन्नानांयथादोषंयथाबलम्।
पंचकर्माणिकुर्वीतमूर्च्छायेषुमदेषुच ॥ ३ ॥
सिद्धानिवर्गैमधुरेपयांसिसदाडिमाजांगलजारसाश्च।
तथायवालोहितशालयश्चमूर्च्छासुशस्ताःससतीनमुद्गाः ॥४
यथादोषंकषायाणिज्वरघ्नानिप्रयोजयेत्।
रक्तजायान्तुमूर्च्छायांहितःशीतक्रियाविधिः ॥ ५ ॥
मद्यजायांवमेन्मद्यंनिद्रांसेवेद्यथासुखम्।
विषजायांविषघ्नानिभोजनानिप्रयोजयेत् ॥ ६ ॥
कोलमज्जोषणोशीरकेशरंशीतवारिणा।
पीतंमूर्च्छांजलेलीढाकृष्णांवामधुसंयुताम् ॥ ७ ॥
महौषधामृताक्षुद्रापौष्करंग्रन्थिकोद्भवम्।
पिबेत्कणायुतंक्काथंमूर्च्छायेषुमदेषुच ॥ ८ ॥
क्षुद्राकण्टकारी।
त्रिफलायाःप्रयोगोवाप्रयोगःपयसोऽपिवा।

रसायनानांकौंभस्यसर्पिषोवाप्रशस्यते ॥ ९ ॥
कौम्भंदशवर्षस्थितंघृतम् ।
पिबेद्दुरालभाक्काथंसघृतंभ्रमशान्तये ।
शतावरीबलामूलद्राक्षासिद्धंपिबेत्पयः ॥ १० ॥
सघृतंभ्रमनाशायवीजंवात्र्यालकस्यवा ।
आभाशतावरीव्योषसौवर्चलरजःपिबेत् ॥ ११ ॥
उष्णाम्बुनाभ्रमेकासेश्वासेनेत्ररुजित्र्यहम् ॥ १२ ॥
आभाआहा ।

कल्याणघृतादिकमत्रविधातव्यमिति ।

अर्थ–जलका छिडकना, जलमें घुसकर स्नानकरना, मुक्तादिके हारोंका धारणकरना, चन्दनादिका प्रलेपकरना, शीतलपंखेकी पवन और गुलाबादि शीतल और सुगंधित अर्कोंका पीना, यह सब कर्म्म मूर्च्छा-रोगमें करने चाहिये । मुख और नासिकाको बन्दकरनेसे अथवा स्त्रीके दूधको पीनेसे मूर्च्छा दूर होतीहै । शिरोविरेचन (अत्यन्त तीक्ष्ण नस्य) अथवा तीक्ष्ण वमन करानेसे–मूर्च्छा दूर होती है। स्नेह और स्वेदसे उत्पन्न हुए मूर्च्छा और मदात्ययरोगमें दोषोंका बलाबल विचार कर पंचकर्म्म (वमन, विरेचन, अनुवासनबस्ति, निरूहबस्ति और नस्य), प्रयोग करने चाहिये । मधुरद्रव्योंके साथ सिद्ध कियाहुआ दूध, अनारके रसके साथ जांगलदेशके जीवोंका मांस, तथा जौ, लालचावल, मटर और मूंग, यह सब पदार्थ मूर्च्छारोगमें हितकारीहै । दोषोंको विचारकर ज्वरनाशक कषाय पीनेसे मूर्च्छा रोग दूर होताहै।रक्तकी मूर्च्छामें शीतल क्रिया, मद्यज मूर्च्छामें मदिराकी वमन और निद्रा सेवनकरनीचाहिये। विषज मूर्च्छारोगमें विषनाशक भोजन सेवनकरने चाहिये। बेरकी मींग, कालीमिरच खस और नागकेशरका चूर्ण शीतलजलके साथ, अथवा पीपलका चूर्ण सहतके साथ सेवनकरनेसे मूर्च्छा दूर होजातीहै । सोंठ गिलोय, कटेरी, पोहकरमूल और पीपलामूल इनके क्वाथमें पीपलका चूर्ण डालकर पीनेसे–मूर्च्छा और मदरोग दूर होताहै । त्रिफलेको सेवनकरनेसै, दूधको पीनेसे, रसायन पदार्थोंके भक्षणकरनेसे और दश वर्षके पुराने घीको सेवनकरनेसे–मूर्च्छारोग आराम होताहै। धमासेका

काढ़ा घीके साथ अथवा शतावर, खिरैटी और दाखोंके साथ पकाया हुआ दूध घीके साथ पीनेसे भ्रमरोग नष्ट होजाताहै। बबूरकी फली, सतावर, त्रिकुटा और कालानोन इनका चूर्ण गरमजलके साथ पीनेसे तीन दिनमें भ्रम, खाँसी, श्वास और नेत्ररोग दूर होते हैं ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

कल्याणकादि घृतोंको सेवनकरनेसे भ्रमरोग दूर होताहै ॥

शक्ताननद्रुताभाषंचलक्षलितचेष्टितम्।
विद्याद्वातमदाविष्टंरक्तपीतासिताकृतिम् ॥ १३ ॥
सक्रोधपरुषाभाषीसंप्रहारकलिप्रियम्।
विद्यात्पित्तमदाविष्टंरक्तपीतसिताकृतिम् ॥ १४ ॥
स्वल्पसंबद्धवचनंतंद्रालस्यसमान्वितम्।
विद्यात्कफमदाविष्टंपाण्डुप्रध्यानतत्परम् ॥ १५ ॥

अर्थ-शक्तमुखहोवै, बहुत शीघ्रबोलै, चंचलतासे गमनादि कार्य करै तथा देह लाल, पीली और सफेद रंगकी होयतौ वातका मदाविष्ट जानना। क्रोधसहित कठिनवचन बोलै, मारनेकी चेष्टा करै, कलह प्यारी लगै, शरीर लाल, पीला और सफेद रंगका होतौ पित्तका मदाविष्ट जानना। बहुत थोड़ाबोले, तन्द्रा और आलस्यसें संयुक्तहो और शरीर पाण्डुवर्ण होजायतौ कफका मदाविष्ट जानना ॥ १३ ॥ १४ ॥ १५ ॥

वन्यकरीषघ्राणाच्छीतलजलपानाल्लवणभक्षणाद्वापि।
शाम्यतिपूगीफलमदचूर्णरुजाशर्कराकवलात् ॥ १६ ॥
पथ्याक्काथेनसंसिद्धंसर्पिर्धात्रीरसेनवा।
सर्पिःकल्याणकंवापिमदमूर्च्छाहरंपिबेत् ॥ १७ ॥
घृत३२पल,हरीतकी६४पल,पानीय५२४पल,शेष१२८पल
अकल्कमिदंघृतम्।

अंजनान्यवपीडाश्चधूमःप्रधमनानिच।
सूचिभिस्तोदनंशस्त्रैर्दाहःपीडान्यथान्तरे ॥ १८ ॥

अंजनंकेशलोम्नाञ्चदन्तैर्दशनमेवच।
आत्मगुप्तावघर्षश्चाहितस्तस्यावरोधने॥ १९॥
अवपीडानिर्गुण्डीपत्ररसादिभिर्नस्यम्।
प्रधमनंत्रिकटुकादिचूर्णस्यनासायांक्षेपः॥ २०॥
शस्त्रैःपीडेतियोजना।
प्रबुद्धसंज्ञमल्पैस्तुलघुभिस्तमुपाचरेत्।
विस्मापनैःसंस्मरणैःप्रियैःश्रुतिभिरेवच॥ २१॥
पटुभिर्गीतवादित्रैःशब्दैश्चित्रैश्चदर्शनैः।
विरेकवान्त्यसृक्स्रावैर्व्यायामामोदघर्षणैः॥ २२॥
प्रातर्गुडार्द्रकंखादेत्तथामधुलिहान्निशि।
मूर्च्छोन्मादमदंकासंसप्ताहात्पथ्यभुग्जयेत्॥ २३॥

अर्थ–वनकागोवर (अरने उपले) सूंघनेसे वा शीतलजलको पीनेसे अथवा लवणको भक्षणकरनेसे सुपारीका मद दूर होता है। खाँडका कवल मुखमें धारणकरनेसे चूनादिकी वेदना दूर होतीहै। हरडोंके क्वाथमें अथवा आमलोंके क्वाथमें पकाए हुए घृतको या कल्याणघृतको पीनेसे मद और मूर्च्छा दूर होजातीहै। नेत्रोंमें अंजन लगानेसे, अवपीडन करनेसे, धूम्रपान करनेसे, प्रधमन करनेसे, सुइयोंको चुभानेसे, शस्त्रोंसे तोदनकरनेसे, लोहेकी शलाकासै दग्धकरनेसे, बाल और रुओंको उखाडनेसे, दांतोसे काटनेसे, कोंछकी फलीको देहपै घिसनेसे और शस्त्रादिकसे डरानेसे मूर्च्छारोगीको चेत होताहै। नास निर्गुण्डीके पत्तोंके रसका लेना चाहिये, और प्रधमन अर्थात् नाकमें त्रिकुटेका चूर्ण डालना चाहिये। चेतहुए मूर्च्छा रोगीकी लघु अल्पाक्रिया, आश्चर्यकी वार्त्ता, स्मरण, प्रिय कार्य, प्रियस्रवण, सुंदर गीत वाद्यादिकेशब्द, विचित्रदर्शन, विरेचन,वमन, रक्तमोक्षण, व्यायाम, आमोद और घर्षणके द्वाराचिकित्सा करनी चाहिये। प्रातःकाल अदरखमें गुड मिलाके खावै और रात्रिमें अदरखको सहतके साथ चाटै तौ सातदिनमें मूर्च्छा उन्माद, मद और खाँसी दूर होवै, इसपै पथ्य भोजन करै॥ १६॥ १७॥ १८॥ १९॥ २०॥ २१॥ २२॥ २३॥

पयः पुनर्नवाक्काथेयष्टिकल्कप्रसाधितम् ।
घृतंपुष्टिकरंपानान्मद्यपानहतौजसम् ॥ २४ ॥

इति पुनर्नवाद्यंघृतम् ।

अर्थ–पुनर्नवाके क्काथमें मुलैठीका कल्क और दूध मिलाकै घीको पकावै । यह घी–पुष्टिकारक और मद्यपानजनित ओजोहीनताको दूर करैहै ॥ २४ ॥

मुस्तकंसैन्धवंचैवबृहतीफलमेवच ।
यष्टीमधुसमायुक्तंनस्यंतन्द्राविनाशनम् ॥ २५ ॥

इति मूर्च्छाभ्रमनिद्रातंद्राध्यायः ।

अर्थ–नागरमोथा, सैंधानोन, बडीकटेरीका फल, और मुलैठी, इनके चूर्णसे नास लेनेसे तन्द्रा दूर होतीहै ॥ २५ ॥

इति मूर्च्छाभ्रमनिद्रातन्द्राधिकारःसमाप्तः ।

अथ दाहचिकित्सामाह ।

यत्पित्तज्वरदाहोक्तंदाहेतत्सर्वमिष्यते ।
शतधौतघृताभ्यक्तंलिह्याद्वायवसक्तुभिः ॥ १ ॥
कोलामलकयुक्तैर्वाधान्याम्लैरपिबुद्धिमान् ।
छादयेत्तस्यसर्वाङ्गमारनालार्द्रवाससा ॥ २ ॥
लामज्जेनाथशुक्तेनचन्दनेनानुलेपयेत् ।
चन्दनाम्बुकणास्यन्दितालवृन्तोपजीविते ॥ ३ ॥
स्वप्याद्दाहार्दितोऽम्भोजकदलीदलसम्भवे ।
परिसेकावगाहेषुव्यजनानाञ्चसेचने ॥ ४ ॥
शस्यतेशिशिरंतोयंतृष्णादाहोपशान्तये ।
क्षीरैः क्षीरकषायैश्चसुशीतैश्चन्दनान्वितैः ॥ ५ ॥
अन्तर्दाहंप्रशमयेदेतैश्चान्यैश्चशीतलैः ।
फलिनीलोध्रसेव्याम्बुहेमपत्रंकुटन्नटम् ॥ ६ ॥

कालीयकरसोपेतंदाहेशस्तंप्रलेपनम् ।
सेव्याम्बुशीरवालाचहेमनागेश्वरचूर्णम् ॥ ७ ॥
(कुटन्नटंकैवर्त्तमुस्तकम् ।)
धातुक्षयोत्थेकुर्वीतक्षीरमांसादिबृंहणम् ॥ ८ ॥

अर्थ-जो औषधी पित्तज्वरमें कहीहै वह सब दाहरोगमें हितकारी है। सौवार धुलेहुए घीको शरीरमें मलनेसे, जौके सतुओंके खानेसे, वेर और आमलोंके साथ काँजीको पीनेसे, काँजीमें भिजोएहुए वस्त्रको सब शरीरमें ढकनेसे, लामज्जकतृण और काँजी तथा चन्दनके लेप करनेसे, चन्दनके जलमें ताड़के पंखेको भिजो पवन करनेसे कमलके पत्तोंकी शय्यापै शयन करनेसे अथवा केलेके पत्तोंपै शयन करनेसे, शीतल जलसे परिसेक और अवगाहन तथा, पंखेको भिजोकर पवन करनेसे दाह और तृषा शान्त होतीहै । चन्दनसंयुक्त शीतल दूध, क्षीर कषाय और अन्यान्य शीतलप्रयोगोंके द्वारा अंतर्दाह दूर होतीहै । फूलप्रियंगू, लोध, खस, सुगंधवाला, नागकेशर और कैवर्ती मोथा, इन सब द्रव्योंको दारुहलदीके रसमें पीसकर प्रलेप करनेसे दाह दूर होती है। धातुक्षयजनित दाहरोगमें दूध और मांसादि पुष्टिकारक खाद्यद्रव्य देने चाहिये ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

कुशादिशालपर्णीभिर्जीवकाद्येनसाधितम् ।
तैलंघृतंवादाहघ्नंवातपित्तविनाशनम् ॥ ९ ॥
इति कुशाद्यंतैलंघृतञ्च ।

अर्थ-कुशादि पंचतृण, लघुपंचमूल, इनके काढ़ेमें जीवकादि अष्टवर्गका कल्क मिला घृत वा तेलको सिद्ध करकै सेवनकरनेसे, दाह और वातपित्त दूर होते हैं ॥ ९ ॥

चतुर्गुणेशतावर्यारसेक्षीरंचतुर्गुणम् ।
सर्पिःप्रस्थंबलाजाजीमंजिष्ठापीवरीनिशा ॥ १० ॥
काकोल्यौमधुमेदद्वेऋद्धीद्विदेवदारुच ।
एषामष्टपलैःकल्कैःपचेत्कल्याणकंमहत् ॥ ११ ॥

बृंहणीयंविशेषेणपरंपुष्टिकरंमतम्।
अर्दितंकर्णशूलञ्चनेत्ररोगंसुदारुणम् ॥ १२ ॥
दाहोन्मादमपस्मारंवातरुग्वातशोणितम्।
उदावर्त्तंगुल्मरोगंहृद्रुजंमूत्रकृच्छ्रकम् ॥ १३ ॥
मूत्रबद्धोपदंशंचग्रहणीमतिदुस्तरम्।
गुदाङ्कुरंमन्दमग्निंश्वासरुग्विषमज्वरौ ॥ १४ ॥
हलीमकंतथाशूलंरक्तपित्तस्वरक्षयम्।
कासश्चैवस्वरंभिन्नंछर्दिंतृष्णांप्रमेहकम् ॥ १५ ॥
स्त्रीणांरुजंजयेच्छीघ्रंक्षयरोगंसकामलम्।
एकजंद्वन्द्वजंचैवतथैवसान्निपातिकम् ॥ १६ ॥
सर्वरोगांनिहन्त्येतन्महत्कल्याणकंघृतम् ॥ १७ ॥

इतिमहत्कल्याणकंघृतम्।

इति दाहाध्यायः।

अर्थ–सतावरका रस २५६ दोसौ छप्पन तोले, गायका दूध २५६ दोसौ छप्पन तोले, घी ६४ चोंसठ तोले, खिरैटी, जीरा, मजीठ, असगंध, हलदी, काकोली, क्षीरकाकोली, मुलैठी, मेदा, महामेदा, ऋद्धि, वृद्धि, और देवदारु, इन सबका कल्क ३२ बत्तीस तोले लेवै, सबको विधिपूर्वक मिलाकर घृतको सिद्ध करै, यह महत्कल्याण घृत–बृंहण, पुष्टिकारक, तथा अर्दितरोग, कर्णशूल, दारुणनेत्ररोग, दाह, उन्माद, अपस्मार, वातरोग, वातरक्त, उदावर्त्त, गुल्मरोग, हृदयरोग, मूत्रकृच्छ्र, मूत्रबंध, उपदंश, असाध्यसंग्रहणी, गुदांकुर, मन्दाग्नि, श्वासरोग, विषमज्वर, हलीमक, शूल, रक्तपित्त, स्वरक्षय, खाँसी, स्वरभेद, वमन, तृषा, प्रमेह, स्त्रीरोग, क्षयरोग, कामला, ऐकाहिक ज्वर, द्वन्द्वजज्वर, और सन्निपात ज्वरको दूर करै है ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ ॥ १५ ॥ १६ ॥ १७ ॥

इति दाहाधिकारःसमाप्तः।

अथोन्मादचिकित्सामाह ।

उन्मादेवातजेपूर्वंस्नेहपानंविरेचनम् ।
कुर्यादावृतवातेतुसस्नेहमूर्द्धशोधनम् ॥ १ ॥
पैत्तिकेरेचनंशस्तंवमनन्तुकफोत्तरे ।
स्निग्धस्विन्नेयथादोषंबस्तिनस्यंचयोजयेत् ॥ २ ॥
शुद्धस्याचारविभ्रंशेतीक्ष्णंलावणमंजनम् ।
ताडनञ्चमनोबुद्धिस्मृतिसंवेजनंहितम् ॥ ३ ॥
तर्जनंत्रासनंदानंसान्त्वनंहर्षणंभयम् ।
विस्मयोविस्मृतेर्हेतोर्नयन्तिप्रकृतिंमनः ॥ ४ ॥

सान्त्वनमाश्वासनम् ।

सर्पैरदन्तैश्चगजैर्व्याघ्रैस्तथारिभिः ।
त्रासयेद्राजपुरुषैःशस्त्रहस्तैर्वधोद्यतैः ॥ ५ ॥
प्रदेहोच्छादनाभ्यंगधूमपानञ्चसर्पिषः ।
प्रयोक्तव्यंमनोबुद्धिस्मृतिसंज्ञाप्रबोधनम् ॥ ६ ॥
प्रयोज्यंसार्षपंतैलंनस्याभ्यंजनयोस्तथा ।
बद्धंसर्षपतैलाक्तमुत्तानञ्चातपेन्यसेत् ॥ ७ ॥
सिद्धार्थिकोवचाहिङ्गुकरंजौदेवदारुच ।
मंजिष्ठात्रिफलाश्वेताकटभीत्वक्कटुत्रिकम् ॥ ८ ॥
समांसानिप्रियंगुश्चशिरीषोरजनीद्वयम् ।
बस्तमूत्रेणपिष्टोऽयमगदःपानमंजनम् ॥ ९ ॥
नस्यमालेपनंचैवस्नानमुद्वर्तनन्तथा ।
अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहः ॥ १० ॥
भूतेभ्यश्चभयंहन्तिराजद्वारेचशस्यते ।
सर्पिरितैश्चसिद्धंवासगोमूत्रंतदर्थकृत् ॥ ११ ॥

अर्थ-वातके उन्मादरोगमें प्रथम स्नेहपान और विरेचन तथा

वातसमन्वित उन्मादरोगमें सस्नेह शिरोविरोचन करना चाहिये। पित्तज उन्मादरोगमें विरेचन और कफज उन्मादरोगमें वमन कराना चाहिये। स्नेह और स्वेदयुक्त मनुष्यको बलाबलका विचार कर बस्तिकर्म्म और नस्यप्रदान करना चाहिये। आचारभ्रष्टमनुष्यको तीक्ष्ण नस्य, अँजन और ताड़नके द्वारा मन, बुद्धि और स्मृति उत्पन्न करानी चाहिये। तर्जन (झिड़कना) त्रासन (धमकाना) दान, सान्त्वन (प्रियवचनोंसे शान्त करना) हर्षण, भय, आश्रय, आश्चर्य और विस्मृतिके द्वारा उन्माद रोगीके मनको प्रकृतिमें प्राप्त करनाचाहिये। सर्प, विनादाँतोंके अथवा दाँतोंके भयंकर जीव, हाथी, व्याघ्र, शत्रु, शस्त्रको हाथमें धारण किये और वधकरनेको तैय्यार ऐसे राजाके पुरुषोंसे उन्मादरोगीको भयभीत करावे, इनसे चित्त स्थिर होजाताहै। उत्तम प्रलेप, श्रेष्ठ आच्छादन, अभ्यंग, धूम्रपान और घृतपानके द्वारा मन, बुद्धि, स्मृति और संज्ञा यह उत्पन्न होतेहैं। सर्सोंके तेलका नास देनेसे और सर्सोंके तेलको शरीरसै मर्दनकरनेसे उन्माद रोग दूर होताहै। उन्माद रोगीको सरसोंके तेलमें भिजोकर फिर सूर्यकी धूपमें पैर फैलाकर सीधा सुलादेवै, इससे उन्मादरोग आराम होताहै। सफेद सरसों, वच, हींग, करंज, देवदारु, मजीठ, त्रिफला, सफेदकोयल, कटमीकी छाल, त्रिकुटा, फूलप्रियंगू, सिरस, हलदी और दारुहलदी, यह सब समान लेकर बकरीके मूत्रमें पीसके पीनेसे, या आंखोंमें अंजन लगानेसे अथवा नाकमें सूंघनेसे वा लेप करनेसे या उबटन करनेसे अथवा जलमें मिलाकर स्नान करनेसे-अपस्मार, विष, उन्माद, अलक्ष्मी और ज्वर दूर होताहै। यह प्रयोग भूतके भयको दूर करताहै और राजद्वारमें श्रेष्ठहै। अथवा गोमूत्र और उक्तद्रव्योंके कल्कमें घृतको सिद्धकर सेवनकरनेसे उन्माद और अपस्मारादिरोग नष्ट होजाते हैं॥१॥२॥३॥४॥५॥६॥ ७॥ ८॥ ९॥ १०॥ ११॥

त्र्यूषणंहिंगुलवणंवचाकटुकरोहिणी।
शिरीषनक्तमालानांबीजंश्वेताश्चसर्षपाः॥ १२॥
गोमूत्रपिष्टैरेतैस्तुवर्त्तिर्नेत्रांजनेहिता।
चातुर्थकमपस्मारमुन्मादंचनियच्छति॥ १३॥

इति त्र्यूषणाद्यावर्त्तिः।

अर्थ-त्रिकुटा, हींग, सैंधानोंन, वच, कुटकी, सिरसके बीज, करंजके बीज, सफेद कोयल, और सरसों, इन सबको गोमूत्रमें पीस बत्ती बना कर आँखोंमें लगानेसे चौथियाज्वर, अपस्मार, और उन्मादरोग दूर होताहै ॥ १२ ॥ १३ ॥

उन्मादेसमधुःपेयोरसोवातालशाखजःकेवलोऽपि।
ब्राह्मीकूष्माण्डीफलषड्ग्रन्थाशंखपुष्पिकाःस्वरसाः १४
उन्मादहराहष्टाःपृथगेतेकुष्ठमधुमिश्राः ॥ १५ ॥
कूष्माण्डफलस्यमज्जा।
दशमूलांबुसघृतंयुक्तंमांसरसेनवा।
ससिद्धार्थकचूर्णवापुराणंचैककंघृतम् ॥ १६ ॥
पानाभ्यंजननस्येषुहितमुन्मादिनांसदा।
उग्रगंधंपुराणंस्याद्दशवर्षस्थितंघृतम् ॥ १७ ॥
लाक्षारसनिभंशीतंप्रपुराणमतःपरम् ॥ १८ ॥

अर्थ-ताडकी शाखाओंके रसमें सहत मिलाकर पीनेसे या केवल ताडकी शाखाओंकाही रस पीनेसे, अथवा ब्रह्मी, पेठेकीमींग, वच और शंखपुष्पी इनके रसोंमें कूठका चूरन और सहत मिलाके अलग अलग सेवन करै तौ उन्माद रोग दूर होवै। घृतयुक्त दशमूलका क्वाथ वा मांस-रसके साथ सफेद सरसोंका चूर्ण अथवा केवल पुरानेघीको पीनेसे, नास लेनेसे और मालिस करनेसे उन्मादरोग दूर होजाताहै। उग्रगंधयुक्त, दशवर्षका रक्खा हुआ, लाखके रंगकी समान ऐसे घीको पुरानाघी कहते हैं और इससे अधिक पुरानेको प्रपुराणघी कहतेहैं १४॥ १५॥ १६॥ १७॥ १८

हिंगुसौवर्चलंव्योषैर्द्विपलांशैर्घृताढकम्।
चतुर्गुणेगवांमूत्रेसिद्धमुन्मादनाशनम् ॥ १९ ॥
इति हिंग्वाद्यंघृतम्।

अर्थ-हींग, कालालोन, त्रिकुटा, यहप्रत्येक आठ आठ तोले लेवै, गोमूत्र ३२ बत्तीस सेर लेवै, इनमें आठसेर घृतको डालके सिद्ध करै, यह घृत उन्मादरोगनाशकहै ॥ १९ ॥

पंचमूल्यावकाश्मर्य्योरास्नैरण्डत्रिवृद्बला।
मूर्वाशतावरीचेतिक्काथैर्द्विपलिकैरिमैः॥ २०॥
कल्याणकस्यचाङ्गेनतद्घृतंचैतसंस्मृतम्।
सर्वचेतोविकाराणांशमनंपरमंमतम्॥ २१॥
(अकाश्मर्य्योगम्भारीमूलरहितदशमूलम्
एषांक्काथःकल्याणघृतस्यकल्कः)

इति स्वल्पचैतसंघृतम्।

अर्थ—कुम्भेररहितदशमूल, रास्ना, अण्ड, निसोथ, खिरैटी, मूर्वा और शतावर, प्रत्येकका आठ आठ तोले क्काथ लेवै, और कल्याणघृतमें कहीहुई औषधि ले कल्कबना क्काथमें मिलाके चित्तके विकारोंको दूर करदेवै॥ २०॥ २१॥

जटिलापूतनाकेशीचारटीमर्कटीवचा।
त्रायमाणाजयावीराचोरकंकटुरोहिणी॥ २२॥
कायस्थाशूकरीच्छत्रासातिच्छत्रापलंकषा।
महापुरुषदन्ताचवयस्थालांगलीद्वयम्॥ २३॥
कटम्भरावृश्चिकालीस्थिराचैवचतैर्घृतम्।
सिद्धंचातुर्थकोन्मादग्रहापस्मारनाशनम्॥ २४॥
महापैशाचिकंनामघृतमेतद्यथामृतम्।
मेधास्मृतिबुद्धिकरंबालानांचांगवर्द्धनम्॥ २५॥

(जटिलाजटामांसीपूतनाहरीतकीकेशीभूकेशः चारटीकुम्भाडुब्रह्मीरामकर्कटीशूकशिम्बीजयाजयन्तीवीराक्षीरकाकोलीपृश्निपर्णी वा चोरकश्चोरहेलीः कायस्थासिन्धुवारःशूकरीवाराहीकन्दः तदभावेचर्मकारत्वक्छत्रामधुरिकैवनतुजीरकंमिसीतिजत्रुकणात् अतिच्छत्राशतपुष्पापलङ्कषागुग्गुलुः महापुरुषदन्ताशतावरीवयस्था

ब्रह्मीगुडूचीवा लांगलीद्वयंरास्नाद्वयमेकातत्रगन्धरास्नात
दभावेभागद्वयम् । कटम्भराभद्राणिकाकटभीवावृश्चि-
कालीविछाती। स्थिराशालपर्णीघृतप्रस्थेकल्कार्थप्रत्ये-
कमेषांरक्तित्रयोपेतषण्माषाधिककर्षएकःकर्ष १ मा ६
रत्ती ३ जलंघृताच्चतुर्गुणम् । महापैशाचिकमितिमह-
च्छब्दःपूजावचनःस्वल्पस्याभावात् ॥)

इति महापैशाचिकंघृतम् ।

अर्थ-बालछड़, हरड, भूकेशी, ब्रह्मी, कौंछ, वच, खिरैटी, जयंती, क्षीरकाकोली, चोरपुष्पी, कुटकी, सम्हालू, वाराहीकन्द, सौंफ, सोया, गूगल, शतावर, गिलोय, रास्ना, गंधरास्ना, मालकांगनी, विछाटी, और शालपर्णी, यह प्रत्येक दो तोले ६ मासे ३ रत्तीभर लेवे, इन सबका कल्क बना उसमें २५६ दोसौछप्पन तोले जल और ६४ चौसठ तोले घृत विधिपूर्वक मिलाकै घृतको सिद्ध करै। यह घृत-चातुर्थिक ज्वर, उन्माद, ग्रहदोष और अपस्मारको दूर करैहै। तथा मेधा, स्मृति, बुद्धि और बालकोंके अंगको बढ़ानेवाला है ॥ २२ ॥ २३ ॥ २४ ॥२५॥

शिवायास्तुसुपुत्रायाःपलंपंचाशतन्तथा ।
पंचपंचसमादायपंचमूलयुगात्पृथक् ॥ २६ ॥
कुट्टयित्वाचतुष्षष्टिप्रस्थैरेवाम्भसांपृथक् ।
पक्त्वापादावशिष्टेनतेनक्काथोदकेनच ॥ २७ ॥
क्षीरस्याष्टभिराज्यस्यशरावाणाश्चतुष्टयम् ।
यष्टीमधुकमंजिष्ठाकुष्ठाचन्दनपद्मकैः ॥ २८ ॥
विभीतकशिवाधात्रीत्रिवृत्तगरपादिकैः ।
विडंगदाडिमंदेवदारुदन्तीहरेणुकैः ॥ २९ ॥
तालीशकेशरंश्यामाविशालाशालपर्णिभिः ।
प्रियंगुमालतीपुष्पकाकोलीयुगलोत्पलैः ॥ ३० ॥
हरिद्रायुगलानन्ताहरिवालुकवालकैः ।

पृश्निपर्णीसमैरेभिःकल्कैरक्षसमन्वितैः ॥ ३१ ॥
सिद्धमेतद्घृतंयच्चतन्मेनिगदतःशृणु ।
देवासुरग्रहैर्ग्रस्तेमानुषेराक्षसैःक्षते ॥ ३२ ॥
गंधर्वधर्षितेचैवपितृग्रहनिपीडिते ।
भूतैरप्यभिभूतेचपिशाचैश्चपरिप्लुते ॥ ३३ ॥
भुजंगमगृहीतेचतथाजांगलभक्षिते ।
ऋक्षैरपिपरिक्षितेभयैरप्यर्दितेभृशम् ॥ ३४ ॥
शस्यतेसर्ववातेचसर्वशूलेप्रशस्यते ।
शोषेवक्षःक्षतेकासेश्वासेमेदेमदात्यये ॥ ३५ ॥
मेहेमूत्रग्रहेचैवज्वरेचैतत्प्रशस्यते ।
वृष्यंबलकरंहृद्यंवन्ध्यानामपिपुत्रदम् ॥ ३६ ॥
श्रीविन्ध्यवासिपादेननिर्म्मितंघृतमुत्तमम् ।
शिवाघृतमिदंनाम्नाशिवायोन्मादिनांसदा ॥ ३७ ॥

(अथ शृगालीमांसंप्रशस्यते)

(पलपंचसंख्यायादशमूल ५० पलक्काथद्वयम्)

इति शिवाघृतम् ।

अर्थ-गायका घी चारसेर, दूध आठसेर, क्राथके लिये शृगालीका मांस ५० पल, जल ६४ चौसठ सेर, शेष १६ रक्खे। दशमूलकी सब औषधी ५० पल, जल ६४ चौसठसेर, शेष १६ सोलह सेर रहने देवै। कल्कके लिये मुलैठी, मजीठ, कूठ, चन्दन, पद्माख, हरड़, आमला, निसोत, तगर, वायविडंग, अनार, देवदारु, दन्ती, रेणुका, तालीशपत्र, नागकेशर, सारिवा, इन्द्रायन, शालिपर्णी, फूलप्रियंगू, मालतीकेफूल, काकोली, क्षीरकाकोली, कमल, नीलेकमल, हलदी, दारुहलदी, अनन्तमूल, एलुआ, सुगंधवाला, और पिठवन, यह प्रत्येक औषधि दो दो तोले लेवै। इस घृतको भलेप्रकारसे सिद्धकर सेवनकरनेसे देव, असुर, राक्षस, गंधर्व, पितर, पिशाच, नाग और यक्षादिका उन्माद दूर होता है। तथा सर्वप्रकारके वातरोग, सर्व प्रकारके शूल, शोष, वक्षःक्षत,

खाँसी, मेदरोग, मदात्यय, प्रमेह, मूत्रग्रह और ज्वर दूर होवै । और यह घी वीर्य तथा बलको बढ़ावै, हृदयको हितकारी, और वंध्या स्त्रियोंको पुत्र देवै है । यह शिवाघृत उन्मादरोगियोंको अत्यन्त हितकारी है ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

निंबपत्रवचाहिंगुसर्पनिर्म्मोकसर्षपैः ।
डाकिन्यादिहरोधूपोभूतोन्मादविनाशनः ॥ ३८ ॥
कार्पासास्थिमयूरपुच्छबृहतीनिर्म्माल्यपिंडीतकैः
दुग्धाशिवातथाहिविष्ठावचाकेशाहिनिर्मोककैः ।
गोशृंगद्विपदन्तहिंगुमरिचैस्तुल्यैस्तुधूपःकृतः
स्कन्दोन्मादपिशाचराक्षससुरावेशोज्वरघ्नःस्मृतः ३९॥

अर्थ—नीमकेपत्ते, वच, हींग, साँपकी कैंचली, और सरसों, इनकी धूप बनाकर देनेसै डाकिनी आदिग्रह और भूतोन्माद दूर होवै है । विनौले, मोरकी पूंछ, कटाई, निर्मलीफल, मैनफल, दुद्धी, हरड़, साँपकी विष्ठा, केश, वच, साँपकीकैचली, गायकेसींग, हाथीकेदाँत, और कालीमिरच, इन सबको समान भाग लेकर धूप बनाकर देनेसै—स्कन्दग्रह, उन्माद, पिशाचबाधा, राक्षसप्रवेश, देवताप्रवेश, और ज्वर दूर होता है ॥ ३८॥ ३९॥

सूतायस्तारताम्रश्चमुक्ताचैवसमंसमम् ।
सूतपादंतथावज्रंतालंगंधंमनःशिला ॥ ४० ॥
तुत्थंशिलाजनंसीसमब्धिफेनंरसाञ्जनम् ।
पंचानांलवणानांचप्रतिभागंरसोन्मितम् ॥ ४१ ॥
चित्रकंमूलकंचैववज्रीदुग्धेनमर्दयेत् ।
दिनान्तेगोलकंकृत्वारुद्धागजपुटेपचेत् ॥ ४२ ॥
भूतांकुशरसोनामततोगुंजाद्वयंलिहेत् ।
आर्द्रकस्यरसेनैवभूतोन्मादसमीराजित् ॥ ४३ ॥
पिप्पल्यार्कंविवेचानुदशमूलकषायकम् ।
स्वेदयेत्कटुतुम्बीनांरसेशीतश्चगोलयेत् ॥ ४४ ॥

माहिषञ्चघृतंक्षीरंभक्षयेच्चततःपरम्।
सघृतंक्कथितंक्षीरंशुष्कशाकंविवर्जयेत्॥ ४५॥
अभ्यंगंकटुतैलेनंगुर्वन्नंभोजनेहितम्॥ ४६॥

इति भूतांकुशरसः।

अर्थ–पारा एकतोला, लोहा एक तोला, चाँदी एक तोला, मोती एक तोला, हीरा ३ मासे, हरिताल तीनमासे, गंधक तीनमासे, मैनशिल तीनमासे, नीलाथोथा तीनमासे, सुरमा तीनमासे, सीसा तीन मासे, समुद्रफेन तीन मासे, रसौत तीनमासे, और पांचों नोन पारेके समान लेवे, इन सबको चीतेके रसमें, मूलीके रसमें और थूहरके दूधमें खरल करै, रात्रिमें गोला बनाकै गजपुटमें रखकर फूंक देवै तो भूतांकुशरस तयार होता है। इसको दो रत्तीभर अदरखके साथ खानेसै भूतोन्माद और वात दूर होती है। इसके ऊपर दशमूलके काढ़ेमें पीपलका चूर्ण डालकै पीवै, और कड़वी तोम्बीके द्वारा स्वेदन करै, सर्वप्रकारके शीतलपदार्थ त्याग देवै, भैंसकाघी और दूध सेवन करै। घृतयुक्त पकाया हुआ दूध और सूखेशाक त्याग देवै। और सदैव कड़वे तैलका मालिस एवं भारी अन्नोंका भोजन करै॥ ४०॥ ४१॥४२॥४३॥४४॥४५॥४६॥

हेमपादंमृतंसूतंनिष्कंखल्वेविमर्दयेत्।
शोभांजनंविषंतुल्यंमर्द्यश्चत्रिशूलीद्रवैः॥ ४७॥
देवदाल्याद्रवैश्चाह्नितद्गोलंपाचयेद्दिनम्।
गंधकोत्थेनतैलेनततउद्धृत्यचूर्णयेत्॥ ४८॥
मासैकंभक्षयेन्नित्यंपिबेद्ब्राह्मीघृतंह्यनु।
सर्वभूतग्रहंहन्तिरसोऽयंचण्डभैरवः॥ ४९॥

इति चण्डभैरवरसः।

अर्थ–सोनेकी भस्म एक भाग, पारेकी भस्म चौथाई भाग, सैंजिना, और विष, यह प्रत्येक एक एक भाग लेकर गोखुरूओंके रसमें और देवदालीके रसमें खरल करै, फिर गोला बना एक दिन पकावै, तदनन्तर गंधकके तेलमें मिलाकर एकमास पर्यन्त सेवनकरै तौ सर्वप्रकारके भूत-ग्रह दूर होवै। इसके ऊपर ब्राह्मीघृतका अनुपान करै॥४७॥४८॥४९॥

नारसिंहस्यमंत्रेणसकृदुच्चारितैर्हरेत् ।
डाकिनीग्रहभूतादितमःसूर्योदयेयथा ॥ ५० ॥
ओंनमोनरसिंहायहिरण्यकशिपोर्वक्षस्थलविदारणायत्रि-
भुवनव्यापकायभूतायप्रतिसारणायडाकिनीकुलोन्मूल-
नायसमस्तदोषान् हरहरविसरविसरबलबलकम्पकम्पम
थहुंहुंहुं फट्फट्चट्चट्एहिएहिरुद्राज्ञापयतिस्वाहा ॥
सर्षपानिम्बपत्राणिभूर्जपत्रंवचाघृतम् ।
धूपोवाजिनखैर्युक्तःसर्वग्रहनिवारणम् ॥ ५१ ॥
इतिनरसिंहमन्त्रः।
इत्युन्मादाऽध्यायः ।

अर्थ–ओं नमो नरसिंहाय–ज्ञापयति स्वाहा । इस मंत्रको एकवार पढ़ैतौ डाकिनी, ग्रह और भूतादिजनित उन्माद दूर होवै है। जैसे सूर्य्योदयसे अन्धकार दूर होवैहै ॥ ५० ॥ सरसों, नीमकेपत्ते, भोजपत्र, वच, घृत, और घोड़के नख, इनसबकी धूपबनाकर देनेसे सर्वप्रकारके ग्रह दूर होतेहैं ॥ ५१ ॥

इत्युन्मादाध्यायः ।

अथापस्मारचिकित्सामाह ।

चिकित्स्योह्यपस्मारीचाचिरकालीमहागदः ।
तस्माद्रसायनैरेनंप्रायशःसमुपाचरेत् ॥ १ ॥
वातिकंबस्तिभिःप्रायःपित्तंप्रायोविरेचनैः ।
श्लैष्मिकंवमनैःप्रायोह्यपस्मारमुपाचरेत् ॥ २ ॥
सर्वतःपरिशुद्धस्यसम्यगाश्वासितस्यच ।
अपस्मारविमोक्षार्थयोगान्त्संशमनाञ्छृणु ॥ ३ ॥
पिप्पलीवृश्चिकालीचकुष्ठञ्चलवणानिच ।
प्रदद्याच्चूर्णितंनस्यमेतत्प्रशमनंपरम् ॥ ४ ॥

भूतोन्मादोत्थितश्चात्रयोज्यंनस्याञ्जनादिकम्।
मनोह्वाताक्षंजश्चैवसकृत्पारावतस्यच ॥ ५ ॥
अञ्जनंहन्त्यपस्मारमुन्मादंचविशेषतः।
(तार्क्षंजंरसांजनम्)
यष्टीहिंगुवचावक्राशिरीषलशुनामयैः ॥ ६ ॥
अजाघृतैरपस्मारेसोन्मादेचांजनंहितम्।
(वक्रंतगरपादिका)
पुष्योद्धृतंशुनःपित्तमपस्मारघ्नमंजनम् ॥ ७ ॥
तदेवसर्पिषायुक्तंधूपनंपरमंमतम्।
नकुलोलूकमार्जारगृध्रकीटादिकाकजैः ॥ ८ ॥
तुण्डैःपक्षैःपुरीषैश्चधूपनंकारयेद्भिषक्।
(कीटोवृश्चिकः)
यःखादेत्क्षीरभक्ताशीमाक्षिकेणवरारजः ॥ ९ ॥
अपस्मारंमहाघोरंसचिरोत्थंजयेद्ध्रुवम्।
(वरात्रिफला)
कूष्माण्डकफलोत्थेनरसेनपरिशोधितम् ॥ १० ॥
अपस्मारविनाशाययष्टिमधुपिबेत्र्यहम्।
प्रयोज्यंतैलल्शुनंपयसाऽथशतावरी ॥ ११ ॥
ब्रह्मीरसश्चमधुनासर्वापस्मारनाशनम् ॥ १२

अर्थ-अपस्माररोग चिरकाली और महा रोगोंमें गिनाजाताहै, इस कारण रसायनप्रयोगसे इनकी चिकित्सा करनी चाहिये। विशेष करकै वातज अपस्माररोगकी बस्तिकर्मसे, पित्तज अस्मारकी विरेचनसे और कफज अस्माररोगकी वमनके द्वारा चिकित्सा करनी उचितहै। अब भलेप्रकारसे शुद्ध किये और भलेप्रकारसे आश्वासित किये अपस्माररोगको हरनेवाले प्रयोग कहे जाते हैं। पीपल, वृश्चिकाली, कूठ,

और पांचो नोन, इनसबको पीसकर नास देनेसे अपस्मार रोग दूर होताहै । भूतोन्मादमें कहेहुए नस्य और अंजन, इसरोगमें प्रयोग करने चाहिये । मैनशिल, रसोत और परेवाकी विष्ठाका अंजन बनाकर नेत्रोंमें लगानेसै अपस्मार और उन्मादरोग नाश होताहै। मुलैठी, हींग, वच, तगर, सिरसके बीज और कूठ, इनको पीसकर बकरीके घीमें मिला नेत्रोंमें लगानेसे-अपस्मार और उन्मादरोग दूर होताहै । पुष्यनक्षत्रमें कुत्तेके पित्तको लेकर आखोंमें आँजनेसै तथा घृत मिलाके धूपदेनेसै उन्मादरोग आराम होताहै । नकुल, उलूक, बिलाव, गीध, विच्छू, साँप और गाककी चोंच अथवा मुख, पक्ष, और विष्ठा, इनकी धूपदैनेसै-अपस्माररोग दूर होताहै । त्रिफलेके चूर्णको सहतमें मिलाकरखावै और दूधके साथ भोजन करै तौ महाघोर और बहुत पुराना अपस्मार दूर होजावै । पेठके रसमें शुद्ध कीहुई मुलैठीके चूरनको मिलाकर खानेसै तीनदिनमें अपस्मार रोग आराम होजाताहै । लहसुनको तेलमें मिलाकर खावै, या शतावरको दूधमें मिलाकर सेवन करै अथवा ब्रह्मीके रसको सहत मिलाकर चाटै तौ सर्वप्रकारके अपस्मार रोगदूर होजावै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥५॥६॥७॥८॥९॥१०॥११॥१२ ॥

गोशकृद्रसदध्यम्लक्षीरमूत्रैःसमैर्घृतम् ।
सिद्धंचातुर्थिकोन्मादसर्वापस्मारनाशनम् ॥ १३ ॥

इति स्वल्पपंचगव्यघृतम् ।

अर्थ-गोवरका रस, खट्टादही, दूध, गोमूत्र, और घी, इन सबको समान भाग लेकर घृतको सिद्ध करै, इस घृतको सेवनकरनेसे चातुर्थिक ज्वर, उन्माद और सर्वप्रकारके अपस्माररोग दूर होते हैं ॥ १३ ॥

द्वेपंचमूल्यौत्रिफलारजन्यौकुटजत्वचः ।
सप्तपर्णमपामार्गनीलिनीकटुरोहिणी ॥ १४ ॥
शम्याकफल्गुमूलश्चपौष्करंसदुरालभम् ।
द्विपलांशंजलद्रोणेपक्त्वापादावशेषितम् ॥ १५ ॥
भार्गीपाठात्रिकटुकत्रिवृतानिचूर्णानिच ।
श्रेयसीमागधीमूर्वादन्तीभूनिम्बचित्रकौ ॥ १६ ॥

द्वेशारिवेरोहिषश्चभूतिकोमदयन्तिकाम्।
क्षिपेत्पिष्ट्वाक्षमानानितैःप्रस्थंसर्पिषःपचेत्॥ १७॥
गोशकृद्रसदध्यम्लक्षीरमूत्रैश्चतत्समैः।
पंचगव्यमितिख्यातंमहत्तदमृतोपमम्॥ १८॥
अपस्मारेज्वरेकासेश्वयथावुदरेषुच।
गुल्मार्शःपाण्डुरोगेषुकामलायांहलीमके॥ १९॥
अलक्ष्मीग्रहरक्षोघ्नंचातुर्थिकनिवारणम्॥ २०॥
श्रेयसीगजपिप्पलीरोहिषंगंधतृणभेदः।
भूतिकंगंधतृणंरोहिषाभावेभागद्वयंग्राह्यम्॥ २१॥

इतिबृहत् पंचगव्यघृतम्।

अर्थ–गायकाघी चारसेर, गोमूत्र चारसेर, गायका दूध चारसेर, गोवरकारस ४ चारसेर, गायका दही चारसेरलेवै, दशमूल, त्रिफला, हलदी, दारुहलदी, कुडेकीछाल, सतवनकी छाल, चिरचिटा, नील, कुटकी, अमलतास, कठूमर, पोहकरमूल और जवासा, यह प्रत्येक दोदो पल लेकर सबका कल्कबना चौसठसेर जलमें पकावै, शेष १६ सोलहसेर जल रहनेदेवै और कल्कके लिये भारंगी, पाढ, त्रिकुटा, निसोत, गजपीपल, पीपल, चुरनहार, दन्ती, चिरायता, चीता, अनंतमूल, गौरीसर, रोहिषतृण, गंधतृण और मैनफल यह प्रत्येक वस्तु दो दो तोले लेवै, पश्चात् विधिपूर्वक घृत सिद्धकरै, इसको पंचगव्यघृत कहतेहैं। यह पंचगव्यघृत–अपस्मार, ज्वर, खाँसी सूजन, उदररोग, गुल्म,, बवासीर पाण्डुरोग, कामला, हलीमक, अलक्ष्मी, ग्रहदोष, राक्षसबाधा और चातुर्थिक ज्वरको दूर करैहै॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥ २०॥ २१॥

शणस्त्रिवृत्तथैरण्डोदशमूलीशतावरी।
रास्नामागधिकाशिग्रुक्काथ्यंद्विपलिकंभवेत्॥ २२॥
विदारीमधुकंमेदेद्वेकाकोल्यौशिवातथा।
एभिःखर्जूरमृद्वीकाभीरुयुञ्जातगोक्षुरैः॥ २३॥
चैतसस्यघृतस्यापिपक्तव्यंसर्पिरुत्तमम्।

महाचैतससंज्ञन्तुसर्वापस्मारनाशनम् ॥ २४ ॥
गरोन्मादप्रतिश्यायतृतीयकचतुर्थकान् ।
पापालक्ष्मीर्जयेदेतत्सर्वग्रहनिवारणम् ॥ २५ ॥
श्वासकासहरंचैवशुक्रार्त्तवविशोधनम् ।
(नित्यंयुञ्जातकाभावेतालमस्तकमिष्यते ॥ २६ ॥
शणादिशिग्रुपर्यन्तंक्वाथःघृतमानंक्वाथविधिः
विदार्य्यादिभिः)
(कल्याणकस्याष्टाविंशतिभिःसहकल्कः)
शणस्यबीजम् ।

इति महाचैतसंघृतम् ।

अर्थ–गायकाघी चारसेर, सनके बीज, निसोत, अंड, दशमूल, सतावर, रायसन और सैंजिना, यह प्रत्येक दो दो पल लेकर १६ सोलह सेर जलमें पकावै, शेष चारसेर जल रहने देवै, और कल्कके लिये विदारीकन्द, मुलैठी, मेदा महामेदा, काकोली, क्षीरकाकोली, हरड, खजूर, दाख, सतावर, ताडका मस्तक, गोखुरू, और चैतसघृतमें कही हुई सर्व औषधियोंका कल्क एक सेर लेवै, पश्चात् घृतको सिद्ध करै । इसको महाचैतसघृत कहतेहैं । यह घृत–सर्वप्रकारके मृगीरोग, विषविकार, उन्माद, प्रतिश्याय, तृतीयकज्वर, चातुर्थिक ज्वर, पाप, अलक्ष्मी, सर्व प्रकारके ग्रह, श्वास, और खांसीको दूर करैहैं । तथा शुक्र और आर्त्तवको शुद्ध करैहै ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

ब्रह्मीयासवचाकुष्ठशंखपुष्पीभिरेवच ।
पुराणंमेध्यमुन्मादग्रहापस्मारनाशनम् ॥ २७ ॥
(ब्रह्मीरसश्चतुर्गुणः पुराणंघृतमत्रयोज्यम्)

इति ब्रह्मीघृतम् ।

अर्थ–पुराना घी चारसेर, ब्रह्मीका रस सोलह सेर, और कल्कके लिये ब्रह्मी, जवासा, कूठ, और शंखपुष्पी, यह समान भागले, सब तोलमें सेरभर लेवै, फिर घृतको सिद्धकर सेवनकरनेसे–उन्माद, ग्रहदोष और अपस्माररोग दूर होताहै ॥ २७ ॥

पार्वतीकाशीशसूतंदरदोमधुपुष्पकम्।
गुडूचीशाल्मलीधान्यभूनिम्बामरतुम्बुरुम्॥ २८॥
तिलमुद्गपटोलानांद्राक्षाकूष्माण्डभस्मानि।
वटिकाकन्यकाभस्मबलाद्वयानियोजितम्॥ २९॥
सर्वमेतत्समाहृत्यगव्याज्येगुटिकाशुभा।
उन्मादपवनच्छर्दिमपस्मारंविशेषतः॥ ३०॥
कासंश्वासंक्षयंहिक्कांदुर्नामश्चप्रमेहकम्।
पित्तज्वरारुचिश्चैवतिमिरंचक्षुरामयम्॥ ३१॥
गलरोगेषुसर्वेषुकर्णस्तब्धंहरेद्ध्रुवम्॥ ३२॥

इतिप्रचण्डभैरवरसः।

अर्थ-गंधक, कसीस, पारा, सिंग्रफ, महुएके फूल, गिलोय, सेमल, धनिया, चिरायता, देवदारु, तुम्बुरु, तिल, मूग, परवल, दाख, पेठेकी भस्म, घीकुवारकी भस्म, खिरैटी और गँगेरन, इन सबका चूर्ण बनाकर गायके घीमें मिलाकै गोली बना लेवै। इनको सेवन करनेसे उन्माद, वात, वमन,अपस्मार, खाँसी, श्वाँस, क्षय, हिचकी,बवासीर, प्रमेह, पित्तज्वर अरुचि, तिमिररोग, नेत्ररोग, सर्वप्रकारके गलरोग और कर्णस्तब्धरोगको दूर करैहै॥२८॥२९॥३०॥३१॥३२॥

मृतसूतार्कलोहश्चतालंगंधमनःशिला।
स्रोतोऽञ्जनंचतुल्यांशंनरमूत्रेणमर्दयेत्॥ ३३॥
तद्गोलंद्विगुणंगंधंलोहपात्रेक्षणंपचेत्।
पंचगुंजामितंखादेदपस्मारहरंघृतैः॥ ३४॥
हिंगुसौवर्चलंत्र्यूषंनरमूत्रेणसर्पिषा।
कर्षमात्रंपिबेच्चानुरसोऽयंभूतभैरवः॥ ३५॥

इति भूतभैरवः।

अर्थ-पारेकी भस्म, तांबा, लोहा, हरिताल, गन्धक, मैनशिल, और सुरमा, यह सब समान भाग लेकर मनुष्यके मूत्रमें खरलकर गोला

बनाले, फिर इस गोलेमें दुगुना गंधक मिलाकर लोहेके पात्रमें क्षणभर पकावै । इसको५पांच रत्ती भर सेवन करै, ऊपरसे हींग, कालानोंन और त्रिकुटेका चूर्ण मनुष्यके मूत्रमें मिलाकर घीके साथ अनुपान करै । यह भूतभैरवरस-सर्वप्रकारके अपस्माररोगोंको दूर करैहै॥३३॥३४॥३५॥

मृतंसूताभ्रंसतीक्ष्णंतारताप्यविषंसमम् ।
पद्मकेसरसंयुक्तंदिनैकंमर्दयेद्द्रवैः ॥ ३६ ॥
स्नुग्वह्निविजयैरण्डवचानिष्पावसूरणैः ।
निर्गुण्ड्याश्वद्रवैर्मर्द्यतद्गोलंपाचयेत्पुनः ॥ ३७ ॥
कर्णिकासर्षपोत्थेनतैलेनगंधसंयुतम् ।
ततःपक्त्वासमुद्धृत्यचणमात्रावटीकृता ॥ ३८ ॥
इन्द्रब्रह्मवटीनामभक्षयेदार्द्रकद्रवैः ।
दशमूलकषायञ्चकणायुक्तंपिबेदनु ॥ ३९
अपस्मारंनिहन्त्याशुयथासूर्योदयेतमः ॥ ४० ॥

इति इन्द्रब्रह्मवटी ।

अर्थ-पारेकी भस्म, अभ्रककीभस्म, लोहा, चाँदी, सोनामाखी, और विष, यह सब समानभागले, कमलकी केशर मिला थूहर, चीता, भांग, अण्ड, वच, निष्पाव, जिमीकन्द, और निर्गुण्डीके रसमें खरल कर गोला बना लेवै, फिर इसगोलेको पकावै, पकती समय मूषाकर्णी, सरसोंका तेल, और गंधक मिला देवै । जब पकजावै तब निकालकर चनेकी समान वटी बना लेवै । इस इन्द्रब्रह्मवटीको अदरखके रसके साथ भक्षण करै । ऊपरसै दशमूलके काढेमें पीपलका चूरन डालकर पीवै । जैसे सूर्योदयसे अंधकार दूर होता है तैसेही इसके सेवनकरनेसे अपस्माररोग दूर होताहै ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९॥४०॥

मानुषास्थिवसाहिंगुलशुनंसर्पकंचुकम् ।
गोधूमंसर्पिषापिष्टाधूपोऽपस्मारनाशनः ॥ ४१ ॥

इति अपस्माराध्यायः ।

अर्थ-मनुष्यकी हड्डी, चर्बी, हींग, लसुन, सांपकी केंचला और गेहूं घीके साथ पीसकर धूपदेनेसै अपस्माररोग दूर होताहै ॥ ४१ ॥

इतिअपस्माराध्यायः समाप्तः।

अथ वातव्याधिचिकित्सामाह।

स्वाद्वम्ललवणस्निग्धैराहारैर्वातरोगिणः।
अभ्यंगस्नेहबस्त्याद्यैःसर्वानेवोपपादयेत् ॥ १ ॥
सर्पिस्तैलवसामज्जपानाभ्यंजनबस्तयः।
स्वेदःस्निग्धोनिवातश्चस्थानंप्रावरणानिच ॥ २ ॥
बृंहणंयच्चतत्सर्वंप्रशस्तंवातरोगिणाम्।
निरामंकेवलंवातमादौस्नेहैरुपाचरेत् ॥ ३ ॥
यूषैर्ग्राम्यांबुजानूपैरसैर्वास्नेहसंस्कृतैः।
कृशरापायसश्चान्नैःसुस्विन्नंस्वेदयेत्ततः ॥ ४ ॥
अभ्यक्तंस्नेहसंयुक्तैःस्वेदनैःशाल्वनादिभिः।
स्नेहाक्तंस्विन्नमङ्गन्तुवक्रंसर्वमथापिवा ॥ ५ ॥
यथेष्टमानमशितुंशक्यतेशुष्कदारुवत्।
स्विन्नस्याशुप्रशाम्यन्तिरुक्स्तम्भःसुग्रहादयः ॥ ६ ॥
स्नेहोमुष्णातिसंशुष्कान्धातून्पुष्टिबलप्रदः।
अतःपुनःपुनःस्नेहैःस्वेदैश्चाप्युपपादयेत् ॥ ७ ॥
अतोपशान्तौमृदुभिःसस्नेहैस्तंविरेचयेत्।
पयसैरण्डतैलंवापाययेद्दोषशोधनम् ॥ ८ ॥
पटोलफलकयूषोवृष्योवातहरोलघु।
वत्यालककृतोयूषःपरंवातविकारनुत् ॥ ९ ॥
उभयत्रैवयूषार्थंमुद्गान्वाकुलत्थान्क्षिपेत् ॥ १० ॥
वात्यालकयूषस्तुमाषकलायाढ्यःप्राय:

प्रचरतिघृतेपरिभज्यसैंधवमनुरूपं
देयमेवमन्यत्रापियूषरसादौ ।
बलायाःपंचमूलस्यदशमूलस्यवारसे ।
अजाशीर्षाम्बुजानूपक्रव्यादपिशितैःपृथक् ॥ ११ ॥
साधयित्वारसान्स्निग्धान्दध्यम्लस्नेहसंस्कृतान् ।
भोजयेद्वातरोगार्त्तंतैलाक्तलवणैर्युतान् ॥ १२ ॥
अम्बुजाःकूर्मादयः । अनूपावराहादयः ।
क्रव्यादादीनांव्याघ्रश्येनगृध्रादीनाम् ।
पंचमूलीबलासिद्धंक्षीरंवातामयेहितम् ॥ १३ ॥
कोलंकुलत्थःसुरदारुरास्नामाषातसीतैलफलानिकुष्ठम् ।
वचाशताह्वायवचूर्णमम्लमुष्णानिवातामयिनांप्रदेहः १४
तैलफलानिसर्षपादीनिअम्लंकांजिकंपेषणार्थम् ।
अनुपवेशवारोष्णप्रदेहोवातनाशनः ॥ १५ ॥
निरस्थिपिशितंपिष्टंस्विन्नंघृतगुडान्वितम् ।
कृष्णामरिचसंयुक्तंवेशवारइतिस्मृतः ॥ १६ ॥

अर्थ–स्वादिष्ट, खट्टे, निमकीन और स्निग्धभोजनकरनेसे, तैलादिका मालिस करनेसे, और स्नेह बस्तिकर्म करानेसे वातरोग शान्त होता है। घृत, तैल, वसा, और मज्जाकापान, अभ्यंजन, बस्तिप्रयोग, स्निग्ध, स्वेद, निर्वातस्थान, प्रावरण (कनात तम्बू) और जितने पुष्टिकारक द्रव्यहैं, सब वातरोगमें हितकारीहैं। केवल निरामवात (आमरहित वात) रोगमें प्रथम स्नेहके द्वारा चिकित्सा करै, तथा ग्राम्य, जलज और अनूपदेशके जीवोंके मांसका यूष बनाकर पीवै, तथा घृतादिकसे मांसको सिद्धकर सेवन करै, और कृशरा (खिचडी)पायस (खीर) और लाल चावलोंके भातके द्वारा तथा स्नेहसंयुक्तमनुष्यको शाल्वनादि स्वेदके द्वारा वारंवार स्वेददेवै, इससे रोगी यथेष्ट भोजन करसक्ताहै, तथा स्तम्भ और पीडा दूर होतीहै। स्नेह और स्वेद यहदोनों सूखीहुई धातुओंको पोषणकर बल और पुष्टिको देवैंहै। इसकारण

वातादि रोगोंमें वारंवार तैलादिको मलकर स्वेदप्रदान करै। और जो इससे वातरोग शान्त न होय तौ स्नेहादिका जुल्लाब देकर वातरोगको शान्त करै। अंडीके तेलको दूधके साथ पीनेसे दस्त होकर कोठा शुद्ध हो जाता है। परवलके फलोंका यूष बनाकर सेवन करनेसे वीर्यकी वृद्धि होतीहै, और वातविकार विनाश होताहै। और यह यूष हलकाहै, वा खिरैंटीका यूष बनाकर पीनेसे वातविकार दूर होताहै, उपरोक्त दोनों यूषोंमें मूंग और कुलथी डालै, प्रायः खिरैंटीके यूषमें उडद और मटर डालते हैं, और यूषादिको घृतमें भून कुछेक सैंधानोंन मिलाकर पीना चाहिये। बकरीके मस्तकका मांस, कच्छपादि जीवोंका मांस, वराहादि पशुओंका मांस, व्याघ्रादि पशुओंका मांस, तथा गृध्रादि पक्षियोंके मांसका यूष, तेल, लवण और खट्टे दहीके साथ पकाकर पीनेसे वातरोग शान्त होताहै। दूधमें पंचमूल और खिरैंटीको पकाकर पीनेसे वातरोग शमन होताहै। बेर, कुलथी, देवदारु, रास्ना, उडद, अलसी, सरसों, कूठ, वच, सौंफ और जौका चून इन सबको कांजीमें पीसकर लेपकरनेसे वातरोग शान्त होताहै। शूकरादिके अस्थिहीन मांसको पीसै, फिर तिसमें घृत, गुड, पीपलका चूर्ण और कालीमिरचोंका चूर्ण मिला वेशवार बना गरम करकै लेपकरनेसे वातरोग शान्त होताहै ॥ १ ॥ २॥३॥४॥५॥६॥७॥८॥९॥१०॥ ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

वातरोगाश्मरीकुष्ठमहोदरभगन्दराः।
अर्शांसिग्रहणीदुष्टामहारोगाःप्रकीर्त्तिताः ॥ १७ ॥
आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षो-
भकम्पप्रतोदाःकण्ठोद्ध्वंसारमादोभ्रमक-
विलपनस्रंसशूलप्रभेदाः ॥ पारुष्यंक-
र्णनादःकेशपरिणतिभ्रंशदृष्टिप्रमोहा-
विस्पन्दोद्घट्टनानिप्लवनमशयनंताडनंपीडनञ्च ॥१८॥
नामोन्नामौविषादोभ्रमपरिसदनंजृम्भणं
रोमहर्षौ विक्षेपाक्षेपशोषग्रहणिशुषि
रताछेदनंवेष्टनंच ॥ वर्णःश्यामोऽरुणोवा

तृडपिचमहतीस्वापविश्लेषसङ्गा
विद्यात्कर्माण्यमूनिप्रकुपितमरुतःस्यात्कषायोरसश्च १९
कटिविकटियकृत्क्रोमपार्श्वांघ्रिपृष्ठे
जठरवृषणवक्षःकुक्षिस्कन्धांसकेषु ।
प्रसरतिगुरुशूलंरात्रिनिद्राविपर्य्य-
स्त्ववातिपवनविकारालक्षणैर्लक्षणीयाः ॥ २० ॥

अर्थ-वातरोग, पथरी, कोढ़, उदर, भगन्दर, बवासीर और संग्रहणी यह सब महारोग कहे जाते है। वातके कुपितहोनेसे आध्मान, स्तम्भ, रौक्ष्य, स्फुटन, विमथन, क्षोभ, कम्प, प्रतोद, कंठके ऊर्ध्वभागमें श्रम, विलाप, स्रंसन, शूल, पारुष्य, कर्णनाद, केशपकता, भ्रंशदृष्टि, मोह, स्पन्दन, उद्वट्टन, ग्लानि, अनिद्रा, ताडन, पीडन, और विक्षेपादि विकारोंकी उत्पत्ति होती है ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

चित्रकेन्द्रयवापाठाकटुकातिविषाभयाः ।
महाव्याधिप्रशमनोयोगःषड्धरणःस्मृतः ॥ २१ ॥
हरीतकीवचारास्नासैन्धवंसाम्लवेतसम् ।
घृतमात्रासमायुक्तमपतंत्रकनाशनम् ॥ २२ ॥

अर्थ-चीता, इन्द्रजौ, पाढ, कुटकी, अतीस, और हरड, इन सब को एकत्रकर सेवनकरै तौ सर्वप्रकारकी वातव्याधि दूर होतीहै। इसको षड्धरण योग कहतेहैं। हरड, वच, रायसन, सैंधानोंन, और अमलवेंत, इन सबको पीस घीके साथ सेवनकरनेसे अपतंत्रक वातरोग शान्त होताहै ॥ २१ ॥ २२ ॥

बिभीतकविषामुस्तंशुण्ठींभार्ङ्गींचपिप्पलीम् ।
कृत्वाचूर्णानिमद्येनपीतान्युष्णोदकेनवा ॥ २३ ॥
नाशयन्तिनृणांक्षिप्रंहिक्काश्वासापतंत्रकम् ॥ २४ ॥

इति बिभीतकादिचूर्णम् ।

अर्थ-बहेड़ा, अतीस, नागरमोथा, सोंठ, भारंगी और पीपल, इनका

चूर्ण बनाकर मदिरा अथवा गरमजलके साथ सेवनकरनेसे-हिक्का, श्वास और अपतन्त्रकवातरोग विनष्ट होताहै ॥ २३ ॥ २४ ॥

तैलद्रोण्यान्तुशमनंधनुस्तम्भेपरंहितम्।
पत्रोत्थाम्बुपरस्तैलद्रोण्यःस्युरवगाहने ॥ २५ ॥
पत्रोत्थाम्बुप्रसारण्यश्वगन्धादीनांपत्ररसः।
पक्षाघातिनमक्षीणंस्निग्धस्विन्नंविरेचनम् ॥ २६ ॥
बस्तिभिर्योजयेत्पित्तकफोद्रेकेविरेचयेत्।
माषात्मगुप्तैरण्डवाट्यालकश्टृतंजलम् ॥ २७ ॥
हिंगुसैन्धवसंयुक्तंपक्षाघातनिवारणम् ॥ २८ ॥

अर्थ-पसरन और असगन्ध आदिके पत्तोंका रस, दूध और तैलसे भरीहुई द्रोणीमें डूबनेसे धनुस्तंभरोग शान्त होताहै। अक्षीण, स्निग्ध, स्विन्न, पक्षाघात रोगीकै पित्तकफकी अधिकता होय तो बस्ति द्वारा विरेचन देवै। उड़द, कौंछ, अण्ड और खिरैंटीका क्वाथ बना तिसमें, हींग और सैंधानोनका चूरन डालके पीनेसे पक्षाघातरोग दूर होताहै ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

माषबलाशूकशिम्बीकत्तृणरास्नाश्वगन्धोरुबूकाणाम्।
क्वाथोनश्यतिपीतोवासत्रंलवणान्वितःकोष्णः ॥ २९ ॥
अपहरतिपक्षवातंमन्यास्तम्भंसकलकर्णनादरुजाम् ॥
दुर्जयमर्दितवातंसप्ताहाज्जयतिचावश्यम् ॥ ३० ॥

इति माषबलादिः।

अर्थ-उड़द, खिरैटी, कौंछ, गंधतृण, रास्ना, असगन्ध और अंड, इनका क्वाथ बना हींग और सैन्धानोन मिला, नासिकाके द्वारा पान करनेसे पक्षाघात, मन्यास्तम्भ, खाँसी, कर्णनाद और दुर्जय अर्दित वातरोग सात दिनमें दूर होताहै ॥ २९ ॥ ३० ॥

रास्नायास्तुपलंचैकंकर्षान्पंचचगुग्गुलोः।
सर्पिषावटिकांकृत्वाखादेद्धन्तिचगृध्रसीम् ॥ ३१ ॥

इति रास्नागुग्गुलुः।

अर्थ-चार तोले रास्ना और पांचतोले गूगल, इन दोनोंको घीमें मिलाकर गोली बना खानेसे-गृध्रसी वातरोग दूर होताहै ॥ ३१ ॥

दशमूलीकषायेणपिबेद्वानागराम्भसा ।
कटीशूलेषुसर्वेषुतैलमेरण्डसंभवम् ॥ ३२ ॥
दशमूलस्यनिर्यूहोहिंगुपुष्करसंयुतः ।
शमयेत्परिपीतस्तुवातंझिंझिनिसंज्ञितम् ॥ ३३ ॥

अर्थ-अंडीके तेलको दशमूलके क्वाथके साथ अथवा सोंठके क्वाथके साथ पीनेसे कटीशूल दूर होताहै। दशमूलके काढ़ेमें हींग और पोहकर मूलका चूरन डालकर पीनेसे-झिनझिन वात शमन होतीहै ॥३२॥३३॥

पलमर्द्धपलंवापिरसोनस्यसुकुट्टितम् ।
हिंगुजीरकसिन्धूथैःसौवर्चलकटुत्रयैः ॥ ३४ ॥
चूर्णितैर्माषिकोन्मानैरवचूर्ण्यविलोडितम् ।
यथाग्निभक्षितंप्रातारुबुक्काथानुपानतः ॥ ३५ ॥
दिनेदिनेप्रयोक्तव्यंमासमेकंनिरन्तरम् ।
वातरोगान्निहन्त्याशुचार्दितंसापतानकम् ॥ ३६ ॥
एकाङ्गरोगिणेचैवतथासर्वाङ्गरोगिणे ।
ऊरुस्तम्भेचगृध्रस्यांकृमिदोषेविशेषतः ॥ ३७ ॥
कटिपृष्ठामयंहन्यादुदरञ्चविशेषतः ॥ ३८ ॥
(वाशब्देनसार्द्धपलमित्यर्थः ।)

इति स्वल्परसोनपिण्डः ।

अर्थ-कुटाहुआ लसुन चार या दो तोले, हींग, जीरा, सैंधानोन, कालानोन, और त्रिकुटा, इन प्रत्येकका चूर्ण एकएक मासा लेवै, सबको अच्छेप्रकार मिला अग्निका बलाबल विचारकर सेवन करै, और ऊपरसे अण्डका काढ़ा पीवै, इसप्रकार प्रतिदिन पीवै तो एक महीनेमें--वात रोग, अर्दितवात, अपतानक, एकांगवात, सर्वांगवात, ऊरुस्तम्भ, गृध्रसीवात, कृमिरोग, कटिरोग, और पृष्ठरोग, दूर होताहै ॥ ३४ ॥ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

आहाश्वगन्धाहवुषागुडूचीशतावरीगोक्षुरवृद्धदारकम् ।
रास्नाशताहासशठीयवानीसनागराश्चेतिसमैश्चचूर्णम् ॥३९॥
तुल्यंभवेत्कौशिकमत्रमध्येदेयंतथासर्पिरथार्द्धभागम् ।
अर्द्धाक्षमात्रंत्वथतत्प्रयोगात्कृतानुपानंसुरयाथयूषैः॥४०॥
मद्येनवाकोष्णजलेनवाथक्षीरेणवामांसरसेनवापि ।
कटिग्रहेगृध्रसिबाहुपृष्ठेहनुग्रहेजानुनिपादयुग्मे ॥ ४१ ॥
सन्धिस्थितेचास्थिगतेचवातेमज्जास्थितेस्नायुगतेचकुष्ठे ।
रोगाञ्जयेदान्त्रकफानुविद्धान्वातोरितान्हृद्ग्रहयोनिदोषान्॥
भग्नास्थिविद्धेषुचखंजवातेत्रयोदशांगंप्रवदन्तिधीराः॥४३॥

इति त्रयोदशांगगुग्गुलुः ।

अर्थ-आहा (एकप्रकारका वणिकद्रव्य) असगन्ध, हाऊवेर, गिलोय, सतावर, विधारा, सौंफ, कचूर, अजवायन, और सोंठ, यह सब समान भाग, गुगल सबकी बराबर और सबसे आधा भाग घी मिलावै, पश्चात् इसका एक तोलाभर सुरा, यूष, मदिरा, किंचित् गरमजल, गरम दूध और मांसरस, इनमेंसे किसी एक अनुपानके साथ सेवन करनेसे कटिग्रह, गृध्रसी, बाहुग्रह, पृष्ठग्रह, जानुग्रह, सन्धिवात, अस्थिवात, मज्जाश्रितवात, स्नायुगतवात, कुष्ठ, कफरोग, वातविकार, हृद्ग्रह, योनिदोष, अस्थिभग्न, विद्ध, और खंजवात दूर होतीहै। इसको त्रयोदशांगगूगल कहतेहैं ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

आजंचर्मविनिर्मुक्तंत्यक्तशृंगखुरादिकम् ।
पंचमूलीद्वयञ्चैवजलद्रोणेविपाचयेत् ॥ ४४ ॥
तेनपादावशेषेणघृतंप्रस्थंविपाचयेत् ।
जीवनीयैःसयष्ट्याह्वैःक्षीरंचैवशतावरीम् ॥ ४५ ॥
छागलाद्यमिदंनाम्नासर्ववातविकारनुत् ।
अर्दितेकर्णशूलेचबाधिर्य्येमूकमिन्मिने ॥ ४६ ॥
जडगद्गदपंगूनांखञ्जेगृध्रसिकुब्जयोः ।

अपतानेऽपतन्त्रेचसर्पिरेतत्प्रशस्यते ॥ ४७ ॥

इति छागलाद्यंघृतम् ।

अर्थ—चर्म, शींग और खुर आदिसे हीन बकरीके ५० पंचास पल मांसको ३२ सेर जलमें पकावै जब आठसेर शेष रहै तब उतारले फिर पंचास पल दशमूलको ३२ बत्तीस सेर जलमें पकावै, जब चौथा भाग अर्थात् आठसेर जल बाकी रहै तब उतारले, और दूध चारसेर, सतावरका रस ४ चार सेर, गायका घी चारसेर, तथा कल्कके लिये जीवनीयदशक और मुलैठी, यह सब ६ सेर लेवै, पश्चात् विधिपूर्वक घृतको बनावै । इस घृतको सेवनकरनेसे— सर्वप्रकारके वातरोग, अर्दितवात, कर्णशूल, बधिरता, गूंगापन, मिनमिन वात, जड़ता, गद्गदवात, पंगला वात, खंजवात, गृध्रसीवात, कुब्जक वात, अपतानक वात और अपतंत्र वातरोग दूर होताहै, इसको छागलाद्यघृत कहतेहैं ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

बलामूलकषायस्यदशमूलीकृतस्यच ।
यवकोलकुलत्थानांक्काथस्यपयसस्तथा ॥ ४८ ॥
अष्टावष्टौशुभाभागास्तैलादेकस्तदेकतः ।
कल्कीकृत्यपचेद्धीमान्काकोल्यादिससैन्धवम् ॥ ४९ ॥
तथागुरुसर्जरसंसरलंदेवदारुच ।
मंजिष्ठाचन्दनंकुष्ठमेलातगरपादिकम् ॥ ५० ॥
मांसीशैलेयकंपत्रंतगरंशारिवांवचाम् ।
शतावरीमश्वगंधांशतपुष्पांपुनर्नवाम् ॥ ५१ ॥
तत्सिद्धंस्थापयेत्कुम्भेसुवर्णादौसुरक्षिते ।
राजार्हणमिदंतैलंसर्ववाताविकारनुत् ॥ ५२ ॥
सूतिकारोगशमनंगर्भदंशुक्रवर्द्धनम् ।
गुल्माग्निमन्दहिक्कार्त्तिश्वासकासान्त्रवृद्धिनुत् ॥ ५३ ॥
भग्नेमर्मगतेग्रन्थेसर्वथैवोपयोजयेत् ।

प्रत्यग्वधात्तः पुरुषोभवेच्चस्थिरयौवनः ॥ ५४ ॥
(यवकोलकुलत्थानांक्काथः)
(बलादीनांतैलाष्टभागापेक्षयाद्वात्रिंशद्गुणोद्रवः)
(बलाक्काथोऽष्टगुणः । दशमूलक्काथोऽष्टगुणः ।
यवादीनांक्काथोऽष्टगुणः । दुग्धमष्टगुणम् ।
काकोल्याद्यष्टवर्गः ।)

इति बृहद्बलातैलम् ।

अर्थ–तिलका तेल आठसेर, खिरैंटीका क्काथ आठसेर, दशमूलका क्काथ आठसेर, जो, बेर और कुलथीका क्काथ आठसेर. दूध आठसेर, और कल्कके लिये काकोल्यादि द्रव्य, सैंधानोन, अगर, राल, धूप सरलदवदारु, मजीठ, लालचन्दन, कूठ, इलायची, बालछड़, तगर, भूरि, छरीला, तेजपात, तगरपुष्प, अनन्तमूल, वच, सतावर, असगंध, सोंफ और पुनर्नवा, यह प्रत्येक समान भाग और सब दोसेर लेवै, सबको मिला अच्छेप्रकारसे सिद्ध कर सुवर्णादिके कुम्भमें भरकै रखदेवै। यह बृहद्बलातेल राजाओंके सेवने योग्य है । यह तेल– सर्वप्रकारके वातविकार, सूतिका रोग, गुल्म, मन्दाग्नि, हिक्कारोग, श्वास, खाँसी, अन्त्रवृद्धि, भग्नरोग, और मर्मगत ग्रन्थि इन रोगोंको दूर करैहै। गर्भजनक, वीर्यवर्द्धक, और वृद्धपुरुषोंको फिर यौवनयुक्त करदेताहै ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

शालपर्णीपृश्निपर्णीबलागोक्षुरतण्डुला ।
एरण्डस्यचमूलानिबृहत्योःपूतिकस्यच ॥ ५५ ॥
शतावरीसहचरंपचेदेतैःपलोन्मितैः ।
तैलप्रस्थंपयोदत्वागव्यंवाजंचतुर्गुणम् ॥ ५६ ॥
वातार्त्तानरनागाश्वाःपीत्वास्युर्निश्चयंदृढाः ।
हृत्पार्श्वशूलवातेषुगलगंडार्दितेक्षये ॥ ५७ ॥
सशर्कराश्मरीपाण्डुकामलार्द्धावभेदके ।
क्षीणेन्द्रियेऽन्त्रवृद्धौचजरयाजर्जरेहितम् ॥ ५८ ॥

स्त्रीणामश्वतरीणान्तुगर्भस्थितिकरंपरम् ।
एतदङ्गवरन्तैलंविष्णुनापरिकल्पितम् ॥ ५९ ॥

इतिविष्णुतैलम् ।

अर्थ-तिलका तेल चारसेर, गाय या बकरीका दूध १६ सोलहसेर, और कल्कके लिये शालपर्णी, पृश्निपर्णी, खिरैंटी, गोखरू, गंगेरन, अंडकीजड, बडी कटाई, छोटी कटेरी, पूतिकरञ्ज, सतावर और पियावासा यह सब एकसेर लेवे, सबको विधिपूर्वक मिला तेलको सिद्धकरै। यह विष्णुतैल वातसै पीड़ितमनुष्य, हाथी और घोडोंके रोगोंको शान्त करकै शरीरको दृढ करदेताहै। हृदयका शूल, पसलीका दर्द, वातरोग, गलगण्ड, अर्दितवात, क्षयरोग,शर्करा, पथरी, पाण्डु, कामला, अर्द्धावभेदक, इन्द्रियोंकी क्षीणता, अन्त्रवृद्धि, जरा और जर्जरविकारको दूर करै है। स्त्री और खिच्चरियोंके गर्भकी स्थिति करनेवालाहै । यह अंगवर तेल विष्णुने निर्म्माण कियाहैं ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥५९॥

छागलक्षणंयथा ।

नातिबालानसूताचनवृद्धानचरोगिणी ।
मध्यस्थातरुणीग्राह्याकृष्णावृष्याविशेषतः ॥ ६० ॥
छागमांसंतुलांगृह्यदशमूल्यास्तथाशतम् ।
अश्वगन्धापलशतंवाट्यालकशतन्तथा ॥ ६१ ॥
घृताढकंपचेत्तेनचतुर्भागावशेषितम् ।
क्षीरंस्नेहसमन्दद्याच्छतावर्यारसस्तथा ॥ ६२ ॥
ताम्रपात्रेदृढेचैवशनैर्मृद्वग्निनापचेत् ।
अस्यौषधस्यकल्कस्यप्रत्येकंशुक्तिसम्मितम् ॥ ६३ ॥
जीवन्तीमधुकंद्राक्षाकाकोलीनीलमुत्पलम् ।
मुस्तंसचन्दनंरास्नापर्णिनीद्वयशारिवे ॥ ६४ ॥
मेदेद्वेचतथाकुष्ठंजीवकर्षभकौसठी ।
दार्वीप्रियङ्गुत्रिफलानंततालीसपद्मकौ ॥ ६५ ॥
एलापत्रंवरीनागजातीकुसुमधान्यकम् ।

माञ्जिष्ठादाडिमंदारुएलावालुकरेणुकम् ॥ ६६ ॥
विडंगंजीरकंचैवपेषयित्वाविनिक्षिपेत् ।
वस्त्रपूतेचशीतेचशर्कराप्रस्थसंयुतम् ॥ ६७ ॥
निधापयेत्स्निग्धभाण्डेमर्दयेद्दृढभाजने ।
अस्यौषधस्यसिद्धस्यशृणुवीर्यमतःपरम् ॥ ६८ ॥
देवदेवंनमस्कृत्यसंपूज्यगणनायकम् ।
पिबेत्पाणितलंतत्रवारिवीक्ष्यानुपानकम् ॥ ६९ ॥
सर्ववातविकारेषुअपस्मारेविशेषतः ।
सोन्मादेपक्षघातेचआध्मानेकोष्ठविड्ग्रहे ॥ ७० ॥
कर्णरोगेशिरोरोगेबाधिर्येसापतन्त्रके ।
भूतोन्मादेचगृध्रस्यांसोद्गारेचाम्लपित्तजे ॥ ७१ ॥
पार्श्वशूलेतथाशूलेबाह्यायामार्दितेतथा ।
क्रोष्टुशीर्षेतथाखंजेकुब्जेगद्गदमिन्मिने ॥ ७२ ॥
अपतानेऽन्तरायामेरक्तपित्तेतथोर्द्धगे ।
आनाहेऽर्शोविकारेषुचातुर्थकज्वरेषुच ॥ ७३ ॥
हनुग्रहेतथाशोषेक्षीणेचैवाववाहुके ।
दण्डापतानके भग्नेदाहेचाक्षेपकेतथा ॥ ७४ ॥
जीर्णज्वरेविषेकुष्ठेशेफस्तम्भेमदात्यये ।
आढ्यवातेऽग्निमांद्येचवातरक्तगदेषुच ॥ ७५ ॥
एकाङ्गरोगिणेचैवतथासर्वांगरोगिणे ।
हस्तकम्पेशिरःकम्पेजिह्वास्तम्भेजडेगद्दे ॥ ७६ ॥
क्षीणेन्द्रियेनष्टशुक्रेशुक्रानिःसरणेतथा ।
स्त्रीणांवातहतेरक्तेप्रदरेसर्वसम्भवे ॥ ७७ ॥
योनिमध्यगतेवातेयोनिशूलेचशस्यते ।
क्षीणगर्भेनष्टगर्भेमूढगर्भेविशेषतः ॥ ७८ ॥

अर्द्धावभेदकेचैवातिमिरेवातपंगुके।
नक्तान्ध्येचाश्रुपातेचपटोलेचाक्षिस्पन्दने॥ ७९॥
एकाङ्गस्पन्दनेचैवतथासर्वांगस्यन्दने।
नगादिपतितेवातेस्त्रीणामप्राप्तिहेतुके॥ ८०॥
आभिचारिकदोषेचधनसन्तापहेतुके।
येवातसम्भवारोगायेचान्येपित्तसम्भवाः॥ ८१॥
शिरोमध्यगतायेचजंघापार्श्वेषुसंस्थिताः।
कुक्षिबस्तिगतायेचयेचान्येहृदिसंस्थिताः॥ ८२॥
मातृग्रहाभिभूतेनाशिशुर्यश्चविशुष्यति।
प्रक्षीणबलमांसश्चनवत्र्मगहनेगतिः॥ ८३॥
स्तन्यंशुष्यतियस्याश्चयावत्स्तन्यंनाविंदाति।
घृतेनानेनसिद्धयन्तिवज्रमुक्तिरिवासुरान्॥ ८४॥
रसायनंवह्निबलप्रदश्चवपुःप्रकर्षंविदधातिरूपम्।
गजेंद्रतुल्येनसमानतेजाश्चिरायुषंपुत्रशतंकरोति॥८५॥
स्त्रीणांशतंगच्छतिसातिरेकंनयातितृप्तिंसबलःसमाङ्गः।
अपुत्रिणीपुत्रशतंकरोतिशतायुवत्सामृतपुत्रवत्यः ८६
महद्घृतंनामतुछागलाद्यंविनिर्मितंवायुनिषूदनश्च।
शिवंशुभंरोगभयापहश्चचकारहारीतमुनिर्वरिष्ठः॥८७॥

अर्थ–न अत्यंत बालकहो, न तत्काल ब्याही हुई हो, न वृद्धहो, और न रोगी हो, मध्यम अवस्थावाली, तरुण और कृष्णवर्ण हो ऐसे बकरी बृष्य होतीहै। ऐसी बकरीका मांस १०० एकसौ पल, दशमूल एकसौ पल, असगंध एकसौ पल, और खिरेंटी एकसौ पल लेवै, प्रत्येक को ५१२ पल जलमें पकावै जब १२८ एकसौ अट्ठाईस पल जल शेष रहै तब उतारले, इसप्रकार सबका चतुर्थांश क्वाथ बनावै, फिर सब क्वाथोंको एकत्र करलेवै, पश्चात् इसमें १२८ एकसौ अट्ठाईस पल गायका घी और एकसौ अट्ठाईस पल सतावरका रस मिलाकै तांबेके

बासनमें मन्दमन्द अग्निसे पकावै, और पकते समय जीवन्ती महुआ, दाख, काकोली, नीलकमल, नागरमोथा, चन्दन, रसायन शालिपर्णी, पृश्निपर्णी, सारिवा, अनन्तमूल, मेदा, महामेदा, कूट, जीवक, ऋषभक, कचूर, दारुहलदी, फूलप्रियंगु, त्रिफला, तगर, तालीसपत्र, पद्माख, इलायची, तेजपात, रुतावर, नागकेशर, चमेलीके फूल, धनिया, मजीठ, अनार, देवदारु, एलुआ, रेणुका, वायविडंग, और जीरा, यह प्रत्येक चार चार तोले लेकर कल्क बना छोड देवै। जब पककर घृत शीतल होजाय तब वस्त्रमें छानकर ६४ तोले बूरा मिलाके चिकणे बासनमें भरकर रखदेवै, फिर देवाधिदेव गणेशजीको नमस्कार और पूजाकर प्रतिदिन एक तोलाभर पीवै, और इसके ऊपर रोगानुसार अनुपान करै तो यह घृत सर्वप्रकारके वातविकार, अपस्मार, उन्माद, पक्षाघात, आध्मान, कोष्ठरोग, विड्ग्रह, कर्णरोग, शिरोरोग, बधिरता, अपतन्त्रक, भूतोन्माद, गृध्रसीवात, अम्लपित्तोद्भव उद्गाररोग, पार्श्वशूल, शूल, बाह्यायाम, अर्दितरोग, क्रोष्टुशीर्ष, वात, खंजवात, कुब्जवात गद्गदवात, मिन्मिन्, अपतानक, अंतरायामवात, अधोगतवायु, रक्तपित्त, आनाह, अर्शरोग, चातुर्थिकज्वर, हनुग्रह, शोष, क्षीणता, अवबाहुकरोग, दण्डापतानक वात, भ्रमरोग, दाह, आक्षेपक वात, जीर्णज्वर, विषविकार, कोढ, शेफस्तम्भ (लिंगरोग विशेष) मदात्यय, आढ्यवात, मन्दाग्नि, वातरक्तरोग, एकांगवात, सर्वांगवात, हस्तकम्प, शिरकम्प, जिह्वास्तम्भ, जड़ता, इन्द्रियोंकी क्षीणता, वीर्यकी क्षीणता, शुक्रनिःसरण, स्त्रियोंके शरीरमें वातसे हताहुआ रुधिरविकार, सर्वप्रकारके प्रदररोग, योनिगतवात, योनिशूल, क्षीणगर्भ, नष्टगर्भ, मूढगर्भ, अर्द्धविभेदक मस्तकरोग, तिमिररोग, पंगुवात, रतौंधा, अश्रुपात रोग, पटलगतनेत्ररोग, नेत्रस्पन्दनरोग, एकांगस्पन्दन, सर्वांगस्पन्दन, वृक्षके ऊपरसे पतित होनेसे उत्पन्न हुई वात, स्त्रियोंकी प्राप्तिके अभावसे उत्पन्न हुई वात, अभिचारिक दोष, धनके सन्तापसे उत्पन्न हुई वात, सर्वप्रकारके वातसे उत्पन्नहोनेवाले रोग, सर्वप्रकारके पित्तसे उत्पन्न होनेवाले रोग, सर्व प्रकारके शिरोरोग, जंघाके रोग, पसलियोंके रोग, कुक्षिरोग, बस्तिरोग, हृदयरोग, मातृग्रहादिसे बालका सूखजाना, बल और मांसकी क्षीणता, मार्गचलनेकी शक्तिका न होना, स्तनोंसे दूधका सूखजाना और स्तनोंमें दूधका उत्पन्न नहीं होना, यह सब रोग

दूर होजावैं । जैसै वज्रसै राक्षस दूर होवै । यह घृत-परमोत्तम रसायन, अग्निप्रदीपक, बलवर्द्धक, शरीरको सुन्दरकरनेवाला, गजेन्द्रकी समान तेजवान् और चिरायुष १०० सौ पुत्रोंको उत्पन्न करनेवाला, इसको सेवनकरनेवाला मनुष्य सौ स्त्रियोंके साथभी रमण करै तौभी तृप्त नहीं होता, अपुत्र स्त्रियोंकै सैंकडों पुत्रोंको उत्पन्न करनेवाला, जिसके पुत्र नहीं जीते हौं और जिसकी अवस्था सौ १०० वर्षकी होय, उनको भी यह घृत-पुत्रवती करदेताहै, इसको बृहत् छागलाद्य घृत कहतेहैं ॥ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥६९॥ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९॥ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥

बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकः ।
प्रसारण्यश्वगंधाचबृहतीकण्टकारिका ॥ ८८ ॥
बलाचातिबलाचैवश्वदंष्ट्रासपुनर्नवा ।
एषांदशपलान्भागांश्चतुर्द्रोणेऽम्भसःपचेत् ॥ ८९ ॥
पादशेषंपरिस्राव्यतैलपात्रंप्रदापयेत् ।
शतपुष्पादेवदारुमांसीशैलेयकंवचा ॥ ९० ॥
चन्दनंतगरंकुष्ठमेलापर्णीचतुष्टयम् ।
रास्नातुरगगंधाचसैन्धवंसपुनर्नवम् ॥ ९१ ॥
एषांद्विपलिकान्भागान्पेषयित्वाविनिक्षिपेत् ।
शतावरीरसंचैवतैलतुल्यंप्रदापयेत् ॥ ९२ ॥
आजंवायदिवागव्यंक्षीरंदद्याच्चतुर्गुणम् ।
पानेबस्तौतथाभ्यंगेभोज्येचैवप्रयोजितम् ॥ ९३ ॥
अश्वोवावातसंभग्नोगजोवायदिवानरः ।
पंगुलःपीठसर्पीचतैलेनानेनासिध्यति ॥ ९४ ॥
अधोभागेचयेवाताःशिरोमध्यगताश्चये ।
मन्यास्तम्भेहनुस्तम्भेदन्तरोगेगलग्रहे ॥ ९५ ॥

यस्यशुध्यतिचैकांगंगतिर्यस्यचविह्वला।
क्षीणेन्द्रियाःक्षीणशुक्राज्वरक्षीणाश्चयेनराः॥ ९६॥
बधिरालल्लजिह्वाश्चमन्दमेधसएवच।
अल्पप्रजाचयानारीयाचगर्भनविन्दति॥ ९७॥
वातात्कौवृषणौयेषामन्त्रवृद्धिश्चदारुणा।
एतत्तैलवरंतेषांनाम्नानारायणःस्मृतः॥ ८९॥

इतिनारायणंतैलम्।

अर्थ—बेलगिरी, अरणी, शोनापाठा, पाटल, पारिभद्र, पसरन, असगंध, कटाई, कटेरी, खिरैटी, कंधी, गोखरू, और पुनर्नवा, यह प्रत्येक चालीस चालीस तोले लेकर चार द्रोण जलमें पकावै, जब एक द्रोण जल शेषरहै तब आठसेर तेल, सौंफ, देवदारु, वालछड भूरिछरीला, वच, लालचन्दन, तगर, कूठ, इलायची, मुद्गपर्णी, माषपर्णी, शालिपर्णी, पृश्निपर्णी, रायसन, असगंध, सैंधानोन और पुनर्नवा, यह प्रत्येक पिसेहुए आठ आठ तोले, सतावरका रस आठ शेर और बकरी या गायका दूध ३२ सेर मिलाके पकावै। इसको पीनेसैं, इसके द्वारा बस्तिकर्म करनेसे, मालिस करनेसे और खानेसै वातसे पीडित अश्व, हाथी और मनुष्य रोगसै विमुक्त होजाताहै। इसको सेवनकरनेवाले पंगु और पीठसै चलनेवाले मनुष्यभी आरोग्य होजातेहैं। तथा अधोभागगत वायु, शिरोगतवायु, मन्यास्तम्भ, हनुस्तम्भ, दन्तरोग, गलग्रह, एकांगशोष, मार्गमें गमन करनेकी शक्ति का न होना, इन सबको दूर करैहै। जिन मनुष्योंकी इन्द्रियैं क्षीणहोगईहैं, जो वीर्य क्षीणहै और जो ज्वरसे क्षीण होगयेहै, बधिरतारोगवाले, जिह्वारोगवाले, जो मन्दबुद्धिवालेहैं उन मनुष्योंको, तथा जिन स्त्रियोंकी सन्तान नहीं जीती, और जिनके गर्भ नहीं रहता उन स्त्रियोंको वातसै पीड़ित अंडकोशरोगवाले मनुष्य और अंत्रवृद्धि रोगवाले मनुष्योंको यह नारायणनामवाला तेल परम श्रेष्ठहै॥ ८८॥ ८९॥ ९०॥ ॥ ९१॥ ९२॥ ९३॥ ९४॥ ९५॥ ९६॥ ९७॥ ९८॥

जलधराश्वगंधाजाजीजीवकर्षभकौसठी।
काकोलीक्षीरकाकोलीजीवन्तीमधुयष्टिका॥ ९९॥

मधुरिकादेवदारुपद्मकाष्ठंचशैलजम् ।
मांसीएलात्वचंकुष्ठंवचाशैलजचन्दनम् ॥ १०० ॥
मंजिष्ठामृगनाभिश्चश्वेतचन्दनकुंकुमम् ।
पद्मिनीकुंदकोटिश्चग्रंथिकश्चनखीतथा ॥ १०१ ॥
एतेषांपलिकैर्भागैस्तैलञ्चापिसहाढकम् ।
शतावरीरससमंदुग्धञ्चापिसमम्भवेत् ॥ १०२ ॥
एतत्संभृत्यसम्भाव्यशनैर्मृद्वग्निनापचेत् ।
विष्णुतैलवरंश्रेष्ठंसर्ववातविकारनुत् ॥ १०३ ॥
ऊर्द्धवातेतथावातेह्यंगविग्रहएवच ।
शिरोमध्यगतेवातेमन्यास्तम्भेशिरोग्रहे ॥ १०४ ॥
यस्यशुष्यतिवैकाङ्गंगतिर्यस्यचविह्वला ।
येवातप्रभवारोगायेचान्येपित्तसम्भवाः ॥ १०५ ॥
सर्वास्तान्नाशयत्याशुतमःसूर्योदयेयथा ॥ १०६ ॥

इति बृहद्विष्णुतैलम् ।

अर्थ-नागरमोथा, असगंध, जीरा, जीवक, ऋषभक,कचूर, काकोली, क्षीरकाकोली, जीवन्ती, मुलैंठी, सौंफ, देवदारु, पद्माख भूरिछरीला, बालछड़, इलायची, दालनी, कूठ, वच, शिलारस, लालचन्दन, मजीठ, कस्तूरी, सफेदचंदन, केसर, कमलिनी, कुन्दुरु (वं कुन्दुरु खोटी) गठिवन और नखी यह प्रत्येक चारचार तोले लेकर कल्क बनावै, फिर दोसौ छप्पन तोले सतावरका रस और दोसौ छप्पनतोले गायका दूध लेवै, इन सबको और उपरोक्त औषधियोंके कल्कको विधिपूर्वक मिलाकै धीरै धीरै मन्दमन्द आगसै पकावै, जब सिद्ध होजाय तब उत्तम वासनमें भरकै रखदेवै । यह बृहद्विष्णुतैल-अत्यंत श्रेष्ठ, तथा सर्वप्रकारके वात विकार, ऊर्द्धवात, अधोवात, व्यंग, विग्रह, शिरोगतवात, मन्यास्तम्भ, शिरोग्रह, एक अंगका सूखजाना, मार्ग चलतेसमय अत्यन्त दुःख होना, सर्वप्रकारके वातरोग और सर्वप्रकारके पित्त, इन सबको यह तेल दूर करैहै, जैसे सूर्योदय अंधकारको दूर करैहै ॥ ९९ ॥ १०० ॥ १०१ ॥ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥

बिल्वाश्वगंधाबृहतीश्वदंष्ट्रास्योनाकवाटचालकपारिभद्रम्।
क्षुद्राकठिल्लातिबलाग्निमन्थंमूलानिचैषांशरणीयुतानाम् ॥
मूलंविदध्यादथपाटलीनांसपादप्रस्थंविधिनोद्धृतानाम्।
द्रोणैरपामष्टभिरेवपक्त्वापादावशेषेणरसेनतेन ॥१०८॥
तैलाढकाभ्यांसममेवदुग्धमाजंविदध्यादथवापिगव्यम्।
एकत्रसम्यग्विपचेत्सुबुद्धिर्दद्याद्रसञ्चैवशतावरीणाम् १०९॥
तैलेनतुल्यंपुनरेवतत्ररास्नाश्वगंधामिसिदारुकुष्ठम्।
पर्णीचतुष्कागुरुकेशराणिसिन्धूत्थमांसीरजनीद्वयंच ११०॥
शैलेयकंचन्दनपुष्कराणिएलासयष्टीतगराब्दपत्रम्।
भृंगाष्टवर्गाम्बुवचापलाशंवृश्चीरस्थौणेयकचोरकाख्यम् १११
एतैःसमस्तैर्द्विपलप्रमाणैरालोड्यसर्वंविधिनापिपक्वम्।
नारायणंनाममहच्चतैलंकर्पूरकाश्मीरमृगाण्डजानाम् ११२॥
दद्यात्सुगन्धायवदन्तिकेचित्प्रस्वेददौर्गन्ध्यनिवारणाय।
चूर्णीकृतानांद्विपलप्रमाणंसर्वैःप्रकारैर्विधिवत्प्रयोज्यम् ११३
आश्वेतपुंसांपवनार्दितानांचैकाङ्गशोषार्दितवेपनानाम्।
येपंगवःपीठविसर्पिणश्चत्राधिर्येशुक्रक्षयपीडिताश्च ॥११४॥
मन्याहनुस्तम्भशिरोगदार्त्तायुक्तामयान्तेबलवर्णयुक्ताः।
संसेव्यतैलंसहसाभवन्तिवन्ध्याचनारीलभतेसुपुत्रम् ११५॥
देवोपमंसर्वगुणोपपन्नंसुमेधसंश्रीविजयान्वितंच।
शाखागतेकोष्ठगतेचवातेवृद्धौविधेयंपवनांत्रजायाम्॥११६॥
जिह्वानिलेदन्तगतेचशूलेवातापहंतैलवरंप्रदिष्टम्।
उन्मादकुब्जज्वरकर्षितानांनातःपरंतैलवरंप्रदिष्टम्॥११७॥
वातामयेवैद्यवरेणयोज्यमायुःप्रकर्षंप्रमदाप्रियत्वम्।
प्राप्नोतिलक्ष्मींविजयञ्चनित्यंरक्षांसिदुष्टानिनिहन्तिनूनम् ॥

तैलोपसेवीजरयाविमुक्तोजीर्णज्वरीचाशुभरेणुरेव।
देवासुरेयुद्धवरेसमीक्ष्यस्नायवस्थिभग्नानसुरैःसुरास्तु ११९
नारायणेनापिसुबृंहणार्थंस्वनामतैलंविहितंतुतेषाम्॥१२०॥

अर्थ-बेलगिरी, असगंध, कटाई, गोखरू, सोनापाठा, खिरैंटी, पारिभद्र, कटेरी, पुनर्नवा, कंधी, अरणी, परस और पाडल यह प्रत्येक अस्सी अस्सी तोले लेकर आठ द्रोण जलमें पकावै, जब दो द्रोण जल शेष रहजाय तब उतारकर छानलेवै, पश्चात् इस काढ़ेमें ५१२ पांचसो बारह तोले गाय या बकरीका दूध और ५१२ पांचसौं बारह तोले शतावरका रस, तथा रास्ना, असगन्ध, सोफ, देवदारु, कूठ, माषपर्णी, मुद्गपर्णी, शालपर्णी, पृश्निपर्णी, अगर, नागकेशर, सैंधानोन, बालछड, हलदी, दारु हलदी, भूरिछरीला, लालचन्दन, पोहकरमूल, इलायची, मुलैठी, तगर, नागरमोथा, तेजपात, दालचीनी, काकोली, क्षीरकाकोली, जीवक, ऋषभक, मेदा, महामेदा, ऋद्धि, वृद्धि, सुगंधवाला, वच, कचूर, विषखपरा, थुनेर, और चोरक (ने, भटेउर); यह प्रत्येक औषधि आठ आठ तोले लेकर सबको पीसकै मिलादेवै, फिर तेलको विधि पूर्वक पकावै। इस तैलको महानारायण तैल कहतेहैं। पश्चात् कितनेक वैद्य इसमें कचूर, कस्तूरी और केशर, यह प्रत्येक औषधि आठ आठ तोले सुगन्धिके लिये, और कितनेक वैद्य प्रस्वेद और दुर्गन्ध दूर करनेके लिये डालतेहैं। यह महानारायण तैल- वातरोग, एकांगशोष, अर्दित रोग और कम्पादि रोगोंको दूर करैहै। तथा पंगुरोगी, जो मनुष्य पीठसे खिचड़ते हैं, बधिरतारोगवाले, जो मनुष्य वीर्य्यके क्षयसे पीडितहैं, मन्यास्तम्भ, हनुस्तम्भ, और शिररोगी मनुष्योंको यह नारायण तैल परम हितकारीहै, और बल तथा वर्णको बढ़ानेवालाहै। इस तेलको सेवनकरनेसे वंध्यास्त्रीभी देवोंकी समान सुन्दर, सर्वगुणसम्पन्न, महाबुद्धिवान्, और विजय लक्ष्मीको पानेवाला पुत्र उत्पन्न करतीहै। यह तेल- शाखागत वात, कोष्ठगतवात, वातवृद्धि, जिह्वा गतवात, दन्तगत शूल और वातरोगको दूर करैहै। उन्माद, कुब्जवात, और ज्वरसे व्याकुल मनुष्योंको यह तेल- महा उपकारीहै। इसको वैद्य सर्वप्रकारके वातरोगोंमें देवैं। जो इसतेलको सदैव सेवन करतेहैं, उनके लक्ष्मी और विजयकी प्राप्ति होतीहै, राक्षस दूरसेही भाग

जातेहैं, वृद्धता नहीं आती, और जीर्णज्वर शीघ्रही नष्ट होजाता है पूर्वकालमें देवता और राक्षसोंका परस्पर युद्ध हुआथा, उससमय राक्षसोंने देवताओंकी हड्डी, स्नायु और संधि आदि तोडडाली, तब श्रीनारायणने देवताओंकी पुष्टिके अर्थ निजनामसे प्रसिद्ध 'नारायणने' तैल निर्माण किया है ॥ १०७ ॥ १०८ ॥ १०९ ॥ ११० ॥ १११ ॥ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥

माषक्काथेबलाक्काथेरास्नायादशमूलजे ।
यवकोलकुलत्थानांछागमांसंभवेत्पृथक् ॥ १२१ ॥
प्रस्थेचातिलतैलस्यक्षीरंदत्त्वाचतुर्गुणम् ।
रास्नात्मगुप्तासिन्धूत्थशताह्वैरण्डमुस्तकैः ॥ १२२ ॥
जीवनीयबलाव्योषैःपचेदक्षसमैर्भिषक् ।
बाधिर्येकर्णशूलेचकर्णनादेचदारुणे ॥ १२३ ॥
विषूच्यामर्दितवातेकुब्जेगृध्रस्यामपतानके ।
वस्त्यभ्यंजनपानेषुलावणेषुप्रयोजयेत् ॥ १२४ ॥
माषतैलमिदंश्रेष्ठमूर्द्ध्वजत्रुगदापहम् ।
क्काथःप्रस्थाःषडेवात्रविभक्त्यन्तेनकीर्त्तिताः ॥ १२५ ॥

यथा माषपल १६ जलशराव १६ शेषशराव ४ एवंसर्वत्र ॥

इति माषतैलम् ।

अर्थ–तिलका तेल चारसेर, उड़दोंका क्काथ चारसेर, खिरैटीका क्काथ चारसेर, रास्नाका क्काथ चारसेर, दशमूलका क्काथ चारसेर जौका क्काथ चारसेर, बेरका क्काथ चारसेर, कुलथीका क्काथ चारसेर, और बकरेके मांसका क्काथ चारसेर लेवै, दूध सोलहसेर, कल्कके लिये रास्ना, कौंछ, सैंधानोन, सौंफ, अंड, नागरमोथा, जीवनीयदशक, खिरैटी, और त्रिकुटा, यह, प्रत्येक औषधि दो दो तोले लेवै, सबको विधिपूर्वक मिला तैलको सिद्ध करै । इसतैलको सेवनकरनेसे– बधिरता, कर्णशूल, दारुणकर्णनाद, विषूचिका, अर्दितवात, कुब्जकवात, गृध्रसी वात, और अपतानक वातरोग दूर होताहै । इसको बस्तिकर्म्म,

अभ्यंजन, पान और नस्य, इन सब कर्मोंमें योजना चाहिये। यह माषतैल अत्यन्त श्रेष्ठहै, ऊर्ध्वजत्रुरोगोंको दूर करैहै ॥ १२१ ॥ ॥ १२२ ॥ १२३ ॥ १२४ ॥ १२५ ॥

माषस्यार्द्धाढकंदत्त्वातुलार्द्धंदशमूलतः ।
पलानिच्छागमांसस्यत्रिंशद्द्रोणेऽम्भसःपचेत् ॥ १२६ ॥
पूतेशीतेकषायेचचतुर्थांशावशेषिते ।
प्रस्थश्चतिलतैलस्यपयोदत्त्वाचतुर्गुणम् ॥ १२७ ॥
आत्मगुप्तोरुबुकश्चशताह्वालवणत्रयम् ।
जीवनीयानिमंजिष्ठाचव्याचित्रककट्फलम् ॥ १२८ ॥
सव्योषंपिप्पलीमूलंरास्नामधुकसैन्धवम् ।
देवदार्व्यमृताकुष्ठंवाजिगंधावचाशठी ॥ १२९ ॥
एतैरक्षसमैःकल्कैःसाधयेन्मृदुनाग्निना ।
पक्षाघातार्दितेवातेचार्दितेहनुसंग्रहे ॥ १३० ॥
कर्णमन्याशिरःशूलेतिमिरेचत्रिदोषजे ।
पाणिपादशिरोग्रीवाभ्रमणेमंदचंक्रमे ॥ १३१ ॥
कलायखंजेपंगुल्येगृध्रस्यामपबाहुके ।
पानेबस्तौतथाभ्यंगनस्यकर्णाक्षिपूरणैः ॥ १३२ ॥
तैलमेतत्प्रशंसन्तिसर्ववातरुजापहम् ॥ १३३ ॥

इतिबृहन्महामाषतैलम् ।

अर्थ–तिलका तेल दोसेर, दूध आठसेर, क्वाथके लिये उड़द चारसेर, दशमूल सवाछहसेर, और बकरेका मांस तीसपल लेवै, सबको एक द्रोण अर्थात् ३२ बत्तीस सेर जलमें पकावै, जब चौथा भाग जल शेष रहै तब उतारकर शीतल होनेपर छान लेवै, फिर कल्कके लिये कौंछ, अंड, सौंफ, सैंधानोंन, काचानोंन, विरिया, संचरनोंन, जीवनीय-दशक, मजीठ, चव्य, चीता, कायफल, त्रिकुटा, पीपरामूल, रास्ना, मुलैठी, सैंधानोंन, देवदारु, गिलोय, कूठ, असगंध, वच और कचूर, यह प्रत्येक दो दो तोले लेवै, सबको मिला यथाविधिसे तेलको पकावै,

यह बृहन्माषतैल–पक्षाघात, अर्दितवात, हनुग्रहवात, कर्णशूल, मन्याशूल, शिरःशूल, त्रिदोष जतिमिररोग, हस्त, पाद, शिर और ग्रीवाका घूमना, मंदचक्रम, कलापखंज, पंगुरोग, गृध्रसी वात, अवबाहुक इत्यादि रोगोंको दूर करैहै। यह–पान, बस्तिकर्म, अभ्यंग, नस्य और नेत्रोंमें भरनेसे सर्वप्रकारके वातरोगोंको दूर करैहै ॥ १२६ ॥ १२७ ॥ ॥ १२८ ॥ १२९ ॥ १३० ॥ १३१ ॥ १३२ ॥ १३३ ॥

त्रिकत्रयसमायुक्तंजीवनीययुतन्त्वयः।
हन्त्यपस्मारमुन्मादंवातव्याधिंसुदुर्ज्जयम् ॥ १३४ ॥

इति त्रिकत्रयाद्यंलौहम्।

अर्थ–सोंठ, मिरच, पीपल, हरड, बहेडा, आमला, नागरमोथा, चीता, वायविडंग और जीवनीयदशक, इन सबको समान भाग लेकर सबका चूर्ण बना और सब चूर्णकी समान लोहेका चूर्ण मिला लेवै। इसको सेवन करनेसे–बवासीर, उन्माद, और दुर्जयवातव्याधि दूर होतीहै ॥ १३४ ॥

जिङ्गीचोरकदेवदारुशबरव्याघ्रीवचाचेलक-
त्वक्पत्रैःसहगन्धपत्रकशठीपथ्याक्षधात्रीघनैः।
एतैःशोधितसंस्कृतैःपलयुगैराख्यातयासंख्यया
तैलप्रस्थमवस्थितैःस्थिरमतिःकल्कैःपचेद्गान्धिकः ॥
मांसीमुरादमनचम्पकसुन्दरीत्वक-
ग्रन्थ्यम्बुरुङ्मरुबकैर्द्विपलैःसपृक्कैः।
श्रीवामकुन्दुरुनखीनालिकामिसीनां
प्रत्येकतःपलमुत्तार्यपुनःपचेच्च ॥ १३६ ॥
एलालवंगचलचन्दनजातियूथी-
कक्कोलकागुरुलताघुसृणैः पलार्द्धैः।
कस्तूरिकाक्षसहितानलदीप्तियुक्तैः
पक्षीष्टमन्दशिखिनैमहासुगन्धम् ॥ १३७ ॥

पंचद्विकेनचार्द्धेनमदात्कर्पूरमेष्यते ।
कर्पूरमदयोरर्द्धंपत्रकल्कादिहेष्यते ॥ १३८ ॥
पंचपत्राम्बुनात्राद्योद्वितीयोगंधवारिणा ।
तृतीयोऽपिचतेनैवपाकोवाधूपिताम्बुना ॥ १३९ ॥
(चेलकंगुवाकस्यत्वक्)

इतिमहासुगन्धिलक्ष्मीविलासतैलम् ।

अर्थ–मजीठ, चोरक, सुगंधद्रव्य, देवदारु, सबरलोध, कटेरी, वच, सुपारीके पेड़की छाल, दालचीनी, तेजपात, गंधपत्रक (बं. पचापाता), कचूर, हरड, बहेडा, आमला और नागरमोथा, यह प्रत्येक दो दो पलके कल्क बना दोसेर तेलमें मिला बिल्वादि पंचपल्लवोंके जलके द्वारा पकावै, फिर बालछड, कपूरकचरी, दौना, चम्पा, फूलप्रियंगू, दालचीनी, गठिवन, सुगंधवाला, कूठ, मरुआ, और असवरग, यह प्रत्येक दो दो पल, तथा श्रीवास (गंधविरोजा , कुंदरू, नखी, नलिका और सोंफ, यह प्रत्येक एक एक पल लेवै । इन सबका कल्कबना दूसरीवार गंधोदकके द्वारा पकावै, तदनन्तर इलायची, लौंग, शिलारस, चन्दन, चमेलीके फूल, जुहीके फूल, शीतलचीनी, अगर, लताकस्तूरी और केशर, यह प्रत्येक दो दो तोले, कस्तूरी एक तोला और कपूर छः मासे, इन सबका कल्कबना तीसरी वार गंधद्रव्यादिके द्वारा गंधोदकके साथ पाक करै । यह महासुगंधि लक्ष्मीविलासतैल–सर्वप्रकारके वातरोगोंको दूर करैहै ॥ १३५ ॥ १३६ ॥ १३७ ॥ १३८ ॥ १३९ ॥

शतत्रयंप्रसारण्यार्द्धचपीतसहाचरात् ।
अश्वगंधैरण्डबलावरारास्नापुनर्नवा ॥ १४० ॥
केतकीदशमूलञ्चपृथक्कपारिभद्रतः ।
प्रत्येकमेषान्तुतुलातुलार्द्धंदेवदारुतः ॥ १४१ ॥
तुलार्द्धंशिरीषस्यैवलाक्षायाःपंचविंशतिः ।
पलानिलोध्राच्चतथासर्वमेकत्रसाधयेत् ॥ १४२ ॥
जलपंचाढकशतेसपादेतत्रशेषयेत् ।

द्रोणद्वयंकांजिकश्चषड्विंशत्याढकोन्मितम् ॥ १४३ ॥
क्षीरदध्नोःपृथक्प्रस्थान्दशमस्त्वाढकंतथा ।
इक्षोरसाढकेचैवछागमांसतुलात्रये ॥ १४४ ॥
जलपंचचत्वारिंशत्प्रस्थेप्रस्थेतुशेषयेत् ।
सप्तदशरसप्रस्थामंजिष्ठाक्काथएवच ॥ १४५ ॥
कुडवोनाढकोन्मानेद्रवैरेभिस्तुसाधयेत् ।
सुशुद्धतिलतैलस्यद्रोणंप्रस्थेनसंयुतम् ॥ १४६ ॥
आद्यएभिर्द्रवैःपाकेकल्कोभल्लातकंकणा ।
नागरंमरिचंचैवप्रत्येकंषट्पलोन्मितम् ॥ १४७ ॥
पथ्याक्षधात्र्यःसरलंशताह्वाककोंटीवचा ।
चोरपुष्पीशठीमुस्तद्वयंपद्मश्चसोत्पलः ॥ १४८ ॥
पिप्पलीमूलमंजिष्ठासाश्वगंधापुनर्नवा ।
दशमूलंसमुदितंचक्रमर्दोरसांजनम् ॥ १४९ ॥
गंधतृणंहरिद्राचजीवनीयगणस्तथा ।
एषांद्विपलिकैर्भागैराद्यपाकोविधीयते ॥ १५० ॥
देवपुष्पीबोलपत्रंशल्लकीरसशैलजे ।
प्रियंगूशीरमधुरीमांसीदारुबलाचलाः ॥ १५१ ॥
श्रीवासोनलिकाखोटिःसूक्ष्मैलाकुन्दुरुर्मुरा ।
नखीत्रयश्चत्वक्पत्रीपयस्यापूतिचम्पकम् ॥१५२ ॥
दमनंरेणुकापृक्कामरुवश्चपलत्रयम् ।
प्रत्येकंगंधतोयेनाद्वितीयःपाकइष्यते ॥ १५३ ॥
गंधोदकन्तुत्वक्पत्रीपद्मकोशीरमुस्तकम् ।
प्रत्येकंसबलामूलपलानिपंचविंशतिः ॥ १५४ ॥
कुर्याऽर्द्धभागोऽत्रजलप्रस्थन्तुपंचविंशतिः ।

अर्द्धावशिष्टःकर्त्तव्यःपाकोगंधाम्बुकर्मणि ॥ १५५ ॥
गंधाम्बुचन्दनाम्बुभ्यांतृतीयःपाकइष्यते ।
कल्कोऽत्रकेशरंकुष्टंत्वक्कालीयककुंकुमम् ॥ १५६ ॥
भद्रश्रियंग्रन्थिपर्णलताकस्तूरिकातथा ।
लवंगागुरुकक्कोलजातीकोषफलानिच ॥ १५७ ॥
एलालवंगवल्लीचप्रत्येकंत्रिपलोन्मितम् ।
कस्तूरीषट्पलंचन्द्रात्पलंसार्द्धंश्चगृह्यते ॥ १५८ ॥
वेधार्थंश्चपुनश्चन्द्रमदौदेयौतथोन्मितौ ।
महाराजप्रसारिणीसेयंराजयोग्याप्रकीर्त्तिता ॥ ५९ ॥
गुणान्प्रसारणीनान्तुवहस्येषाबलोत्तमान् ॥ १६० ॥
सपादंपंचाढकशतंपंचविंशत्यधिकंपंचशतान्याढकानिभवन्ति।

तेषुचद्रोणद्वयंस्थाप्यम् ।

तत्रप्रतिशतमेकविंशतिराढकानिशरावाश्चषट्किंचिन्न्यूनसप्तपलान्विता एतेन किंचिन्न्यूनसप्तपलाधिकत्वाच्चत्वारिंशदुत्तरशरावशतत्रयं भवति । स्थाप्यश्चकिंचिदधिकसार्द्धपलान्विताःप्रतिशतंदेयं जलशरावः ३४२ किंचिदूनपल २७ शेष ५ पल १ किंचिदधिककर्ष ३ समुदायेनदेयजलस्य चतुःशताधिकाष्टसहस्रशरावाः ८४००स्थाप्यश्चाष्टाविंशत्यधिकरशरावशतं १२८किंवा समुदायेन षोडशशरावपरिमितकलशेन पंचविंशत्युत्तरकलशपञ्चशतानि ।

स्थाप्याश्चाष्टौकलशाः ।

कांजिकस्याढकानि षड्विंशतिर्यद्यपि तथापि कांजिकद्रोणमात्रेण व्यवहरन्ति वृद्धाः । कांजिकंशुक्तं ग्राह्यमत

एवोक्तंचक्रेण कांजिकमानतो द्रोणःशुक्तेनैव विधीयते। शुक्तन्तुपरग्रन्थेप्रस्थंतण्डुलतोयत इत्यादिना ग्रहण्यामुक्तम् चक्रमतं पुनरन्यथा तथा

अत्रशुक्तिविधिर्मण्डप्रस्थःपंचाढकोन्मितम्।
कांजिकंकुडवोदध्नोगुडप्रस्थेऽम्लमूलकात् ॥ १६१ ॥
पलान्यष्टौशोधितार्द्रात्पलषोडशकन्तथा।
कणामरिचसिन्धूत्थहरिद्राजीरकंपृथक् ॥ १६२ ॥
द्विपलम्भाविते भाण्डेघृतमष्टदिनास्थितम्।
सिद्धंभवतितच्छुक्तंयदावतार्य्यगृह्यते ॥ १६३ ॥
तदादेयंचतुर्ज्जातंपृथक्कर्षत्रयोन्मितम् ॥ १६४ ॥

अत्रमण्डस्यभक्तमण्डस्यप्रस्थम्।

अम्लमूलकंकांजिकमूलकंशोधितार्द्रात् निस्त्वगार्द्रात् क्षीरदध्नाप्रत्येकंप्रस्थादशेतिभेदः। छागमांसपल २०० जलांश १८० शेषांश ६८ मंजिष्ठापल ६० जलांश ६० शेष १५ गांधिकव्यवहारंसिध्यति तैलांश ६४ उपक्षयार्थमपरतैलांश ४कल्के भल्लातकस्या सहद्रेतस्य स्थानेरक्तचन्दनमेव वदन्ति वृद्धाः।अक्षांविभीतकं पद्मोत्पलयोः पुष्पं दशमूलस्य मिलित्वापलत्रयं चक्रमर्दएडगजाबीजंकल्कद्रव्यं तप्तोदकप्रक्षालितं श्लक्ष्णचूर्णितं सुपिष्टं दत्त्वा क्काथादि सर्वत्र वैवाद्यःपाकः सचातिमृदुःकार्योनिष्पत्तिपाकोऽस्त्येव यतः। द्वितीयपाके देवपुष्पी देवडुलीति प्रसिद्धा बोलो गंधरसः पत्रंवाटीयगंधपत्रकं शल्लकीरसः कुन्दुरु यदुक्तं शब्दार्णवे। कुन्दुरु भागद्वयं पुनरुक्तत्वात् वाला वालकं सुगन्धित्वा-

तृचलः सिद्धकं श्रीवासो नवनीतखोटिःनखी त्रयमश्वखुर-बदरपत्रोत्पल गजकर्णाख्य नखीमध्याज्या दुष्पत्रा तेजोवती पूतिःखाटासी गंधोदके बलायूलं बलानिकरः दुष्पत्रादीनां प्रतिपल २८ तोला उत्पलं १२ तोला ४ जलशराव १०० शेषांश ५० तृतीयपाके गंधोदकं पूर्ववत्। चन्दनोदकार्थं श्वेतचंदनपल८३७कर्ष२क्षोदयित्वा जलशराव १०० शेषांश ५० किंवा उक्तार्द्धमानेन कृत-गंधोदश २८अन्येतु सुपविष्टेनसुघृष्टेनवा गंधोदक एवा-र्द्धमानचन्दनेगोलितमर्द्धावशिष्ट गंधोदकमानं गृह्णन्ति । इत्थं व्यवहारोऽपिकल्के भद्राश्रियंसितचन्दनं जाड्या-दोषःफलश्चलवंगस्यैव छल्ली चन्द्रःकर्पूरःवेधार्थं मदः कस्तूरी सिद्धतैलस्यकिंचित्तैलेन कस्तूरीं पिष्ट्वा पात्रस्थ सिद्धतैले मिश्रयित्वाच्छाद्य स्थाप्यमितिवेधशब्दार्थः)

इतिमहाराजप्रसारणीतैलम् ।

अर्थ—पसरन तीनसौ पल, पीलेफूलकी कटसरैया दोसौ पल, असगंध, अंड, खिरैटी, सतावर, रसायन, पुनर्नवा, केतकी, दशमूल, और फरहद-कीछाल, यहप्रत्येक सौ पल, देवदारु पचास पल, सिरसकी छाल पचा-सपल, लाख पचीसपल और लोध पचीसपल, इन सबको एकत्रकर५२५ आढ़क ५ जलमें पकावै, जब दो द्रोण जल शेषरहै तब उतारकर छान-लेवै । कांजी एकद्रोण, दूध, दही, प्रत्येक दशप्रस्थ, दहीका तोड़ १ एक आढ़क, ईखका रस एक आढक, बकरेकामांस ३०० तीनसौपल, पाकके लिये जल ८५ पिचासी सेर, शेषजल १७ सत्तरह सेर, मजीठ ५० पचासपल, जल साठ सेर, शेष पन्द्रहसेर, तिलका तेल एकद्रोण एक प्रस्थ, कल्कके लिये मिलावै, पीपल, सोंठ और कालीमिरच, प्रत्येक छैछै पल, हरड़ बहेडा, आमला, धूपसरल, सोंफ, काकडाशिंगी, वच, शंख-पुष्पी, कचूर, मोथा, नागरमोथा, कमल, कुमुद, पीपरामूल, मजीठ, असगंध, पुनर्नवा, दशमूल, चकवड,रसौत, सुगंधतृण, हलदी और जीव-

नीयगणकी सम्पूर्ण औषधि, प्रत्येक दोदोपल लेवै, सबको विधिपूर्वक मिलाके प्रथम पाक करै। तत्पश्चात् लौंग, गंधबोल, तेजपात, शल्लकी-कागोंद, भूरि छरीला, फूलप्रियंगू, खंस, सौंफ, वालछड, देवदारु, खिरैटी, सिलारस, सरलका गोंद, नलिका, कुन्दुरु, छोटी इलायची, लोबान, कपूरकचरी, तीनोंप्रकारकी नखी, दालचीनी, गंगापत्री, काकोली, खट्टाशमुष्क, चंपा, दवना, रेणुका, असवरग और मरुआ यह प्रत्येक तीन तीन पल लेवै, इन सबका कल्क और गंधोदकके द्वारा तेलका दूसरा पाककरै। गंधोदक बनानेकी यह विधिहै कि-दालचीनी, गंगापत्री, तेजपात, खस, नागरमोथा और खिरैटीकी जड, प्रत्येक २५पचीस पल कमल १२ बारहपल, जल १०० सौ शरावले, अर्द्धावशेष क्काथ बनावै, इसको गन्धजल कहतेहैं। इसगंधजलके द्वारा उपर लिखाहुआ दूसरा पाककरै। पश्चात् इसी गंधोदक और चन्दनोदकके द्वारा नीचै लिखे तृतीयकल्कका पाककरै। अबचंदनोदक बनानेकी विधि कहतेहैं, कुटाहुआ चन्दन ५० पचास पल, जल पचीस सेरले, अर्द्धावशेष अथवा चतुर्थांश काढा करै, तथा चन्दनको जलमें घिसलेवै। इसको चन्दनोदक, चन्दनाम्बु, चन्दनजल कहतेहैं। उपरोक्त गंधोदक और चन्दनोदकके द्वारा नागकेशर, कूठ दालचीनी, पीलाचन्दन, केशर, चन्दन, गठिवन, लताकस्तूरी, लौंग, अगर, शीतलचीनी, जायफल, जावित्री, इलायची, और लौंगकी वेल प्रत्येक तीन तीन पल, कस्तूरी छै पल, कपूर डेढ पल, इनके कल्कके साथ तृतीय पाक करै। जब तेल सिद्ध होजाय तब १॥ डेढ तोले कस्तूरी और १॥ डेढ तोले कपूर पीसकर तेलमें मिलादेवै। यह महाराजप्रसारिणी तैल-राजाओंके सेवने योग्यहै, तथा अन्यप्रसारिणी तैलोंकी अपेक्षा यह तैल अधिक गुणवालाहै। अब शुक्त बनानेकी विधि कहतेहै। भातका मांड़ दो सेर, कांजी४०चालीस सेर, दही एकसेर, गुड़१एकसेर कांजिकमूलक(कांजी के नीचेकी जमी हुई गाद) आठपल, अदरख १६सोलहपल, पीपल, कालीमिरच, सैंधानोंन, हलदी और जीरा, यह प्रत्येक दो २ पल लेकर सबको एकत्र घीके चिकने बासनमें आठदिन तक रक्खा रहनेदे, फिर इसमें दालचीनी, इलायची, तेजपात और नागकेशर प्रत्येकका चूर्ण छै छै तोले मिलादेवै, इसको शुक्त कहतेहै। यहशुक्तनामवालीकांजी

इस महाराजप्रसारिणी तैलमें डाली जाती है, इसकारण इसको यहाँपै लिख दियाहै ॥ १४० ॥ १४१ ॥ १४२ ॥ १४३ ॥ १४४ ॥ १४५ ॥ ॥ १४६ ॥ १४७ ॥ १४८ ॥ १४९ ॥ १५० ॥ १५१ ॥ १५२ ॥ १५३ ॥ ॥ १५४ ॥ १५५ ॥ १५६ ॥ १५७ ॥ १५८ ॥ १५९ ॥ १६० ॥ १६१॥ ॥ १६२ ॥ १६३ ॥ १६४ ॥

मूलञ्चैवाश्वगन्धायागृहीत्वाखण्डशःशतम्।
पंचाशत्पलमानन्तुजलद्रोणेविपाचयेत् ॥ १६५ ॥
पादशेषेहरेत्क्वाथंक्वाथांशंतिलतैलकम्।
तैलाच्चतुर्गुणंक्षीरंगव्यंवामाहिषन्तथा ॥ १६६ ॥
शतपुष्पाकणाचेलाकुष्ठञ्चकण्टकारिका।
शुण्ठीयष्टीदेवदारुशालपर्णीपुनर्नवा ॥ १६७ ॥
मंजिष्ठापत्रकंरास्नावचापुष्करमूलकम्।
यवानीभूतिकंमांसीनिर्गुण्डीपयस्यावला ॥ १६८ ॥
वह्निगोक्षुरकञ्चैवमृणालंबहुपुत्रिका।
प्रतिकर्षमिदंयोज्यंसर्वमेकत्रपाचयेत् ॥ १६९ ॥
तैलशेषंसमुद्धृत्यसिद्धंवातकुलान्तकम्।
अभ्यंगेयोजयेत्पानेनस्यकर्मणिसर्वदा ॥ १७० ॥
भग्नानांखञ्जपंगूनांशान्तिमाप्नोतिनान्यथा ॥ १७१ ॥

वातकुलान्तकंतैलम्।

अर्थ-तिलकातेल दोसेर, गाय या भैंसका दूध आठसेर, क्वाथके लिये असगंधकी जड़के टुकडे पंचास पल, जल ३२ बत्तीससेर, शेष आठसेर और कल्कके लिये सौंफ, पीपल, इलायची, कूठ, कटेरी, सोंठ, मुलैठी, देवदारु, सालपर्णी, पुनर्नवा, तेजपात, मजीठ, रायसन, वच, पोहकरमूल, अजवायन, सुगन्धतृण, बालछड़, सम्हालू, सूर्यमुखी, खिरैटी, चीता, गोखरू, खस और सतावर, यह प्रत्येक दोदो तोले लेवै। सबको विधिपूर्वक मिलाके तेलको सिद्धकरै। यह वातकुलान्तक तैल अभ्यंग, पान, और नस्यकर्ममें सदैव प्रयोग करैतौ भग्नरोग, खंजरोग, और पंगुरोग दूरहोवै ॥ १६५ ॥ १६६ ॥ १६७ ॥ १६८॥ १६९॥ १७०॥ १७१॥

तिलतैलाढकेक्षिप्त्वातक्रंतत्परिमाणकम्।
वचाचतुष्पलंदत्त्वाशुक्तंतच्चचतुर्गुणम् ॥ १७२ ॥
त्रिफलायाःपलान्यष्टौमंजिष्ठायास्तथैवच।
पुनरष्टपलान्यस्ताअर्द्धदग्धानिधापयेत् ॥ १७३ ॥
पूगलेचशठीपत्रशरण्यम्बुददारुणः।
पलान्यष्टौविनिक्षिप्यंघृतस्यतुपलद्वयम् ॥ १७४ ॥
आद्येपाकेपचेदित्थंतैलंयावच्चतुर्गुणम्।
गालयित्वापरंकुर्यात्तत्रपाकत्रयंबुधः ॥ १७५ ॥
चण्डाचलमरुच्छत्रात्वक्पत्रीचोलशैलजम्।
विषाणवीरणग्रन्थिदेवताकुसुमानिच ॥ १७६ ॥
प्रत्येकमेषांचत्वारिपलान्यादायगान्धिकः।
पाकंद्वितीयंतैलस्यकारयेत्क्रमयोगतः १७७ ॥
स्पृक्कामांसीमुरावालंलवंगच्छलिकामला।
नगुरुकाष्ठखोटीचचम्पकुन्दुप्रियङ्गवः ॥ १७८ ॥
एषांखट्टासिकायाश्चप्रत्येकञ्चपलद्वयम्।
आदायकारयेत्पाकंतृतीयंगंधकोविदः ॥ १७९ ॥
फणिलावलताकोलफलैलागुरुसिह्लकैः।
त्वक्कोषार्कैर्द्विपलिकैरितिपाकचतुर्थकः ॥१८०
वेधपलयुगेनेन्दोर्म्मदस्यत्वष्टभिःपलैः।
गन्धराजाह्वयतैलमिदंनृपमनोहरम् ॥ १८१ ॥

अर्थ-तिलोंका तेल एक आढक, तक्र एक आढक, वच चारपल, शुक्तनामवाली काँजी १६ सोलह पल, त्रिफला आठपल, आधाभुना हुआ मजीठ आठपल और सुपारीके वृक्षकी छाल, कचूर, तेजपात, पसरन, नागरमोथा, और चीता, यह प्रत्येक आठपल, तथा घृत आठ तोले लेवै, सबको विधिपूर्वक मिलाके प्रथम पाककरै, फिर वस्त्रमें

छानकर चोरक, सुगंधद्रव्य, दालचीनी, मरुआ, सौंफ, गंगापत्री, बोल, भूरिछरीला, कूठ, खस, पीपलामूल और लोंग, यह प्रत्येक चारपल मिलाकै दूसरा पाककरै, फिर वस्त्रमें छानकर स्पृक्का (असवरग) बालछड, कपूरकचरी, सुगंधवाला, लोंगकीछाल, भुई आमला, अगर, लोवान, चम्पाकी कली, कुन्दुरु, फूलप्रियंगू और खट्टाशमुष्क यह प्रत्येक दोपल, मिलाकै तृतीय पाककरै, फिर इसको वस्त्रमें छानकर सफेदचंदन, लोंग, लता, कस्तूरी, शीतलचीनी, जायफल, इलायची, अगर, शिलारस, दालचीनी, जावित्री और केशर, यह प्रत्येक आठ आठ तोले मिलाकै चौथीवार पकावै, फिर इसमें २ पल कपूर और आठ पल कस्तूरी मिलालेवै । यह गंधराजतैल सर्वप्रकारके वातरोगोंको दूर करैहै ॥ १७२ ॥ १७३ ॥ १७४ ॥ १७५ ॥ १७६ ॥१७७॥ ॥ १७८ ॥ १७९ ॥ १८० ॥ १८१ ॥

पंचपल्लवतोयेनगंधानांक्षालनंतथा ।
शोषणंचापिसंस्कारोविशेषश्चात्रवक्ष्यते ॥ १८२ ॥
आम्रजम्बुकपित्थानांबीजपूरकबिल्वयोः ।
गंधकर्मणिसर्वत्रपत्राणिपंचपल्लवम् ॥ १८३ ॥

अर्थ–पंचपल्लवके जलसे सर्वगंधद्रव्य धोकर धूपमें सुखाने चाहिये। आम, जामन, कैथ, बिजोरा और बेल इन पांच वृक्षोंके पत्तोंको पंचपल्लव कहतेहैं ॥ १८२ ॥ १८३ ॥

चण्डीगोमयतोयेनयदिवातिन्तिडीजलैः ।
नखंसंक्वाथयेदेभिरभावेमृज्जलेनतु ॥ १८४ ॥
पुनरुद्धृत्यप्रक्षाल्यभर्जयित्वानिषेचयेत् ।
गूडपथ्याम्बुनाह्येवंशुध्यतेनात्रसंशयः ॥ १८५ ॥
सम्मर्द्यचन्दनाद्यैस्तुवासयेत्कुसुमैःशुभैः ॥ १८६ ॥
(चण्डीमहिषीमृत्तिकाकृष्णाग्राह्याकुसुमैर्जातीमल्लिकावकादिभिः । अधिवासनञ्चशरावसंपुटेकृत्वा एवं सर्वेषामेवशुद्धानामधिवासनंज्ञेयम् ।)

इतिनखीकर्कटशुद्धिः ।

अर्थ-भैंसके गोवरके रस अथवा इमलीके जलमें या काली मट्टीके काथमें नखद्रव्यको औटावै, फिरगंधोदकसे धो घीमें भून गुड मिलाकर हरडोंके जलमें भिजोवै, फिर धूपमें सुखाकर चंदनादिसे मर्दनकर चमेली, मोतिया, आदिके फूलोंके सुवासित करलेवै तौ नखद्रव्य शुद्ध होजाताहै ॥ १८४ ॥ १८५ ॥ १८६ ॥

गोमूत्रेचालम्बुषकेपक्त्वापंचदलोदके।
पुनःसुरभितोयेनास्विन्नमातपशोषितम् ॥ १८७ ॥
गुडाम्बुनासिच्यमानंभर्जयेच्चूर्णयेत्ततः ॥ १८८ ॥

इति वचाहरिद्राशुद्धिः।

अर्थ-वच और हलदीको गोमूत्र और गोरखमुंडीके काथमें तथा पंचपल्लवके काथमें पका गंधकोदकमें भिजोके धूपमें सुखावै, फिर गुड़के सरबतमें भिजोकर सुखा देवै,तदनंतर अग्निमें भूनकर चूर्ण करले तौ वच और हलदी शुद्ध होजातीहै ॥ १८७ ॥ १८८ ॥

मुस्तकंचमनाक्क्षुण्णंकांजिकेत्रिदिनोषितम्।
पंचपल्लवतोयेनस्विन्नमातपशोषितम् ॥ १८९ ॥
गुडाम्बुनासिच्यमानंभर्जयेच्चूर्णयेत्ततः।
आजसौभांजनजलैर्भावयेच्चेतिशुध्यति ॥१९०॥
अजस्यजलंमूत्रम्।

इति मुस्तकशुद्धिः।

अर्थ-नागरमोथेको कूट तीन दिन तक काँजीमें भिजो रक्खै, फिर पंचपल्लवके जलमें पकाकर सुखालेवै फिर गुडके सरबतमें भिजोकर भूनकै चूर्ण करले पश्चात् बकरीके मूत्र और सैजिनेके रसकी भावना देवैतौ नागरमोथा शुद्ध होजाता है ॥ १८९ ॥ १९० ॥

कांजिकक्कथितंशैलंभृष्ट्वापथ्यागुडांबुना।
सिंचेदेवंततःपुष्पैर्विविधैरधिवासयेत् ॥ १९१ ॥
कांजिकेविपच्यपंचपल्लवतोयेनक्षालनमित्युपदेशः)

इति शैलजशुद्धिः।

अर्थ-प्रथम भूरिछरीलेको कांजीमें पकाकर पंचपल्लवके जलसे धोलेवै फिर अग्निपै भूनकर हरड और गुडके जलमें भिजोकै अनेकप्रकारके सुगंधित पुष्पोंसे सुवासितकरले तौ भूरीछरिला शुद्ध होजाताहै ॥१९१

यथालाभमपामार्गस्नुहादिक्षीरलेपितम्।
बाष्पस्वेदेनसंस्वेद्यपूतिनिर्लोमतांनयेत् ॥ १९२ ॥
दोलापाकंपचेत्पश्चात्पंचपल्लववारिणि।
खलःसाधुमिवोत्पीड्यततोनिःस्नेहतांनयेत् ॥ १९३ ॥
आजसौभांजनजलैर्भावयेच्चपुनःपुनः।
शिग्रुमूलेचकेतक्याःपुष्पपत्रपुटेचतम् ॥ १९४ ॥
पचेदेवंविशुद्धःसन्मृगनाभिसमोभवेत् ॥ १९५ ॥

इति खट्टासीशुद्धिः।

अर्थ-चिरचिटा और थूहरके दूधसै खट्टाशीको लपेटकर वाफसे स्वेदन करै, तौ यह दुर्गन्धरहित और रोमशून्य होजावै, फिर पंच-पल्लवके जलमें दोलायंत्रकेद्वारा पकाकर निचोड़ लेवै तौ खट्टाशी स्नेहरहित होजाय। पश्चात् बकरीके मूत्र और सैजिनेके रसमें वारंवार भावना देकर सैजिनेके जड, केतकीके फूल, तथा पत्रोंसे पुट बना उसमैं खट्टाशीको रख पकावै, इसप्रकार करनेसे खट्टाशी शुद्ध होकर कस्तूरीकी समान होजातीहै ॥ १९२ ॥ १९३ ॥ १९४ ॥ १९५ ॥

सिह्लकंमधुनाभाव्यंकुंकुमञ्चापिसर्पिषा।
कुंकुमेनागुरुप्राज्ञैर्गोमूत्रेग्रन्थिपर्णकम् ॥ १९६ ॥
मधूदकेनमधुरीपत्रकंतण्डुलाम्बुना।
(भाव्यमितिसर्वत्रयोज्यम्)
कुष्ठंपंचदलोत्स्वन्नमौर्वीकुन्दुरुधूपितम् ॥ १९७ ॥
वासितंकुसुमैरेभिःशुद्धिमायातिनिर्म्मलाम्।
ध्यामकश्चूर्णितःशुद्धिंशर्कराजलसेचितम् ॥ १९८ ॥
घृतगुग्गुलुधूपेनयातिचन्दनवासितः।
(ध्यामकोगंधतृणम्)

कुन्दुरुश्चूर्णितोऽत्यर्थंकुंकुमेनाविमर्दितः ॥ १९९ ॥
धूपितेगुडसर्जाभ्यांवासितःशुध्यतेतराम्।
रेणुकोभावितोऽत्यर्थंमधुनातक्रभावितः ॥ २०० ॥
आतपेशोषितःपुष्पवासितःशुद्धितामियात्।
सर्वेषांगंधवस्तूनांपंचपल्लववारिणा ॥ २०१ ॥
गंधाम्बुनाचकर्त्तव्यंक्षालनंरौद्रशोषणम्।
ततोगुग्गुलुतोयेनसिक्तायुक्त्यातुभर्जयेत् ॥ २०२ ॥
(कुष्ठादिकन्तुनभर्जनीयम्) यदुक्तम्।
रुग्ग्रन्थिलघुनिर्यासपत्रपुष्पफलेषुच।
चन्दनेनचकर्त्तव्यंभर्ज्जनंगंधकोविदैः ॥ २०३ ॥

अर्थ-शिलारस सहतमें भिजोनेसै शुद्ध होजाताहै। केशर घृतमें, अगर केशरमें, गठीवन गोमूत्रमें, सौंफ मधूदकमें, और तेजपात चावलोंके पानीमें भिजोनेसै शुद्ध होताहै। कूटको पंचपल्लवके जलमें पकाकै मूर्वा और कुन्दुरुकी धूपदेवै, फिर सुगंधित पुष्पोंसै सुवासित करैतौ कूट शुद्ध होजाताहै। गंधतृणोंका प्रथम चूर्णकर फिर खांडके सरबतमें भिजोके घृतयुक्त गूगलकी धूपदेवै, पश्चात् चंदनादिकसै सुवासित करलैतौ गंधतृण शुद्ध होजातेहैं। कुन्दुरुका अत्यन्त बारीक चूर्णकरकै केशरके साथ पीसै, फिर गुड और रालकी धूप देकर पुष्पोंसे सुवासित करलैतौ कुन्दुरु शुद्ध होजाताहै। रेणुकाको सहत और तक्रमें भावना देकर सुखालेवै फिर पुष्पोंसै सुवासित करनेसै रेणुका शुद्ध होजातीहै। सर्व प्रकारके गंधद्रव्योंको पंचपल्लवोदक और गंधोदकसै धोकर धूपमें सुखालेवे फिर गूगलके क्काथमें भिजोकर भूनलेवै, परन्तु कुष्ठादि गंध द्रव्योंको नभूने, कूठ, गठिवन, अगर, सर्वप्रकारके गोंद, पत्र, पुष्प और फल, इन सबको चन्दनके साथ भूनना चाहिये ॥ १९६ ॥ १९७ ॥ ॥ १९८ ॥ १९९ ॥ २०० ॥ २०१ ॥ २०२ ॥ २०३ ॥

केतकीयूथिकाजातिश्चम्पकश्चातिमुक्तकः।
कदम्बोमाल्लिकानागःपुन्नागःकुटजस्तथा ॥ २०४ ॥

पाटलाकरुणामौर्वीपुष्पैरेभिःसमाचरेत् ।
वासनंदवसंभिन्नैस्तथान्यैरपिशोभनैः ॥ २०५ ॥
शोधिताशोधितंद्रव्यंनकुर्यादेकभाजने ।
असाधुसंगतःसाधुरप्यसाधुर्यतोभवेत् ॥ २०६ ॥
पीतःकिंचिल्लघुरतिशयंकेतकीतुल्यगंधः ।
स्निग्धोगन्धोमिसिमिसिकरोभस्मभावंनयाति ॥
ईषत्तिक्तःकटुरपिमनाक्क्षारगंधानुविद्धम् ।
शुद्धःसम्यक्मदइतिमहीपालयोग्योमनोज्ञः ॥ २०७ ॥
करस्थतोयेनिक्षिप्ताकस्तूरीचेन्मुहूर्ततः ।
रक्तापित्तंजलंकुर्यात्वकृत्रिमांतांतदाभवेत् ॥ २०८ ॥
पक्वात्कर्पूरतःप्राहुरपक्वंगुणवत्तरम् ।
अत्रापिस्याद्यदक्षुद्रंस्फटिकाभंतदुत्तमम् ॥ २०९ ॥
आकृष्यमाणंयच्चापिकरेरेफाकरंभवेत् ।

अत्राद्यपक्के ।

पक्वञ्चसदलंस्निग्धंहरितद्युतिचोत्तमम् ॥ २१० ॥
भङ्गेमनागपिनचेन्निपतन्तिततःकणाः ।
चन्दनंगुरुगंधाढ्यंरक्तसारंविदुर्बुधाः ॥ २११ ॥
मध्यमंपीतसारंस्यादधमंपाण्डुरच्छवि ।
विशेषेणगुणस्तत्रग्रन्थिकोटरसंगताः ॥ २१२ ॥
आकृष्णमुत्तमंमूलंरक्तच्छायञ्चमध्यमम् ।
आरक्तंमध्यमंविद्धिरक्तचंदनकन्त्रिधा ॥ २१३ ॥
काकतुण्डच्छविस्निग्धंगुरुचागुरुशस्यते ।
मध्यंतित्तिरपक्षाभंहेयंशाल्मलिकाष्ठवत् ॥ २१४ ॥
रक्तास्निग्धंसुगंधंचसरलंसम्मतंसताम् ।

स्निग्धंसुगन्धिलघुचदेवदारुप्रशस्यते ॥ २१५ ॥
खट्टासीधूपजःश्रेष्ठोवर्चलोमांसलश्चयः ।
मृगशृंगोपमंकुष्ठंकीटदोषोज्झितंमतम् ॥ २१६ ॥
किंचित्पीतामुराशस्तामांसीपिंगजटाकृतिः ।
शैलजःशुकपिच्छाभोजलाग्निभ्यामदूषितः ॥ २१७ ॥
वेणुकोमुद्गतुल्योऽत्रश्रेष्ठःस्थूलस्तुनिन्दितः ।
मुस्तंशस्तमनूपोत्थंनिशास्थूलाऽरुणान्तरा ॥ २१८ ॥
जातीफलंसशब्दंचगुरुस्निग्धंप्रशस्यते ।
एलाकक्कोलबीजाभाग्राह्यालोकोऽत्रवाकृतिः ॥ २१९ ॥
एलासूक्ष्मबीजाश्रेष्ठेऽत्यर्थः ।
कक्कोलाभाचकर्पूरश्वेताश्रेष्ठात्रुटिर्मता ।
कक्कोलकंगुरुस्निग्धंसूक्ष्माद्राग्रस्थितंशुभम् ॥ २२० ॥
गुडत्वक्सुरसाभद्रासुदृढाकीटवर्जिता ।
ग्रन्थिकापाण्डवःकिंचित्कनिष्ठामध्यमंमतः ॥ २२१ ॥
उत्तमःकृष्णवर्णोयःस्थूलोऽतीवसानिन्दितः ।
शस्ताप्रियंगूर्वापाण्डुशामाकीटैरदूषिता ॥ २२२ ॥
मलकोष्ठोज्झितंशस्तंसर्जश्रीवासकुन्दुरु ।
सिह्लकस्तुस्वच्छःपिङ्गःशस्तोमधुनिभोऽधमः ॥२२३॥
भूकेशःसूक्ष्ममूलोऽत्रशस्यतेसरसोनवः ।
कीटाग्नितोयैरक्लिष्टंसरसंपत्रकंशुभम् ॥ २२४ ॥
दीर्घमूलंदृढंस्निग्धंपुराणंद्रवसंयुतम् ।
देशेसाधारणेजातमुशीरंभद्रकम्भवेत् ॥ २२५ ॥

अर्थ—केतकी, जुही, चमेली, चम्पा, अतिमुक्तक, कदम्ब, मल्लिका, नागकेशर, पुन्नाग, कुड़ा, पाढ़ल, करुणी और मौर्वी, इनके फूलोंमें तथा अन्यान्य सुगंधित पुष्पोंमें गंधद्रव्यको सुवासित करनाचाहिये । शोधित

और अशोधित दोनों द्रव्योंको कदापि एक बासनमें न रक्खै, कारण यह है कि-दुर्जनकी संगतिसे सज्जनभी दुर्जन होजाते हैं। (कस्तूरीपरीक्षा) कुछेक पीतवर्ण हो, तोलमें अत्यन्त हलकीहो, जिसमें केतकीके फूलोंके समान गंध आतीहो, स्निग्ध, अत्यन्त सुगंधयुक्त, अग्निमें डालनेसै भस्मभावको न प्राप्त होवै और मिसिमिसि ऐसा शब्द करै, स्वादमें किंचित्कडवी और चरपरीहो और अल्पक्षारगंधयुक्तभीहो ऐसी कस्तूरी उत्तम और राजाओंके योग्य होतीहै।

हाथमें जलको स्थापनकर उसमें कस्तूरीको डालदेवै, एकमुहूर्त्तमें वह जल लाल पीले रंगका होजायतौ उसको कृत्रिम कस्तूरी जाननी। पक्क कर्पूरसे अपक्व कर्पूर अधिक गुणवालाहै, और कच्चे कपूरमेंभी जो अक्षुद्र, स्फटिककी कान्तिसमान निर्मल और जिसके लगनेसै हाथमें रेखा पड़जाय वह कपूर अत्युत्तम होताहै। दलयुक्त, स्निग्ध, हरितमणिकी समान प्रकाशमान और अल्पतोडनेसेभी जिसमें कण गिरनेलगैं ऐसा पक्क कपूर उत्तम होताहै, सफेदचंदन-भारी, अत्यंतगंधयुक्त और लाल गूदेवाला उत्तम होताहै, पीले गूदेका मध्यम और पाण्डु वर्णका अधम होताहै। विशेष करकै ग्रन्थि और कोटरसंयुक्त सफेद चन्दन उत्तम होताहै। लालचन्दन तीन प्रकारकाहै, तहाँ जिसका मूल किंचित् कृष्णवर्णहो ऐसा उत्तम होताहै, जिसका रक्तवर्णहो वह मध्यम, और जिसका मूल अल्प रक्तवर्णहो उसको अधम जानना। अगर कौवेकी तुण्डकी समान रंगवाली स्निग्ध और भारी उत्तम होतीहै, तीतर पक्षीके परोंकी समान रंगवाली मध्यम, और सेमलकी समान रंगवाली अधम होतीहै। सरल काष्ठ-स्निग्ध, सुगंधित और रक्तवर्ण होतौ उत्तम होताहै। देवदारु-स्निग्ध, सुगंधित और हलकी उत्तम होतीहै। खट्टाश मुष्क-धूपज और शब्दयुक्त तथा मांसल श्रेष्ठ होतीहै। कूठ-मृगके सींगके समान और कीटदोष वर्जित उत्तम होताहै। किंचित् पीली कपूरकचरी उत्तम होती है। बालछड पिंगवर्ण और जटाकी समान आकृतिवाली उत्तम होती है। जो तोतेकी पूंछकी समानहो, जल और अग्निसै न विगड़ाहो ऐसा भूरिछरीला उत्तम होताहै। रेणुका-मूंगकी समान उत्तम होतीहै और स्थूल निन्दित होतीहै। नागरमोथा-अनूपदेशमें उत्पन्न होनेवाला उत्तम होताहै, हलदी मोटी और भीतरसै लाल उत्तम होतीहै, जायफल शब्दयुक्त भारी और चिकना उत्तम होताहै। इलायची-कंकोलकी समान सूक्ष्म-

बीजोंवाली उत्तम होतीहै, छोटी इलायची कंकोलकी समान प्रभावाली कपूरकी समान धवल और छोटेबीजोंकी उत्तम होतीहै, शीतलचीनी-भारी, चिकनी और सूक्ष्मअग्रभागवाली उत्तम होतीहै। उत्तम रसवाली दृढ और कीडे आदिने नखाई हो, ऐसी दालचीनी उत्तम होतीहै, पाण्डु-वर्ण और छोटा पीपलामूल मध्यम होताहै, कालेरंगका पीपरामूल उत्तम होताहै और अत्यंत मोटा पीपरामूल अधम होताहै। फूलप्रियंगू-पाण्डुवर्ण, श्यामवर्ण और कीडे आदिका नखाया उत्तम होताहै, राल, श्रीवास और कुन्दुरु यह कीट आदिसे न विगडे हुए उत्तम होतेहैं। शिला-रस स्वच्छ और पिंगलवर्णका उत्तम होताहै, और सहतकी समान कान्तिवाला अधम होता है, सूक्ष्मजड़वाला, उत्तमरसयुक्त और नवीन उत्तम होताहै, तेजपात-कीड़े, अग्नि और जलसे नबिगड़ा हुआ और सरस उत्तम होता है, खस-बड़ी जड़वाली, दृढ़, स्निग्ध, पुरानी, रससं-युक्त, और साधारण देशमें उत्पन्न होनेवाली उत्तम होती है ॥ २०४ ॥ ॥ २०५ ॥ २०६ ॥ २०७ ॥ २०८ ॥ २०९ ॥ २१० ॥ २११ ॥ २१२॥ ॥ २१३ ॥ २१४ ॥ २१५ ॥ २१६ ॥ २१७ ॥ २१८ ॥ २१९ ॥ २२० ॥ ॥ २२१ ॥ २२२ ॥ २२३ ॥ २२४ ॥ २२५ ॥

ग्राह्याप्रशोष्यसम्यक्चम्पककलिकाप्रदीपकलिकैव।
कीटादिदोषविरहितमभिनवमितिकेशरंग्राह्यम् ॥२२६॥
अत्युग्रापिसरागापिग्रन्थिलापिपदेपदे।
अन्तःशुद्धित्वमात्रेणवचाबाह्यत्वमुज्झति ॥ २२७ ॥
असारमध्यसबलानिष्कीटानालिकामता।
गजकर्णाश्वखुरकौबदर्युत्पलपत्रकौ ॥ २२८ ॥
वराहकर्णःपंचैतेनखास्त्याज्या इहान्तिमाः।
नामानुरूपातसात्रते।
लाक्षाचनूतनाग्राह्यामृत्तिकादिविवर्जिता ॥ २२९ ॥
कुसुम्भंनूतनंस्पृक्कामव्यापन्नांनवांविदुः।
चौरपुष्पींनवांश्यामामामनन्तिमनीषिणः ॥ २३० ॥
मध्यपाकोगुडःश्रेष्ठोनिर्मलःकाष्ठवर्जितः ॥

हरीतकीचिह्नंरसायनाऽध्यायेऽस्ति ।
भाद्रव्यांकीर्तितंयेषांविरुद्धत्वंनकीर्त्तितम् ॥ २३१ ॥
तेषांतद्विपरीतत्वाद्विरुद्धमपिलक्षयेत् ।
एतेषामपरेषाञ्चनवातप्रभवोगुणः ॥ २३२ ॥
मांसीपत्रंमुरादारुकेशरंकुष्ठरेणुकम् ।
एलाप्रियंगुकाश्मीरंमिथोमित्रगणोमतः ॥ २३३ ॥
परमागुरुपत्राम्बुचौराब्दश्वेतचंदनम् ।
नखीग्रन्थिकचोरस्पृग्देवपुष्पीतुमध्यमः ॥ २३४ ॥

स्पृक्स्पृक्का

श्रीवासतैलेमदकुन्दचन्द्रामिसिद्धिषड्गंइतिप्रकीर्तितः ।
भागक्रमात्तैलविधौविधेयोभवेदमाषांसकलोर्द्धपादिकः॥२३५
सुगन्धितैलपाकार्थंबालानांगंधयोजनम् ॥ २३६ ॥

अर्थ—चम्पाकीकली—दीपककी कलिकाकी समान दीप्तवान् लेनी चाहिये, नागकेशर कीटादि दोषसे रहित और नवीन उत्तम होती है, बच—अत्यन्त उग्र, रागयुक्त, और बहुत गाठोंवाली उत्तम होती है, जो सारही नहो, जिसका मध्यभाग बलवान्हो, और जो निष्कीट हो ऐसी नलिका उत्तम होती है, हस्तिकर्ण, अश्वखुर, बेरीकेपत्र, उत्पल-पत्र और वराहकर्णके सदृश, ऐसे पाँचप्रकारके नख होते हैं, इनमें वराहकर्णकी समान नख त्यागना चाहिये, लाख नवीन और मृत्ति-कादिसै रहित उत्तम होती है, कसूमके फूल नवीनही उत्तम होते हैं,और असवरगभी नवीनही उत्तम होतीहैं, चोरपुष्पी नूतन और श्यामवर्ण उत्तम होती है; गुड मध्यमरीतिसै पकाया हुवा निर्मल और तृणआदिसै रहित उत्तम होताहै, हरड़के लक्षण रसायनाध्यायमें लिखेहैं। जिन द्रव्योंको श्रेष्ठ कहाहै उनमें विरुद्धता नहीं कही है, और उनमें विपरीत-गुणयुक्त होनेके कारण उनको विरुद्धभी कहाहै । इन द्रव्योंमें तथा अन्यान्य द्रव्योंमें वातजनित गुण नहीं है। जटामांसी (बालछड), तेजपात, कपूरकचरी, देवदारु, नागकेशर, कूठ, रेणुका, इलायची, फूलप्रियंगू और केशर, इनसब मिलेहुए द्रव्योंको मित्रगण कहते

हैं। गंधशठी (कपूर कचरी , अगर, तेजपात, सुगंधवाला, चोरद्रव्य नागरमोथा, सफेदचंदन, नखीद्रव्य, गठिवन, चोरक (चोरपुष्पी), असवरग और लोंग, इनसबको मध्यमगण कहतेहैं। श्रीवास, शिलारस, कस्तूरी, कुन्दुरु, कपूर, और, सोंफ, इनको षड्वर्ग (शत्रुवर्ग) कहते हैं। इनकी मात्रा तेलके बनानेमें क्रमसै उत्तरोत्तर चौथाई भाग कम लेनी चाहिये। और सुगंधित तैल बनानेमें सुगंधवाला आदि सुगंधित औषधि डालनी चाहिये ॥ २२६ ॥ २२७ ॥ २२८ ॥ २२९ ॥ २३० ॥ ॥ २३१ ॥ २३२ ॥ २३३ ॥ २३४ ॥ २३५ ॥ २३६ ॥

शुद्धसूतंमृतंलोहंताप्यगंधकतालकम् ।
पथ्याग्निमंथनिर्गुण्डीत्र्यूषणंटंगणंविषम् ॥ २३७ ॥
तुल्यांशंमर्दयेत्खल्वेदिनंनिर्गुण्डिकाद्रवैः ।
शुण्ठीद्रावैर्दिनैकन्तुद्विगुंजांवटकीकृताम् ॥ २३८ ॥
भक्षयेत्सर्वशूलार्त्तोनाम्नास्वच्छन्दभैरवः ॥ २३९ ॥

इति स्वच्छन्दभैरवरसः ।

अर्थ-शुद्धपारा, लोहेकीभस्म, सोनामाखी, गंधक, हरिताल, हरड़ अरणी, निर्गुण्डी, त्रिकुटा, सुहागा और विष, इनसबको समान भाग लेकर एकदिन सम्हालुके रसमें खरल करै, फिर एकदिन सोंठके रसमें खरल करै, पश्चात् दो गुंजाभरकी, गोली बनावैतौ स्वच्छन्दभैरव रस सिद्धहो, यह स्वच्छन्दभैरवरस सर्वप्रकारके शूलोंको दूर करैहै ॥ ॥ २३७ ॥ २३८ ॥ २३९ ॥

अमृतादेवकाष्ठञ्चशुण्ठीवातारितैलकम् ।
गुग्गुलुंसर्वतुल्यांशंकुट्टयेच्चसदादृढम् ॥ २४० ॥
कर्षांशंखादयेच्चापिख्यातंषडङ्गगुग्गुलुम् ॥ २४१ ॥

इति षडंगगुग्गुलु ।

अर्थ-गिलोय, देवदारु, सोंठ, एरण्डकातेल, यह सब समान भाग लेवै और सबकी बराबर गूगल लेवै, सबको कूठ पीसकै एक तोलेभर प्रतिदिन खावैतौ सर्वप्रकारके वातशूल दूर होवैं, इसको षडंग-गूगल कहतेहैं, और कोई वैद्य इसको स्वच्छन्दभैरवरसका अनुपान कहतेहैं ॥ २४० ॥ २४१ ॥

त्र्यूषणंपिप्पलीमूलंचित्रकंरजनीद्वयम् ।
अजमोदायवानीचपथ्यातुल्यासुवर्चलैः ॥ २४२ ॥
सैन्धवंवाकुचीबीजंयवक्षारंविडंवचा ।
प्रत्येकश्चत्रिमाषन्तुसर्वंतुल्यंचगुग्गुलुम् ॥ २४३ ॥
अम्लवेतसकर्षैकंकिञ्चिदाज्येनकुट्टयेत् ।
गुटिकाचहितावातेसामेसंध्यास्थिमज्जगे ॥ २४४ ॥
दृढंकरोतिभग्नंचजठरानलदीपनी ॥ २४५ ॥

इति त्र्यूषणादिगुटिका ।

अर्थ-त्रिकुटा, पीपरामूल, चीता, हलदी, दारुहलदी, अजमोद, अजवायन, हरड़, कालानोन, सैंधानोन, बापचीके बीज, जवाखार, विरिया संचरनोन और बच, यह प्रत्येक तीनतीन मासे और सबकी बराबर गूगल लेवै, और अमलवेंत दोतोले लेवै, फिर सबको एकत्र पीसकै गोली बनालेवै, यहगोली वातरोग, आमवात, संधिगतवात, अस्थिगत वात, मज्जागत वात, इन सब वातविकारोंको दूरकरैहै, टूटे-हाडोंको जोड़देवै, और अग्निको दीपन करैहै॥२४२॥२४३॥२४४॥२४५

क्रमोत्तरगुणंशुद्धंरसंगंधंफलत्रिकम् ।
चित्रकंगुग्गुलुंपञ्चमर्द्यमेरण्डतैलकैः ॥ २४६ ॥
पुन्नागबृहतीयुग्मदेवदारुसुचूर्णितम् ।
एतत्पूर्वौषधिसमंमर्दयेद्यामात्रकम् ॥ २४७ ॥
कर्षंखादेत्पिबेत्क्वाथंनागरैरण्डमूलकैः ।
संमर्द्यैरण्डतैलेनपृष्ठेस्वेदञ्चकारयेत् ॥ २४८ ॥
विरेचनंभवेत्तेनस्निग्धमुष्णञ्चभोजनम् ।
रसोवातारिनामायंसर्ववातहरःपरः ॥ २४९ ॥

इति वातारिरसः ।

अर्थ-पारा एक भाग, गंधक दोभाग, त्रिफला तीनभाग, चीता चारभाग, गूगल पाँचभागलेवै, सबको अंडके तेलमें एक प्रहरतक मर्दनकरै, फिर इसमें पुन्नागके पुष्प, कटाई, कटेरी और देवदारुका

चूर्णमिलाकै एकप्रहर खरल करैतौ वातारिनामकरस सिद्धहो, इसको एक तोलाभर खावै और ऊपरसे सोंठ और अण्डकी जडका क्वाथ पीवै तथा रोगीके शरीरमें अंडीके तेलका मालिस करावै, और पृष्ठभागमें स्वेदप्रदान करै, इसप्रकार करनेसे जुल्लाब होजाताहै। चिकने और गरम भोजनकरै, यह वातारिनामक रस सर्वप्रकारके वातविकारोंको दूर करैहै ॥ २४६ ॥ २४७ ॥ २४८ ॥ २४९ ॥

सूतवज्रार्ककान्तानांभस्ममाक्षिकहाटकम्।
तालंनीलांजनंतुत्थमहिफेनसमांशिकम् ॥ २५० ॥
पंचानांलवणानांचभागैश्चैकंविमर्दयेत्।
वज्रीक्षीरैर्दिनैकन्तुरुद्धातंभूधरेपचेत् ॥ २५१ ॥
माषैकंचार्द्रकद्रावैर्लेहयेद्वडवानलम्।
पिप्पलीमूलजंक्काथंपिप्पल्यासहपाचयेत् ॥ २५२ ॥
धनुर्वातंदण्डवातंशृंखलावातकंजयेत् ॥ २५३ ॥

इतिवडवानलरसः।

अर्थ–पारेकीभस्म, हीरेकीभस्म तांबेकीभस्म, कान्तलोहेकी भस्म सोनामाखीकी भस्म, सोनेकी भस्म, हरिताल, नीलासुर्मा, नीलाथोथा, समुद्रफेन और पांचोनोन, प्रत्येक एकएक भागलेवै, सबको एकत्र कर थूहरके दूधमें एकदिन खरल करै, फिर भूधरयंत्रमें फूँकदेवै तौ वडवानल रस सिद्धहो, इसको एकमासेभर, अदरखके साथ खावै और ऊपरसै पीपलके साथ पीपलामूलका क्वाथ पान करै तौ धनुर्वात, दण्डवात और शृंखलादि वातविकार दूर होवै ॥ २५० ॥ २५१ ॥ ॥ २५२ ॥ २५३ ॥

मृतंसूतंतीक्ष्णकान्तंतालंमाक्षिकगंधकम्।
तुल्यांशंमर्दयेद्द्रावैर्विदार्यार्द्रकसम्भवैः ॥ २५४ ॥
भृंग्युत्थैःकाकमाच्युत्थैर्गिरिकर्णीद्रवैर्दिनम्।
संमर्द्यभांडगंरुद्धापचेन्मन्दाग्निनादिनम् ॥ २५५ ॥
व्योषाग्निगंधकाविषैःसरण्याभयाटङ्कणैः।

समांशैश्चूर्णितंमिश्रैस्तुल्यांशंपूर्वपातितम् ॥ २५६ ॥
त्रिदिनंमर्दयेद्द्रावैर्मुण्डीनिर्गुण्डीभृंगजैः ।
अष्टगुंजामितंखादेद्रसःस्वच्छन्दनायकः ॥ २५७ ॥
सर्ववातहरःख्यातोह्यनुपानमिदंपिबेत् ।
लशुनंसैन्धवंतैलंकर्षमात्रंसुखावहम् ॥ २५८ ॥

इति स्वच्छन्दनायकरसः ।

अर्थ–पारेकीभस्म, तीक्ष्णलोहा, कान्तलोहा, हरिताल, सोनामाखी और गंधक प्रत्येक समान भागलेवै, सबको एकत्रकर विदारीकन्द, अदरख, अतीस, मकोय और विष्णुक्रान्ता (कोयल), इन प्रत्येकके रसमें एकएकदिन खरल गोलाबनालेवै, उस गोलेको हाँडीमें रखके मृदु अग्निसे एकदिन पकावै, फिर त्रिकुटा, चीता, गंधक, विष, प्रसारिणी, हरड और सुहागा समानभागले; सबका चूर्णकर उक्तगोलेमें मिलादेवै, फिर इसको गोरखमुण्डी, सम्हालु और भांगरेके रसमें तीनदिन खरलकरै तौ स्वच्छन्दनायक नामवाला रस सिद्धहो, इसको आठ चौटलीभर खवै और ऊपरसै लशुन, सैंधानोंन और तिलोंका तेल मिलाकर दो तोलेभर पीवै तौ सर्वप्रकारके वातरोग दूर होवैं ॥ २५४ ॥ २५५ ॥ २५६ ॥ २५७ ॥ २५८ ॥

गंधकाष्टगुणंसूतंशुद्धंमृद्वग्निनाक्षणम् ।
पक्वावतार्यसंचूर्ण्यचूर्णतुल्याभयायुतम् ॥ २५९ ॥
सप्तगुंजामितंखादेद्वर्द्धयेच्चदिनेदिने ।
गुंजैकैकंक्रमेणैवयावत्स्यादेकविंशतिः ॥ २६० ॥
क्षीराज्यशर्कराभिश्चशाल्यन्नंपथ्यमाचरेत् ।
कम्पवातप्रशान्त्यर्थंनिर्वातेनिवसेत्सदा ॥ २६१ ॥
द्विगुणाख्योरसोनामात्रिपक्षात्कम्पवातजित् ॥ २६२ ॥

इति द्विगुणाख्योरसः ।

अर्थ–गंधक एकभाग, और शुद्धपारा आठ भाग, दोनोंको क्षण भर मृदु अग्निसै पकावै, फिर उतारकर चूर्ण करले और इस चूर्णमें बराबरका हरडकाचूर्ण मिलालेवै, इसको पहिलेदिन सातरत्तीभर खावै

पश्चात् क्रमसे रोज रोज एकरत्ती बढ़ाकै खावै,ऐसे इक्कीस रत्तीतक खावै, इसपै दूध,घी,बूरा और शालिधानोंका भात सेवन करै । और कंपवातको शान्तकरनेके लिये रोगी निरंतर निर्वातस्थानमें रहै,यह त्रिगुणाख्यनाम-वालारस तीनपक्षमें कम्पवातको दूर करैहै ॥२५९॥२६०॥२६१॥२६२॥

मृताभ्रंतीक्ष्णताम्रञ्चसूततालकगंधकम् ।
भार्गीशुण्ठीवलाधान्यंकट्फलंचाभयाविषम् ॥ २६३ ॥
मर्द्यञ्चचपलाद्रावैर्निष्कैकंभक्षयेद्वटीम् ।
वातश्लेष्महराह्येषागुरुवातगजांकुशः ॥ २६४ ॥

इति वातगजांकुशः ।

अर्थ-अभ्रककीभस्म, लोहेकीभस्म, तांबेकीभस्म, पारेकीभस्म, शुद्ध-हरिताल, शुद्धगंधक, भारंगी, सोंठ, खिरैंटी, धनिया, कायफल, हरडै, और विष इन सबको समान मागले पीपलके क्राथमें खरल करकै दोदो मासेभरकी गोली बनालेवै, इन गोलियोंको सेवनकरनेसे-वातकफरोग और अत्यन्त बढ़ा हुआ वातरोग दूर होताहै, इसको वातगजांकुश रस कहतेहैं ॥ २६३ ॥ २६४ ॥

रसगंधशिलातालंचूर्णसंमर्द्यकांजिकैः ।
लिप्त्वावस्त्रेकृतावर्तिस्तैलाक्ताज्वालयेच्चताम् ॥ २६५ ॥
तद्द्रुतंग्राहयेत्तैलमधःपात्रेधृतेसति ।
तत्तैलेर्लेपयेद्गात्रंनागवल्यातुभक्षयेत् ॥ २६६ ॥
बाहुकम्पंशिरःकम्पमेकाङ्गंजानुकम्पनम् ।
नाशयेद्भक्षणाल्लेपात्तैलंविजयभैरवम् ॥ २६७ ॥

इति विजयभैरवतैलम् ।

अर्थ-पारा, गंधक, मैनसिल, और हरिताल, इनसबका चूर्ण करकै कांजीमें खरल करै, फिर इसको वस्त्रपै लपेटकर बत्ती बनालेवै, उन बत्तियोंको तेलमें भिजोके अग्निसै जलावै,उनके जलनेसे जो तेल नीचे-को गिरै उसको एक बासनमें लेलेवै, इसतेलको शरीरसे मलै, अथवा नागरपानपै लगाकर भक्षण करैतौ बाहुकंप, शिरकम्प, एकांगकम्प

और जानुकम्प दूर होवै, इसको विजयभैरव तैल कहते हैं ॥ २६५ ॥ ॥ २६६ ॥ २६७ ॥

मृतंसूतंमृतंताम्रंमर्द्दयेत्कटुकद्रवैः ।
एकविंशतिवारंचशोष्यंपेष्यंपुनःपुनः ॥ २६८ ॥
चणमात्रावटीभक्ष्यारसःसर्वाङ्गकम्पजित् ॥ २६९ ॥

इति सर्वांगकम्पारिरसः ।

अर्थ-पारेकीभस्म और ताँबेकी भस्म दोनोंको त्रिकुटेके रसमें खरल करै, पश्चात् खरल करके सुखा देवै, फिर खरल करै, इसप्रकार इकीसवार खरलकर चनेकी बराबर गोली बनाके खानेसे सर्वांगकम्परोग दूर होताहै, इसको सर्वांगकम्पारिरस कहते हैं ॥ २६८ ॥ २६९ ॥

सूतस्यचपलात्पञ्चपलैकंमृतताम्रकम् ।
जम्बीराणांद्रवैःपिष्टंसूततुल्यञ्चगंधकम् ॥ २७० ॥
नागवल्लीदलैःपिष्टांस्थित्वामूषांविलेपयेत् ।
रुद्ध्वालघुपुटेपच्यात्त्र्यूषणेनसमान्वितम् ॥ २७१ ॥
अर्द्धाङ्गकम्पवातार्तोभक्षयेच्चाद्रिगुंजकम् ॥ २७२ ॥

इति अर्द्धांगवातारिरसः ।

अर्थ-पारा वीस तोले और ताँबेकी भस्म चार तोले, इन दोनोंको जम्बीरी नीबूओंके रसमें पीसै, फिर इसमें पारेकी बराबर गंधक मिलाकर पानोंके रसमें पीसै, पश्चात् मूषामें रख मूषाका मुख बंदकर लघुपुटमें फूंक देवै । फिर इसरसमें त्रिकुटेका चूर्ण मिलाकर इसको दो रत्तीभर भक्षण करै तौ अर्द्धांगकंपवात दूर होवै ॥ २७० ॥ ॥ २७१ ॥ २७२ ॥

दाहसन्तापमूर्च्छाःस्युर्वातेपित्तसमन्विते ॥ २७३ ॥

अर्थ-पित्तसंयुक्त वातरोगमें दाह, सन्ताप, और मूर्च्छा उत्पन्न होतीहै ॥ २७३ ॥

मृतंसूतंमृतंताम्रंशिलातालंविषोषणम् ।
कुष्टंनागबलापथ्यात्रिकण्टञ्चविदारिका ॥ २७४ ॥

एरण्डंमर्दयेत्तुल्यंद्रवैश्चाग्निपुनर्नवैः।
निष्कमात्रांवटींखादेद्वातपित्तहराभवेत् ॥ २७५ ॥
इतिवातपित्तारिरसः।

अर्थ-पारेकीभस्म, तांवेकीभस्म, मैनशिल, हरिताल, विष, कालीमिरच, कूठ, गंगेरन, हरड, गोखरू, विदारीकन्द, और अण्डकी जड इन सबको समान भागलेकर चीते और पुनर्नवेके रसमें खरल करकै चारचार मासेकी गोली बनालेवै, एकगोली प्रतिदिन खानेसै वातपित्त रोग दूर होवै। इसको वातपित्तारिरस कहतेहैं ॥ २७४ ॥ २७५ ॥

स्निग्धोष्णस्थिरवृष्यबल्यलवणस्वाद्वम्लतैलातप-
स्नानाभ्यंजनमत्स्यमांसमदिरासंवाहनोन्मर्द्दनैः।
स्नेहस्वेदनिरूहनस्यशमनस्नेहोपनाहादिक-
पानाहारविहारभेषजमिदंवातंप्रशान्तिनयेत् ॥ २७६ ॥
इति वातरोगाध्यायः।

अर्थ-स्निग्ध, उष्ण, स्थिर, वृष्य, बलकारक, नमकीन, खट्टे और मधुरद्रव्य, तेल, धूप, स्नान, अभ्यंजन, मत्स्यमांस, मदिरा, संवाहन, उन्मर्द्दन, स्नेहस्वेद, निरूहण, नस्य, स्नेह और उपनाहादि, पान, आहार और विहार, यह सब वातरोगको शान्त करनेवालेहैं॥२७६॥

इति वातरोगाध्यायःसमाप्तः।

अथ वातरक्तचिकित्सामाह।

बाह्यलेपाभ्यंगसेकोपानाहैर्वातशोणितम्।
विरेकास्थापनस्नेहपानैर्गम्भीरमाचरेत् ॥ १ ॥
द्वयोर्मुञ्चेदसृक्शृंगसूच्यलाबुजलौकसा।
देशाद्देशंव्रजेत्स्राव्यंसिराभिःप्रच्छलेनवा ॥ २ ॥
अंगम्लानौनचस्राव्यंरूक्षेवातोद्भवेतुयत्।
पुराणायवगोधूमशालयोभोजनेमताः ॥ ३ ॥

मुद्गादियूषःसघृतोमांसंप्रातुदवैष्किरम् ।
शाकंवास्तुकवेत्राग्रसुनिषण्णादिकंहितम् ॥ ४ ॥
शस्तावातकफेकोष्णालेपाद्याःपैत्तिकेहिमाः ।
दशमूलीशतंक्षीरंसद्यःशूलनिवारणम् ॥ ५ ॥
परिसेकोऽनिलप्रायेतद्वत्कोष्णेनसर्पिषा ।
क्षीरपरिसेकइतियोजनानतुपेयम् । शूलंव्यथा ।
लेपोवरुणाशिग्रुभ्यांशूलंहन्तिसकांजिकः ॥ ६ ॥
गोधूमचूर्णछगलीपयश्चसच्छागदुग्धोरुबुबीजकल्कः ।
लेपेविधेयंशतधौतसर्पिःसेकेपयश्चाविकमेवशस्तम् ॥७॥
अगस्तिपुष्पचूर्णेनमाहिषंजनयेत्पयः ।
तदुत्थनवनीताक्तोदेहजंस्फुटनंजयेत् ॥ ८ ॥
माहिषंनवनीतञ्चखलिगोमूत्रसैन्धवम् ।
क्षीरञ्चाग्नौप्रताप्याङ्गमुद्वर्त्त्यस्फुटनंजयेत् ॥ ९ ॥
लेपःपिष्टास्तिलास्तद्वद्भृष्टाःपयसिनिर्वृताः ।
दुग्धेनपिष्टाहिततोभृष्टादुग्धेनिर्वापिताः ॥ १० ॥
अमृतानागरधान्यककर्षत्रितयेनपाचनंसिद्धम् ।
जयतिसरक्तंवातंसामंकुष्ठान्यशेषाणि ॥ ११ ॥

इति प्रत्येकंकर्षात्कर्षत्रितयम् ।

अर्थ–बाह्यवातरक्तमें लेप, अभ्यङ्ग, जलका सेवन और उपनाह स्वेद करावै, और गम्भीरवातरक्तमें विरेचन, निरूहबस्ति, और स्नेहपान करावै। शींग, सुई, तोंबी और जोंकसे दोनों प्रकारके वातरक्तरोगमें रक्तमोक्षण करावै, एकही जगह रक्तमोक्षण न करावै, किन्तु शरीरकी सर्व शिराओंके प्रदेशमें जगह जगह रक्तस्राव करावै। जिसके अंगमें ग्लानि हो, जिसका शरीर रूखाहो, और जिनके वातसे वातरक्त उत्पन्न हुआ हो, उनको वातरक्तरोगमें रक्तमोक्षण नहीं कराना चाहिये। पुराने जो, गेहूँ, और शालिधानोंका भोजन, मुद्गादिका यूष, प्रतुद और विष्किर पक्षियोंका घृतसै भूना

हुआमांस, वथुआ, वेतका अग्रभाग और शिरीआरी आदिका शाक, यह सब वातरक्तरोगमें हितकारीहै। वातश्लैष्मिक वातरक्तरोगमें किंचित् उष्ण प्रलेपादि हितकारीहैं और पैत्तिक वातरक्तरोगमें शीतल लेपादिक हितकारीहैं। गायके दूधमें दशमूलको पका शीतलकर पीनेसै तत्काल शूल दूर होताहै, किंचित् गरमघीमें दूध मिलाकै सींचनेसै शूल दूर होताहै (यहां शूलशब्दका अर्थ वातरक्तकी पीडाकाहै) वरना और सैंजिनेकी छालको काँजीमें पीसकर लेपकरनेसे वातरक्तकी वेदना दूर होतीहै। गेहूंके चूनेको बकरीके दूधमें मिलाके अथवा अंडके बीजोंको बकरीके दूधमें पीसकै, वा सौवार धुले हुए घीके लेप करनेसै, भेडके द्वारा सेक करनेसै वातरोग आराम होताहै। भैंसके दूधमें अगस्तियेका चूर्ण डालकै दही जमादेवै, फिर उसहीमेंसे माखन निकालकर लेप करनेसै देहस्फुटन दूर होताहै। अथवा भैंसका माखन, खल, गोमूत्र, सैंधानोन, और दूध इन सबको मिलाकर आगपै गरम करकै शरीरपै उद्वर्त्तन करनेसे देहस्फूटन दूर होतीहै। भुने हुए तिलोंको दूधमें पीसकर फिर दूधहीमें मिलाकै लेप करनेसे, अथवा गिलोय, सोंठ, और धनिया प्रत्येक एक एक तोले लेकर पाचन बनाकै पीनेसे वातरक्त, आमवात, और सर्वप्रकारके कुष्ठ नष्ट होतेहैं ॥ १ ॥ २ ॥ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११

गुडूच्याःस्वरसंकल्कंचूर्णवाक्काथमेववा।
प्रभूतकालमासेव्यमुच्यतेवातशोणितात् ॥ १२ ॥

अर्थ-गिलोयका स्वरस कल्क, चूर्ण, अथवा काथ कुछेक दिवस सेवन करनेसे वातरक्तरोग दूर होताहै ॥ १२ ॥

पीतःसगुग्गुलुःक्काथोगुडूच्यावातरक्तजित् ॥ १३ ॥

अर्थ-गिलोयके काढ़ेमें गूगल मिलाकै पीनेसे वातरक्तरोग दूर होताहै ॥ १३ ॥

घृतेनवातंसगुडाविबन्धंपित्तंसिताढ्यामधुनाकफञ्च।
वातास्रमुग्रंरुबुतैलमिश्राशुंठ्यामवातंशमयेद्गुडूची ॥ १४ ॥

अर्थ-गिलोय घीकेसाथ, वातको गुड़केसाथ विबन्धको, खाँडकेसाथ पित्तको मधुके साथ कफको अंडीके तेलके साथ, वातरक्तको और सोंठकेसाथ सेवनकरनेसे आमवात रोगको दूर करे है।

वासागुडूचीचतुरङ्गुलानामेरण्डतैलेनपिबेत्कषायम् ।
क्रमेणसर्वांगजमप्यशेषंजयेदसृग्वातभवंविकारम् ॥१५॥
(चतुरङ्गलंशोणालुमूलम्)

अर्थ-वाँसा, गिलोय और श्योनाककी जड इनका क्वाथ बना अंडीके तेलके साथ पीनेसै सर्वांगवातरक्त दूर होताहै ॥ १५ ॥

तिस्रोथवापंचगुडेनपथ्याजग्ध्वापिबेच्छिन्नरुहाकषायम् ।
तद्वातरक्तंशमयत्युदीर्णमाजानुसंभिन्नमपिह्यवन्यम् ॥ १६ ॥

अर्थ-तीन या पांच छोटी हरडोंको गुडके साथ खाकर ऊपरसै गिलोयका क्वाथपीनेसै जानुतक स्फुटित वातरक्तरोग दूर होताहै ॥१६॥

रुबुबीजामृताकल्कोवातास्रंहन्तिसेवितः ॥ १७ ॥

अर्थ-अण्डके बीज और गिलोयका कल्क सेवन करनेसै वातरक्त रोग दूर होताहै ॥ १७ ॥

कफवातास्रवीसर्पकण्डूजित्सगुडंघृतम् ॥ १८ ॥

अर्थ-गुड और घृतको एकत्र मिलाकर सेवन करनेसै कफ वातरक्त, वीसर्प और कण्डूरोग दूर होताहै ॥ १८ ॥

पटोलकटुकाभीरुत्रिफलामृतसाधितम् ।
क्वाथंपीत्वाजयेज्जन्तुःसदाहंवातशोणितम् ॥ १९ ॥

अर्थ-पटोल, कुटकी, सतावर, त्रिफला और गिलोय इनका क्वाथ बनाकर पीनेसे दाहयुक्त वातरक्तरोग दूर होताहै ॥ १९ ॥

कटुकामृतयष्टाह्वशुण्ठीकल्कःसमाक्षिकः ।
गोमूत्रपीतोजयतिसकफंवातशोणितम् ॥ २० ॥

अर्थ-कुटकी, गिलोय, मुलैठी, और सोंठ, इनको सहतमें पीसकर गोमूत्रके साथ पीनेसे कफयुक्त वातरक्त दूर होताहै ॥ २० ॥

धात्रीमुस्तहरिद्राणांकषायंवाकफाधिके ॥ २१ ॥

अर्थ-आमला, नागरमोथा, और हलदीका क्वाथ बनाकर पीनेसे कफाधिक्य वातरक्त दूर होताहै ॥ २१ ॥

कोकिलाक्षामृताक्वाथेपिबेत्कृष्णांकफाधिके ।

पथ्यभोजीत्रिसप्ताहान्मुच्यतेवातशोणितात् ॥ २२ ॥

अर्थ-तालमखाना और गिलोयके काढेमें पीपलका चूर्ण डालकर पीनेसे इक्कीस दिनोंमें कफाधिक्य वातरक्तरोग दूर होताहै ॥ २२ ॥

त्रिफलानिंबमंजिष्ठावचाकटुकरोहिणी।
वत्सादनीदारुनिशाकषायोनवकार्षिकः ॥ २३ ॥
वातरक्तंतथाकुष्ठंपामानंरक्तमण्डलम्।
कुष्ठंकपालिकाकुष्ठंपानादेवापकर्षति ॥ २४ ॥

प्रत्येकंकर्षकम्।

पंचरक्तिकामाषेणकर्षोग्राह्यः।

इति नवकार्षिकः।

अर्थ-त्रिफला, नीम, मजीठ, वच, कुटकी, गिलोय, दारुहलदी, प्रत्येक एक एक कर्ष ले क्काथ बनाके पीनेसे वातरक्त, कोढ़, पामा, रक्त-मण्डकुष्ठ, और पालिकाकुष्ठरोग नष्ट होताहै ॥ २३ ॥ २४ ॥

शतावरीरसेकल्केगुडूच्याःक्काथकल्कयोः।
तुल्यंक्षीरंघृतंसिद्धंवातासृक्कुष्ठजित्परम् ॥ २५ ॥

इति शतावरीगुडूचीघृते।

अर्थ-गायका घी चारसेर, गायका दूध चारसेर, सतावरका रस वा गिलोयका क्काथ चारसेर, और कल्कके लिये सतावर, गिलोय एकसेर लेवै। विधिपूर्वक दोनों घृतोंको सिद्ध करै। इस सतावरी घृत अथवा गुडूची घृतको पीनेसे वातरक्त और कुष्ठरोग दूर होताहै ॥ २५॥

अमृतायष्टिकाश्मर्यद्राक्षाब्दारग्वधामरैः।
गोक्षुरिक्षुरखुक्षीरवृद्धदारबलावृषैः ॥ २६ ॥
रास्नैरण्डवरातिक्ताभीरुशुण्ठीकणोत्पलैः।
धात्रीरससमंसर्पिःसाधितंत्रिगुणेजले ॥ २७ ॥
गम्भीरोत्तानवातास्रंत्रिकजंघोरुजांरुजम्।
हन्त्युग्रंक्रोष्टुशीर्षंचरुग्दाहंसानिलंज्वरम् ॥ २८ ॥
मेदोदावर्त्तब्रध्नादीनिदमायुर्बलप्रदम्।

अमरंदेवदारु इक्षुरःकोकिलाक्षमूलम् ॥ २९ ॥
वृश्चीरःश्वेतपुनर्नवा । व्यक्तमन्यत् ।

इति अमृताद्यंघृतम् ।

अर्थ–गायका घी चारसेर, आमलोंका रस चारसेर, जल बारह सेर और कल्कके लिये गिलोय, मुलैठी, कुम्भेर, दाख, नागरमोथा, अमलतास, देवदारु, गोखरू, तालमखाना, सोंठ, विधारा, खिरैटी, अडूसा, रास्ना, अण्ड, त्रिफला, कुटकी, सतावर, सोंठ, पीपल और कमल, यह सब एकसेर लेवै, फिर विधिपूर्वक घृतको सिद्ध करै । इस घृतको सेवनकरनेसे-गम्भीर और उत्तानवातरक्त, त्रिक और जंघाकी वेदना, अत्यन्त उग्र क्रोष्टुशीर्षवात, रुग्दाह, सन्निपात, वातज्वर, मेदरोग, उदावर्त्त और ब्रध्नादि रोग दूर होते हैं, तथा बल और आयु बढ़तीहै ॥ २६॥ २७ ॥ २८ ॥ २९ ॥

गुडूचीक्काथकल्काभ्यांतैलंद्राक्षारसेनवा ।
सिद्धंमधुककाश्मर्यरसैर्वावातरक्तजित् ॥ ३० ॥
(गुडूचीक्काथदुग्धाभ्यामितिचक्रेपाठान्तरम्)

इति गुडूच्यादितैलानित्रीणि ।

अर्थ–गिलोयके क्काथ अथवा कल्कमें तेलको पकाकर, या दाखके रसमें तेलको पकाकर अथवा महुआ और कुम्भेरके रसमें पकाकर सेवन करनेसे वातरक्त रोग दूर होताहै ॥ ३० ॥

पद्मकोशीरयष्ट्याह्वरजनीक्काथसाधितम् ।
स्यात्पिष्टैःसर्जमञ्जिष्ठावीराकाकोलिचंदनैः ॥ ३१ ॥
खुड्डाकपद्मकमिदंतैलंवातास्रदाहनुत् ॥ ३२ ॥

इति खुड्डाकपद्मकतैलम् ।

अर्थ–तिलोंका तेल एकसेर, कल्कके लिये राल, मजीठ, सतावर, काकोली और लालचंदन एकसेर, और पद्माख, खस, मुलैठी और हलदीका क्काथ सोलहसेर लेवै, सबको विधिपूर्वक मिलाकै तेलको सिद्ध करै । इसको खुडाकपद्मक तेल कहतेहैं । इसको सेवन करनेसे वातरक्त और दाह दूर होतीहै ॥ ३१ ॥ ३२ ॥

तुलांपचेज्जलद्रोणेगुडूच्याःपादशेषितम् ॥ ३३ ॥
क्षीरद्रोणन्तुताभ्याञ्चपचेत्तैलाढकंशनैः ॥ ३४ ॥
कल्कैर्मधुकमंजिष्ठाजीवनीयगणस्तथा।
कुष्ठैलागुरुमृद्वीकामांसीव्याघ्रनखंनखी ॥ ३५ ॥
हरेणुश्रावणीव्योषंशताह्वाशृंगिशारिवे।
त्वक्पत्राज्र्जुनविक्रान्तास्थिरातामलकीतथा ॥ ३६ ॥
नतंह्रीबेरकेशरंपद्मकोत्पलचन्दनम्।
सिद्धंकर्षसमैर्भागैःपानाभ्यामनुवासनैः ॥ ३७ ॥
सेव्यंवातास्रजोहन्तिसर्वधात्वन्तराश्रयाः।
स्वेदकण्डूरुजायासाशिरःकंपामयार्दितः ॥ ३८ ॥
हन्याद्व्रणकृतान्दोषान्गुडूचीतैलमुत्तमम् ॥ ३९ ॥

इति गुडूचीतैलम्।

अर्थ-तिलोंकातेल आठसेर, कल्कके लिये मुलैठी, मजीठ, जीवनीयगणकी सम्पूर्ण औषधि, कूठ, इलायची, अगर, दाख, बालछड़, व्याघ्रनखी, नखी, रेणुका, गोरखमुण्डी, त्रिकुटा, सोंठ, काकडासिंगी, शारिवा, दालचीनी, तेजपात, अर्जुन, मूषाकानी, सालपर्णी, भुईआमला, तगर, नागकेशर, सुगंधवाला, पद्माख, कमल और चंदन, प्रत्येक दोदो तोले लेवै, गायका दूध बत्तीस सेर, और क्वाथके लिये गिलोय साडेबारह सेर, शेष सोलहसेर। सबको एकत्र कर तेलको सिद्धकरै। इसको पान, मालिस और अनुवासनके द्वारा व्यवहार करनेसे- सर्वधातुओंमें स्थित वातरक्त, पसीना, खुजली, पीडा, दोप्रकारका आयाम, शिरःकम्प, अर्दित वात, और व्रण आदिसे उत्पन्न हुए विकार दूर होतेहैं, यह गुडूचीतैल अत्यन्त उत्तम है ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

शतंपक्त्वाशतावर्याजलद्रोणावशेषितम्।
विस्राव्यविपचेत्तैलंक्षीरंदत्त्वाचतुर्गुणम् ॥ ४० ॥
कल्कैर्मृणालशालूकबिषकिंजल्कमालती।
पुष्पैर्ह्रीबेरमधुकशारिवापद्मकेशरैः ॥ ४१ ॥

मेदापुनर्नवाद्राक्षामंजिष्ठाबृहतीद्वयम् ।
गंधकस्यचमूलानिमूलंसहचरस्यच ॥ ४२ ॥
अश्वगंधाचबिल्वञ्चश्वदंष्ट्रात्रिकटुस्तथा ।
निष्क्काथ्यमूलमेतेषांयस्मिंस्तैलेविनिक्षिपेत् ॥ ४३ ॥
शतपुष्पादेवदारुमांसीशैलेयकंबले ।
चंदनंतगरंकुष्ठमेलाचांशुमतीवचा ॥ ४४ ॥
वृद्धदारककाकोलीमेदामधुकमुत्पलम् ।
सर्वमेतत्समंकृत्वाकल्कैरक्षसमन्वितैः ॥ ४५ ॥
पानेबस्तौतथाभ्यंगेनस्येचैवप्रदापयेत् ।
अंगशूलंशिरःशूलंमेहदण्डापतानकम् ॥ ४६ ॥
वातरक्तंसदाहञ्चवातपित्तादिकंमदम् ।
शोथपाण्ड्वामयप्लीहकामलागरगृध्रसी ॥ ४७ ॥
योनिशूलंत्वसृग्दोषमाध्मानेविनिहन्तिच ।
क्षीणशुक्रौजसांपुंसांशस्तंवन्ध्याशुभप्रदम् ॥ ४८ ॥
शतावरीतैलमिदंकृष्णात्रेयेणपूजितम् ॥ ४९ ॥

इति शतावरीतैलम् ।

अर्थ-तिलोंकातेल सोलहसेर, गायका दूध चौसठ सेर, क्काथके लिये शतावर साडेबारहसेर, जल चौसठसेर, शेष सोलह सेर रखै । मृणाल (कमलकी डंडी) शालूक (भसींडे) कमलकी केशर, मालतीके फूल, सुगंधवाला, मुलैठी, सारिवा, कमल, नागकेशर, मेदा, पुनर्नवा, दाख, मजीठ, कटाई, कटेरी, अण्डकीजड, कटसरैयाकी जड ,असगंध, बेल, गोखरू, और त्रिकुटा, प्रत्येकका क्काथ दोदो तोले लेवै, और कल्कके लिये सोंफ, देवदारु, बालछड, भूरिछरीला, खिरैटी, गंगेरन, लालचंदन, कूठ, इलायची, पिठवन, वच, विधारा, काकोली, मेदा, महुएके फूल और कुमुद प्रत्येक दोदो तोले लेवै, सबको मिलाकर तेल सिद्धकरै । इसको पान, बस्तिकर्म्म, अभ्यंग और नस्यकर्म्मके द्वारा प्रयोग करनेसै-अंगशूल, शिरःशूल, प्रमेह, दंडापतानक, वातरक्त, दाह, वातपित्तादिक,

मद, सूजन, पाण्डुरोग, प्लीहा, कामला, विषदोष, गृध्रसीवात, योनिशूल, रुधिरविकार और आध्मानरोग दूर होताहै। यह तेल क्षीणशुक्र और क्षीण ओजवाले मनुष्योंको परमाहितकारीहै और वन्ध्या स्त्रियोंको कल्याणप्रदायकहै। यह सतावरीतेल श्रीकृष्ण और आत्रेयकरकै पूजितहै ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

अंकोठमूलंत्रिफलाकुण्डलीमरिचंनिशा।
सप्तच्छदाकुटीकुष्ठंप्रत्येकंकार्षिकंभवेत् ॥ ५० ॥
विडंगमुस्तकंकाचंतालकंटंगणंत्रिवृत्।
रसगंधकलोहानांप्रत्येकार्द्धंपलंक्षिपेत् ॥ ५१ ॥
गुग्गुलंत्रिपलंदत्त्वाघृतेनपरिपेषितम्।
वटीकामलकानामगहनानन्दभाषिता ॥ ५२ ॥
चतुर्मासावटीखाद्यागोमूत्रेणजडीकृता।
वातरक्तंनिहन्त्याशुनानादोषसमुद्भवम् ॥ ५३ ॥
कुष्ठंनानाविधंहन्तिनानादोषसमुद्भवम्।
दद्रुकण्डूविचर्चंश्चव्रणाशोंगंडमालिका ॥ ५४ ॥
भगंदरोपदंशाश्चविद्रधिगर्द्दभार्बुदे।
श्लीपदंशोथशूलानिकासश्वासमरोचकम् ॥ ५५ ॥
प्लीहगुल्मोदराष्ठीलामेहमेदोगलामयान्।
जीर्णज्वरमानाहश्चपांड्वादित्रितयंजयेत् ॥ ५६ ॥
संग्रहग्रहणींदुष्टांबलवर्णाग्निवर्द्धनीम् ॥ ५७ ॥

इति कामलकावटिका।

अर्थ–अंकोठकी जड, त्रिफला, गिलोय, कालीमिरच, हलदी, सतोना, कपूरकचरी और कूठ, यह प्रत्येक औषधि एक एक तोले, वायविडंग, नागरमोथा, कांच, हरिताल, सुहागा, निसोत, पारा, गंधक और लोहा, यह प्रत्येक दो दो तोले और गूगल चौवीस तोले लेवै, सब द्रव्योंको एकत्र घीके साथ पीस कर गोमूत्रमें चार चार

मासेकी गोली बनालेवै, यह कामलकानामवाली वटी गहनानन्दने कहीहै । प्रतिदिन एकगोलीखानेसै-शीघ्रही अनेकप्रकारके दोषोंसै उत्पन्न हुवा वातरक्त, नानाप्रकारके कोढ़ और दाह, कण्डू, विचर्चिका, व्रण, बवासीर, गंडमाला, भगंदर, उपदंश, विद्रधि, जालगर्दभकरोग, अर्बुद, श्लीपद, सूजन, शूल, खाँसी श्वास, अरुचि, प्लीहा, गुल्मरोग, उदररोग, आष्ठीला, प्रमेह, मेदरोग, गलरोग, जीर्णज्वर, आनाह, पाण्ड्वादिरोग और दुष्ट संग्रहणीरोग दूर होताहै, तथा बल, वर्ण और जठराग्निकी वृद्धि होतीहै ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

मधूच्छिष्टंसमंजिष्ठंससर्जरसशारिवम् ।
पिण्डतैलंतदभ्यंगाद्वातरक्तरुजापहम् ॥ ५८ ॥

इति पिण्डतैलम् ।

अर्थ-मोम, मजीठ, राल और सारिवा, इनको तेल सिद्धकर मालिस करनेंसै-वातरक्तरोग दूर होताहै ॥ ५८ ॥

शारिवारिष्टकूष्माण्डपोतकीभस्मजाऽम्बुना ।
गुडूचीक्वाथदुग्धंचकर्म्मरङ्गरसेनच ॥ ५९ ॥
पचेत्तैलश्चातिलजंदत्त्वैतानिभिषग्वरः ।
काकोल्यौजीरकंमेदेशताह्वाक्षीरिणीयुतैः ॥ ६० ॥
जिङ्गीसिक्थामृतानन्तासर्जसैन्धवचन्दनैः ।
षड्गुंजाधिकचतुर्मासंकर्षद्वितयसंयुतम् ॥ ६१ ॥
हन्तिवातास्रजंघोरंस्फुटितंगलितन्तथा ।
चर्मदलश्चपामानंत्वग्दोषश्चविपादिकाम् ॥ ६२ ॥
कुष्ठान्यर्शांसिवीसर्पव्रणशोथभगन्दरान् ॥
नसोऽस्तिवातरक्तस्यविकारोयंनहन्तिच ॥ ६३ ॥

इति शारिवाद्यंतैलम् ।

अर्थ-तिलका तेल चारसेर, सारिवा, नीम, कुह्मडा और पोईकी क्षारका जल चारसेर, गिलोयका क्काथ चारसेर, गायका दूध चारसेर, कमरखोंका रस चारसेर और कल्कके लिये मजीठ,

मोम, जीरा, मेदा, महामेदा, खिरनी, काकोली, क्षीरकाकोली,गिलोय, सारिवा, राल, सेंधानोंन और लालचन्दन यह प्रत्येक तीन कर्ष चार मासे और छै रत्ती लेवै । सबको विधिपूर्वक मिलाके तेलको सिद्ध करै । यह तेल-वातरक्त, घोर स्फुटित और गलितरोग, चर्मदलकुष्ठ, पामारोग, त्वचाकेविकार, विपादिका, सर्वप्रकारके कुष्ठ, ववासीर, वीसर्प, व्रण, सूजन और भगन्दररोगको दूर करैहै, ऐसा कोईभी वातरक्तविकार नहीं है जिसको यह शारिवादितैल दूर नहीं करसक्ता ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

लोहंफलत्रिकंचैवशाणमानंसमाहरेत् ।
षट्शाणंबाकुचीबीजंयत्नतः परिकल्पयेत् ॥ ६४ ॥
त्रिवृच्चित्रकमूलञ्चशाणंशाणंसमाहरेत् ।
शुण्ठीशाणत्रयंदद्याच्छाणैकंपिप्पलींतथा ॥ ६५
तोलद्वयंगुडूच्याश्चतथापौनर्नवंदलम् ।
तथावासकवल्कञ्चमुस्तंशाणद्वयंतथा ॥ ६६ ॥
शाणद्वयंघोषावतीफलंदद्याद्भिषग्वरः ।
पिष्ट्वैकत्रजलंदत्त्वाशुष्कंभक्ष्येत्प्रयत्नतः ॥ ६७ ॥
मासमेकंप्रयोगेणप्रातःकालेदिनेदिने ।
मधुनालेहपिष्टञ्चवातरक्तंविनाशयेत् ॥ ६८ ॥
गम्भीरंद्वन्द्वजंचैवत्रिदोषजमथापिवा ।
नाशयेन्नात्रसंदेहःसर्वकुष्ठंतथैवच ॥ ६९ ॥
वातरक्तान्तकोनामप्रयोगोमुनिसम्मतः ॥ ७० ॥

इति वातरक्तान्तकोरसः ।

अर्थ-लोहा और त्रिफला प्रत्येक चारमासे, बापचीके बीज तीन तोले, निसोथ, चीता, प्रत्येक चार चारमासे, सोंठ बारहमासे, पीपल चारमासे, गिलोय, पुनर्नवा और अडूसेकी छाल प्रत्येक दोदो तोले, नागरमोथा एकतोला,और कडवी तोरइयोंके वीज एक तोला भरलेवै, सबको एकत्रकर पानी डालके पीसलेवै, फिर इसको सूखजानेपर इसमें

सहत मिलाके प्रतिदिन प्रातःकाल चाटै, इसप्रकार एकमास चाटनेसै वातरक्त, गम्भीर, द्वन्द्वज और त्रिदोषवातरक्त तथा सर्वप्रकारके कोढ दूर होतेहैं, इसको वातरक्तान्तक रस कहतेहैं ॥ ६४ ॥ ६५ ॥ ६६ ॥ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥

वरमहिषलोचनोदरसन्निभवर्णस्यगुग्गुलोःप्रस्थम्।
प्रस्थद्वयंगुडूच्यास्त्रिफलायाःपृथगपिप्रस्थम् ॥ ७१ ॥
पक्काशताढकजलेशेषितमर्धंपचेत्पश्चात्।
दत्त्वापिण्डितगुग्गुलुमस्मिन्गुडवत्साधितेशीते ॥७२॥
त्रिफलात्रिकटुविडंगंपृथक्पलार्द्धंगुडूच्याश्च।
कर्षंकर्षंत्रिवृतादन्त्योःसंचूर्ण्यनिक्षिपेत्तदनु ॥ ७३ ॥
जलमुष्णाद्यनुपानंभेषजमुपयुज्ययंत्रणाहीनः।
वातास्रंहन्त्यखिलंस्रुतशुष्कंस्फुटितमागतंजानु ॥७४॥
व्रणकासगुल्मश्वयथूदरपाण्डुमेहांश्च।
मंदाग्नित्वविबन्धंप्रमेहविट्कांश्चनाशयत्याशु ॥ ७५ ॥
सततंनिषेव्यमाणःकालवशाद्धन्तिगदान्।
अभिभूयजरादोषंयातिचकैशोरकंरूपम् ॥ ७६ ॥

(किशोरस्तरुणस्तस्यरूपम्)

इति कैशोरकगुग्गुलुः।

अर्थ–उत्तमभैंसागूगल एकप्रस्थ, गिलोय दो प्रस्थ, और त्रिफला एकप्रस्थ लेकर एकसौ आढ़क जलमें पकावै, जब जल पचास आढ़क शेषरहै तब उतारकर छानलेवै, फिर इसमें उक्तऔटेहुए गूगलको छोड़-कर गुड़की समान पकावै, पश्चात् शीतल होनेपर त्रिकुटा, त्रिफला और वायविडंग, इन प्रत्येकका चूर्ण दो दो तोले, गिलोय, निसोथ और दन्ती, प्रत्येकका चूर्ण एक एक तोले मिला देवै । इसको उष्णजलके साथ सेवन करै तौ सर्वप्रकारके वातरक्त, स्रुत, शुष्क, स्फुटित और जानुतक आयाहुआ वातरक्त, व्रण, खांसी, गुल्म, सूजन, उदररोग, पाण्डुरोग, प्रमेह, मन्दाग्नि, विबन्ध, प्रमेहपिडका, यह सब दूर होवैं।

इसको निरंतर सेवनकरनेसे यह कैशोरगूगल जरादोषको दूर करके मनुष्यको किशोरअवस्थावाले मनुष्योंकी समान रूपवान् करदेताहै ॥ ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥ ७५ ॥ ७६ ॥

प्रस्थंगुडूच्याःप्रस्थार्द्धंप्रत्येकंत्रिफलापुरम्।
पक्काद्द्रोणेऽम्भसःशिष्टेपाकाद्घनेततःक्षिपेत् ॥ ७७ ॥
कोष्णेदन्त्यमृताव्योषविडंगत्रिफलारजः।
प्रत्येकमर्द्धपलिकंत्रिवृच्चूर्णञ्चकार्षिकम् ॥ ७८ ॥
वातास्रकुष्ठमेहार्शऊरुस्तम्भंभगन्दरान्।
आमवातंव्रणंशोथममृतागुग्गुलुर्जयेत् ॥ ७९ ॥

इतिअमृतागुग्गुलुः।

अर्थ-गिलोय दोसेर, त्रिफला और गूगल प्रत्येक सेर सेर भर लेवै, सबको एकद्रोण जलमें औटावै जब आधाभाग जल शेष रहै तब उतार लेवै, पश्चात् इसको छानकर दूसरीवार पकावैं; गाढे होजाने पर किंचित् उष्णमें दन्ती, गिलोय, त्रिकुटा, वायविडंग और त्रिफला प्रत्येकका चूर्ण दोदो तोलेले, और निसोथका चूर्ण एक तोला मिलादेवै। इसको अमृतागुग्गुलु कहते हैं, यह वातरक्त, कोढ, प्रमेह, ऊरुस्तम्भ, भगंदर, आमवात, व्रण, और सूजनको हरै है ॥ ॥ ७७ ॥ ७८ ॥ ७९ ॥

शतावरीनागबलावृद्धदारकमुञ्चटा।
पुनर्नवामृताकृष्णावाजिगंधात्रिकण्टकम् ॥ ८० ॥
पृथक्दशपलान्येषांश्लक्ष्णचूर्णानिकारयेत्।
सर्पिष्प्रस्थमाढकार्द्धंक्षौद्रंचूर्णार्द्धशर्करा ॥ ८१ ॥
पृथक्त्रिजातकपलंदत्त्वामद्यंचभक्षितम्।
वातासृक्क्षयकुष्ठासृक्पित्तमन्यांस्तथागदान् ॥ ८२ ॥
हत्वाकरोतिपुरुषंवलीपलितवर्जितम्।

योगसारामृतोनामलक्ष्मीकान्तिविवर्द्धनः ॥ ८३ ॥
उच्चटारक्ताग्राह्याश्रेष्ठत्वान्मिलितचूर्णार्द्धसमाशर्करा।

इति योगसारामृतः।

अर्थ–शतावर, गंगेरन, विधारा, सफेद चौटलीकी जड, पुनर्नवा, गिलोय, पीपल, असगंध, और गोखरू, प्रत्येक चालीस चालीस तोले लेकर सबका बारीक चूर्ण करले। घृत दोसेर, सहत चार सेर, और सब चूरणसे आधीमिश्री, दालचीनी, इलायची और तेजपात, प्रत्येकका चूर्ण चार चार तोले लेवै, सबको एकत्र कर खूब मर्दन करै। इसको भक्षणकरनेसै वातरक्त, क्षय, कोढ, रक्तपित्त तथा अन्यान्यरोग दूर होते है, तथा मनुष्य वलीपलितरहित होजाते हैं। यह योगसारामृत–लक्ष्मी और कान्तिको बढानेवाला है ॥ ८० ॥ ॥ ८१ ॥ ८२ ॥ ८३ ॥

अलम्बुषालोहचूर्णमयोर्द्धपलेपृथक् ॥
पलत्रयंचताप्यस्यवाकुच्याश्चपलत्रयम् ॥ ८४ ॥
शिलाजतुतयोस्तुल्यंपलानिदशगुग्गुलोः ॥
सर्वाण्येतानिसंचूर्ण्यगुटिकांकारयेद्भिषक् ॥ ८५ ॥
शाणंकर्षार्द्धकर्षंवाततःखादेत्प्रयत्नतः ॥
वातरक्तानिकुष्ठानिश्वित्राणित्रिविधानिच ॥ ८६ ॥
भगन्दरान्दुष्टव्रणान्ग्रहणीश्चव्रणन्तथा ॥
बस्तिजान्गुदजान्दोषान्पाण्डुतामुदराणिच ॥ ८७ ॥
शोथश्लीपदमानाहंयक्ष्माणश्चविशेषतः ॥
नाडीव्रणान्निहन्त्याशुअंत्रवृद्धिंश्चविद्रधीन् ॥ ८८ ॥
वृष्योबल्यश्चकेश्यश्चमेधाग्निबलवर्द्धनः।
आयुर्वर्णकरस्त्वच्यःपुत्रसौभाग्यदस्तथा ॥ ८९ ॥
भग्नसंधानकृत्प्रोक्तोगृध्रदृष्टिकरःपरः।
जालपादेनविख्यातोनाम्नास्वायंभुवोभुवि ॥ ९० ॥

इति स्वायंभुवोगुग्गुलुः।

अर्थ-गोरखमुंडी और लोहेका चूर्ण प्रत्येक दो दो तोले, सोनामाखी और बापचीके बीज तीन तीन पल, शिलाजीत छै पल, और गूगल दश पल लेवै, सबको एकत्र पीसकर गोली बनालेवै। इसको चारमासे अथवा एक तोला वा दो तोलेभर यत्नपूर्वक भक्षण करै तौ वातरक्त, कोढ़, श्वित्रकोढ़, नानाप्रकारके कोढ़, भगन्दर, दुष्टव्रण, संग्रहणी, व्रण, बस्तिरोग, गुदारोग, पाण्डुता, उदररोग, सूजन, श्लीपद, आनाह राजयक्ष्मा, नाडीव्रण, अन्त्रवृद्धि, और विद्रधिरोग दूर होताहै। यह स्वायम्भुव गूगल वीर्यवर्द्धक, बलकारक, केशोंको हितकारी, मेधा, अग्नि और बलको बढानेवाला, आयुको बढानेवाला, वर्णको सुन्दरकरनेवाला, त्वचाको हितकारी, पुत्र और सौभाग्यताको देनेवाला, भग्नसन्धानकारक, गृध्रकी समान दृष्टि करनेवाला, यह स्वायम्भुव नाम वाला गूगल, पृथ्वीपर जालपादमुनिने प्रकाशित कियाहै ॥८४॥८५॥८६॥ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥

काकोलियुग्ममधुकंसशिवाचधात्री
जीवन्तिमेदयुगलावपिपृश्निपर्ण्यौ।
द्राक्षासपद्मकतुगाचकुलीरशृंगी
द्वौजीरकावपिसमस्तचतुष्पलाधिकम् ॥ ९१ ॥
यष्टिंविचूर्ण्यविपचेच्चशनैर्घटेऽपां
प्रस्थंमृतस्यचतथास्वरसंगुडूच्याः ॥ ९२ ॥
घृतस्यपादंपुरमेवदत्त्वापुनःपचेद्वैद्यवरोविधिज्ञः ॥
कृत्वाविरेकंवमनञ्चपश्चाद्यथानुपानंसुदिनेप्रयुज्यात् ९३
वातरक्तंमहाघोरंद्वन्द्वजंसर्वजन्तथा ॥
आमवातञ्चवातञ्चनाशयेन्नात्रसंशयः।
काकोल्यादिघृतंह्येतद्बलवर्णाग्निवर्द्धनम् ॥ ९४ ॥
वृष्यंरसायनंमेध्यंवातरक्तान्तकंविदुः।
वातरक्तगजेन्द्रायकेसरीमुनिनिर्मितः ॥ ९५ ॥

इति काकोल्यादिघृतम्।

अर्थ-काकोली, क्षीरकाकोली, मुलैठी,हरड, आमला, जीवन्ती, मेदा, महामेदा, पृश्निपर्णी, दाख, पद्माख, काकडाशिंगी, सफेदजीरा और कालाजीरा, प्रत्येक चार चार पल लेकर सबका बारीक चूर्ण करले, पश्चात् इसचूर्णको बत्तीस सेर जलमें पकावै, फिर छानकर दूसरी बार पकावै, जब पकते पकते गाढ़ा पडजावै तब दो सेर गिलोयका रस, दोसेरघी और आधसेर गूगल डालकर आलोडनकरै । तदनंतर विरेचन और वमन कराकर शुभदिनमें यथानुपानके साथ इस काकोल्यादि घृतको देवै । यह काकोल्यादिघृत-महाघोरवातरक्त, द्वन्द्वज, सर्वज आमवात और वातको दूर करैहै । यह काकोल्यादिघृत-बल, वर्ण और अग्निको बढानेवालाहै, वीर्यवर्द्धक, रसायन, मेधाजनक और वातरक्तका अंतकारकहै ।यह वातरक्तरूपी गजेन्द्रके लिये सिंहस्वरूपहै ॥ ९१ ॥ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥

गंधकंपारदंलौहंघनतालंमनःशिला ।
शिलाजतुपरंशुद्धंसमभागंविचूर्णयेत् ॥ ९६ ॥
विडंगंत्रिफलाव्योषमब्धिफेनंपुनर्नवा ।
देवदारुंचित्रकञ्चदार्वींश्वेतापराजिता ॥ ९७ ॥
चूर्णमेषांपृथक्तुल्यंसर्वमेकत्रकारयेत् ।
त्रिफलाभृंगराजस्यरसेनैवत्रिधात्रिधा ॥ ९८ ॥
भावनाखलुदातव्याततःसंचूर्ण्यभक्षयेत् ।
मधुनामाषमात्रञ्चप्रातःकालेदिनेदिने ॥ ९९ ॥
कृत्वाऽनुपानंनिम्बस्यपत्रंपुष्पंत्वचंसमम् ।
शाणमात्रंघृतैःकुर्यात्सर्ववातविकारनुत् ॥ १०० ॥
वातरक्तंमहाघोरंगंभीरंसर्वजंजयेत्
सर्वोपद्रवसंयुक्तंसाध्यासाध्यंनिहन्त्यलम् ॥ १०१ ॥

इति वातरक्तान्तकोरसः ।

अर्थ-गंधक, पारा, लोहा, अभ्रक, हरिताल, मैनशिल, समानभाग लेकर, सबका चूर्ण अलग अलग करकै पश्चात् एकत्र करलेवै, फिर

शुद्ध शिलाजीत, वायविडंग, त्रिफला, त्रिकुटा, समुद्रफेन, पुनर्नवा, देवदारु, चीता, दारुहलदी, और सफेदकोयल, इनसबको समान भाग ले, सबका अलग अलग चूर्णकर पश्चात् सबको एकत्र कर त्रिफला और भांगरेके रसकी तीन तीन भावनादेवै, फिर चूरनकर सहतके साथ एक मासेभर प्रतिदिन प्रातःकाल सेवनकरै और ऊपरसे नीमके पत्र, फूल और छालको घीमें पीसकर चारमासे भर भक्षणकरे तौ सर्वप्रकारके वातविकार, वातरक्त, महाघोरवातरक्त, गम्भीरवातरक्त, सर्वजवातरक्त, सर्वोपद्रवसंयुक्त वातरक्त और साध्य तथा असाध्य वातरक्त दूर होवै ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥

त्रिकटुत्रिफलादन्तीचित्रकंत्रिवृताशठी ।
विडंगमुस्तकंरात्रिबाकुचीन्द्रयवंवचा ॥ १०२ ॥
अंकोठमूलंकुष्ठञ्चराजवृक्षस्यमूलकम् ।
एतेषांपलिकंग्राह्यंतत्समंगुग्गुलुंगुरु ॥ १०३ ॥
भल्लाततैलंद्विपलंगोघृतेनजडीकृतम् ।
तत्रताम्रहरितालंद्वयोःकुर्यात्पलद्वयम् ॥ १०४ ॥
सर्वमेकीकृतंयत्नात्पेषयित्वासुपिण्डकम् ।
घृतभाण्डेतुसंस्थाप्यखादेन्मासचतुष्टयम् ॥ १०५ ॥
गुग्गुलुर्वज्रनामायंगहनानन्दभाषितः ।
देशकालवयोवह्निंदृष्ट्वावात्रुटिवर्द्धनम् ॥ १०६ ॥
वातरक्तंनिहन्त्याशुनानादोषसमुद्भवम् ।
श्लीपदंशोथशूलानिमेहमेदोगलामयान् ॥ १०७ ॥
प्लीहगुल्मोदराष्ठीलाकासश्वासमरोचकम् ।
जीर्णज्वरश्वसानाहंबलवर्णाग्निवर्द्धनम् ॥ १०८ ॥
संग्रहग्रहणींदुष्टांपाण्डुवातादित्रितयंजयेत् ॥ १०९ ॥

इति वज्रगुग्गुलुः ।

अर्थ-त्रिकुटा, त्रिफला, दन्ती, चीता, निसोथ, कचूर, वायविडंग, नागरमोथा, हलदी, बापची, इन्द्रजौ, वच, अंकोठकी जड़, कूठ,

अमलतासकी जड, यह प्रत्येक चार चार तोले, और सबकी समान गूगल, भिलावेका तेल दो पल, गायकाघी दोपल लेवै, सबको एकत्र कर यत्नपूर्वक पीसके गोला बनालेवै, इसको घीके चिकने बासनमें स्थापनकर देश,काल, अवस्था और अग्निका बलाबल देखकर प्रतिदिन चार चार मासे खावै । यह वज्रगुग्गुलु श्रीमान् गहनानन्दने भाषण कियाहै । यह गूगल नानाप्रकारके दोषोंसै उत्पन्न हुआ वातरक्तरोग, श्लीपद रोग, सूजन, शूल, प्रमेह, मेदरोग, गलरोग, प्लीहा, गुल्म, उदररोग, अष्ठीला, खाँसी, श्वास, अरुचि, जीर्णज्वर, आनाह, दुष्टसंग्रहणी और पाड्वादि तीनों रोगोंको दूर करैहै, तथा बल, वर्ण और अग्निको बढ़ावै है ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥

गरुत्मान्दरदस्तीक्ष्णंस्वर्णाह्वावंगशक्तिका ।
शुल्बश्चगगनंफेनंरुधिरश्चत्रिनेत्रकम् ॥ ११० ॥
पातालनृपतिश्चैववह्निमूलश्चरामठम् ।
त्रिकटुत्रिफलाशिग्रुचाजमोदायवानिका ॥ १११ ॥
पिप्पलीमूलभार्गीचलशुनंजीरकद्वयम् ।
आर्द्रकस्यरसेनैवगुटिकांकारयेद्भिषक् ॥ ११२ ॥
मन्दानलामवातघ्नंश्लेष्माणञ्चजलोदरम् ।
अशीतिर्वातजान्रोगान्प्रमेहांश्चैवविंशतिम् ॥ ११३ ॥
घ्राणाक्षिकर्णजिह्वानांगदश्चैवत्रिदोषजम् ।
गलिताङ्गंवातरक्तंसर्वमेतद्व्यपोहति ॥ ११४ ॥

इतित्रिनेत्रारसः ।

अर्थ–सोनामाखी, सिंग्रफ, लोहा, स्वर्णक्षीरी, बंग, गंधक, तांबा, अभ्रक, समुद्रफेन, गेरू, सोना, सीसा, चीतेकीजड, हींग, त्रिकुटा, त्रिफला, सैंजिना, अजमोद, अजवायन, पीपरामूल, भारंगी, लशुन, जीरा और कालाजीरा; इन सबको अदरखके रसमें खरलकरकै गोली बनालेवै । इन गोलियोंको सेवनकरनेसै–मन्दाग्नि, आमवात, कफ, जलोदर, अस्सीप्रकारके वातरोग, वीसप्रकारके प्रमेहरोग,

त्रिदोषज नासिका नेत्र कर्ण और जिह्वारोग, गलितांग और वातरक्तरोग दूर होता है ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥

विमर्द्दयेत्ततःपच्याद्गुटिकाकोलसम्मिता ।
लाङ्गल्यामूलमुद्धृत्यत्रिफलात्रिकटुकामृता ॥ ११५ ॥
द्राक्षागुग्गुलुभिस्तुल्यंलोहचूर्णंनियोजयेत् ।
मातुलुंगरसेनैवत्रिफलायारसेनच ॥ ११६ ॥
भक्षयेन्मधुनासार्द्धंशृणुकुर्वन्तियत्फलम् ।
पादस्फोटंमहाघोरंसर्वगात्रस्यस्फोटनम् ॥ ११७ ॥
तत्सर्वंनाशयन्त्याशुसाध्यासाध्यञ्चशोणितम् ॥ ११८॥

इति लांगलाद्यंलौहम् ।

अर्थ–कलिहारीकी जड़, त्रिफला, त्रिकुटा, गिलोय, दाख, गूगल, यह सब समान भाग और सबकी बराबर लोहेका चूर्ण लेवै. सब एकत्रकर विजौरे नीबूके और त्रिफलेके रसमें खरल करकैं बेरकी बराबर गोली बनालेवै। इन गोलियोंको सहतके साथ सेवन करै, इससे महाघोर पादस्फोट, सर्व शरीर स्फोटन, और साध्यासाध्य वातरक्त रोग दूर होताहै ।

गुडूचीसारसंयुक्तंत्रिकत्रयसमन्वितम् ।
वातरक्तंनिहन्त्याशुसर्वरोगहरोपिसन् ॥
सर्वचूर्णसमंलौहचूर्णंग्राह्यम् । इतिगुडच्याद्यंलौहम् ।

इतिवातरक्ताध्यायः ।

अर्थ–गिलोयका सार, त्रिफला, त्रिकुटा, नागरमोथा, चीता, वायविडंग, यह सब समान भाग और सबकी बराबर लोहेका चूर्ण लेवै, सबको एकत्र पीसकर सेवन करनेसे वातरक्तादि संपूर्ण रोग दूर होतेहैं ।

इति वातरक्ताधिकारःसमाप्तः ।

अथोरुस्तम्भचिकित्सामाह ।

ऊरुस्तम्भेविधिःकार्योवातकोपीकफापहः ।
युक्त्याजित्वाकफंरूक्षैःपश्चाद्वातंजयेद्भिषक् ॥

अर्थ–ऊरुस्तम्भरोगमें वातको कुपित करनेवाली और कफनाशक विधि करनी चाहिये । प्रथम रूक्ष क्रियाओंके द्वारा यत्नपूर्वक कफको जीतकर पश्चात् वातको जीते ।

पुराणशालिश्यामाकयवकोद्रवमोदनम् ।
अघृतैर्जाङ्गलैर्मांसैस्तथाचालवणैर्हितम् ॥
वास्तुकंवायसीनिम्बवेत्राग्रकुलकादिभिः ।
शुष्कमूलकयूषेणपटोलस्यरसेनवा ॥
कफक्षयार्थंव्यायामेष्वेनंशक्येषुयोजयेत् ।
स्थानान्याक्रामयेत्प्रातःप्रतिस्रोतोनदीन्तरेत् ॥
लिम्पेदूरुग्रहंमूत्रकरञ्जफलसर्षपैः ।
क्षौद्रसर्षपवल्मीकमृत्तिकागजपिप्पलीः ॥
त्वक्पत्रफलमूलानिकरञ्जात्सर्षपस्तथा ।
प्रलोपोद्वर्त्तनंपिष्ट्वामूत्रेणोरुग्रहापहम् ॥
शिलाजतुगुग्गुलुंवापिप्पलींवाथनागरम् ।
ऊरुस्तम्भेपिबेन्मूत्रैर्दशमूलीरसेनवा ॥
भल्लातकामृताशुण्ठीदारुपथ्यापुनर्नवा ।
पंचमूलीद्वयोन्मिश्राऊरुस्तम्भानिवर्हणाः ॥

क्काथेन ।

पिप्पलीपिप्पलीमूलंभल्लातक्काथएववा ।
कल्कोवासमधुर्देयऊरुस्तम्भविनाशनः ॥
दारुचव्याग्निपथ्यानांकल्कंचमधुनालिहेत् ।
त्रिफलाचव्यकटुकंग्रन्थिकंमधुनालिहेत् ॥

लिह्याद्वात्रिफलाचूर्णंक्षौद्रेणकटुकायुतम् ।
कटुकेनात्रिकटुकेनयुतंकिंवाकटुकंकटुकी ॥
सुखाम्बुनापिबेद्वापिचूर्णषड्धरणंनरः ॥

इति षड्धरणंवातोक्तम् ।

अर्थ-पुराने शालिधान, समा, जव और कोदोंकाभात, घृत और लवण-रहित जांगलदेशके जीवोंका मांस, वथुआ, मकोय, नीम, बेतकी कोपल, परवल और सूखीमूलीका यूष, तथा परवलका रस भोजनार्थ देवे। कफको दूर करनेके लिये बलवान् रोगीको व्यायाम, पथ-भ्रमण करावे, और प्रातःकाल प्रवाहवाली नदियोंमें तिरावे। करंजके फल और सरसोंको गोमूत्रमें पीसकर, अथवा सहत, सरसों, बांबीकी माटी, और गजपीपलको गोमूत्रमें पीसकर अथवा करंजकी छाल, पत्र, फल, मूल और सरसोंको गोमूत्रमें पीसकर लेप तथा उबटन करनेसे ऊरुग्रहरोग दूर होताहै। शिलाजीत और गूगल वा पीपल अथवा सोंठको गोमूत्रके या दशमूलके काथके साथ सेवन करनेसे ऊरुस्तम्भरोग दूर होताहै। पीपल, पीपरामूल, और भिलावेंका काढ़ा या कल्क सहतके साथ, देवदारु, चव्य, चीता और हरड़ अथवा त्रिफला, चव्य, त्रिकुटा और पीपलामूलका चूर्ण अथवा त्रिफलेका चूर्ण और कुटकी सहतके साथ, किंवा वातोक्त षड्धरणयोग किंचित् गरमजलके साथ पीनेसे ऊरुस्तम्भ रोग दूर होताहै ॥

कुष्ठंश्रीवेष्टकोदीच्यंसरलंदारुकेशरम् ।
अजगंधाश्वगंधाचतैलन्तैःसर्षपंपचेत् ॥
सक्षौद्रंमात्रयातस्यऊरुस्तम्भार्दितःपिबेत् ॥

इति कुष्ठाद्यंतैलम् ।

अर्थ-कूठ, श्रीवेष्ट, सुगंधवाला, धूपसरल, देवदारु, नागकेशर, वनतुलसी और असगंध, इनके काथ अथवा कल्कमें सरसोंका तेल पकावे, इसतेलको सहतके साथ सेवन करै तौ ऊरुस्तम्भरोग दूर होवे॥

द्विपलिकंग्रन्थिकंविश्वंसमंदध्यष्टकद्वरम् ।
कटुतैलंपचेत्प्रस्थंगृध्रस्यूरुग्रहापहम् ॥

द्विपलंप्रत्येकम् ।

अष्टकट्वरमष्टगुणंसस्नेहंदधिघृततक्रकम् ॥
इतिअष्टकट्वरंतैलम् ।
सैन्धवादितैलमत्रयोज्यम् ।

इति ऊरुस्तम्भाध्यायः ।

अर्थ-पीपरामूल आठतोले, सोंठ आठतोले, दहीका तोड बत्तीस तोले, सरसोंका तेल दोसेर, अष्टकट्वर दोसेर लेवै, सबको मिलाके तेलको पकावै । इस तेलको सेवनकरनेसै गृध्रसीवात, और ऊरुस्तम्भ रोग दूर होताहै, यहाँ सैन्धवादितैल योजना चाहिये ॥

इति ऊरुस्तम्भाधिकारःसमाप्तः ।

अथ आमवातचिकित्सामाह ।

लंघनंस्वेदनंतिक्तंदीपनानिकटूनिच ।
विरेचनंस्नेहपानंवान्तयश्चाममारुते ।
रुक्षःस्वेदोविधातव्योवालुकापुटकैस्तथा ॥

अर्थ-लंघन करना, पसीना निकलवाना, चरपरे, कडवे और दीपन पदार्थोंका भक्षण करना, विरेचन, स्नेहपान, बस्ति और वालूकी पोटलीकेद्वारा रूक्ष पसीना देना, यह सब उपचार आमवातरोगमें कराने चाहिये ॥

कार्पासास्थिकुलत्थकातिलयवैरण्डमूलातसी
वर्षाभूषणबीजकांजिकयुतैरेतत्कृतैर्वापृथक् ।
स्वेदःस्यादतिकूर्परोदराशिरःस्फिक्पाणिपादांगुली
गुल्फस्कन्धकटीरुजोविजयतेसाम्याःसमीरारुजः ॥

अर्थ-विनोले, कुलथी, तिल, जौ, अंडकीजड, अलसी, पुनर्नवा और सनकेबीज, इनसब द्रव्योंको एकत्रकर अथवा एक एकको अलग अलग कूठकर काँजीमें भिजोके पोटली बनालेवै, उन पोटलियोंसे कुहिनी, उदर, शिर, कूला, हाथ, पांव, अंगली, स्कन्ध और कमरको सेके तौ आमवात दूर होवै ॥

गोजलंपिष्टाहिंस्राकेबुकाशिग्रुभिरत्रनाङ्गयुतैः।
लेपःसामसमीरेविहितःसहवेदनेशोथे॥

अर्थ-मकोय, केउँआ, सैंजिनीकी जड और बाँबीकी मट्टी, यह सब समान भागले गोमूत्रमें पीस गरम करकै प्रलेप करैतौ वेदना और सूजनयुक्त आमवात रोग दूरहोवै।

कोष्णंकृत्वालेपःसवेदनेशोथे।
पटोलंगोक्षुरंचैववरुणंकारवेल्लकम्।
यवकोद्रवशाल्यादिप्रपुराणंसतिक्तकम्॥
लावादीनांतथामांसंतक्रेणमस्तुनाहितम्।
कुलत्थयूषसूपैश्चरूक्षमन्नंप्रदापयेत्॥

अर्थ-परवल, गोखरू, बरना, करेला, जौ, कोदौ, पुरानेशालिधान्य, और पित्तपापडा, लावादिपक्षियोंका मांस, तक्र, दहीका पानी, कुलथीका यूष और दालके साथ रूक्ष अन्न आमवात रोगमें देवै॥

शुण्ठीगोक्षुरकःक्काथःप्रातःप्रातर्निषेवितः।
सामेवातेकटीशूलेपाचनोरुक्प्रणाशनः॥

अर्थ-सोंठ और गोखुरोंका क्काथ प्रातःकाल सेवन करैतौ आमवात और कटीशूल दूरहोवै, यह पाचनहै॥

रास्नामृतारग्वधदेवदारुत्रिकण्टकैरण्डपुनर्नवानाम्।
क्काथंपिबेन्नागरचूर्णमिश्रंजंघोरुपृष्ठत्रिकपार्श्वशूली॥

इति रास्नासप्तकः।

अर्थ-रायसन, गिलोय, अमलतास, देवदारु, गोखरू, अण्डकी जड और पुनर्नवा, इनके क्काथमें पीपलका चूर्ण डालकर पीवैतौ जंघा, ऊरु, पृष्ठ, त्रिक और पार्श्वशूल दूर होवै॥

रास्नागुडूचीमेरण्डंदेवदारुमहौषधम्।
पिबेत्सर्वाङ्गकेवातेसामेसंध्यस्थिमज्जगे॥
भेदार्थमेरण्डतैलंप्रक्षिपन्तिवृद्धाः॥

इति रास्नापंचकः।

अर्थ-रायसन, गिलोय, अंडकी जड, देवदारु, और सोंठ, इनके काढेमें अंडीका तेल मिलाकर पीनेसे सर्वाङ्गगत, सन्धिगत, अस्थिगत और मज्जागत, आमवातरोग दूर होता है ॥

दशमूलामृतैरण्डरास्नानागरदारुभिः ।
क्वाथोरुबूकतैलेनसामंहन्त्यनिलंगुरुम् ॥

इति रास्नादशमूलः ।

अर्थ-दशमूल, गिलोय, अण्ड, रास्ना, सोंठ और देवदारु, इनके काढेमें अण्डीका तेल मिलाकर पानकरनेसै निःसन्देह आमवातरोग दूर होताहै ॥

आमवातगजेन्द्रस्यशरीरवनचारिणः ।
एकएवनिहन्त्याशुएरण्डस्नेहकेसरी ॥

अर्थ-मनुष्योंके शरीररूपी वनमें विचरता हुआ जो आमवातरूपी गजेन्द्रहै उसको मारनेके लिये केवल एकही अण्डका तेल सिंहस्वरूपहै.

आमवातेकणायुक्तंदशमूलीजलंपिबेत् ॥

अर्थ-अथवा दशमूलके काढेमें पीपलका चूर्ण डालकर पीनेसै, आमवातरोग दूर होताहै ।

खादेद्द्राव्यभयाविश्वंगुडूचीनागरेणवा ।
शतपुष्पाविडंगानिसैन्धवंमरिचंसमम् ॥
चूर्णमुष्णाम्बुनापीतमामघ्नंवह्निदीपनम् ॥

अर्थ-हरड, सोंठ, और गिलोयके काढेमें सोंठका चूर्ण मिलाकर पीनेसै अथवा सोंफ, बायविडंग, सैंधानोन और कालीमिरच इन सबको समानले, बारीक चूर्णकर किंचित् गरमजलके साथ पीनेसै आमवातरोग दूर होताहै, तथा अग्नि दीपन होतीहै ॥

मणिमन्थस्यभागौद्वौयवान्यास्तद्वदेवतु ।
भागास्त्रयोऽजमोदायानागराद्भागपंचकम् ॥
दशद्वौचहरीतक्याःश्लक्ष्णचूर्णीकृताःशुभाः ।
मस्त्वारनालतक्रेणसर्पिषोष्णोदकेनवा ॥

पीतंजयत्यामवातंगुल्महृद्बस्तिजान्गदान्।
प्लीहानंग्रन्थिशूलादीनर्शांस्यानाहमेवच ॥
विबन्धंजाठरान्रोगांस्तथावैदुष्टपादजान्।
वातानुलोमनमिदंचूर्णंवैश्वानरंस्मृतम् ॥

इति वैश्वानरचूर्णम्।

अर्थ-सैंधानोन दो तोले, अजवायन दो तोले, अजमोद तीनतोले, सोंठ पाँचतोले, और हरड बारहतोले लेवै, सबको एकत्र पीस बारीक चूर्ण करले, इसचूर्णको दहीका तोड, काँजी, तक्र, घी और गरमजल इनमेंसे किसीएक अनुपानके साथ पीनेसे- आमवात, गुल्म, हृदयरोग, बस्तिरोग, प्लीहा, ग्रन्थिरोग, शूल, अर्श, आनाह, विबन्ध, उदररोग, और पावोंके रोग दूर होतेहैं, और यह वैश्वानर चूर्ण वातानुलोमकहै ॥

अलम्बुषांगोक्षुरकंगुडूचींवृद्धदारकम्।
पिप्पलींत्रिवृतांमुस्तांवरुणंसपुनर्नवम् ॥
त्रिफलांनागरञ्चैवश्लक्ष्णचूर्णानिकारयेत्।
मस्त्वारनालतक्रेणपयोमांसरसेनवा ॥
आमवातंनिहंत्याशुश्वयथुंसन्धिजस्थितम् ॥

इति अलम्बुषाद्यंचूर्णम्।

अर्थ-अलम्बुषा (एक प्रकारका लज्जालु), गोखरू, गिलोय, विधारा, पीपल, निसोथ, नागरमोथा, वरना, पुनर्नवा, त्रिफला और सोंठ, इन सबका बारीक चूर्ण कर दहीका पानी, तक्र, दूध और मांसरस इनमेंसे किसी एकके साथ सेवनकरनेसे-आमवात और संधिज शोथ दूर होता है ॥

चित्रकंपिप्पलीमूलंयवानींकारवींतथा।
विडंगान्यजमोदाञ्चजीरकंसुरदारुच ॥
चव्यैलांसैन्धवंरास्नांतथागोक्षुरधान्यकम्।
त्रिफलामुस्तकंव्योषंत्वगुशीरयवाग्रजम् ॥

तालीशपत्रंपत्रञ्चश्लक्ष्णचूर्णानिकारयेत् ।
यावन्त्येतानिचूर्णानितावन्मात्रन्तुगुग्गुलुम् ॥
संमर्द्यसर्पिषागाढंस्निग्धेभाण्डेनिधापयेत् ।
ततोमात्रांप्रयुञ्जीतयथेष्टाहारवानपि ॥
योगराजइतिख्यातोयोगोऽयममृतोपमः ।
आमवाताढ्यवातादीन्कृमिकुष्ठव्रणानपि ।
प्लीहगुल्मोदरानाहदुर्नामानिविनाशयेत् ।
अग्निंचकुरुतेदीप्तंतेजोवृद्धिंबलंतथा ॥
वातरोगाञ्जयत्येषसन्धिमज्जागतानपि ॥

इति योगराजगुग्गुलुः ।

अर्थ—चीता, पीपरामूल, अजवायन, सोंफ, वायविडंग, अजमोद, जीरा, देवादारु, चव्य, इलायची, सैंधानोंन, रायसन, गोखरू, धनिया, त्रिफला, नागरमोथा, त्रिकुटा, दालचीनी, खस, जवाखार, तालीशपत्र और तेजपात, यह सब समान भागलेकर बारीक चूर्ण बनावै, और सबचूर्णकी बराबर गूगल डालै, पश्चात् इसको घृतमें मर्दन कर चिकने वासनमें भरकै रखदेवै, यह संसारमें अमृतकी समान योग, " योगराज गुग्गुलु " इसनामसे प्रसिद्ध है। इसको उचित मात्रानुसार खावे और यथेष्ट भोजन करै। यह योगराज—आमवात, आढ्यवातादिरोग, कृमि, कुष्ठ, व्रण, प्लीहा, गुल्म, उदररोग, आनाह और बवासीरको दूर करैहै। अग्निको दीपनकरै, तेज और बलको बढ़ावै, तथा सन्धि और मज्जागत वातरोगोंको हरैहै ॥

वातारितैलसंयुक्तंगुग्गुलुंपरिपेषयेत् ।
गंधकंत्रिफलाचूर्णैःसुश्लक्ष्णैर्मिश्रयेत्ततः ॥
भक्षयेत्प्रत्यहंप्रातरुष्णतोयाऽनुपानतः ।
आमवातंकटीशूलंगृध्रसींखञ्जपंगुताम् ॥
वातरक्तंसशोथञ्चसदाहंक्रोष्टुशीर्षकम् ।
शमयेच्छतशोदृष्टमपिवैद्यविवर्जितम् ॥

इति वातारिगुग्गुलुः ।

अर्थ-अंडीके तेलके साथ गूगलको पीस लेवै, पश्चात् इसमें गन्धक और त्रिफलेका चूर्ण मिलाकर प्रतिदिन प्रातःकाल गरम जलके अनुपानसे भक्षण करै तो आमवात, कटीशूल, गृध्रसीवात, खंज और पंगुता, शोथयुक्त और दाहयुक्त वातरक्त, तथा क्रोष्टुशीर्षक रोग और वैद्यवर्जित सैंकडों रोग दूर होवै ॥

पलत्रयंकषायस्यत्रिफलायाःसचूर्णितम्।
सौगन्धिकपलंचैकंकौशिकस्यपलन्तथा ॥
कुडवंचित्रतैलस्यसर्वमादाययत्नतः।
पाचयेत्पाकविद्वैद्यःपात्रेलोहमयेदृढे ॥
हन्तिवातंतथापित्तंश्लेष्माणंखंजपंगुताम्।
श्वासंसुदुर्जयंहन्तिकासंपंचविधंतथा ॥
कुष्ठानिवातरक्तंचगुल्मशूलोदराणिच।
आमवातंजयेदेतदपिवैद्यविवर्जितः ॥
एतदभ्यासयोगेनवलीपलितनाशनः।
सर्पिस्तैलरसोपेतमश्नीयाच्छालियष्टिकम् ॥
सिंहनादइतिख्यातोरोगवारणदर्पहा।
वह्नेर्वृद्धिकरंपुंसांभाषितोदण्डपाणिना ॥
चित्रतैलमेरण्डतैलं तस्यकुडवोकृतद्वैगुण्यः।
अन्यथातैलबहुत्वात्पाकःबहुर्विज्ञेयःस्यात् ॥

इति सिंहनादगुग्गुलुः।

अर्थ-त्रिफलेका क्काथ तीन पल, गंधकका चूर्ण एक पल, गूगल एक पल, और अंडीका तेल एक सेर लेवै, पश्चात् सबको मिलाकर पाकक्रियाको जाननेवाला वैद्य उत्तम लोहेके दृढ पात्रमें पकावै। इसको सेवनकरनेसे वात, पित्त, कफ, खंज और पंगुता, दुर्जय श्वास पाँच प्रकारकी खाँसी, कोढ़, वातरक्त, गुल्म, शूल, उदररोग, और वैद्य करकै वर्जितभी आमवातरोग दूर होवै। इसके अभ्यासके योगसै मनुष्य वली (शरीरमें वलोंका पड़ना), पलित (विना समयही

वालोंका धवल होजाना) रहितहो जाते हैं । घी, तेल, और रसों- युक्त शालि और साठी धानोंका भात खावै । यह सिंहनाद गूगल रोगरूप हाथियोंके दर्प्पको भंजन करनेवाला है । और मनुष्योंकी जठराग्निको बढानेवाला है । यह महादेवने भाषण कियाहै ॥

त्रिफलायाःपलान्यष्टौप्रत्येकंबीजवर्जितम् ।
गुग्गुलोर्द्विपलंचात्रनिक्षिपेत्तंसुकुट्टितम् ॥
सर्वसंक्षुद्ययत्नेनसार्द्धाढकजलेपचेत् ।
एकरात्रौस्थितंचैतत्पक्त्वापादावशेषितम् ॥
द्विपलंकटुतैलस्यमिलित्वैकत्रपाचयेत् ।
त्रिकटुत्रिफलामुस्तविडंगामलकानिच ॥
गुडूच्यग्नित्रिवृद्दन्तीचव्यसूरणमानकम् ।
अष्टाष्टौमाषकानेतान्प्रत्येकन्तुसुचूर्णितम् ॥
सहस्रार्द्धपलंद्वयंकालकंविधिशोधितम् ।
रसगंधककर्षार्द्धंप्रत्येकंकज्जलीकृतम् ॥
सम्यक्सिद्धंतुविज्ञायस्निग्धेभाण्डेविनिक्षिपेत् ।
ततोमाषद्वयंजग्ध्वाप्रातरुष्णोदकंपिबेत् ॥
प्रथमंकुरुतेवह्निंशरीरंस्थिरयौवनम् ।
धातुवृद्धिंवयोवृद्धिंबलंसुविपुलन्तथा ॥
अश्मरीमूत्रकृच्छ्रञ्चदुर्नामंसभगन्दरम् ।
आमवातंशिरोवातमम्लपित्तंनिहन्तिच ॥
कामलांपाण्डुतांश्वासंप्रमेहंगुदनिर्गमम् ।
प्लीहानंश्लीपदंश्वासंकासंपंचविधन्तथा ॥
शमयत्युदराण्यष्टौशूलान्यष्टौविशेषतः ।
भग्नास्थिविद्धवातेषुसक्थिग्रहविमोक्षये ॥
हन्यादेवंविधान्व्याधीनामवातंविशेषतः ।

ग्रन्थिवातंतथाकुष्ठंविषमज्वरमेवच ॥
मेदःकफामयंवातंव्याधिवारणदर्पहा ।
व्याधिशार्दूलविख्यातोयोगोऽयममृतोपमः ॥
इति व्याधिशार्दूलगुग्गुलुः ।

अर्थ-गुठलीरहित हरड़, बहेडा और आमला, प्रत्येक आठ आठ पल और कुटा हुआ गूगल आठ तोले गेरै, सबको यत्नपूर्वक कूटकर बारहसेर जलमें पकावै, जब चौथा भाग जल शेष रहै, तब एक रात रख दूसरेदिन आठ तोले कड़वातेल मिला चूल्हेपै चढ़ाकै इसमें त्रिकुटा, त्रिफला, नागरमोथा, वायविडंग, आमला, गिलोय, चीता, निसोत, दन्ती, चव्य, जमीकन्द और मानकन्द, इन प्रत्येकका चूर्ण आठ आठ मासे, जमालगोटेकी अन्तर्जिह्वा दो तोले, पारे और गंधककी कज्जली एक तोले मिलादें, जब भले प्रकारसै सिद्ध हो जाय तब चिकने बासनमें भरके रख देवै, पश्चात् इसको प्रतिदिन प्रातःकाल दो मासे भर खावै और ऊपरसे गरम जल पीवे । यह अग्निको दीपन करै, शरीरको स्थित यौवनयुक्त करे, धातुओंको बढावै, आयुको बढावै और अत्यन्तबलकी वृद्धि करै है । तथा पथरीरोग, मूत्रकृच्छ्र, बवासीर, भगन्दर, आमवात, शिरोवात, अम्लपित्त, कामला, पाण्डुरोग, श्वास, प्रमेह, गुदनिर्गम, प्लीहा, श्लीपद, श्वास, पांचप्रकारकी खाँसी, आठ प्रकारके उदर रोग, आठप्रकारके शूल, भग्नअस्थि, विद्धवात, सक्थिग्रह, विशेषकरकै आमवात, ग्रन्थिवात, कोढ़, विषमज्वर, मेदरोग और कफरोगको दूर करैहै । यह वातरोगरूपी हाथीके मदके दूर करनेके लिये व्याधिशार्दूल है, यह अमृतकी समान योग व्याधिशार्दूल गुग्गुलु नामसे विख्यात है ॥

त्रिफलामुस्तकंव्योषंविडंगंपुष्करंवचा ।
चित्रकंमधुकंचैवपलांशंश्लक्ष्णचूर्णितम् ॥
अयश्चूर्णपलान्यष्टौगुग्गुलुस्तावदेवच ।
आलोड्यमधुनोपेतंपलद्वादशकेनच ॥
प्रातर्विभज्यभुंजानोजीर्णेतस्मिन्नयेद्रुजः ।

आमवातंतथागुल्मंश्वयथुंविषमज्वरम् ॥
जीर्णानुसम्भवंशूलंपाण्डुरोगंहलीमकम् ॥

इति त्रिफलागुग्गुलुः ।

अर्थ-त्रिफला, नागरमोथा, त्रिकुटा, वायविडंग, पोहकरमूल, वच, चीता, और महुआ प्रत्येकका चूर्ण चारचार तोले, लोहेका चूर्ण बत्तीस तोले, और गूगल ३२ बत्तीस तोलेलेवै, पश्चात् इसमें बारहपल सहत मिलाकर नित्यप्रति प्रातःकाल सेवन करै तौ जीर्ण आमवातरोग, गुल्म, सूजन, विषमज्वर, बहुत दिनोंका शूल, पाण्डुरोग और हलीमक रोग दूर होवै ॥

वृद्धदारात्रिवृद्दन्तीकरिकर्णाग्निमानकैः ।
त्रिकत्रययुतोलोहआमवातान्तकोमतः ॥
सर्वानेतान्गदान्हन्तिदन्तिनःकेसरीयथा ॥

इति वृद्धदारकादिलोहम् ।

अर्थ-विधारा, निसोत, दन्ती, हस्तिकर्णपलाश, चीता, मानकन्द, त्रिकुटा, त्रिफला और त्रिमद, यह सब समानभाग और सबकी समान लोहा लेवै, सबको एकत्रकर चूर्ण बनाकर भक्षण करै तौ आमवातरोग, दूर होवै। जिसप्रकार सिंह हाथीको मारदेवे है उसीप्रकार यह लोह आमवातादि संपूर्णरोगोंको विध्वंस करदेवैहै ॥

योगरत्नाकरस्य ।

जारितंपुटितंलौहंचूर्णंपंचपलन्ततः ।
गुग्गुलोःपलपंचाथलौहार्द्धंमृतमभ्रकम् ॥
शुद्धसूतमभ्रसमंगन्धकञ्चतथामतम् ।
त्रिगुणामसयश्चूर्णादभ्रान्तात्रिफलांनयेत् ॥
दत्त्वाद्विरष्टपानीयमष्टभागावशेषयेत् ।
तेनचाष्टावशेषेणपचेल्लोहाभ्रगुग्गुलुम् ॥
घृततुल्यंशतावर्यारसंदत्त्वातथाशुभम् ।
प्रस्थंप्रस्थञ्चदुग्धस्यशनैर्मृद्वग्निनाभिषक् ॥

लोहमय्यापचेद्दर्व्यापात्रेचायसिमृन्मये।
ततःपाकविधिज्ञस्तुपाकसिद्धेविनिक्षिपेत्॥
रसकज्जलिकांकृत्वादत्वाचापिविशुद्धयेत्।
विडंगनागरंधान्यंगुडूचीसत्वजीरकान्॥
पंचकोलंत्रिवृद्दन्तीत्रिफलैलाचमुस्तकम्।
सुचूर्णितंचप्रत्येकंचूर्णमर्द्धपलन्तथा॥
उत्तार्यस्थापयेद्भाण्डेसिद्धेचापिसुरञ्जितम्।
घृतेनमधुनापश्चान्मर्दयित्वानुपानतः॥
भक्षयेच्छुद्धदेहस्तुशुभेऽहनिविपृच्छयच।
आमवातमहाव्याधिविनाशायमहौषधम्॥
सन्धिवातंकर्णशूलंकुक्षिशूलंसुदारुणम्।
जंघापदांगुलीशूलंगृध्रसीमग्निमान्द्यताम्॥
गुल्मंशोथंकामलाञ्चपाण्डुरोगंसुदुःसहम्।
आमवातगजेन्द्रस्यकेसरीमुनिनिर्मितः॥

इति पंचाननोरसः।

अर्थ-जारित और पुटित लोहेका चूर्ण पांचपल, शुद्ध गूगल पांच पल, अभ्रककी भस्म ढाईपल क्राथके लिये त्रिफला प्रत्येक बारहपल पांच तोले लेकर छः सौ तोले जलमें पकावै, जब आठमाभाग जल शेष रहै तब उतारले, पश्चात् उसमें अष्टावशेष काढेमें लोहेका चूर्ण, गूगल और अभ्रक तथाघृत, दूध और शतावरका रस प्रत्येक एक एक प्रस्थ डालकै उत्तम लोहेकी पात्रमें अथवा मट्टीके पात्रमें धीरै धीरै मन्दमंद अग्निसै पकावै और लोहेकी करछीसै चलाता जावै। जबपाक सिद्ध होजाय तब किंचित् गरममें गंधक और पारेकी कज्जली पांच पल, वायविडंग, सोंठ, धनियां, गिलोयका सत्व, जीरा पंचकोल, निसोथ, दन्ती, त्रिफला, इलायची, और नागरमोथा, प्रत्येकका चूर्ण दोदो तोले मिलादेवै। फिर इसको उतारकर चिकने वासनमें भरकै रखदेवै, पश्चात् इसको घृत और सहतमें मर्दनकर पवित्रहो शुभ दिनमें अनुपानके

साथ सेवन करै । यह आमवातमहाव्याधिको दूर करनेके लिये, महौषध है । तथा सन्धिवात, कर्णशूल, कुक्षिशूल, जंघाओंकी पीडा, पदांगुली शूल, गृध्रसीवात, अग्निकी मंदता, गुल्म, सूजन, कामला और दुःसह पाण्डुरोगको दूर करैहै । यह पंचाननरस आमवात-रूपी गजराजके लिये सिंहहै ॥

रसार्णवस्य ।

पिट्टितांगुग्गुलुमानींकटुतैलपलाष्टके ।
प्रत्येकंत्रिफलाप्रस्थौसार्द्धद्रोणेजलेपचेत् ॥
पादशेषंचपूतंचपुनरग्नावधिश्रपेत् ।
त्रिकटुत्रिफलामुस्तविडंगामलकालिकम् ॥
गुडूच्यग्नित्रिवृद्दन्तीचव्यंसूरणमानकम् ।
पारदंगंधकंचैवप्रत्येकंशुक्तिसम्मितम् ॥
सहस्रंकालकफलंसिद्धेसंचूर्ण्यनिक्षिपेत् ।
ततोमाषद्वयंजग्ध्वापिबेत्तप्तजलादिकम् ॥
अग्निश्चकुरुतेदीप्तंवडवानलसन्निभम् ।
धातुवृद्धिंवयोवृद्धिंबलवृद्धिकरन्तथा ॥
आमवातंशिरोवातंसन्धिवातंभगन्दरम् ।
जानुजंघाश्रितंवातंसकटीग्रहमेवच ॥
अश्मरीमूत्रकृच्छ्रञ्चभग्नञ्चतिमिरोदरम् ।
अम्लपित्तंतथाकुष्ठंप्रमेहंगुदनिर्गमम् ॥
कासंपंचविधंश्वासंक्षयञ्चविषमज्वरम् ।
प्लीहानंश्लीपदंगुल्मंपाण्डुरोगंसकामलम् ॥
शोथान्त्रवृद्धिशूलानिगुदजानिविनाशयेत् ।
मेदःकफामसंजातव्याधिवारणदर्पहा ॥
सिंहनादइतिख्यातोयोगोऽयममृतोपमः ॥

इति बृहत्सिंहनादगुग्गुलुः ।

अर्थ-गूगल आठपल, सरसोंका तेल आठपल, और त्रिफला प्रत्येक २ दोसेर लेकर डेढ द्रोण जलमें पकावै,जब जल चौथा भाग शेष रहै तब उतार लेवै,पश्चात् वस्त्रमें छानकर फिर चूल्हेपै चढादेवै,और इसमें त्रिकुटा, त्रिफला, नागरमोथा,वायविडंग,आमला, गिलोय,चीता, निसोत, दन्ती, चव्य,जमीकन्द,मानकन्द,पारा और गंधक प्रत्येक दोदो तोले, तथा शुद्ध किये हुए जमालगोटेकी अन्तर्जिह्वा १००० सबका चूर्णकर मिला देवै।इसको दोमासेभर खावै और ऊपरसे उष्ण जलपीवे।इससे जठराग्नि वडवानलकी समान दीपन होतीहै, धातु, आयु और बलको वृद्धि होती है, तथा आमवात,शिरोवात, सन्धिवात, भगन्दर, जानु और जंघाश्रितवात, कटीग्रह, अश्मरी, मूत्रकृच्छ्र,भ्रम, तिमिर, उदररोग, अम्लपित्त,कोढ,प्रमेह,गुदनिर्गम, पांचप्रकारकी खाँसी, श्वाँस, क्षय, विषमज्वर, प्लीहा, श्लीपद, गुल्म, पाण्डुरोग, कामलारोग, सुजन, अंत्रवृद्धि, शूल और बवासीर नष्ट होती है। यह मेद, कफ और आमसे उत्पन्न हुए रोगरूपी हस्तियोंके मदको दूर करनेके लिये सिंहनाद है। यह योग अमृतकी समान है।

दग्धमनिर्गतधूपंमृगशृंगंगोघृतेनसहपीतम्।
हृदयनितम्बजशूलंहरतिशिखीदारुनिवहमिव॥

अर्थ-हिरनके सींगकी भस्म गायके घीके साथ पीनेसे हृदयशूल और नितम्बशूल दूर होता है। अब हिरनके सींगकी भस्म बनानेकी विधि कहते हैं (प्रथम हिरनके सींगको छीलकर पीस लेवै, फिर उस पिसे हुए हिरनके सींगको एक नवीन मट्टीकी हांडीमें रखकर हांडीके मुखपर शराव ढकके गीली मिट्टीसे बंद कर देवै और नीचै अग्नि जला देवै, जब जलकर भस्म हो जाय तब ग्रहण कर लेवै)॥

अभिष्यन्दकरायेचयेचान्येगुरुपिच्छिलाः।
वर्जनीयाःप्रयत्नेनआमवातार्दितैर्नरैः॥

अर्थ-अभिष्यन्दकारी, भारी, और पिच्छिल द्रव्य आमवात रोगमें त्यागने चाहिये॥

परग्रन्थे।

पलशतंरसोनस्यातिलस्यकुडवन्तथा।

हिंगुत्रिकटुकंक्षारौद्वौपश्चलवणानिच ॥
शतपुष्पातथाकुष्ठंपिप्पलीमूलचित्रकौ ।
अजमोदायवानीचधान्यकश्चैवबुद्धिमान् ॥
प्रत्येकन्तुपलश्चैषांश्लक्ष्णचूर्णानिकारयेत् ।
घृतभाण्डेतथाचैतत्स्थापयेद्दिनषोडश ॥
प्रक्षिप्यतैलमानीश्चप्रस्थार्द्धंकांजिकस्यच ।
खादेत्कर्षप्रमाणश्चतोयंमद्यंपिबेदनु ॥
आमवातेतथावातेसर्वाङ्गैकांगसंश्रये ।
अपस्मारेऽनलेमन्देकासेश्वासेज्वरेषुच ।
सोन्मादेवातभग्नेचशूलेजन्तुषुशस्यते ॥
क्षारौयवक्षारसर्जिकाक्षारौयवान्याभागद्वयंके-
चिदजमोदांफोफान्धीमेवगृह्णन्तिमानीपलाष्टकम् ।
रसोनश्चतिलंनिस्तुषंकृत्वामिश्रयित्वास्निग्धे
भाण्डेकृत्वाशुधान्यराशौस्थापयेत् ।
कर्षंकर्षार्द्धंवाखादित्वातप्तजलानुपानम् ।
रसोनपिण्डाद्युपयोगजातेदाहेविदध्याद्वपुषःप्रलेपनम् ।
धत्तूरपत्रंस्वरसेनपिष्टंनागेश्वरचूर्णनवनीतयुक्तम् ॥

इति रसोनपिण्डः ।

अर्थ–लशुन १०० एक सौ पल, तिल आधसेर, हींग, त्रिकुटा, जवाखार, सज्जी, पाचोंनोन, सोंफ, कूठ, पीपरामूल, चीता, अजवायन, अजमोद और धनिया यह प्रत्येक एक एक पल लेकर सबका बारीक चूर्ण कर घीके चिकने बासनमें भर तिसमें बत्तीस तोले तेल और बत्तीस तोले कांजी मिलाके रख देवै, १६ सोलह दिन बीत जानेपर इसमेंसे एक तोला या दो तोले नित्य खावै और ऊपरसे गरम जल या मदिरा पीवै । इससे आमवात, वात, सर्वांगवात, एकांगवात, अपस्मार, मंदाग्नि, खांसी, श्वास, ज्वर, उन्माद, वातभग्न और शूल दूर होवै ।

रसोनस्यशतंक्षुण्णंतदर्द्धंनिस्तुषात्तिलात् ।
पात्रेगव्यस्यतक्रस्यपिष्टैर्द्रव्यैःसमंक्षिपेत् ॥
त्रिकटुधान्यकंचव्यंचित्रकंगजपिप्पलीम् ।
अजमोदांत्वगेलाश्चग्रन्थिकश्चपलांशिकम् ॥
शर्करायाःपलान्यष्टौपंचाजाज्याःपलानिच ।
कृष्णाजाज्याश्चचत्वारिमधुकस्यगुडस्यच ॥
आर्द्रकस्यचचत्वारिसर्पिषोष्टौपलानिच ।
तिलतैलस्यतावन्तिशुक्तस्यापिचविंशतिः ॥
सिद्धार्थकस्यचत्वारिराजिकायास्तथैवच ।
कर्षप्रमाणंदातव्यंहिंगुलवणपंचकम् ॥
एकीकृत्यदृढेभाण्डेधान्यमध्येनिधापयेत् ।
द्वादशाहात्समुद्धृत्यप्रातःखादेद्यथाबलम् ॥
सुरासौवीरकंसीधुमधुचानुपिबेन्नरः ।
जीर्णेयथेप्सितंभोज्यंदधिपिष्टविवर्जितम् ॥
आमवातार्दिताद्धांङ्गसर्वाङ्गैकाङ्गमारुतान् ।
मासात्सर्वगदान्हन्तिवातपित्तकफोद्भवान् ॥
प्रमेहोदरकुष्ठार्शःशोथगुल्मक्षयज्वरान् ।
अग्निसंधानकृद्वृष्यंदृष्ट्यायुर्बलवर्णदम् ॥

पात्रंशरावः ।

मधुकस्यगुडस्येत्यत्रमधुनःकुडवन्तथेतिपाठान्तरंतेनापिव्यवहारःशुक्ताभावेकांजिकम् ।

इति बृहद्रसोनपिण्डः ।

अर्थ—लशुनका कल्क सौपल, तुषरहित अर्थात् धुले हुए तिल पचास पल, त्रिकुटा, धनिया, चव्य, चीता, गजपीपल, अजमोद, दालचीनी, इलायची और पीपलामूल प्रत्येक चार चार तोले, बूरा आठ पल,

जीरा २० तोले, मुलैठी सोलह तोले, गुड सोलह तोले, अदरख सोलह तोले, गायका घी बत्तीस तोले, तिलका तेल बत्तीस तोले, काँजी अस्सी तोले, सफेद सरसों सोलह तोले, राई सोलहतोले, हींग दो तोले, और पाँचोनोन प्रत्येक दो दो तोले लेवै, सबका चूर्णकर एक पात्रमें गायका मट्ठाभर उसमें यह चूर्णडाल पात्रका मुख बन्द करकै धानोंके ढेरमें बारह दिन तक गाड़ देवै, पश्चात् निकालकर शक्त्यनुसार प्रातःकाल खावै और ऊपरसे सुरा, कांजी, सीधुनामवाली मदिरा और सहत इनमेंसे किसी एकका अनुपान करै। और जीर्ण होजाने पर यथेष्ट भोजन करै। और दही तथा पिष्टि छोड देवै। यह आमवात, अर्द्धांगवात, सर्वांगवात, एकांगवात, वातपित्त और कफसे उत्पन्न हुए रोग, प्रमेह, उदररोग कोढ, बवासीर, सूजन, क्षय और ज्वर इन सब रोगोंको एक महीनेमें दूर करदेताहै। भग्नसंधानकारक वीर्यवर्द्धक तथा दृष्टि, आयु, बल और वर्णको बढ़ानेवाला है॥

सैंधवंत्रिफलारास्नापिप्पलीगजपिप्पली।
स्वर्जिकामरिचंकुष्ठंशुण्ठीसौवर्चलंविडम्॥
यवान्योपुष्कराजाजीमधुकंशतपुष्पिकाम्।
पलार्द्धिकैःपचेदेतैःप्रस्थमेरण्डतैलतः॥
प्रस्थाम्बुशतपुष्पायाःप्रत्येकंमस्तुकांजिके।
दत्त्वाद्विगुणितेपानेतत्रसम्यक्प्रयोजितम्॥
आमवातहरंश्रेष्ठंसर्ववातघ्नमग्निदम्।
कटीजानूरुसन्धिस्थेपार्श्वहृद्वङ्क्षणाक्षये।
शस्तंवातान्त्रवृद्धौचसैन्धवाद्यमिदंमहत्।

इति बृहत्सैन्धवाद्यंतैलम्।

अर्थ—अंडीका तेल दोसेर, सौंफका अर्क दोसेर, दहीका तोड चारसेर, कांजी चारसेर, और कल्कके लिये सैंधानोन, त्रिफला, रायसन, पीपल, गजपीपल, सज्जी, काली मिरच, सोंठ, कालानोन, विड़नोन, अजमोद, पोहकरमूल, जीरा, मुलैठी और सोंफ, प्रत्येक दो दो तोले कूठ और अजवायन चार चार तोले लेवै। सबको विधिपूर्वक मिलाकर

सिद्ध करै। इसको पीनेसे आमवात तथा सर्वप्रकारकी वात दूर होजाती है, अग्निदीपन होतीहै तथा कटी, जानु, ऊरु सन्धि, पार्श्व और वंक्षणमें स्थित हुई वात दूर होजातीहै। यह बृहत्सैन्धवाद्यतैल वातान्त्रवृद्धि रोगोंको अत्यन्त हितकारीहै ॥

सैन्धवंश्रेयसीरास्नाशतपुष्पायवानिका।
स्वर्जिकामरिचंकुष्ठंशुण्ठीसौवर्चलंविडम् ॥
वचाजमोदाजरणपौष्करंमधुकंकणा।
एतान्यर्द्धपलांशानिश्लक्ष्णंपिष्ट्वाप्रदापयेत् ॥
प्रस्थमेरण्डतैलस्यप्रस्थाम्बुशतपुष्पजम्।
काञ्जिकंद्विगुणंदत्त्वामस्तुचद्विगुणन्तथा ॥
सिद्धमेतत्प्रयोक्तव्यमामवातहरंपरम्।
पानाभ्यंजनबस्तौचकुरुतेऽग्निबलंभृशम् ॥
वातार्त्तेवङ्क्षणेशस्तंकटीजानूरुसान्धिजे।
शूलेहृत्पार्श्वजेवृद्धौकृच्छ्रेऽश्मरीप्रपीडिते ॥
बाह्यायामार्दितेवातेत्वन्त्रवृद्धिनिपीडिते।
अन्यांश्चानिलजान्रोगान्नाशयत्याशुदेहिनाम् ॥

इतिबृहत्सैन्धवाद्यंतैलम्।

इति आमवाताध्यायः।

अर्थ-सैंधानोंन, हरड, रायसन, सोंफ, अजवायन, सज्जी, कालीमिरच, कूठ, सोंठ, कालानोंन, विरियासंचरनोंन, बच, अजमोद, जीरा, पोहकरमूल, मुलैठीऔर पीपल, यह प्रत्येक दोदो तोले लेकर सबको बारीक पीसलेवै, फिर दोसेर अंडीका तेल, दोसेर सोंफका क्काथ, चारसेर दहीका पानी लेवै, सबको मिलाकर सिद्ध करै। इस तेलको पान, अभ्यंजन और बस्तिकर्म्ममें प्रयोग करै। यह तेल आमवातनाशक और अग्निवर्धक है तथा वंक्षण, कटि, जानु संधि, हृदय और पसली, इनका शूल, मूत्रकृच्छ्र, पथरी, बाह्यामवात, अन्त्रवृद्धि और अन्यान्य वातरोगोंको दूर करै है ॥

इति आमवाताधिकारः समाप्तः।

अथ शूलचिकित्सामाह ।

वमनंलंघनंस्वेदःपाचनंफलवर्त्तयः ।
क्षारचूर्णानिगुटिकाः शस्यन्तेशूलशान्तये ॥
पुंसःशूलाभिपन्नस्यस्वेदएवसुखावहः ।
पायसैः कृशरैःपिष्टैःस्निग्धैर्वापिसितोत्करैः ॥

अर्थ-वमन, लंघन, स्वेद, पाचन, फलवर्त्ती, क्षार, चूर्ण और गुटिका यह सब शूलरोगमें शान्तिके लिये प्रयोग करै। शूलरोगयुक्त मनुष्यको स्वेदही सुखकारक है, तथा खीर, खिचड़ी, पिट्ठी, स्निग्ध और खाँड-युक्त द्रव्यशूलरोगमें हितकारीहैं ॥

शूलेतुवातिकेऽभ्यङ्गस्वेदमर्द्दनवस्तयः ।
स्निग्धोष्णमनुपानञ्चसस्नेहमुपनाहनम् ॥
बिल्वमूलतिलैरण्डकांजिकैर्वाथवातिलैः ।
गुटिकांभ्रामयेदुष्णांवातशूलविनाशिनीम् ॥
नाभिलेपाज्जयेच्छूलंमदनःकांजिकान्वितः ।
बलापुनर्नवैरण्डबृहतीद्वयगोक्षुरैः ॥
सहिंगुलवणक्काथः सद्योवातरुजापहः ।
तुम्बुरूण्यभयाहिंगुपुष्करंलवणत्रयम् ॥
पिबेद्यवाम्बुनावातगुल्मशूलापतन्त्रकी ।
यवानीहिंगुसिन्धूत्थक्षारसौवर्चलाभयाः ॥
सुरामण्डेनपातव्यावातशूलनिषूदनाः ।
विश्वमेरण्डजंमूलंक्काथयित्वाजलंपिबेत् ॥
हिंगुसौवर्चलोपेतंसद्यःशूलनिवारणम् ।
विश्वैरण्डयवक्काथःसद्यः शूलनिवारणः ॥

अर्थ-वातजन्यशूलरोगमें अभ्यंग, स्वेद, मर्दन, बस्ति, स्निग्ध और उष्ण अनुपान तथा स्नेहयुक्त उपनाहस्वेद हितकारकहै । बेलकी

जड, तिल, अण्डकी जड, इनको कांजीमें पीसकर गोली बना अथवा तिलोंकी गोली बना गरमकर स्वेददेवै तौ वातजशूल दूर होवै। मैनफलको कांजीमें पीसकर नाभिपै लेपकरनेसे वातशूल नष्ट होता है। खिरैटी, पुनर्नवा, अंड़कीजड़, बृहती, कटेरी और गोखरू इनके काढ़ेमें हींग और सैंधेनोनको डालकर पीनेसे वातजनितशूल रोग दूर होता है। धनिया, हरड, हींग, पोहकरमूल, कालानोन, सैंधानोन, और विरियासंचरनोन इनका क्काथ बना जवोंके जलकेसाथ पीनेसे वातजनितगुल्म, शूल और अपतन्त्रक वातरोग दूर होताहै। अजवायन, हींग, सैंधानोन, जवाखार, कालानोन, और हरड़, इनका चूर्ण सुराके मंडके साथ पीनेसे वातजशूल नष्ट होताहै। सोंठ और अण्डकी जड़के क्काथमें हींग और कालानोन डालकर पीनेसे अथवा सोंठ, अण्ड और जौंका क्काथ पीनेसे तत्काल शूल दूर होताहै॥

गुडःशालिर्यवाःक्षीरसर्पिष्पानंविरेचनम्।
जाङ्गलानिचमांसानिभेषजंपित्तशूलिनाम्॥

अर्थ-गुड, शालिधान, जौ, दूध, घी, और जाङ्गलदेशके जीवोंका मांस इनका भक्षण करना, और विरेचन यह पित्तशूलरोगवालोंकी औषधी है॥

प्रातर्वरीरसःपीतःसक्षौद्रोदाहशूलहा॥

अर्थ-प्रातःकाल शतावरका रस सहतकेसाथ पीनेसे दाहयुक्तशूलरोग दूर होताहै॥

बृहत्यौगोक्षुरैरण्डकुशकाशेक्षुबालिका।
पीताःपित्तभवंशूलंसद्योहन्तिसुदारुणम्॥

अर्थ-बृहती, कटेरी, गोखरू, अंडकीजड, कुश, काँस और इक्षुबालिका (एक प्रकारकी ईख, जो कि ईखकी समान होती है, जिसको वंगदेशमें आनाखु और खागड़ा कहतेहैं), इनका क्काथ पीनेसे तत्काल दारुणपित्तजशूल दूर होता है॥

त्रिफलानिम्बयष्ट्याह्वकटुकारग्वधैःस्मृतम्।
पाययेन्मधुमिश्रं वा दाहशूलोपशान्तये॥

अर्थ-त्रिफला, नीम, मुलैठी, कुटकी, और अमलतास इनके काढेमें सहत मिलाके पीनेसे दाह और शूल शान्त होताहै ॥

कफशूलेबस्तिनस्यंलंघनंकटुरूक्षकम् ।
पंचमूलकृतापेयादीपनंकफशूलनुत् ॥
अर्द्धशृतेनकल्केनवा ।

अर्थ-कफजशूल रोगमें बस्ति, नस्य, लंघन, कटु और रूक्षद्रव्य हितकारकहै । पंचमूलके अर्द्धावशिष्ट क्वाथके अथवा कल्कके साथ बनाई हुई पेया पीनेसे जठराग्नि दीपन होतीहै और कफजशूल दूर होताहै ॥

लवणत्रयसंयुक्तंपंचकोलंसरामठम् ।
सुखोष्णेनाम्बुनापेयंकफशूलनिवारणम् ॥

अर्थ-सैंधानोन, कालानोन, विरियासंचरनोन, पंचकोल और हींग इनका बारीक चूर्णकर सुखोष्णजलके साथ पीनेसे कफजशूल दूर होताहै॥

बिल्वमूलमथैरण्डंचित्रकंविश्वभेषजम् ।
हिंगुसैन्धवसंयुक्तंसद्यःशूलनिवारणम् ॥

अर्थ-बेलकीजड, अण्डकीजड, चीता और सोंठ, इनके क्वाथमें सैंधानोन और हींग डालकर पीनेसै तत्काल शूल नष्ट होताहै ॥

मातुलुङ्गरसोवापिशिग्रुक्काथस्तथापरः ।
सक्षारोमधुनापीतःपार्श्वहृद्बस्तिशूलनुत् ॥

अर्थ-बिजोरेके रसमें अथवा सैजिनेके काथमें जवाखार और सहत-डालके पीनेसे पार्श्व, हृदय और बस्तिशूल आराम होताहै ॥

दीप्यकंसैन्धवंपथ्यानागरञ्चचतुःसमम् ।
चूर्णंशूलंजयत्याशुमन्दस्याग्नेश्चदीपनम् ॥
इति तप्तजलेनपेयम् ।

अर्थ-अजमोद, सैंधानोन, हरड और सोंठ, सब समान भागले चूर्णकर गरम जलकेसाथ पीनेसे शूल निर्मूल होजाताहै और अग्नि-प्रदीपन होती है ॥

विश्वोरुबूकदशमूलयवाम्भसातु
द्विक्षारहिंगुलवणत्रयपुष्कराणाम्।
चूर्णंपिबेद्धृदयपार्श्वकटीग्रहाम-
पक्वाशयांसभृशरुग्ज्वरगुल्मशूली॥
अत्रचूर्णापेक्षीचतुर्द्रवः।
इति बृहद्विश्वादि।

अर्थ-सोंठ, अण्डकीजड, दशमूल और जौ, इनके चौगुने काथमें जवाखार, सज्जी, हींग, सैंधानोन, कालानोन, विरियासंचरनोन, और पोहकरमूलका चूर्ण मिलाकर सेवनकरनेसे हृदय, पार्श्व, कटि और आमशूल, पक्वाशय और स्कन्धदेशकी वेदना, ज्वर, गुल्म और शूल दूर होताहै॥

विदारीदाडिमरसःसव्योषलवणान्वितः।
क्षौद्रयुक्तोजयत्याशुशूलंदोषत्रयोद्भवम्॥

अर्थ-विदारीकन्द, और अनारके रसमें त्रिकुटा, सैन्धानोनका चूर्ण डालके सहतकेसाथ पीनेसे सान्निपातिक शूल दूर होताहै॥

एरण्डबिल्वबृहतीद्वयमातुलुंग-
पाषाणभित्त्रिकण्टकमूलकृतःकषायः॥
सक्षारहिंगुलवणोरुबुतैलमिश्रः
श्रोण्यंसमेढ्र्यहृदयस्तम्बरुक्षपेयः॥
इति एरण्डसप्तकः।

अर्थ-अण्डकीजड, बेल, कटेरी, कटाई, बिजोरा, पाषाणभेद, और गोखरू, इनके काढेमें हींग, सैंधानोन, जवाखार, और अण्डीका तेल मिलाकर पानकरनेसे कटी, संधि, मेढ्र और हृदयशूल दूर होताहै॥

तुम्बुरूण्यभयाहिंगुपौष्करंलवणत्रयम्।
यवानीचयवक्षारोविडंगानिसमानिच॥

त्रिवृत्त्रिगुणितंचूर्णंपिबेदुष्णेनवारिणा ।
आनाहमुदराण्यष्टौविद्रधिंगुल्ममेवच ॥
निहन्तिसर्वंइतितुम्बर्वाद्यचूर्णंशूलानितुम्बुर्वाद्योऽतिविश्रुतः ॥

अर्थ–तुम्बुरु, हरड, हींग, पोहकरमूल, कालानोंन, सैंधानोंन विरियासंचरनोंन, अजवायन और वायविडंग, यह सब समान भाग और निसोत तीन भाग लेवै, सबका बारीक चूर्ण कर गरमजलके साथ पीवै तौ आनाह, आठप्रकारके उदररोग, विद्रधि, गुल्म और सर्वप्रकारके शूल दूर होवै ॥

शुद्धलोहमलाच्चूर्णंषट्पलंपंचकार्षिकम् ।
हरीतक्याःकठिन्याश्चरसगंधकयोःपृथक् ॥
अर्द्धकर्षंततःकर्षंचित्रकंनागरंकणा ।
सूक्ष्मैलातेजपत्रञ्चवाट्यालंभद्रमुस्तकम् ॥
यवानीधान्यकंधूपंविभीतक्यामलक्यपि ।
विडंगंशंखनाभिंचअर्जुनाशनयोस्त्वचः ॥
अपामार्गभवंमूलं सर्वमेकीकृतंशुभम् ।
पीठोपरिपदं न्यस्यप्रस्तये घृतभाजने ॥
भुक्तोपरिचतच्चूर्णंकर्षंकर्षार्द्धमाचरेत् ।
तप्तोदकानुपानञ्चताम्बूलंभक्षयेत्ततः ॥
ततोभूमौपदंदत्त्वाभूमेःकिंचिद्यथासुखम् ।
प्रत्यहंभक्षयेद्धत्त्यावाह्निसंदीपनंपरम् ॥
शूलमष्टविधंहन्तिविशेषात्परिणामजम् ।
अन्नद्रवकृतंशूलंगुल्मशूलञ्चनाशयेत् ॥
कटीपार्श्वभवंशूलंयकृत्प्लीहकृतञ्चयत् ।
शूलानामपिसर्वेषामौषधंनास्तितत्परम् ॥
कामलापाण्डुरोगघ्नंहलीमकाविनाशनम् ।

मानवानांकृपाहेतोर्देवदेवेननिर्मितम् ॥
चित्रकाद्यमिदंचूर्णसर्वशूलान्तकंमतम् ॥

इति सर्वेश्वरचूर्णम् ।

अर्थ-त्रिकुटा, त्रिफला, शम्बूकके मुखका चूर्ण, जवाखार, कामरुदेशकी सेलखड़ी (असगंध और लालसेलखड़ी), इन्द्रजव, और सतोनाका खार प्रत्येकसमान, गोमूत्र और कलमी शाकके रससै शुद्ध किया हुआ मण्डूर सब औषधियोंसे दुगुना लेकर सबका एकत्र चूर्ण करले । इसको सर्वेश्वरचूर्ण कहतेहैं, इसको भोजनके पूर्व, मध्य और अन्तमें भक्षणकरै । अनुपान-शुष्कपत्र, जल और गायका अध औंटा हुआ गरमागरम दूध है । इसको सेवनकरनेसे मनुष्य बहुतदिनोंके पुराने, महादुस्तर और असाध्य शूलसै छूट जाते हैं, तथा भरकै रखदेवै । इसको भोजनके पश्चात् कर्ष या अर्द्धकर्ष प्रमाण गरम जलके साथ खावै । तदनन्तर पानखाय और कुछ देर पृथ्वीमें पांवधर सुखपूर्वक बैठे । इसप्रकार प्रतिदिन खावै । इससे आठप्रकारके शूल, विशेषकरकै परिणामशूल, अन्नद्रवकृतशूल, गुल्मशूल, कटी और पार्श्वोद्भवशूल, यकृत और प्लीहासे उत्पन्न हुआ शूल, कामला, पाण्डुरोग और हलीमकरोगको दूर होता है । यह शूलरोगकी एकही औषधि है । यह चित्रकाद्यचूर्ण देवादिदेव शिवजीने मनुष्योंके हितके लिये निर्माण कियाहै ॥

त्रिकटुत्रिफलाचूर्णचूर्णशम्बूकजाननम् ।
यवक्षारंतथारक्तकठिनीकामरूपिणी ॥
शक्रचूर्णसमाधिकंक्षारंदानदलोद्भवम् ।
यावन्त्येतानिचूर्णानिमण्डूरंद्विगुणन्ततः ॥
मन्डूरंद्विगुणंकार्यंगोमूत्रैःसप्तचैवहि ।
कलम्बीस्वरसैःशुद्धंशोधयेत्सुविचक्षणः ॥
एकीकृत्यप्रयत्नेनचूर्णसर्वेश्वराह्वयम् ।
प्राङ्मध्यान्तक्रमेणैवभोजनस्यप्रयोजयेत् ॥

मात्रयाचानुपानञ्चशुष्कपत्रजलेपयः ।
गव्यमर्द्धशृतंकृत्वाशूलादन्तकमान्वितात् ॥
चिरजातसर्वतोधीमान्दुस्तरान्मुच्यतेनरः ।
पक्तिशूलात्तथैवान्नद्रवशूलाच्चसर्वशः ॥
मुच्यतेमानवोयाद्दग्विष्णुमाराधनेभवात् ।
प्लीहगुल्मोदरादींश्चमन्दाग्नित्वमरोचकम् ॥
कासंपंचविधंचापिऊरुस्तम्भामवातकैः ।
हन्यादेवप्रयोगोऽयमश्विभ्यांनिर्मितःपुरा ॥

इति चित्रकाद्यंचूर्णम् ।

अर्थ–शुद्ध लोहेके मलकाचूर्ण छैपल, हरड़ और सेलखड़ी प्रत्येक दश तोले, शुद्धपारा एक तोला, शुद्ध गंधक एक तोला, चीता दो तोले, सोंठ दो तोले, पीपल दो तोले, छोटी इलायची दो तोले, तेजपात दो तोले, खिरैटी दो तोले, नागरमोथा दो तोले, अजवायन दो तोले, धनिया दो तोले, राल दो तोले, आमला दो तोले, वायविडंग दो तोले, शंखनाभि दो तोले, अर्जुनवृक्षकी छाल दो तोले, असनवृक्षकी छाल दो तोले, और चिरचिरेकी जड़ दो तोले लेकर सबका बारीक चूर्णकर घीके चिकने बासनमें रखकर प्रति दिन खानेसे पक्तिशूल और अन्नद्रवकृत शूलसे मनुष्य इसप्रकार निर्मुक्त होजातेहैं जैसे विष्णु-भगवान्के आराधनसे इस असारसंसारसे निर्मुक्त होजाते हैं। तथा प्लीहा, गुल्म, उदररोग, मन्दाग्नि, अरुचि, पाँचप्रकारकी खाँसी, ऊरु-स्तम्भ, और आमवात रोग दूर होजाता है। यह योग पूर्वकालमें अश्विनी-कुमारोंने निर्माण किया है ॥

शंखचूर्णसलवणंसहिंगुव्योषसंयुतम् ।
उष्णोदकेनतत्पीतंशूलंहन्तित्रिदोषजम् ॥

अर्थ–शंख, सैंधानोन, हींग और त्रिकुटा इनका चूर्ण बनाकर गरम जलके साथ सेवनकरनेसे त्रिदोषज शूल आराम होताहै ॥

गोमूत्रशुद्धमण्डूरंत्रिफलाचूर्णसंयुतम् ।

विलिहन्मधुसर्पिभ्यांशूलंहन्तित्रिदोषजम् ॥
सर्वचूर्णसमंमण्डूरंग्राह्यंप्रधानत्वात् ।

इति त्रिफलामण्डूरम् ।

अर्थ-त्रिफला प्रत्येक एक भाग और गोमूत्रमें शुद्ध किया हुआ मण्डूर तीन भाग लेव, सबका एकत्र चूर्ण बनाकर सहत और घीके साथ चाटनेसे त्रिदोषज शूल नष्ट होताहै ॥

बीजपूरकमेरण्डंरास्नांगोक्षुरकंबलाम् ।
पृथक्पंचपलान्भागान्यवप्रस्थसमायुतान् ॥
वारिद्रोणेनसंसाध्यंयावत्पादावशेषितम् ।
घृतप्रस्थंपचेत्तेनकल्कंदत्त्वाक्षसम्मितम् ॥
तुम्बुरूण्यभयाव्योषहिंगुसौवर्चलंविडम् ।
सैन्धवंयावशूकञ्चस्वर्जिकामम्लवेतसम् ॥
पुष्करंदाडिमंचैववृक्षाम्लंजीरकद्वयम् ।
मस्तुप्रस्थद्वयंसिद्धंततोमृद्वग्निनापचेत् ॥
पानमेतत्प्रशंसन्तिशूलंहन्यात्रिदोषजम् ।
वातशूलंयकृच्छूलंगुल्मप्लीहापहंपरम् ॥
हृच्छूलंपार्श्वशूलञ्च अंगशूलञ्चयद्भवेत् ।
बलवर्णकरंहृद्यमग्निसंदीपनंपरम् ॥

इति बीजपूराद्यंघृतम् ।

अर्थ-गायकाघी दोसेर, दहीका तोड चारसेर, काथके लिये विजौरा नीबू, अण्ड, रास्ना, गोखरू, और खिरैटी ५ पल, जौ दोसेर, पाकके लिये जल ३२ बत्तीस सेर, शेष आठसेर रक्खे, कल्कके लिये तुम्बुरु, हरड, त्रिकुटा, हींग, कालानोन, विरियासंचरनोन, सैंधानोन, जवाखार, सज्जी, अम्लवैंत, पोहकरमूल, अनार, विषांबिल, जीरा और कालाजीरा, प्रत्येक समान और सब बीस तोले लेवै । सबको यथाविधिसे मिलाकर मन्दाग्निसे पकावै । जब सिद्ध होजाय तब उतारकर

उत्तमपात्रमें भरके रख देवै । इसको पीनेसे- त्रिदोषशूल, वातशूल, यकृच्छूल, गुल्म, प्लीहा, हृदयशूल, पार्श्वशूल और अंगशूल, नाश होताहै । यह- बल, वर्ण, इनको करनेवाला, हृदयको हितकारी, और अग्निको दीपनकरनेवाला है ॥

रास्नाश्वगन्धाकपिकच्छुभूमिकूष्माण्डगोकण्टकशालपर्णी ।
छिन्नारुहैरण्डबलाशताह्वपुनर्नवानांविधिनोद्धृतानाम् ॥
प्रत्येकशःपंचपलंगृहीत्वापचेद्घटेऽपांकृतपादशेषे ॥
शतावरीरसंपूतंदत्त्वात्रपलषोडशम् ।
घृतप्रस्थंविपक्तव्यंतैलमेरण्डमेववा ॥
दत्त्वाष्टवर्गकल्कञ्चगुग्गुलोर्वापलाष्टकम् ।
सिद्धंघृतंचतैलंवादद्याद्वातगदातुरे ॥
एकजंद्वन्द्वजंचैवसर्वगञ्चविशेषतः ।
आमवातगदंहन्तिघृतमेतदनुत्तमम् ॥
पार्श्वशूलञ्चहृच्छूलंकटिशूलञ्चनाशयेत् ।
पादमन्याभिसन्धीनांशूलंहन्तिनसंशयः ॥

इति रास्नाद्यंघृतंतैलञ्च ।

अर्थ-गायकाघी अथवा अंडका तेल दोसेर, शतावरका रस दो सेर, क्वाथके लिये रास्ना, असगंध, कौंछ, विदारीकन्द, गोखरू, शालिपर्णी, गिलोय, अण्ड, खिरेटी, सौंफ और पुनर्नवा प्रत्येक पांच पल, जल ३२ बत्तीस सेर, शेष आठसेर रक्खै, और कल्कके लिये (काकोली, क्षीरकाकोली, मेदा, महामेदा, ऋद्धि, वृद्धि, जीवक, ऋषभक) या गूगल एकसेर लेवै । सबको मिलाकर घृत अथवा तेल सिद्ध करै । इस घृत या तेलको सेवनकरनेसे सर्व प्रकारके वातरोग और आमवातरोगको दूर करैहै । तथा पार्श्वशूल, हृदयशूल, कटिशूल, पाद, मन्या और संधियोंके शूलको हरैहै ॥

मृतःसूताभ्रकंचाम्लवेतसंताम्रगंधकम्
विषंफलत्रयंतुल्यंचूर्णमर्द्यादिनावधि ॥

विषमुण्डतिकावासाविजया रक्तशालिनी ।
बृहतीचमहाराष्ट्रीधत्तूरंपद्मपत्रकम् ॥
अन्तमत्यमृता जम्बुर्गव्यंनीलोत्पलद्रवैः ।
समांशंपंचलवणंदत्त्वार्द्रकरसेनच ॥
दिनंपेष्यंततःकुर्याद्वटिकांचणमात्रकम् ।
प्रातर्मध्याह्नरात्रौचभक्षयेद्वटिकात्रयम् ॥
मांसेक्षुपिष्टगुर्वन्नंगोपयश्चपिबेच्छनैः ।
भक्षयेद्वातशूलार्त्तःसोऽयमग्निरसोत्तमम् ॥
हरीतकीप्रतिविषाहिंगुसौवर्चलंवचा ।
कलिंगेन्द्रयवातुल्यंपाययेदुष्णवारिणा ॥
कर्षैकमनुपानंस्याद्वातशूलहरंपरम् ॥

इति अग्निमुखरसः ।

अर्थ–पारेकी भस्म, अभ्रककी भस्म, अमलवेंत, तांबेकी भस्म, शुद्ध गंधक, शुद्ध तेलिया और त्रिफला, यह सब समान भाग लेकर एक एक दिन विषतुण्डिका, वासा, भांग, रक्तशालिनी, बृहती, जलपीपल, धतूरा, कमलके पत्र, शालिपर्णी, गिलोय, जामन, गोबर और नीलोत्पलके रसमें खरल करै । फिर इसमें समान भाग पंचलवण मिलाकर एक दिन अदरखके रसमें खरल करै । पश्चात् चनेकी बराबर गोलियां बनालेवै । एक गोली प्रातःकाल, एक गोली दुपहरको और एक गोली रातको भक्षण करै, इसप्रकार प्रतिदिन तीन गोली खावै । अनुपान–हरड, अतीस, हींग कालानोंन, वच, कुडेकीछाल और इन्द्रजवका चूर्ण दोतोला गरम जलके साथ । इसपर मांस, ईख, पिट्ठी भारी अन्न और गायका दूध पीवै । यह अग्निमुखरस वातशूलको दूर करैहै ॥

भस्मसूतसमंचाभ्रंशिलागंधकतालकम् ।
हिंगुकंकुष्ठमुस्तञ्चतुल्यंचूर्णविभावयेत् ॥

स्नुह्युन्मत्तस्यनिर्गुण्डीमहाराष्ट्रीद्रवैःपुनः ।
प्रतिद्रावैर्दिनंभाव्यंशुष्कंतद्गोलकंकुरु ॥
वस्त्रेबद्धामृदालेप्यंशुष्कन्तुसंपुटेपचेत् ।
चतुर्यामार्धमात्रेषुतदामाय विचूर्णयेत् ॥
गुंजाष्टंघृतशुण्ठीभ्यांलेह्यश्चोदयभास्करः ।
वातशूलप्रशान्त्यर्थंतिलक्षारंसकुष्टकम् ॥
मधुनालेहयेच्चानुमलंवाकाकतुण्डजम् ।

इति उदयभास्कररसः ।

अर्थ—पारेकी भस्म,अभ्रककी भस्म, मैनशिल, गंधक, हरिताल, हींग, मुरदारसिंह नागरमोथा, यह सब समान भाग लेकर थूहर, धतूरा, सम्हालु और जलपीपके रसमें एक एक दिन खरल कर गोला बना सुखादेवै, पश्चात् इस गोलेको वस्त्रमें बांध मट्टीका लेपकर ४॥ साढ़ेचार प्रहर तक पुटपाककरे। शीतल होने पर चूर्ण करलेवै । आठ गुंजाभर इस उदयभास्कर रसको सोंठके चूर्णके तथा सहतके साथ चाटै तौ वात शूल दूर होवै।अनुपान तिलोंका खार और कूटका चूर्ण या कौआठोडीकी जलका चूर्ण सहतके साथ ॥

शुद्धसूतंसमंगंधंमृताकारोमनःशिला ।
सैन्धवंमाक्षिकंतालंधत्तूरंहिंगुसूरणम् ॥
महाराष्ट्रयर्कनिर्गुण्डीवासैरण्डद्रवैर्दिनम् ।
मर्द्यंरुद्धापुटेपच्यात्कुक्कुटाख्येसमुद्धरेत् ॥
अष्टगुंजांलिहेत्क्षौद्रैर्भूदारोवातशूलजित् ।
हिंगुसौवर्चलंशुंठीमक्षमुष्णाम्बुनाप्यनु ॥

इति भूदारोरसः ।

अर्थ—शुद्ध पारा, शुद्ध गंधक, तांबेकी भस्म, लौहेकी भस्म, मैनफल, सैंधानोंन, सोनामाखी, हरिताल, धतूरा, हींग और जमीकन्द, यह सब समान भाग लेकर जलपीपल, निर्गुण्डी, वासा और अण्डके रस-में एक एक दिन खरलकर कुक्कुटपुटमें पकावै । आठ घुघुची

भर इस भूदाररसको सहतके साथ चाटै तौ वातशूल दूर होय. अनुपान-हींग, कालानोंन और सोंठका चूर्ण दो तोले भर गरम जलके साथ पीवै ॥

इति भूदारोरसः ।

मृतसूतस्यभागैकंभागैकं शोधितांशिलाम् ।
दिनंजम्बीरजैर्द्रावैर्मर्द्यंरुद्ध्वाधमेल्लघु ॥
शिलाबद्धोरसोनामगुंजैकंपित्तशूलजित् ।
एकंहिंगुशतंपथ्यात्रिशुण्ठीद्विसुवर्चला ॥
एतच्चूर्णञ्चकर्षैकमनुस्याच्छूलशान्तये ॥

इति शिलाबद्धरसः ।

अर्थ-पारेकीभस्म एकभाग, शुद्धमैनाशिल एकभाग लेकै दोनोंको जम्बीरीनीबूकेरसमें एकदिन खरलकर लघुपुटमेंरखके फूँकदेवे। इस शिलाबद्धरसको एकगुंजाभर खानेसे पित्तशूल दूर होताहै । अनुपान एकभाग हींग, सौभाग हरड़, तीनभाग सोंठ और दो भाग कालानोन इनका चूर्ण बनाकर दो तोले खावै ॥

विषकर्षवचाकर्षत्रिकटुत्रिफलाचषट् ।
भार्गीमुस्ताविडंगानांप्रतिकर्षञ्चचूर्णयेत् ॥
गुडेनसर्वतुल्येनगुटिकाचणमात्रका ।
शूलसिंहप्रयोगोऽयंकफशूलहरंभवेत् ॥
एरण्डतैलशुण्ठीभ्यांहिंगुसौवर्चलान्वितम् ॥
उष्णोष्णकैःपिबेच्चानुरसोवानन्दभैरवः ॥

इतिशूलसिंहरसः ।

अर्थ-विष, वच, सोंठ, मिरच, पीपल, हरड़, बहेड़ा, आमला, भारंगी, नागरमोथा, और वायविडंग प्रत्येक एक२ कर्ष लेकर सबका चूर्ण करले और सब चूर्णकी बराबर गुड मिलाकर चनेकी समान गोली बना लेवै। यह शूलसिंहरस कफशूलको नष्ट करैहै । अनुपान-हींग और कालेनोनको अंडीके तेल और सोंठकेसाथ या गरम जलकेसाथ पान करै ॥

शुद्धसूतंमृतंताम्रंशिलामाक्षिकतालकम् ।
चूर्णयेल्लवणंपंचएतद्दशकतुल्यकम् ॥
सूततुल्यंवत्सनाभंचूर्ण्यंभाव्यंदिनावधि ।
विषमुष्ट्याजयन्त्यावाविजयारक्तशाकिनी ॥
शोभांजनंमहाराष्ट्रीद्रवैर्धुस्तूरजैस्तथा ।
रुद्धातुसंपुटेपच्यात्समुद्धृत्यविचूर्णयेत् ॥
सर्वाङ्गसुन्दरोनामरसोगुंजा चतुष्टयम् ।
भक्षयेद्धिंगुशुण्ठीभ्यांकफशूलञ्चगुल्मनुत् ॥
व्योषंसौवर्चलंहिंगुकरञ्जबीजसंयुतम् ।
पिबेदुष्णाम्बुनाचानुकफशूलहरंपरम् ॥

इति सर्वांगसुन्दररसः ।

अर्थ-शुद्ध पारा, तांबेकी भस्म, मैनशिल, सोनामाखी, हरिताल, पांचोंनोंन और वत्सनाभविष,सब समान भाग लेकर चूर्ण बना कुचिला, जयन्ती, भांग, रक्तशाकिनी, सैंजिना, जलपीपल और धतूरेकेरसकी प्रतिदिन भावना देकर पुटपाक करै, फिर शीतल होजानेपर तोड़कर चूर्ण करले तौ सर्वांगसुन्दररस सिद्धहो । यह सर्वाङ्गसुन्दररस हींग और सोंठकेसाथ खानेसे-कफ शूल और गुल्मको दूर करैहै । मात्रा चार रत्तीकी है, अनुपान-त्रिकुटा, कालानोन, हींग, और करंजके बीजोंका चूर्ण गरम जलके साथ पान करै ॥

रसगंधकलौहानांपलार्द्धेनसमन्वितम् ।
टंकणंरामठं शुंठीत्रिकटुत्रिफलाशठी ॥
त्वगेलापत्रतालीशंजातीफललवंगकम् ।
यवानीजीरकंधान्यंप्रत्येकंतोलकंशुभम् ॥
माषैकावटिकाकार्याछागीदुग्धप्रपेषिता ।
गणेशयोगिनीशम्भुहरिसूर्यान्प्रपूज्यच ॥
शीतनीरानुपानेनच्छागीदुग्धेनवापुनः ।

एकैकाभक्षिताचेयंवटिकाशूलवज्रिणी ॥
शूलमष्टविधंहन्तिप्लीहगुल्मोदरंज्वरम् ।
अष्ठीलानाहमेहांश्चमूत्ररोगंहलीमकम् ॥
अम्लपित्तामवातंचकामलांपाण्डुरोगकम् ।
शोथंमलग्रहंवृद्धिंश्लीपदञ्चभगन्दरम् ॥
कासंश्वासंव्रणंकुष्ठंकृमिहिक्कामरोचकम् ।
अर्शांसिग्रहणींदुष्टांसर्वातीसारनाशनम् ॥
विषूचीकण्डुमन्दाग्निपिपासांपीनसंगदम् ।
एकजंद्वन्द्वजंवापिदोषत्रयसमुद्भवम् ॥
बुद्धिकान्तिप्रदानित्यंसेविताचचिरायुषी ।
गुरुणाचन्द्रनाथेनमह्यमेषाप्रकीर्त्तिता ॥
संसारलोकरक्षार्थंविचिन्त्यपरिनिर्मिता ॥

इति शूलवज्रिणीवटिका ।

अर्थ–पारा,गंधक,लोहा प्रत्येक दो दो तोले,सुहागा,हींग,सोंठ,त्रिकुटा, त्रिफला, कचूर, दालचीनी, इलायची, तेजपात, तालीसपत्र, जायफल, जीरा,लौंग अजवायन,धनियाँ प्रत्येक एक एक तोला लेवै,सबको बकरी-के दूधमें पीसकर एक एक मासेकी गोली बनालेवै । इसको शूलवज्रिणी-वटिका कहतेहैं। गणेश, योगेश्वरी, शंकर, हरि और सूर्यदेवका पूजनकर प्रतिदिन एक गोली शीतलजलके अथवा बकरीके दूधके साथ खावै । यह शूलवज्रिणीवटिका–आठप्रकारके शूल, प्लीहा, गुल्म, उदररोग, ज्वर, आष्ठीला, आनाह, प्रमेह, मूत्ररोग, हलीमक, अम्लपित्त, आमवात, कामला, पाण्डुरोग, सूजन, गलग्रह, वृद्धिरोग, श्लीपद, भग-न्दर, कास, श्वास, व्रण, कूष्ठ, कृमि, हिक्का, अरुचि, अर्श, दुष्टसंग्र-हणी, सर्वप्रकारके अतिसार, विषूचिका, कण्डू, मंदाग्नि, पिपासा, पीनस, एक दोषसे उत्पन्न हुए, दो दोषसे उत्पन्न हुए, और तीन दोषसे उत्पन्न हुए रोगोंको दूर करै है । बुद्धि और कान्तिको बढ़ाने-वाली है । इसको नित्यसेवनकरनेसै मनुष्य दीर्घायु होते हैं। यह शूल-

वज्रिणी वटिका संसारके मनुष्योंकी रक्षाके लिये श्रीमान् गुरु चन्द्रनाथजीने विचारकर निर्म्माणकी है ॥

शुद्धसूतंसमंगंधंरसार्द्धंमृतताम्रकम् ।
दिनैकंशाकजैर्द्रावैर्मर्द्यंश्चक्षीरिणीद्रवैः ॥
रुद्ध्वालघुपुटेचैवपच्यादाग्निमुखोरसः ।
यवानीन्द्रयवापाठाबिल्वशुण्ठीरसांजनम् ॥
चूर्णंशूलहरंचानुपिबेदुष्णाम्बुनासह ।
इति अग्निमुखोरसः ।

अर्थ–शुद्धपारा दो भाग, शुद्धगंधक दो भाग, ताँबेकी भस्म एक भाग लेवै, इन सबको एकत्र कर एक दिन शाकवृक्षके रसमें और एक दिन खिरनीके रसमें खरल करे, पश्चात् लघुपुटमें फूंक देवे तौ अग्निमुख रस सिद्धहो । इसको भक्षण कर ऊपरसे अजवायन, इन्द्रजौ, पाढ़, बेल, सोंठ और रसौंतका चूर्ण गरमजलके साथ पीवै तो शूल दूर होवै ॥

मृतताम्रंपलैकन्तुचिंचाक्षारपलाष्टकम् ।
हिंगुहरीतकींव्योषंकरंजबीजचोरकम् ॥
प्रत्येकंपलमात्रन्तुचूर्णंकोष्णोदकोपिबेत् ।
कर्षैकंशूलशान्त्यर्थंसर्वोपद्रवसंयुतम् ॥

अर्थ–ताँबेकी भस्म एकपल, इमलीका खार आठ पल, हींग एक पल, हरड एकपल, सोंठ एकपल, पीपल एकपल, मिरच एकपल, करंजके बीज एकपल, चोरकद्रव्य एकपल लेवै, सबका चूर्ण कर एककर्षप्रमाण गरम जलके साथ पीनेसे सर्वोपद्रवसंयुक्त शूल रोग शान्त होताहै ।

शुद्धसूतंद्विधागंधंयामैकंमर्दयेद्दृढम् ।
द्वयोस्तुल्यंशुल्बपत्रसंपुटेतंनिरोधयेत् ॥
ऊर्द्ध्वाधोलवणंदत्त्वासद्भाण्डेधारयेद्भिषक् ।
रुद्ध्वागजपुटेपच्यात्स्वाङ्गशैत्यंसमुद्धरेत् ॥

संपुटंचूर्णयेच्छ्लक्ष्णंपर्णखण्डेद्विगुंजकम्।
भक्षयित्वानुपानंचहिंगुशुण्ठीचजीरकम्॥
वचामरिचचूर्णञ्चकर्षमुष्णाम्बुनापिबेत्।
असाध्यंनाशयेच्छूलंरसोऽयंशूलकेसरी॥

इतिशूलकेसरी रसः।

अर्थ-शुद्धपारा एक भाग और शुद्धगंधक दो भाग लेकर दोनोंको एकत्र खरल करै, फिर तीन भाग ताँबा लेकर तिसका सम्पुट बनाय उस सम्पुटमें पूर्वोक्त खरल किये हुए पारे और गन्धकको रखकै ढक-देवै, फिर इसको नोनसे भरी हुई हांडीमें गाड़, हाँडीका मुख बन्द कर गजपुटमें धरके फूंक देवै। स्वांगशीतल होनेपर उसको बाहर निकालकर सम्पुटको बारीक पीसकै चूर्ण बना लेवै तौ शूलकेस-रीरस सिद्धहो। इसको दो रत्तीभर पानपै रखकै खावै और ऊप-रसै हींग, सोंठ, जीरा, वच और कालीमिरचका चूर्ण एक कर्ष-प्रमाण गरम जलके साथ पान करै। यह शूलकेसरी रस असाध्य शूलकोभी दूर करै है॥

तोलकाश्चतुरःसूतादष्टौगंधाश्मनस्तथा।
समादायततःकार्यपलंताम्रस्यसंपुटम्॥
एकस्मिन्नथपात्रेद्वौकृत्वागंधकपारदौ।
अनेनताम्रपात्रेणपिधातव्यंदृढंततः॥
क्षिप्त्वास्थाल्याञ्चलवणंततःक्षिप्त्वारसंपुटेत्।
तस्योपरिपुटंक्षिप्त्वारुद्धास्थाल्यामथापिच॥
निरुध्यातिप्रयत्नेनपुटेद्गजपुटेनच।
स्वांगशीतलतांज्ञात्वासंपुटंपरिचूर्ण्यच॥
निहंत्यष्टविधंशूलंगुल्मप्लीहयकृद्गदम्।
मन्दाग्निग्रहणीपाण्डुंकामलाञ्चहलीमकम्॥
श्लेष्मवातोत्थरोगांश्चज्वरानपितथाविधान्।

हरीतक्यनुपानेनज्ञातव्योऽयंभिषग्वरैः ॥
पथ्यंदोषानुसारेणशास्त्रप्रोक्तंप्रदापयेत् ॥

इति शूलगजकेसरीरसः ।

अर्थ-पारा, चार तोले, गन्धक आठतोले लेकर दोनोंकी कज्जली करै, फिर आठतोले तांबा लेकर तिसका सम्पुट बना उससम्पुटमें उपरोक्त कज्जली रख दूसरे पात्रसे आच्छादित करकै नोनकी भरीहुई हांडीमें स्थापन करै, और उस हांडीको मुख बन्द करदेवै, पश्चात् गजपुटमें फूँकदेवै, फिर स्वांगशीतल होजानेपर सम्पुटको पीसकर चूर्ण करलेवै, तौ शूलगजकेसरी रस सिद्ध हो । इसको हरडकेसाथ सेवन करनेसे, आठ प्रकारके शूल, गुल्म, प्लीहा, यकृत, मंदाग्नि, संग्रहणी, पाण्डुरोग, कामला, हलीमक, कफवातोत्पन्नरोग और सर्वप्रकारके ज्वर दूर होते हैं । पथ्य-दोषानुसार करावै ॥

शुद्धंसूतंमृतंतीक्ष्णंपंचमंभागसम्मितम् ।
चूर्णतयोर्भावयित्वाशतावर्यारसेनच ॥
धात्र्यागुडूच्यास्त्रिदिनंखल्वेमर्द्यंपुनःपुनः ।
गुंजाचतुष्टयंखादेद्घृतेनमधुनापयः ॥
अनुपानंपिबेत्प्राज्ञःसर्वशूलनिवारणम् ।
वातरोगान्पित्तरोगान्कफरोगान्सुदुस्तरान् ॥
त्वग्दोषदेहकार्श्यंश्चदाहमुग्रंनिवारयेत् ।
गौड़ारसःसमुद्दिष्टोबलवर्णाग्निवर्द्धनः ॥

इति गौडारसः ।

अर्थ-शुद्धपारा एक भाग और लोहेकी भस्म पांच भाग, दोनोंको शतावरीके रसमें, आमलेके रसमें और गिलोयके रसमें क्रमसे एक एक दिन भावना देकर खरल करे । इसको चारगुंजाभर खावै और ऊपरसे घी, सहत तथा दूध पीवै तौ यह 'गौडारस' सर्वप्रकारके शूल, सर्वप्रकारके वातरोग, पित्तरोग, कफरोग, त्वचाके विकार, शरीरकी कृशता और उग्रदाहको दूर करै । तथा बल, वर्ण और अग्निकी बढ़ावै है ॥

सूतंगंधंसमंशुद्धंसूतांशंमृतताम्रकम्।
सौवर्चलञ्चसूतांशंजम्बीरैर्दिनसप्तकम्॥
मर्दयेदातपेतीक्ष्णंरुद्ध्वालघुपुटेत्रयम्।
दत्त्वादायतुतच्चूर्णंसमंत्रिकटुकंपचेत्॥
षण्मुखोऽयंरसोनामत्रिगुञ्जेनामशूलजित्।
एरण्डतैलषड्भागंलशुनस्यदशाष्टकम्॥
एकंहिंगुत्रिसिन्धूत्थंसर्वमेकत्रकारयेत्।
त्रिनिष्कंभक्षयेच्चानुआमशूलप्रशान्तये॥

इति षण्मुखोरसः।

अर्थ-शुद्धपारा, शुद्धगंधक, तांबेकी भस्म और सज्जी, यह सब समान भाग लेकर सात दिनतक जम्भीरी नीबूके रसके द्वारा तेज-धूपमें खरल करै, पश्चात् सूखजानेपर लघुपुट देवै इसप्रकार तीनपुट देवै, फिर इसमें बराबरका त्रिकुटेका चूर्ण मिलालेवै। इसको षण्मुखरस कहतेहैं।इसको तीन रत्ती प्रमाण खानेसे सर्वप्रकारके आमशूल दूर होतेहैं। अनुपान-अण्डीका तेल छे भाग, लशुन १८ अठारह भाग, हींग एक भाग और सैन्धवनोंन तीन भाग एकत्र मिलाकर बारह मासे प्रमाण भक्षण करै॥

त्रिकत्रयसमायुक्तंतालमूलीशतावरी।
लोहोनिहन्तिशूलानिदारुणान्ययसोरजः॥

इति त्रिकत्रयाद्यंतैलम्।

अर्थ-हरड, बहेडा, आमला, सोंठ, मिरच, पीपल, नागरमोथा, वायविडंग, चीता, मुसली, सतावर, यह सब समान भाग और सबकी बराबर लोहेका चूर्ण लेवै। सबको एकत्र पीसकै चूर्ण करले। यह-त्रिकत्रयाद्य लौह सर्वप्रकारके शूलोंको निर्मूल करैहै॥

त्रिफलायास्तथाधात्र्याश्चूर्णंवाकाललौहजम्।
शर्कराचूर्णसंयुक्तंसर्वशूलेषुलेहयेत्॥

पुनरुक्तत्वाद्धात्र्याभागद्वयंग्राह्यम् ॥
सर्वचूर्णसमंलौहचूर्णम् ।

इति शर्करालौहम् ।

अर्थ-हरड एक भाग, बहेडा एक भाग, आमला दो भाग और काल-लोहेका चूर्ण चार भाग लेवै, सबको एकत्र पीसकै चूर्ण बनाले, फिर इस चूर्णमें बराबरकी मिश्री मिलाकर सेवन करैतौ सर्वप्रकारके शूल दूर होवै ॥

अभ्रंताम्रंरसंलौहंप्रत्येकंसंस्कृतंपलम् ।
सर्वमेतत्समाकृत्यगृह्णीयात्कुशलोभिषक् ॥
आज्येपलद्वादशकेदुग्धेऽपिघृतसंक्षये ।
पक्त्वातत्रक्षिपेच्चूर्णंसुपूतंघनवाससा ॥
विडंगत्रिफलावह्नित्रिकटूनान्तथैवच ।
पिष्ट्वापलोन्मितानेतान्यथासंमिश्रितान्नयेत् ॥
ततःपिष्टेषुभाण्डेषुस्थापयेच्चविचक्षणः ।
आत्मनःशोभनेचाह्निपूजयित्वापरंगुरुम् ॥
घृतेनमधुनामर्द्यभक्षयेन्माषकोन्मितान् ।
अष्टौमाषान्क्रमेणैववर्द्धयेच्चसमाहितः ॥
अनुपानञ्चदुग्धेननारिकेलोदकेनवा ।
जीर्णेलोहितशाल्यन्नंमुद्गमांसरसादयः ॥
रसायनविरुद्धानिचान्यान्यपिनकारयेत् ।
हृच्छूलंपार्श्वशूलञ्चआमवातंकटीग्रहम् ॥
गुल्मशूलंशिरःशूलंयकृतप्लीहौविशेषतः ।
अग्निमान्द्यंक्षयंकुष्ठंकासंश्वासंविचर्चिकाम् ।
अश्मरीमूत्रकृच्छ्रञ्चयोगेनानेननाशयेत् ॥

इति चतुःसमं लौहम् ।

अर्थ-अभ्रककीभस्म, ताँबेकीभस्म, पारेकीभस्म, लोहेकीभस्म, और शुद्ध गंधक प्रत्येक एक एक पल लेकर बारहपल घी और दूधके साथ पकावै, फिर इसको गाढ़वस्त्रमें छानकर इसमें चार चार तोले वायविडंग, हरड, बहेड़ा, आमला, चीता, सोंठ, मिरच और पीपलका चूर्ण मिलादेवै। फिर इसको खूब चलाकर चिकने बासनमें भरकै रखदेवै पश्चात् शुभदिनमें अपने परं गुरुका पूजन कर घृत और सहतके साथ मिलाके खावै। पहिले दिन एक मासे प्रमाण खावै, दूसरे दिन दो मासे खाय, इसप्रकार प्रतिदिन एक एक माषा बढ़ाकै आठ मासे तक खावै। ऊपरसे दूध और नारियलका जलपीवै। इस औषधिके जीर्ण होनेपर लाल शालिधानोंका भात, मूंग, और मांसरस खावै। इसपै रसायन विरुद्धद्रव्य कदापि भक्षण नहीं करै। यह-हृदयशूल, पार्श्वशूल, आमवात, कटीग्रह, गुल्म, शूल, शिरःशूल, यकृत्, प्लीहा, मन्दाग्नि, क्षय, कोढ़, खाँसी, श्वास, विचर्चिका, पथरी, और मूत्रकृच्छ्रादि रोगोंको दूर करै है॥

व्यायामंमैथुनंमद्यंलवणंकटुवैदलम्।
वेगरोधंशुचंक्रोधंवर्जयेच्छूलवान्नरः॥

इति शूलाध्यायः।

अर्थ-व्यायाम, मैथुन, मद्य, लवण, कटुरसवाले द्रव्य, विदल अन्न, मलमूत्रादिकोंके वेगका धारण, शोक और क्रोध यह सब शूलरोगी त्याग देवै॥

अथ परिणामशूलचिकित्सामाह।

वमनंतिक्तमधुरैर्विरेकश्चात्रशस्यते।
बस्तयश्चहिताःशूलेपरिणामेसमुद्भवे॥

अर्थ-तिक्त और मधुरद्रव्योंके द्वारा वमन तथा विरेचन, और बस्तिप्रयोग, यह सब परिणामशूलमें हितकारी है॥

विडंगव्योषदन्त्यग्नित्रिवृच्चूर्णंगुडैःकृतम्।
मोदकःसर्वजंपक्तिशूलंहंत्यग्निदीपनम्॥

अर्थ-वायविडंग, सोंठ, मिरच, पीपल, दन्ती, चीता, और निसोत,

सब समानले चूर्णकर गुड़में मिलाके लड्डू बनालेवै। इनको गरमजलके साथ खानेसे यह मोदक सर्वप्रकारके पक्तिशूलोंको हरै है। तथा अग्निको दीपन करै है॥

नागरतिलगुडकल्कंपयसासंसाध्ययःपुमानद्यात्।
उग्रंपरिणतिशूलंतस्याभ्युपैतिसप्तरात्रेण॥

अर्थ-सोंठ, तिल और गुड़ इनका कल्क दूधमें पकाकर सेवन करनेसे सात रात्रियोंके भीतर परिणामशूल दूर होता है॥

शम्बूकजंभस्मपीतंजलेनोष्णेनवारिणा।
पक्तिजंविनिहंत्याशुशूलंविष्णुरिवासुरान्॥

अर्थ-घोंघेकी भस्म गरम जलके साथ पीनेसे परिणामशूल दूर होताहै

रसोनपत्रस्वरसःपीतोमधुनापिदुस्तरंशूलम्।
परिणामजंनिहन्यात्पित्तप्रबलंत्रिरात्रेण॥

अर्थ-लशुनके पत्तोंके रसमें सहत मिलाकर पीनेसे पित्तप्रबल परिणाम-शूल तीन दिनमें दूर होता है॥

पिप्पलीक्काथकल्काभ्यांसिद्धंसर्पिःसमाक्षिकम्।
पक्तिशूलंप्रवृद्धञ्चहन्तिक्षीरानुपानतः॥
शीतमधुपानादिकम्।

इति पिप्पलीघृतम्।

अर्थ-गायका घी एक सेर ऽ१, पीपलका क्काथ चार सेर ऽ४, और कल्कके लिये पीपल पावभर ऽ। सबको मिलाकर घृत सिद्ध करै। पश्चात् इस घृतको सहतके साथ सेवन करै और ऊपरसे दूधका पान करै तो अत्यंत बढाहुआ परिणामशूल नष्ट होवै॥

कुड़वंनारिकेलस्यश्लक्ष्णंदृषादिपेषितम्।
शुद्धखंडस्यकुडवंसर्वमेतच्चतुर्गुणे॥
आलोड्यनारिकेलस्यजलेमृद्वग्निनापचेत्।
धन्याकंपिप्पलीमुस्तंचातुर्जातंसुचूर्णितम्॥

शाणप्रमाणंतद्गाह्यंशीतीभूतेक्षिपेद्बुधः।
नारिकेलस्यखण्डोऽयंपुंसोनिद्राबलप्रदः॥
अम्लपित्तंक्षयंश्वासंशूलञ्चपरिणामजम्।
नाशयेद्रक्तपित्तञ्चशुष्कंदार्वनलोयथा॥
पलेसर्पिषिभृष्टञ्चशस्यंचाद्यौमधुप्रभम्॥

इतिनारिकेलखण्डम्।

अर्थ-पीसकर घीमें भुनी हुई नारियलकी गिरी एकसेर, बूरा एकसेर, दोनोंको चौगुने नारियलके जलमें मन्द मन्द अग्निसे पचावै, जब पककर शीतल हो जाय तब इसमें धनिया, पीपल, नागरमोथा, दालचीनी, इलायची, तेजपात और नागकेशर प्रत्येकका चार चारमासे चूर्ण डालदेवै और करछीसे एकमें एक करदेवै। यह नारिकेलखण्ड-मनुष्योंको निद्रा और बलको देनेवालाहै। तथा अम्लपित्त, क्षय, श्वास, परिणामशूल, और रक्तपित्तको दूर करै है॥

नारिकेलपलान्यष्टौशर्कराप्रस्थमेवच।
तज्जलंपात्रमेकन्तुसर्पिष्पंचपलानिच॥
शुण्ठीचूर्णस्यकुडवंप्रस्थार्द्धंक्षीरमेवच।
सर्वमेकीकृतंपात्रेशनैर्मृद्वग्निनापचेत्॥
तुगात्रिकटुकंमुस्तंचातुर्जातकधान्यकम्।
द्विकणाकर्षयुग्मन्तुजीरकंचपृथक्पृथक्॥
श्लक्ष्णचूर्णानिनिक्षिप्यस्थापयेत्स्निग्धभाजने।
खादेत्प्रतिदिनंशाणंयथेष्टाहारसेविनः॥
सर्वदोषोद्भवंशूलमामवातंविनाशयेत्।
परिणामभवंशूलमम्लपित्तञ्चनाशयेत्॥
बलपुष्टिकरञ्चैववाजीकरणमुत्तमम्।
रक्तपित्तहरंश्रेष्ठंछर्दिहृद्रोगनाशनम्॥
अग्निसन्दीपनकरंसर्वरोगनिषूदनम्।

धन्वन्तरिकृतंह्येतन्नारिकेलमिदंमहत् ॥

इति बृहन्नारिकेलखण्डम् ।

अर्थ–नारियलकी गीरी एक सेरऽ१,बूरादोसेरऽ२, नारियलकाजल आठ सेर ऽ८, घी वीस तोले२०,सोंठका चूर्णआध सेर ऽ॥, गायकादूध एक सेर ऽ१ लेवै, सबको एक पात्रमें करकै धीरै धीरै मन्द मन्द अग्निसे पकावै, पकते पकते जब गाढ़ा होजाय तब वंशलोचन, सोंठ, मिरच, पीपल, नागरमोथा, दालचीनी, इलायची, नागकेसर, तेजपात, धनिया, पीपल, गजपीपल और जीरा, प्रत्येकका चूर्ण दो दो तोले डाल देवै और करछीसे चलाकर एकमएक कर देवै, फिर चूलेपैसे उतारकर चिकने बासनमें भरके रखदेवै। फिर इसमेंसे प्रतिदिन चारमासे खावै और यथेष्ट भोजन करै। यह बृहन्नारिकेलखण्ड–सर्वदोषोत्पन्नशूल, आमवात परिणामशूल, अम्लपित्त, रक्तपित्त, वमन और हृदयरोगको दूर करै है,, बल और पुष्टिको करै है, उत्तम वाजीकरण है, और अग्निको दीपन करै है, तथा सर्वप्रकारके रोगोंको दूर करै है, यह बृहन्नारिकेल खण्ड श्रीमान् धन्वन्तरिजीने निर्माण किया है ॥

स्विन्नपीडितकूष्माण्डात्तूलार्द्धंभृष्टमाज्यतः ।
प्रस्थार्द्धंखण्डतुल्यन्तुपचेदामलकीरसात् ॥
प्रस्थेसुस्विन्नकूष्माण्डरसप्रस्थे विघट्टयेत् ।
दर्वीपाकंगतेतस्मिंश्चूर्णीकृत्यविनिक्षिपेत् ॥
द्वेद्वेपलेकणाजाजीशुण्ठीनांमरिचस्यच ।
पलंतालीशधन्याकंचातुर्जातकमुस्तकम् ॥
एतत्प्रमाणंप्रत्येकंप्रस्थार्द्धंमाक्षिकस्यच ।
पक्तिशूलंनिहन्त्येतद्दोषत्रयकृतञ्चयत् ॥
छर्द्यम्लपित्तमूर्च्छाश्चश्वासकासमरोचकम् ।
हृच्छूलंरक्तपित्तंचपृष्ठशूलञ्चनाशयेत् ॥
रसायनमिदंश्रेष्ठंखण्डामलकसंज्ञितम् ।

इति खण्डामलकी ।

अर्थ-प्रथम पेठेको उसेकर निचोड़लेवै, ऐसा पेठा घीमें भुनाहुआ ५० पचासपल, आमलोंका रस ६४ चौसठ तोले, पेठेका रस ६४ चौसठ तोले सबको मिलाकर पकावै और करछीसे चलाता जाय, जब गाढ़ा होजाय तब इसमें पीपल, जीरा, सोंठ और कालीमिरचका चूर्ण दो दो पल, तालीशपत्र, धनिया, दालचीनी, इलायची, नागकेशर, तेजपात, और नागरमोथा प्रत्येकका चूर्ण एक एक पल और सहत बत्तीस तोले मिला देवै। इसको सेवनकरनेसे त्रिदोषोद्भव, परिणामशूल, अम्लपित्त, छर्दि, मूर्छा, स्वांस, खाँसी, अरुचि, हृदयशूल, रक्तपित्त और पृष्ठशूलको यह खण्डामलकनामवाली उत्तम रसायन दूर करै है ॥

सामुद्रंसैन्धवंक्षारौरुचकंरोमकंविडम् ।
दन्तीलौहरजःकिट्टंत्रिवृच्छूरणकंसमम् ॥
दधिगोमूत्रपयसामन्दपावकपाचितम् ।
तद्यथाग्निबलंचूर्णंपिबेदुष्णेनवारिणा ॥
जीर्णेजीर्णेचभुञ्जीतमांसादिघृतसाधितम् ।
नाभिशूलंयकृच्छूलंप्लीहगुल्मकृतञ्चयत् ॥
विद्रध्यष्ठीलिकांहन्तिकफवातोद्भवंतथा ।
शूलानामपिसर्वेषामौषधंनास्तितत्समम् ॥
परिणामसमुत्थस्यविशेषेणान्तकृन्मतम् ॥

इति समुद्राद्यंचूर्णम्।

अर्थ-समुद्रनोन, सेंधानोन, जवाखार, सज्जी, कालालोन, सामर, विरिया, संचरनोन, दन्ती, लोहेकी भस्म, मण्डूर, निसोत, जमीकन्द, दही, गोमूत्र और दूध मिलाकर मंदमन्द अग्निसे पकावै। इस चूर्णको शक्त्यनुसार गरमजलके साथ सेवन करै। इसके जीर्णहोनेपर घृतसे सिद्ध किया हुआ मांसादिक भोजनकरै। यह समुद्राद्यचूर्ण-नाभिशूल, यकृत्शूल, प्लीहाशूल, गुल्मशूल, विद्रधि, अष्ठीलिका, कफ और वातसे उत्पन्न हुआ शूल, इनसबको हरैहै, इसकी समान शूलनाशक और दूसरी औषधि नहींहै, और परिणामशूल होतो विशेषकरकै विध्वंस करैहै। और कोई कोई वैद्य इसमें घृत मिलाकर समुद्राद्यघृत बनाते है।

विडंगचित्रकंचव्यंत्रिफलात्र्यूषणानिच ।
नवभागानिचैतानिलोहकिट्टसमानिच ॥
गोमूत्रंद्विगुणंदत्त्वामूत्रार्द्धिकगुडान्वितम् ।
शनैर्मृद्वग्निनापक्त्वासुसिद्धंपिंडतांगतम् ॥
स्निग्धेभाण्डेविनिक्षिप्यभक्षयेत्कोलमात्रया ।
प्राङ्मध्यान्तक्रमेणैवभोजनस्यप्रयोजितः ॥
योगोऽयंशमयत्याशुपक्तिशूलंसुदारुणम् ।
कामलांपाण्डुरोगञ्चशोथंमन्दाग्नितामपि ।
अर्शांसिग्रहणीदोषंकृमिगुल्मोदराणिच ।
नाशयेदम्लपित्तञ्चस्थौल्यंचैवापकर्षति ।
वर्जयेच्छुष्कशाकानिविदाह्यम्लगुरूणिच ।
पक्तिशूलान्तकोह्येषगुडोमण्डूरसंज्ञकः ॥
शूलार्तानांकृपाहेतोस्तारयापरिकीर्तितः ॥

इति तारामण्डूरम् ।

अर्थ—वायविडंग, चीता, चव्य, हरड, बहेडा, आमला, सोंठ, मिरच, पीपल, यहसब समानभाग, सबकी समानमण्डूरका चुर्ण, और सबसे दुगना गोमूत्र, गोमूत्रसे आधागुड लेवै, सबको एकत्र कर धीरै धीरै मन्दमन्द अग्निसे पकावे। जब सिद्ध होकर पिण्डसा होजाय तब एक चिकने बासनमें भरके रखदेवे । यह औषधी एक तोला प्रमाण भोजनके पूर्व, मध्य और अन्तमें खानेसे दारुण परिणाम शूल, कामला, पाण्डुरोग, सूजन, मन्दाग्नि, बवासीर, संग्रहणी कृमि, गुल्म, उदररोग, अम्लपित्त और स्थूलताको दूर करैहै । इसपर शुष्कशाक, दाहकारक द्रव्य, अम्लद्रव्य और भारीपदार्थ त्यागने चाहिये । यह गुड़-संज्ञकमण्डूर-विशेषकरकै परिणामशूलनाशक है । शूलरोगवाले मनुष्योंपर कृपाकरकै यह तारामण्डूर प्रकट कियाहै ॥

ततांवराम्बुसिक्तस्यमण्डूरस्यपलाष्टकम् ।
अष्टौवरीरसादुग्धाद्दध्नोधात्रीरसादपि ॥

सर्पिश्चतुष्पलंपक्काचतुःशाणंरजःपृथक् ।
क्षिपेन्मुस्तकणाजाजीधान्यपथ्याद्विजातकम् ॥
त्रिदोषपक्तिशूलाम्लपित्तरोचकवातनुत् ।
वराम्बुत्रिफलाक्काथः ।

इति बृहच्छतावरीमण्डूरम् ।

अर्थ–त्रिफलाके क्काथमें शुद्धमण्डूर आठपल, सतावरका रस ८ आठ-पल, दूध आठपल, आमलोंका रस आठपल, और घी चारपल डालके पकावै, जब पकते पकते गाढाहोजाय तब नागरमोथा, पीपल, जीरा, धनिया, हरड, दालचीनी और इलायची प्रत्येकका चूर्ण चार चार मासे डालकर करछीसे चलादेवै। यह बृहच्छतावरी मण्डूर–सान्निपातिकपक्तिशूल, अम्लपित्त, अरुचि और वातको दूर करै है ॥

शतावरीरसाद्दुग्धाद्दध्नोमण्डूरचूर्णकात् ।
पृथक्पृथक्पलान्यष्टौघृतात्पलचतुष्टयम् ॥
पक्काद्याद्दातपित्तोत्थंपक्तिशूलंजयेध्रुवम् ॥

इति शतावरीमण्डूरम् ।

अर्थ–शतावरकारस, दूध, दही और मण्डूरका चूर्ण प्रत्येक आठ आठपल, घृत चारपल सबको मिलाकर पकावै । यह शतावरीमण्डूर–त्रिदोषजनित परिणामशूल दूर करै है ॥

शतावरीरसप्रस्थेप्रस्थेचसुरभीजले ।
अजायाःपयसःप्रस्थेप्रस्थेधात्रीरसस्यच ॥
लोहकिट्टपलान्यष्टौशर्करापलषोडश ।
दत्त्वाचाष्टपलंसर्पिःपचेन्मृद्वग्निनाभिषक् ॥
सिद्धशीतेघनीभूतेचूर्णानीमानिदापयेत् ।
त्रिफलाव्योषयवानीपिप्पलीगजापिप्पली ॥
द्विजीरकघनानाञ्चश्लक्ष्णान्यक्षसमानिच ।
मधुनस्त्रिपलञ्चात्रसिद्धेशीतेप्रदापयेत् ॥

भक्षयेच्चत्वनापेक्षीभक्तस्यादौविचक्षणः ।
शूलंसर्वोद्भवंहन्तिपक्तिशूलंविशेषतः ॥
रक्तपित्ताङ्गदाहञ्चसाम्लपित्तंवमिन्तथा ।
हृच्छूलंपार्श्वशूलञ्चकुक्षिबस्तिगुदोद्भवम् ।
कासंश्वासंतथाशोषंग्रहणीदोषनाशनम् ।
यकृत्प्लीहोदरंगुल्मंराजयक्ष्मज्वरापहम् ॥
विष्टम्भनामदौर्बल्यमग्निमान्द्यंतथैवच ।
दुर्नामपाण्डुरोगंचकामलाञ्चहलीमकम् ॥
सर्वांश्चन्नाशयत्याशुभास्करस्तिमिरंयथा ॥
दुग्धेनिर्वापणंकार्यमण्डूरंवागवांजले ।
सप्तवाराष्टवारंवारुद्धानिर्मलतांव्रजेत् ॥

इति शर्करामण्डूरम् ।

अर्थ–सतावरका रस, गोमूत्र, बकरीका दूध, और आमलों-कारस प्रत्येक दो दो सेर, लोहेकी किट्ट एकसेर, बूरा दो सेर, और घी एक सेर लेवै, सबको मिलाकर मन्द मन्द अग्निसे पकावै, जब पककर गाढ़ा होजाय तब उतार लेवै, पश्चात् शीतल होनेपर इसमें हरड, बहेडा, आमला, सोंठ, मिरच, पीपल, अजवायन, पीपल, गजपीपल, जीरा, कालाजीरा और नागरमोथा, प्रत्येकका चूर्ण दो दो तोले और सहत बारह तोले मिलादेवै । इसको भोजनकी आदिमें भक्षणकरनेसे सर्वप्रकारके शूल, विशेषकरके पक्तिशूल, रक्तपित्त, अंगदाह, अम्लपित्त, वमन, हृदयशूल, पार्श्वशूल, कुक्षिशूल, बस्तिशूल, गुदशूल, खांसी, श्वास, शोष, संग्रहणी, यकृत, प्लीहा, उदररोग, गुल्म, राजयक्ष्मा, ज्वर, विष्टम्भ, आम, दुर्बलता, मन्दाग्नि, बवासीर, पाण्डुरोग, कामला, हलीमक, इन सबरोगोंको यह शर्करामण्डूर दूर करैहै । लोह-किट्ट आठवार अथवा सातवार दूधमें, या गोमूत्रमें बुझाकर पुटनेसे शुद्ध होजाता है ॥

कुडवंपथ्याचूर्णद्विपलंगन्धाश्चलोहकिट्टञ्च ।
शुद्धरसस्यार्द्धपलंभृंगस्यकेशराजस्य ॥

प्रस्थोन्मितश्चदत्त्वापात्रेलोहेचदण्डसंघृष्टम्।
शुद्धंघृतमधुयुक्तंमृदितंस्थाप्यंचभाजनेस्निग्धे॥
उपयुक्तमेतदचिरान्निहन्तिकफपित्तजान्रोगान्।
शूलंतथाम्लपित्तंग्रहणीकामलामुग्राम्।
भृंगराजकेशराजयोःप्रत्येकंरसप्रस्थम्॥

इतिरसमण्डूरम्।

अर्थ-हरड़का चूर्ण सोलह तोले, गंधक और मण्डूर प्रत्येक दो दो पल, शुद्धपारा दो तोले, भांगरेका रस और कुकुर भांगरेकारस प्रत्येक दो दो सेर, इन सबको लोहेके पात्रमें एकत्र कर लोहेके दण्डेसे घोटै, जब घोटते घोटते सूख जाय तब इसमें घी और सहत मिलाकर खूब मर्द्दन करै, पश्चात् इसको चिकनेबासनमें भरकर रख देवै। यह रसमण्डूर कफ-पित्तसे उत्पन्न हुए रोगोंको, शूलको, अम्लपित्तको, संग्रहणीको और उग्रकामला रोगको दूर करै है॥

टंकणंहरिणशृंगंस्वर्णशुद्धंमृतंरसः।
आर्द्रकस्यद्रवैश्चाह्निमर्द्यंरुद्ध्वापुटेपचेत्॥
त्रिनेत्राख्यरसोनाममाषैकंमधुसर्पिषा।
सैन्धवंजीरकंहिंगुमध्वाज्याभ्यांलिहेदनु॥
पक्तिशूलहरंख्यातोमासमात्रान्नसंशयः॥

इति त्रिनेत्राख्योरसः।

अर्थ-सुहागा, हरिणका सींग, शुद्धसोना और पारेकी भस्म, सबको समान भाग लेकर अदरखके रसमें एक दिन खरलकर मट्टीके शराव-सम्पुटमें रख कपरौटीकर पुटपाक करै, शीतल होनेपर निकालकर चूर्ण करले, इसको त्रिनेत्राख्यरस कहतेहैं। यह रस एक मासे प्रमाण घृत और सहतके साथ सेवन करै। और ऊपरसे सैंधानोंन, जीरा, हींग, इनका चूर्ण सहत और घृतमें मिलाकर खावै तौ यह त्रिनेत्राख्य रस परिणामशूलको एक महीनेमें दूर करताहै॥

मण्डूरस्यपलान्यष्टौशतावर्यारसन्तथा।

क्षीराज्यदधिप्रत्येकंपिष्ट्वाचतुष्पलंपिबेत् ॥
यावत्पित्तंतदुत्तार्यनिष्कैकंभोजयेत्सदा ।
प्रातःसन्ध्यांसदाखादेत्पक्तिशूलप्रशान्तये ॥
वातजंपित्तजंमिश्रममृताख्योहिमृत्युजित् ।

इति अमृतमण्डूरम् ।

अर्थ-मण्डूर आठ पल, सतावरका रस आठ पल, दूध, घी और दही प्रत्येक चारचार पल लेकर एकत्र पीस लेवै । इसको प्रतिदिन प्रातःकाल और संध्यासमय आठ मासे भर खावै तौ परिणामशूल दूरहोवै, तथा वातज पक्तिशूल और पित्तज पक्तिशूलभी दूरहोता है । यह अमृतमण्डूर मृत्युकोभी दूरकरताहै ॥

पथ्यालोहरजःशुण्ठीतच्चूर्णमधुसर्पिषा ।
परिणामोद्भवंशूलंसाद्याहन्तित्रिदोषजम् ॥

इतिपथ्याद्यं लौहम् ।

अर्थ-हरड़काचूर्ण, लोहेकाचूर्ण और सोंठकाचूर्ण प्रत्येक समान भाग लेकर सहत और घीके साथ सेवनकरनेसे कफज, पित्तज, और वातज परिणामशूल दूरहोताहै ॥

कृष्णाभयालोहचूर्णलेहयेन्मधुसर्पिषा ।
परिणामोद्भवंशूलंसद्योहन्तित्रिदोषजम् ॥

इति कृष्णाद्यंलौहम् ।

अर्थ-पीपल, हरड, औरलोहेका चूर्ण प्रत्येक समान भाग लेकर सहत और घीके साथ सेवनकरनेसै तत्काल त्रिदोषजनित परिणामशूल दूरहोताहै ॥

द्व्याढकंत्रिफलायाश्चचतुर्गुणजलेपचेत् ।
पादावशिष्टंविज्ञायकषायमवतारयेत् ॥
सुतप्तंनिर्वपेत्प्राज्ञोगुडूच्यार्द्धशतन्तथा ।
सर्पिषःषोडशपलंतच्चूर्णैःसहयोजयेत् ॥
गुडूचीकन्दकदलीतालमूलीयवासकम् ।

चित्रकंपिप्पलीमूलंचविकाजीरकद्वयम् ॥
त्वगेलऽरुष्करोव्योषद्विक्षारलवणत्रयम् ।
विडंगंटंकणक्षारौयवानीद्विपालिकांशिकान् ॥
लोहंपचेत्तदैकध्यंयावत्सान्द्रत्वमागतम् ।
भक्षयेन्मधुसर्पिभ्यांयथासानुश्चभोजनम् ॥
वातजंपित्तजंशूलंकफजंद्वन्द्वजंतथा ।
परिणामसमुत्थञ्चसन्निपातसमुद्भवम् ॥
अष्टादशविधंकुष्ठंपाण्डुरोगंभगन्दरम् ।
मन्दाग्निगुदजञ्चैवजयेदेतन्नसंशयः ॥
सुतप्तंजारणपुटनादिशोधितम् ।

इति बृहत्त्रिफलाद्यंलौहम् ।

अर्थ–सोलह सेर त्रिफलाको चौगुने जलमें पकावै, जब चौथाई भाग जल शेष रहै तब उतारकर छान लेवै, फिर इस काढेमें सवा-छहसेर कान्तलोहेका चूर्ण, सवाछैसेर गिलोयका रस, दोसेरघी, तथा गिलोय, केलाकन्द, मुसली, अडूसा, चीता, पीपरामूल, चव्य, काला जीरा, सफेदजीरा, दालचीनी, इलायची, भिलावा, सोंठ, मिरच, पीपल, जवाखार, सज्जी, कालानोन, सैंधानोंन, विरियासंचरनोंन, वायविडंग, सुहागा और अजवायन, प्रत्येक आठ आठतोले बारीकचूर्ण मिलाकर पकावै, जबतक यह खूब गाढ़ा नहोय तब तक पकावै । इस त्रिफलाद्य लोहको सहत और घीकेसाथ सेवनकरै । इससे वातजशूल, पित्तजशूल कफजशूल, द्वन्द्वजशूल, परिणामशूल, सान्निपातिकशूल, अठारह प्रकारके कोढ़, पाण्डुरोग, भगन्दर, मन्दाग्नि और बवासीर दूरहोती है ॥

धात्रीचूर्णस्याष्टपलानिचत्वारिलौहचूर्णस्य ।
यष्टीमधुकरजश्चद्विपलंदद्यात्पट्टघृष्टम् ॥
अमृताक्काथेनैतद्भाव्यंचूर्णन्तुसप्ताहम् ।
चण्डातपेसुशुष्कंभूयःपिष्ठानवेघटेस्थाप्यम् ॥
मधुघृतमधुनासंयुक्तंभक्तादौमध्यतोऽन्तेन ।

त्रीनपिवारान्खादेत्पथ्यंदोषानुबन्धने ॥
भक्तादौनाशयतिव्याधीन्पित्तानिलोद्भूतान् ।
मध्येऽह्नो विष्टम्भंजयतिचनृणांविदह्यतेनानुम् ॥
पानानुकृतान्दोषान्भुक्तान्तेशीततोजयति ।
एवंजीर्यतिचानुशूलंनृणांसुकष्टमपिहन्ति ॥
हरतिचसहसायुक्तोयोगश्चायंजरत्पित्तम् ।
चक्षुष्यःपलितघ्नः कफपित्तसमुद्भवाञ्जयेद्रोगान् ॥
प्रसादयत्यपिरक्तंपाण्डुत्वंकामलांजयति ॥

इति धात्रीलौहम् ।

अर्थ-आमलोंका चूर्ण आठ पल, लोहेका चूर्ण चारपल, मुलैठीका चूर्ण दो पल, सबको मिलाकर सात दिन तक गिलोयके रसकी भावना देवै, पश्चात् तेज धूपमें सुखाकर बारीक पीसकै एक नवीन घडेमें भरके रखदेवै। इसको सहत और घीमें मिलाकर भोजनके आदि मध्य और अन्तमें इसप्रकार तीन वार खावै और पथ्यसै रहै। यह भोजनके पूर्वमें भक्षण कियाहुआ पित्त और वातसै उत्पन्न हुए रोगोंको विध्वंसकरैहै। भोजनके मध्यमें भक्षण किया हुआ विष्टम्भको दूर करैहै, और भोजनके अन्तमें भक्षण किया हुआ पानसे उत्पन्नहुए विकारोंको हरताहै। यह जीर्ण होनेपर अत्यन्तकष्टयुक्तशूलको नष्ट करै है। यह योग-पित्तनाशक, नेत्रोंको हितकारी, विनासमय बालोंके श्वेत हो जानेको हरै है, तथा कफपित्तसे उत्पन्न हुवे रोग, रुधिरविकार, पाण्डुता और कामलारोगको दूर करैहै ॥

शुण्ठीशमीवारिपुनर्नवानांजलंसशम्बूकजभस्मपीतम् ।
सैरंडतैलंजयतिप्रसह्यशूलंसमस्तंपुरुषस्यासिद्धम् ॥

अर्थ-सोंठ, शमी, सुगन्धवाला और पुनर्नवा, इनके क्वाथमें घोंघेकी भस्म और अण्डीका तेल डालकर पीनेसे सर्वप्रकारके शूल दूर होते हैं ॥

हिंगुसौवर्चलंपाठाद्वौक्षारौलवणत्रयम् ।
चूर्णीकृतंविधातव्यंवटकंलशुनेरसे ॥

हृच्छूलेपार्श्वशूलेचमन्यास्तम्भेचदारुणे।
प्रयोज्यकुक्षिशूलेचभिषजासिद्धिमिच्छता॥

इतिहिंगाद्योवटकः।

अर्थ-हींग, कालानोन, पाढ़, सज्जी, जवाखार, सैंधानोन, संचरनोन, और विरिया संचरनोन, इन सबको पीस लशुनके रसमें भिजो बडे बना लेवे। इन वडोंको सेवनकरनेसै-हृदयशूल, पार्श्वशूल, मन्यास्तम्भ, और कुक्षिशूल दूर होताहै॥

फलतिक्ताव्योषगुडशर्करात्रिवृतार्द्धिकाः।
मोदकंभक्षयेच्चानुपिबेत्कोष्णंजलंपुनः॥
पार्श्वशूलेऽरुचौकासेज्वरेचानिलसम्भवे॥

इति त्रिफलामोदकः।

इति पक्तिशूलाऽध्यायः।

अर्थ-हरड़, बहेड़ा, आमला, कुटकी, सोंठ, मिरच और पीपल, इनका चूर्ण समान भाग, शर्करा और निसोतका चूर्ण सबसे आधा भाग, तथा गुड सबसै दुगुना डालकर मोदक बनाके भक्षण करै और ऊपरसै गरमजल पीवैतौ पार्श्वशूल, अरुचि, खाँसी, और वातज्वर दूर होताहै॥

इति परिणामशूलाऽध्यायः।

जीर्णेजीर्यत्यजीर्णेवायच्छूलमुपजायते।
पथ्यापथ्यप्रयोगेणभोजनाभोजनेनच॥
नशमंयातिनियमाद्योऽन्नद्रवउदाहृतः।
अन्नद्रवाख्यशूलेषुतावन्नस्वास्थ्यमश्नुते॥
यावत्कटुकपीताम्लमन्नंनच्छर्दयेद्द्रवम्।
जातमात्रेजरत्पित्तेशूलमाशुविनाशयेत्।
पित्तार्त्तंवमनंकृत्वाकफार्त्तंश्चविरेचनम्।
अन्नद्रवेचतत्कार्य्यंजरत्पित्तेयदीरितम्॥
आमपक्वाशयेशुद्धेगच्छेदन्नद्रवःशमम्॥

अर्थ–भोजनके पच जानेपर, या पचनेसमय अथवा अजीर्णमें जो शूल उत्पन्न होवे, वह शूल पथ्यापथ्यप्रयोगसे, वा भोजन करनेसैं अथवा भोजन करनेके नियमसे शान्त होवे, उसको अन्नद्रवशूल कहते हैं। अन्नद्रवशूलमें जबतक चरपरे, पीले, खट्टे, अन्नद्रवको वमन नहीं करै, तबतक चैन नहीं पडताहै ॥ जरत्पित्तशूल उत्पन्न होतेही मनुष्यको मार देता है, इस कारण पित्तसे पीडितमनुष्यको वमन करावै, और कफसे पीडित जरत्पित्तशूलवालेको विरेचन करावै, जो चिकित्सा जरत्पित्तमें कही है वही अन्नद्रवशूलमें करे और जो यत्न अन्नद्रवमें कहा है वह जरत्पित्तमें; करे जब रोगीका आमाशय और पक्काशय और शुद्ध हो जाता है तब अन्नद्रवशूल शांतहोताहै ॥

माषेण्डरींसरुचकांसुस्विन्नांवह्निपाचिकाम् ।
तादृशींसर्पिषाखादेदन्नद्रवनिपीडितः ॥
लिह्याद्धात्रीफलचूर्णमयश्चूर्णसमायुतम् ।
यष्टीचूर्णेनवायुक्तंलिह्यात्क्षौद्रेणतद्गदे ॥
श्यामाकतण्डुलैःसिद्धंसिद्धंतण्डुलकोद्रवैः ।
प्रियंगुतण्डुलैःसिद्धंपायसंशर्करान्वितम् ॥
गौडिकंसूरणंकन्दंकूष्माण्डञ्चापिभक्षयेत् ।
कलाययवसक्तून्वासक्तून्वालाजसंभवान् ॥
कुलत्थसक्तुमथवाऽथवादुग्धसरेणतु ।
चणकानामथोसक्तून्कोद्रवस्यौदनंयथा ।
गोधूममण्डकंतत्रसर्पिषागुडसंयुतम् ॥
ससितंशीतदुग्धेनसूदितंवाहितंचयत् ।
पटोलपत्रयूषेणखादेत्कणिकसक्तुकान् ॥
भृष्टान्वाचणकान्खादेद्दुजावान्वापिपिष्टितान् ।
कलायान्वानिराहारस्तृषितःक्षीरपोभवेत् ॥
कलाययवगोधूमश्यामाकाःककुभस्यच ।
एर्वारुबीजतोयेनपिबेद्वालवणाकृतम् ॥

शर्करेक्षुरसंक्षीरद्राक्षारसमथापिवा।
सर्वथोपप्रयुञ्जीतमूत्रकृच्छ्राश्मरीभिदाम्॥

अर्थ-अन्नद्रवसे पीडित मनुष्योंको लवणयुक्त, भलेप्रकार अग्निसै पकाये हुये उडदोंके बड़े घीके साथ खाने चाहिये। आमलोंका चूर्ण और लोहेका चूर्ण दोनोंको सहतमें मिलाकर चाटनेसे, अथवा मुलैठीके चूर्णमें सहत मिलाकर चाटनेसै अन्नद्रवशूल दूर होताहै। समेके चावलोंकी, या कोदोंके चावलोंकी अथवा कंगनीके चावलोंकी बनाई हुई खीर बूरा मिलाकर भक्षण करनी अन्नद्रवशूलवाले रोगियोंको हितकारीहै। ईख, सूरणकन्द, पेठा, मटर, जौकेसत्तू, खीलोंके सत्तू, कुलथीके सत्तू और चनेके सत्तू, कुदईका भात इनको दधि और दूध केसरके साथ सेवन करना चाहिये। गेहूंके मण्डकको घृत और गुड़ तथा बूरामिले हुए ठंडे दूधमें मलके या औटाकर खावै। कणिक (सूजी) के सत्तू अथवा भुनेहुए चनोंके सत्तू या मटरके सत्तू परवलके यूषके साथ भोजन करै, और ऊपरसे दूधपीवै। मटर, जौ, गेहूं, समा और अर्जुनवृक्षकी छाल इनको ककडीके बीजोंके जल और लवणके साथ पीनेसै अथवा मिश्री, ईखकारस और दूध वा दाखोंका रस पीनेसै मूत्रकृच्छ्र और अश्मरी रोग दूर होताहै॥

अन्नद्रवोदुश्चिकित्स्योदुर्विज्ञेयोमहागदः।
तस्मात्तस्यप्रशमनेपरंयत्नंसमाचरेत्॥
अन्नद्रवेजरत्पित्तेवह्निर्मन्दोभवेद्यतः।
तस्मात्तत्रानुपानानिमात्राहीनानिकारयेत्॥
कलाययवगोधूमश्यामाकाःकोरदूषकाः।
राजमाषाःस्थूलमाषाःस्थूलस्थाःकंगुशालयः॥
भोजनार्थेप्रशस्ताश्चपुराणाःसाप्रियङ्गवः।
दधिलुप्तसरंक्षीरंगव्यमाजंसमाहिषम्॥
घृतंपुराणंशाकार्थेवास्तुकोनिम्बपल्लवाः।
कर्कोटकाचवेल्लानांपत्राणिस्वरस्यच॥
यानिकानिप्रयोज्यानिकासमर्द्दलानिच।

बर्हिणोहरिणामत्स्यारोहिताःसकपिञ्जलाः ॥
भूतीकृताःशस्ततरारसार्त्तेचोपपादिताः ॥

अर्थ-अन्नद्रवशूल महा असाध्य, दुर्विज्ञेय (जाननेमें नहीं आवै) और महारोगहै, इसकारण इसको शीघ्रही बडे यत्नोंसे शान्त करै । जरत्पित्त और अन्नद्रवशूलरोगमें अत्यन्त अग्नि मन्द होजातीहै । इसकारण इसरोगमें अन्न और पान सकल अल्प देनेचाहिये । मटर, जौ, गेहूं, समा, कोदों, लोबिया, उडद, कंगनी, शालि, और प्रियंगू (चोवा) यह सब पुराने अन्न अन्नद्रवशूलरोगमें भोजनके लिये हितकारीहै । दधिमिश्रित दूध, गायकाघी, भैंसकाघी, पुरानाघी, बथुआ, नीमकेपत्ते, ककोडे, करेले, इनके पत्ते और स्वरस, तथा कसौंदीकेपत्ते, इन सबका शाक, मयूर, हिरण, रोहितमछली, और कपिंजलपक्षीके मांसका रस, अन्नद्रवशूलरोगमें हितकारीहै ।

गुडामलकपथ्यानांचूर्णप्रत्येकशःपलम् ।
त्रिपलंलोहकिट्टस्यतत्सर्वंमधुसर्पिषा ॥
समालोड्यततःखादेदक्षमात्रप्रमाणतः ।
आद्यमध्यावसानेषुभोजनस्यनिहन्तितत् ।
अन्नद्रवंजरत्पित्तमम्लपित्तंसुदारुणम् ।
परिणामसमुत्थस्यशूलंसंवत्सरोत्थितम् ॥
इति गुडमण्डूरम् ।

अर्थ-गुड चारतोले, आमलोंका चूर्ण चारतोले, हरडका चूर्ण चार तोले, मण्डूरकी भस्म बारह तोले लेवै, सबको सहत और घीमें मिलाकर दो तोले प्रमाण भोजनके पूर्व, मध्य और अन्तमें भक्षण करै । इससै अन्नद्रवशूल, जरत्पित्त, दारुण अम्लपित्त, और एक वर्षका परिणाम शूल दूर होताहै ॥

विडंगमुस्तात्रिफलागुडूचीदन्तीत्रिवृद्वह्निकटुत्रिकाणि ।
प्रत्येकमेषांपिचुभागचूर्णपलानिचत्वार्ययसोमलस्य ॥
गोमूत्रशुद्धस्यपुरातनस्ययद्वायसस्तानिशिवाटिकायाः ।

कृष्णाभ्रकाच्चूर्णपलंविशुद्धंनिश्चन्द्रकाच्छ्लक्ष्णमतीवसूतात्
पादोनकर्षंस्वरसेनखल्वशिलातलेमन्यमुनीदलस्य।
संमर्द्ययत्नादतिशुद्धगन्धपाषाणचूर्णेनविचूर्णितेन॥
युक्त्याततःपूर्वरजांसिदत्त्वासर्पिर्मधुभ्यामवमृद्ययत्नात्।
संस्थापयेत्स्निग्धघटेविशुद्धेततःप्रयोज्योऽस्यरसायनस्य॥
प्राङ्माषकोद्वावथमाषकौवागव्यश्चपथ्यंशिशिरंजलंवा।
पिबेदयंयोगवरःप्रभूतकालप्रनष्टानलदीपकःस्यात्॥
योगोपिहन्यात्परिणामशूलंतथापिचान्नद्रवसंज्ञकञ्च।
यक्ष्माम्लपित्तंग्रहणींप्रदुष्टांजीर्णज्वरंलोहितपित्तकुष्ठे॥
नसन्तितेयान्ननिहन्तिरोगान्योगोत्तमःसम्यगुपास्यमानः।

इति विद्याधराभ्रकम्।

अर्थ-वायविडंग, नागरमोथा, त्रिफला, गिलोय, दन्ती, निसोत, चीता और त्रिकुटा, प्रत्येकका चूर्ण दोदो तोले, गोमूत्रमें भावनादेकर सिद्ध कियाहुआ लोहमल या लोहपात्रिका चारपल निश्चंद्रकृष्णाभ्रकका चूर्ण चारतोले, और शुद्धपारा डेढ़तोले लेकर सबको अगस्तियाके पत्तोंके रसमें खरलकरै, पश्चात् सूख जानेपर इसमें १॥ डेढ़तोले शुद्धगंधकका चूर्ण मिलादेवै, फिर सहत और घीमें घोटकर एकचिकने बासनमें भरकर रखदेवै। अग्निका बलाबल विचारकर एकमासा या दोमासे गायके दूध या शीतल जलके साथ सेवन करै। इससै मन्दाग्नि, परिणामशूल, अन्नद्रवशूल, राजयक्ष्मा, अम्लपित्त, दुष्टसंग्रहणी, जीर्णज्वर, रक्तपित्त, और कुष्ठरोग दूर होताहै॥

लौहस्यरजसोभागास्त्रिफलायास्तथात्रयः।
गुडस्याष्टौतथाभागागुडान्मूत्रंचतुर्गुणम्॥
एतत्सर्वन्तुविपचेद्गुडपाकविधानवित्।
लिहेच्चतद्यथाशक्तिशूलंचान्नद्रवंजयेत्॥
लौहस्यैकभागः।

इति लौहगुटिका।

अर्थ-लोहेकाचूर्ण एकभाग, त्रिफला तीनभाग, गुड़ आठभाग, और गोमूत्र बत्तीसभाग, सबको एकत्रकर गुडपाककी विधिसै पकावै । इसको यथाशक्त्यनुसार सेवनकरै तौ अन्नद्रवशूल दूरहोवै ॥

कलायचूर्णभागौद्वौलोहचूर्णस्यचापरः ।
कारवेल्लपलाशानांरसेनैवविमर्दयेत् ॥
कर्षमात्रांततश्चैकांभक्षयेद्गुटिकांनरः ।
मण्डानुपानात्साहन्तिजरत्पित्तंसुदुर्जयम् ॥
अत्रकलायोवर्तुलकलायः ।
लोहस्यैकभागःमाषकादिक्रमेणभक्षणीयम् ।
इतिकलायगुटिका ।
इतिअन्नद्रवजरत्पित्ताऽध्यायः ।

अर्थ-मटरकाचूर्णदो तोले, लोहेकाचूर्ण एक तोला, दोनोंको करेलेके पत्तोंके रसमें खरलकर दोदो तोलेकी गोली बना लेवै, एक गोली प्रतिदिनखावै और ऊपरसै माड़ पीवै । इससै दुर्ज्जयजरत्पित्तरोग दूरहोताहै
इतिअन्नद्रवजरत्पित्ताधिकारः ।

अथउदावर्त्तचिकित्सामाह ।

त्रिवृत्सुधापत्रतिलादिशाकग्राम्यौदकानूपरसैर्यवान्नम् ।
अन्यैश्चसृष्टानिलविड्विबद्धात्तथाप्रसन्नागुडसीधुपायी ॥
प्रसन्नासुरामण्डःगुडकृत्सीधुगुडसीधु ।
आस्थापनंमारुतजेस्विन्नस्यपरिशस्यते ॥
पुरीषजेतुकर्त्तव्योविधिरानाहिकस्तुयः ॥
आनाहिको विधिः ।
इतिफलवर्त्यादिः ।

अर्थ-निसोत, थूहरकेपत्ते, तिलादिकाशाक, तथा ग्राम्यजलचर और अनूपदेशके जीवोंके मांसका रस, यवान्न, सुरामण्ड, और गुड़सै बनाई

हुई सीधू तथा अन्यान्य वायुनिःसारक द्रव्य उदावर्त्तरोगमें हितकारी है। वातज उदावर्त्तमें स्निग्ध और स्विन्नमनुष्योंकेलिये आस्थापन (निरूहवस्ति) और पुरीषज उदावर्त्तमें आनाहिक विधि (फलवर्त्त्यादि) करनी चाहिये ॥

क्षारवैतरणौबस्तीयुज्यात्तत्रचिकित्सकः।
सर्पिस्तैलरजःक्वाथंकल्कैरन्यतमेनच ॥
उदावर्त्तोदरानाहविषगुल्मविनाशनः ॥

अर्थ-क्षार, वैतरणनिरूहवस्ति- अनुवासनवस्ति, घृत, तेल, चूर्ण, क्वाथ, कल्क और अन्यान्यरोगोंके द्वारा उदावर्त्त, आनाह, विषदोष और गुल्मरोग नष्ट होता है ॥

त्रिवृत्कृष्णाहरीतक्योद्विचतुष्पंचभागिकाः।
गुटिकागुडतुल्यास्तुविड्विबन्धगदापहाः ॥

अर्थ-निसोत दो भाग, पीपल चार भाग और हरड पांच भाग तथा सबकी समान गुड लेवै, सबको मिला गोली बनाकर खानेसे विड्बन्धरोग दूर होताहै ॥

खण्डपलंत्रिवृतासममुपकुल्याकर्षचूर्णितं श्लक्ष्णः।
प्राग्भोजनेचसमधुरितान्मोदकंलिहन्प्राज्ञः ॥
एतद्गाढपुरीषेपित्तेचाविनियोज्यम्।
स्वादुर्नृपयोग्योऽयंचूर्णनाराचकोनाम्ना ॥

इति नाराचचूर्णम्।

अर्थ-खांड एक पल, निसोतका चूर्ण एक कर्ष, पीपलका चूर्ण एक कर्ष, इन सबको सहतमें मिलाकर भोजनके पहिले भक्षण करै तौ गाढपुरीष, पित्त और कफ दूर होवै । यह नाराचचूर्ण राजाओंके सेवने योग्य है ॥

सव्योषंपिप्पलीमूलंत्रिवृन्दन्तीसचित्रकम्।
तच्चूर्णंगुडसंमिश्रंभक्षयेत्प्रातरुत्थितः ॥
एतद्गुडाष्टकंनामबलवर्णाग्निवर्द्धनम् ॥

प्लीहोदावर्त्तगुल्मघ्नंशोथपाण्डुज्वरापहम् ॥
इति गुडाष्टकम् ।

अर्थ-पीपल, कालीमिरच, सोंठ, पीपलामूल, निसोत, दन्ती और चीतेकी जड, इन सबका चूर्ण समान भाग और सबकी समान गुड मिलाकर प्रातःकाल सेवन करै । यह गुडाष्टक-बल, वर्ण और अग्निको बढ़ानेवालाहै, तथा प्लीहा, उदावर्त्त, गुल्म, सूजन, पाण्डु और ज्वरको दूर करैहै ॥

हिंगुमाक्षिकसिन्धूत्थैःपक्त्वावर्त्तिंसुवार्जिताम् ।
घृतयुक्तांगुदेदद्यादुदावर्त्तविनाशिनीम् ॥

अर्थ-हींग चारमासे, सहत आठ तोले, सैन्धानोंन चारमासे, इन सबको एकत्र कर गुड़पाकविधिसे पकाके बत्ती बनालेवै, इन बत्तियोंको घिसे चुपडकर गुदामें चढानेसे दस्तहोकर उदावर्त्त रोग दूर होजायगा ॥

त्रिवृद्धरीतकीश्यामास्नुहीक्षीरेणभावयेत् ।
वटिकामृतपीतास्ताःश्रेष्ठाश्चानाहभेदिकाः ॥
इतिश्यामाश्याममूलैवत्रिवृत् ।

अर्थ-कालानिसोत, और हरड दोनों बराबर लेकर चूर्ण बनाले, पश्चात् थूहरके दूधकी भावना देकर गोली बना दूधकेसाथ सेवनकरनेसे आनाहरोग दूर होताहै ॥

स्थिरादिवर्गस्यपुनर्नवायाःशम्याकपूतीककरञ्जयोश्च ।
सिद्धःकषायेद्विपलांशिकानांप्रस्थोघृतात्स्यात्प्रतिबद्धवाते
इतिस्थिरादिवर्गः ।

इति स्थिरादिघृतम् ।

अर्थ-गायका घी दोसेर, जल आठसेर, और स्थिरादिवर्ग, पुनर्नवा, श्योनाक, पूतिकरञ्ज, तथा डहर, करंज, प्रत्येक आठ आठ तोले, पाकके लिये जल बत्तीससेर और शेष आठ रक्खै । यथा विधिसे घृतको सिद्ध करै । यह घृत वातकी बद्धताको दूर करैहै ॥

मूलकंशुष्कमार्द्रञ्चवर्षाभूमूलपञ्चकम् ।

आरेवतपलञ्चापिपिष्ट्वातेनपचेद्घृतम् ॥
तत्पीयमानंशमयेदुदावर्त्तमशेषतः ॥
स्वल्पपंचमूलंस्वल्पमिदम् । आर्द्रआर्द्रकम् ।

इति शुष्कमूलाद्यंघृतम् ।

अर्थ-गायका घी एक सेर, जल चारसेर, तथा कल्कके लिये सूखी मूली, अदरख, पुनर्नवा, स्वल्पपंचमूल, और अमलतासका गूदा, प्रत्येक दोदो तोले लेवै। यथा विधिसे घृतको पकावै। इस घृतको पीनेसे उदावर्त्त रोग दूर होता है ॥

त्रिवृत्खण्डश्चपलिकंकर्षंकृष्णारजोमधु ।
विष्टम्भेकफपित्तेचनाराचाख्यंनृपोचितम् ॥
कर्षंकर्षार्द्धवामधुनालिह्यात् ।

इति नाराचयोगः ।

इति आनाहोदावर्त्ताध्यायः ।

अर्थ-निसोतका चूर्ण चार तोले, खाँड चार तोले, पीपलका चूर्ण दो तोले लेवै पश्चात् सबको मिलाकर सहतके साथ चाटनेसे-कफ और पित्तजनित विष्टम्भरोग दूर होताहै। यह नाराचयोग राजा-ओंके सेवने योग्य है ॥

इतिआनाहोदावर्त्ताधिकारः ।

अथ गुल्मचिकित्सा ।

लंघनंदीपनंस्निग्धमुष्णवातानुलोमनम् ।
बृंहणंयद्भवेत्सर्वंतद्धितंसर्वगुल्मिनाम् ।

अर्थ-लंघन, दीपन, स्निग्ध, उष्ण, वातानुलोमक और सर्व प्रकाकारके पुष्टिकारक द्रव्य गुल्मरोगवालोंको हितकारीहै ॥

स्निग्धस्याभिषजास्वेदःकर्त्तव्योगुल्मशान्तये ।
स्रोतसांमार्दवंकृत्वाजित्वामारुतमुल्बणम् ॥

अर्थ-गुल्मरोगीको प्रथम स्निग्ध करके पश्चात् स्वेद देवै। कारण

यह है कि–स्वेद, स्निग्धमनुष्योंके स्रोतोंमें मृदुता उत्पन्न करके कुपित वायुको शान्तकर विबन्धादिकको नष्टकर गुल्मरोगको दूर कर देताहै ।

स्निग्धस्यस्वेदनंकुर्यात्कुम्भीपिण्डेष्टकादिभिः ।
शाल्वणाद्युपनाहश्चसुखोष्णंगुल्मशान्तये ॥
भित्त्वाविबन्धंस्निग्धस्यस्वेदोगुल्ममपोहति ॥

इतिपिण्डमांसादिपिण्डः ।

अर्थ–गुल्मरोगीको स्निग्धकरकै कुम्भ मांसपिण्ड और इष्टकादि द्वारा शाल्वणकेसाथ उपनाह स्वेददेनेसै गुल्मरोग दूरहोताहै ॥ वातनाशक काथसै कुम्भीको परिपूर्णकर पृथ्वीमें खोदकर गाड़देवे और उसके उपर शय्याको कराय स्वेददेनेसै गुल्मरोग शान्त होताहै ॥

मातुलुंगरसोहिंगुदाडिमंविडसैन्धवम् ।
सुरामण्डेनपातव्यंवातगुल्मरुजापहम् ॥

अर्थ–विजौरेका रस, हींग, अनार, विडनोन और सैन्धानोन, सबको एकत्रकर सुरामण्डके साथ पीनेसै वातगुल्मरोग दूर होताहै ॥

हिंगुत्रिकटुकंपाठांहपुषामभयाशठीम् ।
अजमोदाश्वगन्धेचतिन्तिडीकाम्लवेतसम् ॥
दाडिमंपौष्करंधान्यमजाजीचित्रकंवचाम् ।
द्वौक्षारौलवणेद्वेचचव्यंचैकत्रचूर्णयेत् ॥
चूर्णमेतत्प्रयोक्तव्यमनुपानेष्वनव्ययम् ।
प्रागुक्तमथवापेयंमद्येनोष्णोदकेनवा ॥
पार्श्वहृद्वस्तिशूलेषुगुल्मेवातकफात्मके ।
आनाहेमूत्रकृच्छ्रेचशूलेचगुदयोनिजे ॥
ग्रहण्यर्शोविकारेषुप्लीहपाण्ड्वामयेऽरुचौ ।
उरोविबन्धेहिक्कायांकासेश्वासेगलग्रहे ।
भावितंमातुलुंगस्यचूर्णमेतद्रसेनवा ।
बहुशोगुटिकाःकार्याःकार्मुकाःस्युस्ततोऽधिके ॥

इति हिंग्वादिचूर्णम् ।

अर्थ-हींग, सोंठ, मिरच, पीपल, पाढ़, हाऊबेर, हरड़, कचुर, अजमोद, असगंध, इमली, अमलवेंत, अनार, पोहकरमूल, धनिया, जीरा, चीता, वच, सज्जी, जवाखार, सैंधानोन, कालानोन, और चव्य, इन सबका बारीक चूर्ण बना बिजोरे नींबूके रसकी भावना देकर गोली बनालेवै। इसको पूर्वोक्त अनुपान, अथवा मदिरा, या उष्णोदकके साथ पान करनेसे-पार्श्वशूल, हृदयशूल, बस्तिशूल, वातकफात्मकगुल्म, आनाह, मूत्रकृच्छ्र, गुदशूल, योनिशूल, संग्रहणी, बवासीर, प्लीहा, पाण्डुरोग, अरुचि, उरोरोग, विबन्ध, हिक्का, खाँसी, श्वास, और गलग्रह यहसब रोग दूरहोतेहैं॥

पूतिकपत्रगजचिर्भटचव्यवह्नि-
व्योषश्चसंस्तररचितंलवणोपधानम्।
दग्धाविचूर्णयदधिमस्तुयुतंप्रयोज्यम्
गुल्मोदरश्वयथुपाण्डुगदोद्भवेषु॥
पूतिकोनाटकरंजस्तस्यमूलंगजचिर्भटंगोरक्षकर्कटी।
लवणंसैन्धवंतच्चपूतिकमत्रापिसमम्।
इति सर्वमन्तर्धूमेनदाग्धव्यम्।

अर्थ-दुर्गंधित करञ्जकी जड, तेजपात, बडी इन्द्रायनकी जड, चव्य, लालचीता, सोंठ, मिरच, पीपल, और सैंधानोन, इन सबको दग्ध करकै चूर्णबनालेवै इस चूर्णको दहीके पानीके साथ सेवन करनेसै गुल्म, उदरोग, सूजन और पाण्डुरोग दूर होताहै॥

शठींपुष्करमूलञ्चदन्तींचित्रकमाढकीम्।
शृंगबेरंवचाञ्चैवपलिकानिसमाहरेत्।
त्रिवृतायाःपलञ्चैकंकुर्यात्रीणिचहिंगुलः।
यवक्षारपलेद्वेचद्वेपलेचाम्लवेतसात्॥
यवान्यजाजीमरिचंधान्यकंचेतिकार्षिकम्।
उपकुंच्यजमोदाभ्यांपृथगर्द्धपलंभवेत्॥
मातुलुंगरसेनैतद्गुटिकांकारयेद्भिषक्।

तासामेकांपिबेद्द्वेवातिस्त्रोवाथसुखाम्बुना ।
अम्लैर्मद्यैश्वयूषैश्चघृतेनपयसाथवा ।
एषाकांकायनेनोक्तागुटिकागुल्मनाशिनी ।
अर्शोहृद्रोगशमनीकृमीणाञ्चविनाशिनी ।
गोमूत्रयुक्ताशमयेत्कफगुल्मचिरोत्थितम् ॥
क्षीरेणपित्तगुल्मन्तुमद्यैरम्लैश्चवातिकम् ।
त्रिफलारसमूत्रैश्चनियच्छेत्सान्निपातिकम् ॥
रक्तगुल्मन्तुनारीणामुष्ट्रीक्षीरेणपाययेत् ॥
उपकुंचिकाकृष्णजीरा ।

इति कांकायनगुटिका ।

अर्थ–कचूर, पोहकरमूल, दन्ती, चीता, अड़हर, अदरख और बच, प्रत्येक चार चार तोले, निसोत चार तोले, सिग्रफ बारह तोले, जवाखार आठ तोले, अम्लवेत आठ तोले, अजवायन, जीरा, काली मिरच और धनिया प्रत्येक एक एक तोला, कालाजीरा और अजमोद प्रत्येक दोदो तोले लेवै, सबका बारीक चूर्णकर विजोरेके रसमें गोलीबनालेवै। एक गोली या दो गोली अथवा तीन गोली, उष्णोदक, अम्लद्रव्य, मूंग आदिकेयूष, घी अथवा दूधके साथ सेवन करै। यह कांकायन मुनिप्रोक्त कांकायन गुटिका–गुल्म, बवासीर, हृदयरोग, कृमि आदिरोगोंको दूर करै है। यह गोली गोमूत्र-के साथ बहुत दीनोंके कफगुल्मको, दूधकेसाथ पित्तगुल्मको, मदिराके साथ वातगुल्मको, त्रिफलेकेरस और गोमूत्रकेसाथ सान्निपातिक गुल्म-को, तथा ऊंटनीके दूधकेसाथ पीवैतौ स्त्रियोंके रक्तगुल्मको यह कांकायन-गुटिका दूर करतीहै ॥

हपुषाव्योषपृथ्वीकाचव्यचित्रकसैन्धवैः ।
साजाजीपिप्पलीमूलदीप्यकैर्विपचेद्घृतम् ॥
सकोलमूलकरसंसक्षीरंदधिदाडिमम् ।
तत्परंवातगुल्मघ्नंशूलानाहविबन्धनुत् ॥
योन्यर्शोग्रहणीरोगश्वासकासारुचिज्वरान् ।

पार्श्वहृद्बस्तिशूलञ्चघृतमेतद्व्यपोहति ॥
कोलस्यमूलकक्काथस्तथार्द्रस्यरसस्तथा।
दाडिमबीजस्वरसःक्काथोवास्वरसाभावे ॥
पंचद्रवाणिप्रत्येकंस्नेहसमानिचतथा ॥

इति हपुषादिघृतम्।

अर्थ–गायकाघी एकसेर, बेरीका क्काथ एकसेर, मूलीका क्काथ एकसेर, दूध एकसेर, दही एकसेर, अनारका रस एकसेर और कल्कके लिये हाऊ, बेर, सोंठ, पीपल, कालीमिरच, बडी इलाची, चव्य, चीता, सैंधानोन-जीरा, पीपलामूल, और अजवायन प्रत्येक एक एक तोले। यथा विधि-सै घृतको सिद्धकर सेवन करनेसै वातगुल्म, शूल, आनाह, विबन्ध, योनि-रोग, बवासीर, संग्रहणी, श्वास, खाँसी, अरुचि, ज्वर, पार्श्वशूल, हृदय-शूल, बस्तिशूल, इन सब रोगोंको यह हपुषादिघृत दूर करैहै ॥

द्राक्षामधुकखर्जूरंविदारींसशतावरीम्।
परुषकाणित्रिफलांसाधयेत्पलसंमितान्।
जलाढकेपादशेषेरसमामलकस्यच।
घृतमिक्षुरसंक्षीरमभयाकल्कपादिकम् ॥
साधयेच्चघृतंसिद्धंशर्कराक्षौद्रपादिकम्।
प्रयोगात्पित्तगुल्मघ्नंसर्वपित्तविकारनुत् ॥

इति द्राक्षाद्यंघृतम्

अभावेवृद्धदारस्यत्रिवृताञ्चनियोजयेत् ॥

इति नित्यानन्दरसः ।

अर्थ–सिंग्रफसै निकाला हुआ पारा, गंधक, ताँबेकी भस्म, कांसी, वंग, हरिताल, नीलाथोथा, शंख, कौड़ी, सोंठ, मिरच, पीपल, हरड़, बहेडा, आमला, लोहा, वायविडंग, पांचोंनोन, चव्य, पीपरामूल, हाऊबेर, बच, कचूर, पाढ़, देवदारु, इलायची, और विधारा, इनसबको समान भागले चूर्णकर निसोत, चीता, दन्ती और हरड़ प्रत्येकके रसमें अलगभावनादेकर पाँचपाँच रत्तीकी गोली बनालेवै । एकगोली प्रतिदिन खाय, और ऊपरसै शीतल जलका अनुपानकरै । यह–कफवातोद्भव श्लीपदरोग, रक्तमांसाश्रित श्लीपदरोग, मेदोगत श्लीपदरोग, धातुगत श्लीपदरोग, अर्बुद, गण्डमाला, बहुतपुराना अन्त्रवृद्धिरोग, वातपित्त, श्लेष्मवात, गुदरोग, क्रिमिरोग इनसबको दूर करैहै । अग्निको दीपनकरै, बल, वर्ण और सुस्थताको बढ़ावैहै । यह श्लीपदरोगनाशक नित्यानन्द रस श्रीमद्गहननाथ वैद्यने संसारके उपकारके लिये निर्माण कियाहै । तथाब्रध्न, वृद्धि, त्रिदोषज, रक्तज और पित्तज इनसबको हरैहै । इसके ऊपर सदा पथ्यदेवै । इसयोगमें जो विधारा नहीं मिलैतौ निसोत अथवा (समुद्रशोष) लेवै ॥

रसगंधकताम्राणिकाचंसीसंसमंसमम् ।
पिप्पलीत्रिवृताशुण्ठीधन्याकंचहरीतकी ॥
रसतास्त्रिगुणोग्राह्यःप्रत्येकंचूर्णमेवच ।
रसपादंप्रदातव्यंहिंगुचैवयवानिका ॥
अर्द्धमाषावटीकार्याखादेदेकांयथाबलम् ।
निहन्तिश्लीपदंरोगंदोषत्रयसमुद्भवम् ॥
पैत्तिकेभक्षयेद्यूषंश्लैष्मिकेशुण्ठसैंधवम् ।
वातिकेतक्रभक्तानिविष्टम्भंपरिवर्जयेत् ॥
कामदेवरसश्चायंतद्वद्देहंकरोत्यलम् ।
श्रीमद्गहननाथेनरचितोविश्वसंपादि ॥

इतिकामदेवरसः ।

अर्थ-पारा, गंधक, ताँबा, काँच, और सीसा प्रत्येक एकभाग, पीपल, निसोत, सोंठ, धनिया, और हरड़ प्रत्येक तीनभाग, तथा हींग और अजवायन प्रत्येक चौथाईभाग, सबको बारीक पीसकर आधे आधे मासेकीगोली बना लेवै। प्रतिदिन एक गोली बलको विचारकर खावै। यह त्रिदोषज-श्लीपदरोगको दूर करैहै। यह औषधि सेवन करके मनुष्योंको चाहिये जो पित्तका श्लीपद होयतो मूंग माषादिके यूषके साथ भोजनकरै। कफज श्लीपद होयतौ सैंधेनोनका चूर्ण और सोंठका चूर्ण भक्षणकरै। और वातज श्लीपद होयतौ तक्रके साथ भातभोजन करै, इसपर विष्टम्भि पदार्थ कभीभी नखाय। यह कामदेव रस देहको कामदेवकी समान करताहै, यह श्रीमद्गहननाथने संसारके उपकारके लिये निर्माण कियाहै॥

शालश्चिकापलद्वन्द्वंपलद्वंद्वंपुनर्नवा।
इन्द्रसुरंपलद्वन्द्वंपलैकंचमरीफलम्॥
गुंजादलंपलैकन्तुक्काथयेत्प्रास्थिकेऽम्भसि।
पादावशेषेविपचेद्वोघृतंप्रास्थिकंसुधीः॥
अभयाचित्रकंक्षारंसैन्धवंविश्वभेषजम्।
एतेषांकर्षमानेनवस्त्रपूतंविचूर्णितम्।
घृतेसिद्धेप्रदातव्यंतच्चमाषन्तुखादयेत्।
पंचाननघृतंनामश्लीपदेगदकुम्भिनि॥
प्लीहगुल्मोदरानाहज्वरशोथविनाशनम्।
श्रीमद्गहननाथेन निर्मितंविश्वसम्पदि
गोमूत्रंश्लैष्मिकेदेयंदुग्धंवातेचपैत्तिके।
सामान्यभोजनंदेयमनुपानंप्रकीर्तितम्॥
एतत्तैलंप्रकर्त्तव्यंकल्केनवस्तुनाविना।
घृतेनवाकृतंतैलंघृततुल्योगुणोभवेत्॥

इतिपंचाननघृतंतैलञ्च।

अर्थ-शालिच दोपल, पुनर्नवा दोपल, इन्द्रायण दोपल, सुपारी एक

पल, और चोंटलीके पत्ते एकपल, जल दोसेर, शेष आधसेर, गायका घी दोसेर, और कल्कके लिये हरड़, चीता, जवाखार, सैंधानोन और सोंठ, यह प्रत्येक दोदो तोले। सबको मिलाकर यथाविधिसे घृतको सिद्ध करैं। यहपंचाननघृत श्लीपदरोग, प्लीहा, गुल्म, उदररोर, आनाह, ज्वर और शोथरोगको दूर करैहै। यह श्रीमद्गहननाथने संसारके उपकारके लिये निर्माण कियाहै। श्लेष्मज श्लीपद होयतो गोमूत्रका अनुपान करै, जो तेल बनाना होयतो कल्ककी औषधी नगेरे।अथवा घृतहीमें तेलको डालकर पकावे तो घृतकी समान गुण करै॥

पुनर्नवादारुशिग्रुदशमूलमहौषधैः।
कफवातकृतेशोथेलेपःकोष्णोविधीयते॥

अर्थ–पुनर्नवा, देवदारू, सैंजिनेकी जड़, दशमूल और सोंठ यह सब समान भागले जलमें पीस लेपकरनेसे कफवातकृत शोथ दूरहोताहै॥

हरीतक्याविभीतस्यधात्र्याश्चूर्णंसुचूर्णितम्।
षट्तोलकप्रमाणेनग्राह्यमेतद्गुणैषिणा।
तोलद्वयंलौहचूर्णकान्तलोहस्यजारितम्।
तोलद्वयंततोदेयंविशुद्धंचशिलाजतु॥
कृत्वैकत्रसमस्तेषुत्रिफलाक्काथभावना।
आशुश्लीपदविध्वंसीसर्वव्याधिविनाशनः॥
श्लीपदारिरितिख्यातोलोहोमुनिभिरर्चितः।

इतिश्लीपदारिलोहः।

अर्थ–हरड़,बहेड़ा,आमला प्रत्येक छै छै तोले,जारित लोहेका चूर्ण दो तोले,शुद्ध शिलाजीत दोतोले इनसबको एकत्रकर त्रिफलेके काढेमें भावना देकर चूर्णकरले। यह श्लीपदरोगको शीघ्रही दूर करताहै इसको श्लीपदारि लोह कहते हैं.

गंधकंपारदंलौहंघनतालंमनःशिला।
शिलाजतुपुरंशुद्धंसमभागंविचूर्णयेत्॥
विडंगंत्रिफलाव्योषमाब्धिफेनंपुनर्नवा।

देवदारुंचित्रकंचदार्वीश्वेतापराजिता ॥
चूर्णमेषांपृथक्तुल्यंसर्वमेकत्रकारयेत् ।
त्रिफलाभृंगराजस्यरसेनैवत्रिधात्रिधा ॥
भावनाखलुदातव्याततःसंचूर्ण्यभक्षयेत् ।
मधुनामाषमात्रञ्चप्रातःकालेदिनेदिने ॥
कृत्वानुपानंनिम्बस्यपत्रंपुष्पंत्वचंसमम् ।
शाणमात्रंघृतैःकुर्यात्सर्ववातविकारनुत् ॥
वातरक्तंमहाघोरंगम्भीरंसर्वजंजयेत् ।
सर्वोपद्रवसंयुक्तंसाध्यासाध्यंनिहन्त्यलम् ॥

इति वातरक्तान्तकोरसः ।

इति श्लीपदाध्यायः ।

अर्थ-पारा, गंधक, लोहा, अभ्रक, हरिताल, मैनशिल, शिलाजीत, गूगल, वायबिडंग, त्रिकुटा, त्रिफला, समुद्रफेन, पुनर्नवा, देवदारु, चीता, दारुहलदी, और सफेद कोयला, इनसब द्रव्योंको समान भागले एकत्र चूर्णकर, त्रिफला, और भांगरेके रसकी तीन तीन भावना देकर चूर्ण करले । सहत साथ इसको एक मासेभर प्रतिदिन प्रातःकाल खावै, अनुपान-नीमके पत्ते, पुष्प और छालका चूर्णकर चारमासे घृतके साथ खाय । इससे-सर्वप्रकारके वातविकार, वातरक्त और महाघोर, गंभीर तथा सर्वोपद्रवसंयुक्त वातरक्त रोग दूर होताहै ॥

इति श्लीपदरोगाधिकारःसमाप्तः ।

अथ विद्रधिचिकित्सामाह ।

विद्रधिंसर्वमेवात्रत्वरयाव्रणशोथवत् ।
उपाचरेद्यथादोषंशोणितंचहरेच्छनैः ॥
जलौकःपातनंशस्तंसर्वस्मिन्नेवविद्रधौ ।
मृदुर्विरेकोलघ्वन्नंस्वेदःपित्तोत्तरंविना ॥

अर्थ-सर्वप्रकारके विद्रधिरोगकी चिकित्सा व्रणशोथकी समान करै, तथा दोषानुसार रक्तमोक्षण करावै । सर्वप्रकारके विद्रधिरोगमें जौंकोंको लगवाना अत्युत्तमहै । पित्तज विद्रधिको छोड़कर बाकी सर्वप्रकारके विद्रधिरोगोंमें मृदु विरेचन, हलका भोजन, और स्वेद देवै ॥

वातघ्नमूलकल्कैश्चवसातैलघृताप्लुतैः ।
सुखोष्णोबहुलोलेपःप्रयोज्योवातविद्रधौ ॥
रास्नाहिंस्रादेवदारुबिल्वमूलाग्निमन्थकैः ।
मातुलुंगाम्लसंपिष्टैःसाज्यैर्लेपोत्रवातिके ॥
स्वेदोपनाहाःकर्त्तव्याःशिग्रुमूलसमन्विताः ।
स्वेदःपयोवेशवारकृशरापायसैर्मतः ॥
उपनाहश्चवातोक्तःप्रयोज्यःशाल्वनादिकः ।
यवगोधूममुद्गैश्चस्विन्नपिष्टैःप्रलेपयेत् ॥
विलीयतेक्षणेनैवअपक्वश्चैवविद्रधिः ।
दशमूल्यमृतापथ्यावर्षाभूदारुनागरैः ॥
सशिग्रुक्वथितंपेयंज्वरेवातजविद्रधौ ।
पुनर्नवादारुविश्वदशमूलाभयाम्भसा ॥
गुग्गुलुंरुबुतैलंवापिबेन्मारुतविद्रधौ ॥
कफानुबन्धे गुग्गुलुम् ।

इति वाते ।

अर्थ-वातज विद्रधिरोगमें वातघ्न औषधि जड़को पीसकर घृत, तेल और वसामें मिलाकर कुछ कुछ गरम लेपकरै । रास्ना, कटेरी, देवदारु, बेलकी जड़, अरणी, बिजोरानीबू, और अमलवैंत, इन सबको एकत्र पीसकर घीके साथ मिलाकर लेप करनेसे वातज विद्रधि रोग दूर होताहै. विद्रधि रोगमें स्वेद और प्रलेपदेना होयतो सैंजिनकीजडके साथ देवै, तथा दूध, वेशवार, कृशरा और पायसके द्वारा स्वेद प्रदान करै। वातमें कहे हुए शाल्वनादि प्रलेपभी विद्रधिरोगमें करने चाहिये । जौ, गेहूँ, और मूँगको उबालकर पीसके लेपकरनेसे अपक्वविद्रधि क्षणभरमेंही

दूर होजावैगी। दशमूल, गिलोय, हरड़, पुनर्नवा, देवदारु, सोंठ, और सैंजिनेकी जड़, इनका एकत्र क्वाथ बनाकर पीनेसै वातज विद्रधिरोग नष्ट होताहै । पुनर्नवा, देवदारु, सोंठ, दशमूल, और हरड़, इनके काढ़ेके साथ गूगल अथवा अंडीके तेलको सेवन करनेसै वातज विद्रधिरोग दूर होताहै पुनर्नवादि क्वाथके साथ गूगल कफानुबन्ध वातजविद्रधि रोगमें प्रयोग करै ॥

पैत्तिकेशर्करालाजामधुकैःशारिवायुतैः ।
प्रदिह्यात्क्षीरपिष्टैर्वापयस्योशीरचन्दनैः ॥
योगद्वयोऽपिक्षारेणलेपनंपित्तविद्रधौ ।
पयस्या क्षीरकाकोली ।
पंचवल्कलकल्केनघृतमिश्रेणलेपयेत् ॥
सर्पिषाशतधौतेननवनीतेनवागवाम् ।
त्रिवृद्धरीतकीनाञ्चचूर्णंमधुयुतंपिबेत् ॥
पिबेद्वात्रिफलाक्काथंत्रिवृत्कल्काक्षसंयुतम् ॥
इतिपित्ते ।

अर्थ-मिश्री, खीलै, मुलैठी और अनन्तमूल इनको दूधमें पीसकर, अथवा-क्षीरकाकोली, खस, और लालचन्दन इनको दूधमें पीसकर प्रलेप करनेसै पित्तज विद्रधिरोग दूर होताहै । वड़, गूलर, पीपल, पाखर, और वेत इन पाँचवृक्षोंकी छालको पीसकर घीमें मिलाकर लेप करनेसै पित्तजविद्रधिरोग दूर होताहै । सौवार धुलेहुए घीका अथवा नौनीका लेप करनेसै पित्तजविद्रधिरोग दूर होताहै । निशोतका चूर्ण और हरडोंका चूर्ण समानभाग ले सहतके साथ सेवन करनेसै अथवा त्रिफलेके क्वाथमें निसोतका चूर्ण मिलाकर पान करनेसै पित्तजन्य विद्रधिरोग दूर होताहै ॥

इष्टकासिकतालौहगोशकृत्तुषपांशुभिः ।
मूत्रपिष्टैश्चसततंस्वेदयेच्छ्लेष्मविद्रधौ ॥
कषायपानैर्वमनैरालेपैरुपनाहकैः ।
हरेद्दोषमभीक्ष्णञ्चतथैवासृगलाम्बुना ॥

दशमूलीकषायेणसस्नेहेनरसेनवा।
शोथंव्रणंवाकोष्णेनसशूलंपरिसेचयेत् ॥
त्रिफलाशिग्रुवरुणदशमूलाम्भसापिबेत्।
गुग्गुलुंमूत्रसंयुक्तंविद्रधौकफसंभवे ॥

इति कफे।

अर्थ—ईट, वालू, लौहा, गोवर और गोवरकी मांदको गोमूत्रमें पीसकर लेप करनेसे कफजविद्रधिरोग दूरहोताहै । कफज विद्रधिरोगमें कषाय, वमन, प्रलेप और स्वेद देकर दोषोंको दूरकरै, तथा अलाबुप्रयोगके द्वारा रक्तमोक्षण कार्य्यकरै। ईषत् उष्ण दशमूलके क्वाथ अथवा स्नेह-संयुक्त मांसादिरसके द्वारा परिसेक करनेंसै शूलकी समान पीडायुक्त व्रणशोथ दूर होताहै। त्रिफला, सैंजिनेकी जड़, वरनेकी छाल, और दशमूल इनका क्वाथ गोमूत्र और गूगलके साथ पानकरनेसै—कफजन्य विद्रधिरोग दूरहोताहै ॥

भूनिम्बार्द्धपलंशिलापलयुतंदार्वीपलेद्वेतथा
दार्व्यर्द्धेनपुनर्नवांकुरुसमांदार्वीसमःप्रग्रहः।
वासादर्द्धयुतंपलन्तुकटुकायोज्यातदर्द्धेनवै
विन्ध्याह्वंचनिशासमानममृताकर्षास्तुपंचैवतु।
सर्ववत्सकसप्तकर्षसहितंसुश्लक्ष्णचूर्णीकृतम्।
वासायाःस्वरसेनभावितामिदंत्रीन्पंचवारांस्तथा ॥
भूयस्तद्गुडवारिणाप्रतिदिनंपीतंपुरस्तेरवौ।
पुंसांविद्रधिनाशनन्तुकथितंपथ्यंस्वयंब्रह्मणा ॥

प्रग्रहःशोणालुफलम्।
विन्ध्याह्वस्थानेऽश्वामितिपाठेऽश्वगंधा।

इति भूनिम्बाद्यं चूर्णम्।

अर्थ—चिरायता दोतोले, हलदी चारतोले, दारुहलदी आठतोले, पुनर्नवा चारतोले, अमलतास आठतोले, अडूसा डेढ़तोला, कुटकी पौनतोला, छोटी इलायची चारतोले, गिलोय पाँचतोले, और कुडेकी

छाल साततोले लेवै। इन सब औषधियोंका उत्तमरीतिसे चूर्णकर अडूसे-केरसकी तीन तथा पाँच भावना देवै। इसको प्रतिदिन प्रातःकाल गुडके सरबतके साथ सेवन करै। यह मनुष्योंके विद्रधिरोगको नाश करनेके लिये स्वयं ब्रह्माजीने कहाहै ॥

मधुशिग्रुशृतंतोयंशिलाजतुसमन्वितम्।
पिबेदभ्यंतरोत्थेचविद्रधावाशुशान्तये ॥
वरुणादिगणक्काथमपक्केभ्यन्तरोत्थिते।
उषकादिप्रतीवापंपिबेत्संशमनायवै ॥

इति उषकादिर्गणः।

अर्थ-लालसैंजिनेका क्काथ शिलाजीतके साथ पान करनेसै आभ्यन्तरिक विद्रधिरोग दूर होताहै। वरुणादिके क्काथमें उषकादि औषधियोंका चूर्ण डालकर पान करनेसै आभ्यंतरिक अपक्कविद्रधिरोग दूर होताहै ॥

प्रियंगूधातकीलोध्रकट्फलंतिलसैन्धवम्।
एतैस्तैलंविपक्तव्यंविद्रधौरोपणंपरम् ॥
तिलोवत्सकः।
तिलशत्वचमित्यपपाठःसुश्रुतादावदर्शनात् ॥
एषांकल्कः। जलंचतुर्गुणम्।

अर्थ-तेल दोसेर, जल आठसेर, और कल्कके लिये फूलप्रियंगू, धायकेफूल, लोध, कायफल, कुडा, और सैंधानोन प्रत्येक दो दो तोले। इस तेलको प्रयोग करनेसै विद्रधिका घाव भर जाताहै ॥

द्विपंचमूलीत्रिफलाकुलत्थेत्रिवृद्घनैर्मूलकशिग्रुयुक्तैः।
तैलंतिलैरण्डजमेतदेभिःसिद्धंहितंविद्रधिगुल्मशूले ॥
दशमूलादिकल्कः जलंचतुर्गुणम्।

इति दशमूलाद्यं तैलम्।

इति प्रियंग्वाद्यं तैलम्।

अर्थ-अंडका तेल दोसेर, जल आठसेर, कल्कके लिये दशमूल, त्रिफला, कुलथी, निसोत, नागरमोथा, मूली, सैंजिनेकी जड़ और तिल, प्रत्येक

दोदो तोले। यथाविधिसै तैलको सिद्धकरै। यह तेल विद्रधि और गुल्मशूलको नष्ट करैहै।

वरुणवल्कलक्काथेपिबेद्रासैन्धवंतथा।
शिलाजतुसमंहिंगुमसाध्यंविद्रधिंजयेत्॥
क्काथंशिग्रुवचावाथहिंगुसैन्धवचूर्णितम्।
संयुक्तंपाययेच्छान्त्यैविद्रधिरोगपीडितम्॥

इति विद्रध्यध्यायः।

अर्थ-वरनाकी छालके काढ़ेमें सैंधानोन, शिलाजीत और हींग डालकर पीनेसै अथवा सैंजिनेकी जड़ और वचके क्काथमें सैंधेनोन और हींगका चूर्ण डालकर पान करनेसै सर्वप्रकारके विद्रधिरोग नष्ट होतेहैं॥

इति विद्रध्यध्यायः समाप्तः।

अथ व्रणशोथचिकित्सामाह।

आदौविम्लापनंकुर्याद्द्वितीयमवसेचनम्।
तृतीयमुपनाहंचचतुर्थींपाटनक्रियाम्॥
पंचमंशोधनंचैवषष्ठंरोपणमिष्यते।
एतेक्रमाद्व्रणस्योक्ताःसप्तमोवैकृतापहः॥
मातुलुंगाग्निमन्थौचभद्रदारुमहौषधम्।
अहिंस्राचैवरास्नाचप्रलेपोवातशोथहा॥
कल्कःकांजिकसंपिष्टःस्निग्धःशाखोटकत्वचः।
सुपर्णइवनागानांवातशोथविनाशनः॥

इति वाते।

अर्थ-प्रथम विम्लापन (मर्दन), द्वितीय अवसेचन, तृतीय प्रलेप, चतुर्थ छेदन, पंचम शोधन, षष्ठ रोपण, और सप्तम वैकृतविनाश, यह व्रणकी चिकित्सा करनेकी क्रिया क्रमसै कही है। बिजोरानीबू, अरणी, देवदारु, सोंठ, रास्ना, और अहिंस्रा इन सबको समानभागले एकत्र पीसकर लेप करनेसै वातात्मक व्रणशोथरोग दूर होताहै। सिहोड़ेकी छालको काँजीमें पीस घी मिलाकर लेपकरनेसै वातजनित व्रणशोथ दूर होताहै।

दूर्वाचनलमूलश्चमधुकंचंदनस्तथा ।
शीतलाश्चगणाःसर्वेप्रलेपःपित्तशोथहा ॥
शीतलागणाउत्पलादिकाःकोलादिकाः ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षवेतसवल्कलैः ॥
ससर्पिष्कःप्रलेपःस्याच्छोथनिर्वापणःस्मृतः ।
सर्पिःशतधौतंपंचवल्कलम् ।
न्यग्रधोदुम्बराश्वत्थप्लक्षवेतसशेलुभिः ॥
चंदनद्वयमंजिष्ठायष्टीपूरणगैरिकैः ॥
शतधौत घृतोन्मिश्रोलेपोरक्तप्रसादनः ।
दाहपाकरुजास्रावशोथनिर्वापणःपरः ॥
शेलुर्बहुवारकःपूरणंमातुलुंगमूलमिति ।
कंचटंतिलभृष्टंचपिष्ट्वालेपंप्रदापयेत् ॥
दाहक्लेदरुजास्रावशोथवैवर्ण्यनाशनम् ।
इति पित्ते ।

अर्थ–दूब, नीलकीजड़, मुलेठी, लालचन्दन और उत्पलादि शीतल गणकी औषधियोंके द्वारा प्रलेप करनेसै पित्तज व्रणशोथ दूरहोताहै. बड, गूलर, पीपल, पाखर, और वेत, इनकी छालको पीसकर सोवारधुलेहुए पुराने घीमें मिलाकर लेपकरनेसै पित्तज व्रणशोथ दूरहोताहै बडकी छाल, गूलरकी छाल, पीपलकी छाल, पाखरकी छाल, मुलेठी बिजोरे नीबूकी जड़,वेतकी छाल, लिसोडेकी छाल, लालचन्दन, सफेद चंदन,मजीठ और गेरू इन सब औषधियोंको समानभागलेकर सौवार धुले पुराने घीमें मिलाकर लेप करनेसै पित्तजव्रणशोथजन्य दूषित रक्त शुद्ध होवै, तथा व्रणकी दाह, पाक, वेदना, राध आदिका गिरना और सूजन दूर होतीहै । जलचौलाई और भुनेहुए तिलोंको एकत्र पीसकर लेपकरनेसै व्रणकी दाह, क्लेद, पीडा, स्राव, शोथ और विवर्णता दूरहोतीहै ॥

अजगंधाश्वगंधाचकालासरलयासह ।
एकोपिचाजशृंग्याश्चप्रलेपःश्लेष्मशोथहा ॥

अजगंधाक्षेत्रयवानी अजश्रृंगीकाकडाश्रृंगी ॥

इति कफे ।

अर्थ-तिलवन, असगंध, कलम्बक और धूप सरल इनको एकत्र पीसकर अथवा केवल कांकडासिंगीको पीसकर लेपकरनेसे कफजन्य व्रणशोथ दूर होताहै ॥

तिलकल्कःसलवणोद्वेहरिद्रेत्रिवृद्घृतम् ।
मधुकंनिम्बपत्राणिप्रलेपःशोथशोधनः ॥

इति त्रिफलाष्टकम् ।

अर्थ-तिलोंका चूर्ण, सैंधानोन, हलदी, दारुहलदी, निसोत, मुलेठी, और नीमके पत्तोंको एकत्र पीसकर घीमें मिलाके लेपकरनेसे व्रणशोथ दूर होताहै ॥

निम्बपत्रंतिलादन्तीत्रिवृत्सैन्धवमाक्षिकम् ।
दुष्टव्रणप्रशमनोलेपःशोधनकेसरी ॥
सुषवीपत्रपत्तुरकर्णामोटकुठेरकाः ।
पृथगेतेप्रलेपेनगंभीरव्रणरोपणाः ॥
येक्लेदपाकाःस्रुतिगंधवन्तोव्रणामहान्तःसरुजःसशोथाः ।
प्रयान्तितेगुग्गुलुमिश्रितेनपीतेनशान्तित्रिफलारसेन ॥

अर्थ-नीमकेपत्ते, तिल, दन्ती, निसोत, और सैंधानोन, इनसबको समानभाग लेकर जलके संग पीस सहत मिलाकर लेपकरनेसे दुष्टव्रण शुद्धहोकर आराम होताहै । करेलेके पत्ते, शालिंचशाक, कर्णमोरटलता, और तुलसीके पत्ते, इनमेंसे एक किसीके पत्तोंको पीसकर प्रलेप करनेसे गंभीर व्रण भरजाताहै । त्रिफलेके काथको गूगलके साथ सेवन करनेसे क्लेद, पाक, स्राव, वेदना और सूजनसहित व्रण नष्ट होजाताहै ॥

विडंगत्रिफलाव्योषचूर्णगुग्गुलुनाशनम् ।
सर्पिषावटिकांकृत्वाखादेद्वाहितभोजनः ॥
दुष्टव्रणापचीमेहकुष्ठशोथनाडीव्रणापहः ॥

इति वटिकागुग्गुलुः ।

अर्थ-वायविडंग, त्रिफला, त्रिकुटा, और गूगल, इनको एकत्र कर घीमें मिला गोली बनालेवै । इन गोलियोंको सेवन करनेसै-दुष्टव्रण, अपची, प्रमेह, कोढ़, और नाड़ीव्रण दूर होताहै ॥

अमृतायाःपलशतंदशमूलशतन्तथा ।
पाठामूर्वाबलेद्वेचदार्वीगन्धर्वहस्तकः ॥
पृथग्दशपलान्भागाच्छतंचापिहरीतकी ।
विभीतकशतेद्वेचचत्वार्यामलकानिच ॥
गुग्गुलुप्रस्थसंयुक्तोद्रोणेऽपामुषितंनिशि ।
पूर्वाह्णेक्वाथयेद्धीमांश्चतुर्भागावशेषितम् ॥
उद्धृत्यस्राव्यविपचेद्यावल्लेहक्रमाद्धनम् ।
शीतेत्वेतानिसंचूर्ण्यप्रक्षिपेत्पलिकानिच ॥
त्रिफलात्रिवृताव्योषदन्तीच्छिन्नाश्वगंधकाः ।
क्रिमिशत्रुदलंचोचंसूक्ष्मैलानागकेशरम् ॥
स्वच्छन्दहारचेष्टस्यशीताम्भोवृष्यभोजनम् ॥
अमृतागुग्गुलुर्नाम्नासर्वव्रणविशोधनम् ॥
दुष्टकुष्ठविसर्पांश्चहिक्कामेहगरोदरम् ॥
प्लीहामयक्ष्मह्द्रोगंपाण्डुशोषमसृग्दरम् ॥
गुल्मार्शोविद्रधीन्भस्मनाडीव्रणभगंदरान् ।
अशीतिवातजान्रोगान्निहन्तिश्वासजित्परान् ॥
कण्डूकोठाङ्गमर्द्दामवातशोणितवातहा ।
आत्रेयानुमतोह्येषगुग्गुलुःपरिकीर्त्तितः ॥

इति अमृतागुग्गुलुः ।

अर्थ-गिलोय सौपल, दशमूल १०० सौ पल, पाढ़, मूर्वा, खिरेटी, गंगेरन, दारुहलदी, और अण्ड, प्रत्येक दशदशपल, हरड़ सौ, बहेडे सौ, आमले चारसौ, और चौसठतोले गूगल पोटलीमें बांधकर सबको एक द्रोण जलमें रातको भिजो देवै और सवेरेको क्वाथ बनावै, जब चौथा

भाग जल शेषरहै तब उतारकर छान लेवै, पश्चात् इसमें हरड़, बहेड़े और आमलेकी गुठली निकालकर और गूगलको पीसकर मिलादेवैं, फिर इसको पकावै, जब पकते २ गाढ़ा होकर शीतल होजाय तब त्रिफला, निसोत, त्रिकुटा, दन्ती, गिलोय, असगंध, वायविडंग, दालचीनि, तेजपात, छोटी इलायची और नागकेशर प्रत्येकका चूर्ण चार चार तोले मिलादेवै। इसपै यथेष्ट और वृष्य भोजनकरै और शीतल जलपान करै। यह अमृतागूगल–सर्वप्रकारके व्रणोंको शुद्धकरै है, तथा दुष्ट कुष्ठ, विसर्प, हिक्कारोग, प्रमेह, विषविकार, उदररोग, प्लीहा, आम, राजयक्ष्मा, हृदयरोग, पाण्डु, शोष, रुधिरविकार, गुल्म, बवासीर, विद्रधि, भ्रम, नाडीव्रण, भगंदर, अस्सीप्रकारके वातरोग, श्वाँसरोग, कण्डू, कोढ, अंगमर्द, आमवात, और रक्तवात तथा अन्यान्य रोगोंको दूर करै है।

तुल्यंसर्जरसंलोध्रंसिन्दूरातिविषानिशा।
अक्षकम्पिल्लश्रीवासगुग्गुलुर्घृततैलकैः॥
तुल्यांशंपेषयेत्पिण्डंतत्तुल्यंसिक्थकंभवेत्।
मृद्वग्निनापचेत्पात्रेमिश्रितंतंसमुद्धरेत्॥
वर्त्तिर्गुणवतीनामयोज्याशीतजलान्विता।
दुःसाध्यव्रणगण्डेषुहितानाडीव्रणेषुच॥
शोधनेरोपणेचैवस्वास्थ्यमुत्पादयत्यलम्॥

इति गुणवतीवर्त्तिः।

अर्थ–राल, लोध, सिंदूर, अतीस, हलदी, बहेड़ा, कवीला, सरलका गोंद, गूगल, घृत और तैल, यह सब समानभाग और सबकी बराबर मोम लेवै, इनको मंद अग्निसे पकाकर बत्ती बनालेवै, यह बत्ती शीतल जलके साथ व्रणपर लगावै। इससे असाध्य व्रण, गण्डव्रण, और नाड़ीव्रण शुद्ध होकर भरजाते हैं॥

धत्तूरपत्रमूलंसलवणमुष्णंव्रणोत्थितारम्भे।
दत्तंलेपान्नियतंव्रणशोथंहरातिबहुदुष्टम्॥

अर्थ–धतूरेके पत्ते और जड़को पीस लवण मिलाके गरमकर व्रणके उत्पन्न होनेके पहिलेही लेप करनेसै व्रणशोथ आराम होताहै ॥

दरदःपार्वतीपुष्पंकुनटीपुरुषोरसः ।
शोणितंगंधकोदैत्यःसैंधवातिविषाचवी ॥
शरपुंखाविडंगश्चयवानीगजापिप्पली ।
मरिचार्कश्चवरुणाधूनकंचहरीतकी ॥
मर्दितंकटुतैलेनगुटिकांकारयेदिह ।
नाडीव्रणप्रवाहश्चगंडमालांविचर्चिकाम् ॥
चिरव्रणंदद्रुकुष्ठंपूतिकन्तुशिरोगदम् ।
पादस्फोटंतथाहस्तंविचर्चीबहुकीटजम् ॥

अत्रदरदोहिंगुलः । पार्वतीवेङ्गामाटी । पुष्पकंरसांजनं । मणिविशेषोवा । कुनटीमनःशिला । पुरुषोगुग्गुलुः । शोणितंताम्रं । दैत्योलोहः । स्पष्टमपरम् ।

इतिव्रणगजांकुशः ।

अर्थ–सिंगरफ, वेंगामट्टी, रसौत, मैनशिल, गूगल, पारा, ताँबा, गंधक, लोहा, सैंधानोन, अतीस, चव्य, शरफोंका, अजवायन, गजपीपल, वायविडंग, वरना, आक, कालीमिरच, हरड, और राल, इन सबको समानभाग ले कड़वे तेलमें खरलकर गोली बनालेवै। इन गोलियोंको सेवन करनेसै नाड़ीव्रण, प्रवाह, गण्डमाला, विचर्चिका बहुत दिनोंका व्रण, दाद, कोढ़, दुर्गन्धित व्रण, शिरोरोग, पादस्फोट, हस्तस्फोट, विचर्ची और कृमिरोग दूर होतेहैं ॥

वन्ध्याककोंटकीपाठाव्याघ्रीकुष्ठपटोलिका ।
अंकोटहस्तिपर्णीचतालगंधकसैन्धवम् ॥
मंजिष्ठाकरवीरंचनिशाहिंगुसुवर्चला ।
वचासिन्दूरतुल्यांशंजलेनसहपेषयेत् ॥
कल्काच्चतुर्गुणंतैलंतैलात्तोयंचतुर्गुणम् ।

पचेत्तैलावशेषञ्चलेपाद्दुष्टव्रणापहम् ॥

इतिकर्कोटाद्यंतैलम् ।

इति व्रणरोगाध्यायः ।

अर्थ-कड़वातेल दोसेर, जल आठसेर, और कल्कके लिये वाँझककोड़ा, पाढ़, कटेरी, कूट, कडवीतोरई, अंकोल, हस्तपर्णी, हरिताल, सैंधानोन, गंधक, मजीठ, कनेरकी जड, हलदी, हींग, तुलसी, वच और सिंदूर प्रत्येक दोदो तोले यथाविधिसै तेलको सिद्धकरै इस तेलका लेप करनेसै दुष्टव्रण दूर होताहै ।

इति व्रणरोगाध्यायः समाप्तः।

अथ शारीरव्रणसद्योव्रणमाह ।

परिपक्कंव्रणंवैद्योदारयेदवधानतः ।
नच्छिन्द्यादाममज्ञानान्नतुपक्कमुपेक्षते ॥ १ ॥
गवांदन्तंजलेघृष्टंबिन्दुमात्रंप्रलेपतः ।
अत्यन्तकठिनेचापिव्रणेपाचनभेदनम् ॥ २ ॥
कण्टुतैलान्वितैलैंपात्सर्वानिर्मोकभस्माभिः ।
चयःशाम्यतिगण्डस्यप्रकोपःस्फुटातिद्रुतम् ॥ ३ ॥
चिरबिल्वाग्निकोदन्तीचित्रकोहयमारकः ।
कपोतकंकगृध्राणांपुरीषाणिचदारुणम् ॥ ४ ॥

चिरबिल्वःकरंजः । अग्निकोलांगलीअजमोदावा।हयमारः करवीरः।सर्वेषांमूलंएषांसमस्तानांव्यस्तानांचदारुणत्वं५॥

क्षारद्रव्याणिवायानिक्षारोवादारुणःपरः ।
द्रव्याणांपिच्छिलानान्तुत्वङ्मूलानिप्रलेपनम् ॥ ६ ॥
यवगोधूममाषाणांविचूर्णानिसमासतः ।
पटोलीतिल्वष्टयाह्वात्रिवृद्दन्तीनिशाद्वयम् ॥ ७ ॥
निम्बपत्रान्वितोलेपःसपटुर्व्रणशोधनः ॥

इति पटुसैन्धवम् ।

अर्थ-वैद्यको चाहिये कि अत्यन्त चतुरताके साथ पक्केव्रणको चीरै और कच्चा व्रण कदापि न चीरै, तथा पक्केव्रणको तर्क करकै चीरनेमें देर नकरै । गायके दाँतको जलमें घीसकर एक बिन्दुमात्र लेप करनेसै अत्यन्त शक्तव्रणभी पक करकै अपने आपही फट जाताहै। साँपकी कैंचलीकी भस्मको सरसोंके तेलमें मिलाकर लेप करनेसै गलगण्ड मतव्रण शीघ्रही फटकर नष्ट होताहै । करंजुवा, कलिहारी, दन्तीकी जड़, चीतेकी जड, कनेरकी जड, और कबूतर, कंक तथा गृध्र इन तीनों पक्षियोंकी विष्ठा, इन सबको एकत्र अथवा अलग अलग तथा क्षारद्रव्य और जवाखार इन औषधियोंके द्वारा अथवा पिच्छिल द्रव्योंकी छाल या मूलके द्वारा लेप करनेसै व्रण विदीर्ण होकर आराम होजाताहै । जौ, गेहू, और उडदोंका चूर्ण तथा पटोल, तिल, मुलेठी, निसोत, दन्ती, हलदी, दारुहलदी, नीमके पत्ते, और सैंधानोन सबको एकत्र पीसकर लेप करनेसै व्रण शुद्ध होताहै ॥ १ । २ । ३ । ४ । ५ । ६ । ७ ॥

विडंगत्रिफलाव्योषचूर्णगुग्गुलुनासह ॥ ८ ॥
सर्पिषावटिकांकृत्वाखादेद्वाहितभोजनः ।
दुष्टव्रणापचीमेहदुष्टनाडीविशोधनः ॥ ९ ॥

इति विडंगादिवटिकागुग्गुलुः

अर्थ-वायविडंग, त्रिफला, त्रिकुटेका चूर्ण और गूगल इनको एकत्र घीमें पीसकर गोली बना लेवै; एक गोली प्रतिदिन खावै और इसपर हितकारक भोजन करै । यह गोली-दुष्टव्रण, अपची, प्रमेह और दुष्टनाडीव्रणको दूर करैहै ॥ ८ ॥ ९ ॥

अमृतापटोलमूलत्रिफलात्रिकटुक्रिमिघ्नानाम् ।
समभागानांचूर्णसर्वसमोगुग्गुलोर्भागः ॥ १० ॥
प्रतिवासरमेकैकांगुडिकांखादेदक्षपरिमाणाम् ।
जेतुंव्रणवातासृग्गुल्मोदरश्वयथुपाण्डुरोगान् ॥ ११ ॥

इति अमृतावटिकागुग्गुलुः ।

अर्थ-गिलोय, परवलकी जड, त्रिकटु, त्रिफला, और वायविडंग, प्रत्येकका चूर्ण एकभाग और सबकी समान गूगल लेवै, इन सबको एक.

त्र पीसकर दो दो तोलेकी गोली बनालेवै, फिर एक गोली प्रतिदिन खाय; इससे व्रण, वातरक्त, गुल्म, उदररोग, सूजन और पाण्डु-रोग दूर होताहै ॥ १० । ११ ॥

जातीनिम्बपटोलपत्रकटुकादार्वीनिशाशारिवा।
मंजिष्ठाभयसिक्थतुत्थमधुकैर्मुक्ताह्वबीजैःसमैः ॥
सर्पिःसिद्धमनेनसूक्ष्मवदनामर्माश्रितास्राविणो।
गंभीराःसरुजोव्रणाःसगतिकाःशुध्यन्तिरोहन्तिच ॥ १२ ॥
जात्यादेस्त्रयस्यपत्रम्। एषांकल्कः।
जलं चतुर्गुणम्। गतिंनाडीम् ॥ १३ ॥

इति जात्याद्यं घृतम्।

अर्थ-गायका घी दोसेर, जल आठ सेर, कल्कके लिये चमेलीके पत्ते, नीमके पत्ते, पटोलपत्र, कुटकी, हलदी, दारुहलदी, अनन्तमूल, मजीठ, हरड़, मोम, तूतिया, मुलेठी और मुक्ताबीज प्रत्येक दो दो तोले। सब-को मिलाकर यथाविधिसै घृतको सिद्ध करै, इस घृतको सेवन करनेसै सूक्ष्म मुखवाले, मर्माश्रित, स्रावयुक्त, गंभीर, वेदनायुक्त नाडीव्रण समस्त शुद्धहोकर आराम होजाताहै ॥ १२ । १३ ॥

गौरहरिद्रामंजिष्ठामांसीमधुकमेवच।
प्रपौण्डरीकंह्रीबेरंभद्रमुस्तंसचन्दनम् ॥ १४ ॥
जातीनिम्बपटोलञ्चकरंजंकटुरोहिणी।
मधूच्छिष्टंसमधुकंमहामेदातथैवच ॥ १५ ॥
पंचवल्कलतोयेनघृतप्रस्थंविपाचयेत्।
एषगौरोमहावीर्यःसर्वव्रणविशोधनः ॥ १६ ॥
आगन्तुसहजाश्चैवसुचिरोत्थाश्चयेव्रणाः।
विषमामपिनाडींतुरोहयेच्छीघ्रमेवच ॥ १७ ॥
गौरहरिद्रा दारुहरिद्रा।
जातीनिंबपटोलानांपत्रं करंजस्यफलं मधुकस्यपुष्पम्।

इति गौराद्यं घृतम्।

अर्थ–गायका घी दो सेर, वटादि पंचवल्कलोंका क्काथ आठ सेर, जल आठ सेर, तथा कल्कके लिये दारुहलदी, मजीठ, बालछड, मुलेठी, पुण्डेरिया, सुगंधवाला, नगरमोथा, लालचंदन, चमेलीके पत्ते निम्बकेपत्र, पटोल, करंजके फल, कुटकी, मोम, महुवेके फूल और महामेदा प्रत्येक दोदो तोले । सबको मिलाकर यथाविधिसे घृतको सिद्ध करै यह घृत नाडीव्रणको शुद्ध करके भरदेताहै॥ १४॥ १५॥ १६ ॥ १७ ॥

नक्तमालस्यपत्राणितरुणानिफलानिच ॥ १८ ॥
मालत्याश्चैवपत्राणिपटोलारिष्टयोस्तथा ॥
द्वेहरिद्रेमधूच्छिष्टंमधुकंतिक्तरोहिणी ॥ १९ ॥
मंजिष्ठाचंदनोशीरमुत्पलंशारिवात्रिवृत् ॥
एतेषांकार्षिकैर्भागैर्घृतप्रस्थंविपाचयेत् ॥ २० ॥
दुष्टव्रणप्रशमनंनाडीव्रणविशोधनम् ॥
सद्यश्छिन्नव्रणानांचकरंजाद्यमिदंशुभम् ॥ २१ ॥
पत्राणितरुणानि ।

इतिकरंजाद्यं घृतम् ।

अर्थ–उत्तम गायका घी दोसेर जल आठसेर तथा कल्कके लिये करंजके पत्ते और फल मालतीके पत्ते, पटोलपत्र, नीमके पत्ते, हलदी, दारुहलदी, मोम, महुएके फूल,कुटकी,मजीठ, लालचंदन, खस, उत्पल, अनन्तमूल और निसोत प्रत्येक दोदो तोले । विधिपूर्वक घृतको सिद्धकरै यह घृत दुष्टव्रणको शान्त करै है नाडीव्रणको शुद्धकरैहै, तथा सद्य और छिन्नव्रणको यह घृत हितकारीहै ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

सिंदूरहिंगुविषकुष्ठरसोनचित्रवालांघ्रिलांगलिककल्कविपक्वतैलं
प्रासादमंत्रयुतहुंकृतमाध्विकेनक्लिन्नव्रणप्रशमनोविपरीतमल्लः ॥
खड्गाभिघातगुरुगण्डमहोपदंश
नाडीव्रणव्रणविचर्चिककुष्ठपामाः ॥ २३ ॥
एतान्निहन्तिविपरीतकमल्लनाम
तैलंयथेष्टशयनाशनभोजनस्य ॥ २४ ॥

चित्रकोरक्तचित्रकः । वालांघ्रिःशरपुंखामूलम् ।
जलंचतुर्गणम् । केचित्कटुतैलमिच्छन्ति ।
तिलतैलेनव्यवहारःप्रासादमंत्रोमाहेश्वरोमंत्रः ॥ २५ ॥
ओंहाँहींहैंहौंशिवायस्वाहेतिपठित्वाफेनमपनोद्यम् ॥

इतिविपरीतमल्लतैलम् ।

अर्थ-तिलका तेल दोसेर, जल आठसेर, तथा कल्कके लिये सिंदूर हींग, विष, कूठ, लहसुन, लालचीता, सरफोंकेकी जड़, और कलिहारीकी जड़, प्रत्येक दोदो तोले । सबको मिलाकर यथाविधिसे तेलको सिद्ध करै । 'ओं हाँ हीं हैं हौं शिवाय स्वाहा' इस मंत्रको पढ़के झाँगोंको हटाकर तेलको पानकरै यह विपरीतमल्लतैल छिन्नव्रण, खड्गाभिघातव्रण, महागण्ड, महाउपदंश, नाडीव्रण, व्रण, विचर्चिका, कुष्ठ और पामादि रोगोंको दूरकरैहै । इसके ऊपर यथेष्ट भोजन और शयनकरै ॥ २३ ॥ २४॥२५॥

कुठारकात्पलशंतक्राथयेद्दुल्वनेऽम्भसि ॥ २६ ॥
तेनपादावशेषेणतैलप्रस्थंविपाचयेत् ॥
कल्कैःकुठारापामार्गप्रोष्ठीकामक्षिकासुच ॥ २७ ॥
एतत्कुठारकंनामव्रणशोधनरोपणम् ॥
नाडीषुपरमोऽभ्यंगोनिजगागन्तुकीषुच ॥ २८ ॥
प्रोष्ठीकाशफरीमत्स्यः ।

इतिकुठारकंतैलम् ।

अर्थ-तेल एक सेर, काथके लिये कुठारक (क्षुद्रलताविशेष) ३ सेर जल सोलह सेर, शेष चारसेर और कल्कके लिये कुठारक, चिरचिटा, प्रोष्ठीमछली और चिंगिडी मछली प्रत्येक चार चार तोले । विधिपूर्वक तेलको सिद्ध करै, इस तेलको मर्दन करनेसे सर्वप्रकारके व्रण तथा व्रणको शुद्ध करकै भरदेवैहै ॥ २६ ॥ २७ ॥ २८ ॥

दूर्वास्वरससंसिद्धंतैलंकम्पिल्लकेनच ।
दार्वीत्वचश्चकल्केनप्रधानंव्रणरोपणम् ॥

दूर्वास्वरसकल्काभ्यामेकंतैलंतथागतम् ॥ २९ ॥
कम्पिल्लदार्वीकल्केनजलंचतुर्गुणंदत्वापरमेकंतैलम् ।

अर्थ-तेल दो सेर, दूबका रस आठ सेर, जल आठ सेर, और कल्कके लिये कुटीहुई दूब आधा सेर। विधिपूर्वक तेलको सिद्धकरै। इस तेलको मर्द्दन करनेसै सर्वप्रकारके नाडीव्रण दूरहोतेहैं। तेल दो सेर, जल आठ सेर और कल्कके लिये कवीला और दारुहलदी दोनों मिलेहुए आधसेर इस तेलसैभी व्रण भरजाताहै॥ २९ ॥

मंजिष्ठाचंदनंमूर्वांपिष्ट्वासर्पिर्विपाचयेत् ।
सर्वेषामग्निदग्धानामेतद्रोपणमिष्यते ॥ ३० ॥
जलं चतुर्गुणम् ।

इति मंजिष्ठाद्यं घृतम् ।

अर्थ-गायका घी दोसेर, जल आठ सेर, और कल्कके लिये मजीठ, लालचन्दन, और मूर्वा यह सब आधसेर, सबको मिलाकर यथाविधिसै घृतको सिद्धकरै। यह घृत अग्निदग्ध व्रणोंको दूर करै है ॥ ३० ॥

लांगलीलोध्रमंजिष्ठाकृष्णामधुककट्फलम् ॥ ३१ ॥
कम्पिल्लंद्वेनिशेमेदेनिम्बपत्रंफलत्रयम् ॥
घृतेसिक्थंद्विपलिकंदेयंतद्व्रुन्धरोपणम् ॥ ३२ ॥
लांगलीकंघृतंनामनाडीदुष्टव्रणापहम् ॥

इति लांगलीघृतम् ।

अर्थ-गायका घी दोसेर, जल आठसेर, दूध चार सेर, तथा कल्कके लिये मोम आधपाव, और कलिहारीकी जड़, मजीठ, लोध, पीपल, मुलेठी, कायफल, कवीला, मेदा, महामेदा, हलदी, दारुहलदी, नीमके पत्ते और त्रिफला प्रत्येक दोदो मासे लेवै। सबको मिलाकर यथाविधिसै घृतको सिद्धकरै। यह घृत दुष्टव्रणको नष्ट करै है ॥ ३१ ॥ ३२ ॥

सिद्धंकल्ककषायाभ्यांपाटल्याःकटुतैलकम् ।
दग्धव्रणरुजास्रावदाहविस्फोटनाशनम् ॥ ३३ ॥

इति पाटलीतैलम् ।

अर्थ-पाढ़लके कल्कमें तथा क्वाथमें कड़वे तेलको सिद्धकर लगानेसै अग्निदग्धजन्यव्रणकी वेदना, दाह और विस्फोट दूर होजातेहैं ॥ ३३ ॥

चन्दनवटशृंगाश्चमंजिष्ठामधुकंतथा ॥ ३४ ॥
प्रपौण्डरीकंदूर्वाचधातकीरक्तचंदनम् ॥
एभिस्तैलंविपक्तव्यंसर्पिःक्षीरसमायुतम् ॥ ३५ ॥
अग्निदग्धेव्रणेश्रेष्ठंम्रक्षणाद्रोपणंपरम् ॥

इति चन्दनाद्यं यमकम्।

अर्थ-तिलका तेल और घी दोसेर, जल आठसेर, दूध आठसेर, तथा कल्कके लिये सफेद चन्दन, वड़के अंकुर, मजीठ, मुलेठी, पुण्डेरिया, दूब, धायके फूल, और लालचन्दन, यह सब आधसेर, यथाविधिसै इस चंदनाद्य यमकको सिद्धकर मर्दन करनेसै अग्निदग्ध व्रण नष्ट होजाते हैं ३४।३५

मनःशिलालेमंजिष्ठासलाक्षारजनीद्वयम् ॥ ३६ ॥
प्रलेपःसघृतःक्षौद्रस्त्वग्निशुद्धिकरःपरः ।
अयोरजःसकाशीशंत्रिफलाकुसुमानिच ॥ ३७ ॥
प्रलेपःकुरुतेसात्म्यंसद्यएवनवत्वचि ।
त्रिफलायाःकुसुमाभावेफलंग्राह्यम् ॥ ३८ ॥
कालीयकलतामास्थिहेमकालारसोत्तमैः ।
प्रलेपोगोमयरसःसवर्णकरःपरः ॥ ३९ ॥
कालीयकंकालियाकाष्ठं लताप्रियंगुर्दूर्वावा
हेमनागकेशरं कालामंजिष्ठा रसोत्तमंघृतम् ॥ ४० ॥
चतुष्पदांग्नित्वग्लोमखुरशृंगास्थिभस्मना ।
तैलाक्ताचूर्णिताभूमिर्भवेद्रोमवतीपुनः ॥ ४१ ॥

अर्थ-मैनशिल, हरिताल, मजीठ, लाख, हलदी, और दारुहलदी, इन सब औषधियोंको पीस घृत, और सहतमें मिलाके लेपकरनेसै त्वचा शुद्ध होतीहै। लोहा कसीस और त्रिफलेके फूल एकत्र पीसकर प्रलेप करनेसै तत्काल व्रणपै नवीन खाल जम आतीहै। कलम्बक, फूलप्रियंगू

आमकी गूठली, नागकेशर, मजीठ और घृत इन सब द्रव्योंको एकत्र पीस-कै गोबरके रसमें मिलाके प्रलेप करनेसे व्रणकी जगह उत्तमवर्णवाली होजाती है। चतुष्पद जन्तुओंके पाँव, चमड़ा, रोम, खुर, सींग, और हड्डियोंकी भस्मको तेलमें मिलाके लेप करनेसे व्रण क्षतकी जगह रोम जम आतेहैं ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥

लवणाल्मकटूनिचविदाहीनिगुरूणिच ।
वर्जयेदनुपानानिव्रणीमैथुनमेवच ॥ ४२ ॥
नवंधान्यंमाषागुडातिलकुलत्थाम्बुकृशराः ।
कलायानिष्पावाहरितकिजलानूपपिशितम् ॥
हिमापोवन्धूकंलवणकटुकंपिष्टविकृति ।
दधिक्षीरंतक्रंव्रणिषुसकलंदोषजनकम् ॥ ४३ ॥

अर्थ-निमक, खटाई, मिरच, गरमपदार्थ, दाहजनक द्रव्य, और भारी भोजन, तथा पानद्रव्य, मैथुन, नवीनधान्य, उडद, गुड, तिल, कुलथी, यूष, खिचड़ी, मटर, निष्पाव, हरडोंका काथ, अनूपदेशके जीवोंका मांस, शीतल जल, दुपहरियोंके फूल, लवण-रसवाले द्रव्य, चरपरे द्रव्य, पिष्टकविकार, दही, दूध और तक्र, यह सब पदार्थ व्रणरोगवाले मनुष्यको अहितकारीहैं ॥ ४२ ॥ ४३ ॥

नाडीव्रणचिकित्सामाह।

गुग्गुलुस्त्रिफलाव्योषैःसमांशैराज्ययोजितैः ।
नाडीदुष्टव्रणशूलभगंदरविनाशनः ॥ ४४ ॥

इति समसमो गुग्गुलुः ।

अर्थ-गूगल, त्रिफला, और त्रिकुटा यह समानभाग लेकर चूर्ण बना घीमें मिलाके सेवन करनेसै नाड़ीव्रण, दुष्टव्रण, और भगंदर रोग दूर होताहै ॥ ४४ ॥

कुष्ठोदितःपंचतिक्तःगुग्गुलुश्चात्रशस्यते ॥ ४५ ॥

कार्पासमूलरजनीकल्कंदत्वाजलेशृतंतैलम् ॥
पूरणमात्राच्चिरजंनाडीव्रणमाशुनाशयति ॥ ४६ ॥
इति कार्पासतैलम् ।

अर्थ-कुष्ठरोगमें कहा हुआ पंचतिक्त गूगलभी व्रणरोगमें हितकारी है । तेल दोसेर, जल आठसेर, तथा कल्कके लिये कपासकी जड़, और हलदी आधसेर, यथाविधिसे तेलको सिद्धकर भरनेसै नाड़ीव्रण (नासूर) आराम होताहै ॥ ४५ ॥ ४६ ॥

कुम्भीकखर्ज्जूरकपित्थबिल्ववनस्पतीनांतुशलाटुवर्गे ।
कृत्वाकषायंविपचेच्चतैलमवाप्यमुस्तासरलाप्रियंगू ॥ ४७॥
सौगन्धिकामोचरसाहिपुष्पंलोध्राणिदत्वाखलुधातकीञ्च ।
एतेनशल्यप्रभवाहिनाडीरोहेद्व्रणोवैसुखमाशुचैव ॥ ४८ ॥
इति कुम्भीकाद्यंतैलम् ।

अर्थ-तेल दोसेर, जलकुम्भी, खिजूर, कैथ, वेल, तथा वटादि पंच वृक्षोंके कच्चेफल इनका क्वाथ आठसेर, और कल्कके लिये नागरमोथा, धूपसरल, फूलप्रियंगू, अनन्तमूल, नागकेशर, लोध और धायके फूल प्रत्येक दो दो तोले । यथाविधिसे इस तेलको सिद्धकर सेवन करनेसै शल्याघातादिजन्य नाड़ीव्रण भरजातेहैं ॥ ४७ ॥ ४८ ॥

समूलपत्रनिर्गुण्ड्यारसैस्तैलंसमैःशृतम् ।
हन्तिनाडीव्रणस्फोटान्नस्याभ्यङ्गादिनापचीम् ॥ ४९ ॥
अकल्कमेव ।
इति निर्गुण्डीतैलम् ।

अर्थ-तेल दोसेर, जल आठसेर, और पत्तोंसहित सम्हालूका रस आठसेर, इस तेलका नास लेनेसै तथा अभ्यंग करनेसै नाड़ीव्रण और अपचीरोग दूर होताहै ॥ ४९ ॥

हंसपद्यारिष्टपत्रंजातीपत्रंततोरसैः ।
तत्कल्कैश्चपचेत्तैलंनाडीव्रणनिरोहणम् ॥ ५० ॥
इति हंसपदीतैलम् ।
इति नाड़ीव्रणाऽध्यायः ।

अर्थ-तेल दोसेर, जल आठसेर, हंसपदी, नीमके पत्ते, और चमेलीके पत्तोंका स्वरस आठसेर, तथा कल्कके लिये हंसपदी, नीमके पत्ते, और चमेलीके पत्ते आधसेर, यथाविधिसै इस तेलको सिद्धकर लगानेसै नाड़ीव्रण भरजाताहै ॥ ५० ॥

इति नाडीव्रणचिकित्सा समाप्ता ।

अथ भगंदरचिकित्सामाह ।

लंघनस्वेदनालेपविम्लापनविरेचनैः ।
रक्तमोक्षादिभिःशीघ्रंगुदजांपिडकांजयेत् ॥ १ ॥
तथायत्नंभिषक्कुर्याद्यथापाकंनगच्छति ।
वटपत्रेष्टकाशुण्ठीगुडूच्यःसपुनर्नवाः ॥ २ ॥
सुपिष्टापिडकारम्भेलेपःशस्तोभगन्दरे ।
त्रिफलारससंयुक्तंबिडालास्थिप्रलेपनम् ॥ ३ ॥
भगन्दरंनिहन्त्याशुदुष्टव्रणहरंपरम् ।
स्विन्नंवचाकुष्ठंहिङ्गुयवानीपटुपञ्चकम् ॥ ४ ॥
सर्पिषापाययेच्चूर्णमम्लेनसुरयापिवा ।
स्नुह्यर्कदुग्धदार्वीभिर्वर्त्तिंकृत्वाभगन्दरे ॥ ५ ॥
दद्यात्सर्वशरीरस्थांनाडींहन्यात्प्रयोगराट् ।
त्रिवृत्तिलानागदन्तीमञ्जिष्ठासहसर्पिषा ॥ ६ ॥
उत्सादनम्भवेदेतत्सैन्धवंक्षौद्रसंयुतम् ॥ ७ ॥

उत्सादनमुद्वर्त्तनम् ।

रसांजनंहरिद्रेद्वेमंजिष्ठानिम्बपल्लवाः ।
त्रिवृज्ज्योतिष्मतीदन्तीलेपोहान्तिभगन्दरम् ॥ ८ ॥
कुष्ठंत्रिवृत्तिलादन्तीमागध्यःसैन्धवंमधु ।
रजनीत्रिफलातुत्थंहितंव्रणविशोधनम् ॥ ९ ॥
तिलाभयालोध्रमरिष्टपत्रंनिशेवचालोध्रमगारधूमः ।

भगन्दरेचाप्युपदंशनेचदुष्टव्रणेशोधनरोपणीयम् ॥१०॥
पयःपिष्टतिलैरण्डयष्टीलेपःसशोणिते।
खरास्रपक्वंभूरोमचूर्णंलेपोभगन्दरम् ॥ ११ ॥
हन्तिदन्त्यग्न्यतिविषालेपस्तद्वच्छुनोऽस्थिवा।
नश्येद्भगन्दरःक्षिप्रंक्षालितेत्रिफलाम्भसा ॥ १२ ॥

अर्थ-लंघन, स्वेद, प्रलेप, विम्लापन (मर्द्दनादि), विरेचन और रक्तमोक्षणादिके द्वारा शीघ्र गुदज पिड़काओंको दूरकरै, वैद्य इस प्रकार इसरोगकी चिकित्साकरै कि जिससे यह पके नहीं। बड़के पत्ते ईंट, सोंठ, गिलोय और पुनर्नवा इनको एकत्र पीसकर भगन्दररोगके पिड़काओं उत्पन्न होतेही लेपकरनेसै आराम होताहै।बिलावकी हड्डियोंको त्रिफलेके रसमें पीसकर लेपकरनेसै भगन्दर और दुष्टव्रण नष्ट होजाताहै। वच, कूठ, हींग, अजवायन और पाँचोंनोन घृतमें भून चूर्ण करकै काँजी अथवा सुराके साथ सेवन करनेसे भगंदररोग नष्ट होताहै। थूहरके दूध और आकके दूधमें दारुहलदीके चूर्णको मिलाकर वत्तीवना लगानेसै भगन्दररोग और नासूर दूर होताहै। निसोत, दन्ती, नागकेशर, तिल और मजीठ इनको घीमें पीसकर सहत और सैंधानोन मिलाकर उबटन करनेसै भगन्दर दूर होताहै। रसौत, हलदी, दारुहलदी, मजीठ, नीमकेपत्ते, निसोत मालकांगनी और दन्तीकी जड़ इनको एकत्र पीसकर लेपकरनेसै भगन्दररोग दूर होताहै। कूठ, निसोत, दन्तीकी जड़ तिल, पीपल, सैंधानोन, सहत, हलदी, हरड़, बहेड़ा, आमला, और तूतिया, इन सब औषधियोंको एकत्र पीसकर प्रलेप करनेसै भगन्दरका व्रण शुद्ध होजाताहै। तिल, हरड, लोध, नीमके पत्ते, हलदी, दारुहलदी, वच, लोध, और घरका धुआं यह सब औषधि समानभाग लेकर प्रलेप करनेसै भगन्दर, उपदंश, और दुष्टव्रण शुद्ध होताहै। दूध, पिट्ठी, तिल, अण्ड और मुलेठी इनका प्रलेप करनेसै रक्तदोषजन्य भगन्दररोग दूर होताहै। गधेके रुधिरमें पकाया हुआ भूरोमका चूर्ण तिसका लेपकरनेसै अथवा कुत्तेकी हड्डियोंका लेपकरनेसै किम्वा त्रिफलेके जलसै धोनेसै भगन्दररोग दूर होताहै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

त्रिफलापुरकृष्णाभिस्त्रिपञ्चैकांशयोजिता ।
गुडिकाशोथगुल्मोर्शोभगन्दरवतांहिता ॥ १३ ॥

इति नवकार्षिको गुग्गुलुः ।

अर्थ-हरड़, बहेडा, आमला, प्रत्येक एकएक कर्ष, गूगल पाँचकर्ष और पीपल एककर्ष इन सब औषधियोंको एकत्र मिलाकर गोली बनालेवै। यह गोली-सूजन,गुल्म,बवासीर,और भगन्दररोगको नष्ट करैहै ॥

त्रिकटुत्रिफलामुस्ताविडंगामृतचित्रकम् ।
शस्येलेपिप्पलीमूलंहपुषासुरदारुच ॥ १४ ॥
तुम्बुरंपुष्करंचव्यंविशालारजनीद्वयम् ।
विडसौवर्चलंक्षारःसैन्धवंगजपिप्पली ॥ १५ ॥
यावन्त्येतानिचूर्णानितावद्विगुणगुग्गुलुः ।
कोलप्रमाणांगुटिकांखादेत्तुमधुनासह ॥ १६ ॥
भगन्दरंश्वासकासक्षयजीर्णज्वरोदरम् ।
नाडीदुष्टव्रणनाहकुष्ठपामाश्मरीक्रिमीन् ॥ १७ ॥
मेहान्त्रवृद्धिहृत्पार्श्वशूलंप्लीहानमेवच ।
पंचतिक्तघृतंशस्तम् ।
सप्तविंशतिकोहन्तिगुग्गुलुःसर्वरोगहा ॥ १८ ॥

इति सप्तविंशति गुग्गुलुः ।

अर्थ-सोंठ, मरिच, पीपल, हरड, बहेडा, आमला, नागरमोथा, वायविडंग, गिलोय, चीता, कचूर, इलायची, पीपरामूल, हाऊबेर, देवदारु, धनिया, पोहकरमूल, चव्य, इन्द्रायनकी जड,हलदी,दारुहलदी, विरियासंचरनोन, कालानोन, जवाखार, सैंधानोन, और गजपीपल, इन सबका चूर्ण एकभाग, और सबसै दूना गूगल, एकत्र मिलालेवै । प्रतिदिन इसको वेरकी बराबर सहतमें मिलाकर खाय, इससै-भगन्दर श्वाँस, खाँसी, क्षय, जीर्णज्वर, उदररोग, नाडीव्रण, दुष्टव्रण, अफारा, कोढ़, पामा, पथरी, कृमिरोग, प्रमेह, अंत्रवृद्धि, हृदयरोग, पार्श्वशूल, प्लीहा, तथा अन्यान्यरोग, दूर होतेहैं । अथवा, पंचातिक्त गूगल तथा

सप्तविंशति गूगलको सेवन करनेसै भगन्दरादि नाना प्रकारके रोग दूर होतेहैं ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

जम्बुकमांसंभक्षयेत्प्रकारव्यंजनादिभिः।
अजीर्णवर्जीमासेनमुच्येततुभगन्दरात् ॥ १९ ॥
पंचतिक्तघृतंशस्तंपंचतिक्तश्चगुग्गुलुः।
न्यग्रोधादिर्गणोयस्तुहितःशोधनरोपणः ॥ २० ॥

अर्थ-शृगालके मांसके विविधप्रकारके व्यंजन बनाकर सेवनकरै, और अजीर्णमें भोजन नकरै तौ भगन्दर रोगसै रोगी छूट जातेहैं। पंचतिक्तघृत और पंचतिक्त गूगलको सेवन करनेसे तथा न्यग्रोधादिगणकी सर्व औषधियोंका क्वाथबनाकर सेवन करनेसे भगंदर रोगके सम्पूर्ण व्रण शुद्ध और भरकर रोग दूर होजाता है ॥ १९ ॥ २० ॥

चित्रकार्कौत्रिवृत्पाठेमलपूहयमारकौ।
स्नुहींवचांलांगलकीं हरितालंसुवर्च्चिकाम् ॥ २१ ॥
ज्योतिष्मतीञ्चसंहृत्यतैलंधीरोविपाचयेत्।
एतद्विस्यन्दनंनामतैलंदद्याद्भगन्दरे ॥
शोधनंरोपणंचैवसवर्णकरणंपरम् ॥ २२ ॥

मलपूःकृष्णोदुम्बरः।

इति विस्यन्दनतैलम्।

अर्थ-तेल २ दोसेर, जल ८ आठसेर, कल्ककेलिये चीता, आक, निसोत, पाढ़, कटूमर, कनेर, मालकाँगनी, थूहर, वच, कलिहारी, हरिताल, और सज्जी यह सब औषधी आधसेर, यथाविधिसे इस तेलको सिद्धकरै, यह तेल-भगन्दर रोगके व्रण शुद्धकरकै भरदेताहै, और घावके स्थानको उत्तम वर्णवाला करदेताहै ॥ २१ ॥ २२ ॥

करवीरनिशादन्तीलांगलीलवणाग्निभिः।
मातुलुंगार्कवत्साह्वैःपचेत्तैलंभगन्दरे ॥ २३ ॥

कुटजस्यफलंदग्ध्वा।

इति करवीराद्यं तैलम्।

अर्थ-तेल २ दोसेर, जल ८ आठसेर, तथा कल्ककेलिये कनेरकी जड़, हलदी, दन्तीकी जड़, कलिहारी, सेंधानोन, चीता, विजोरेकी जड़, आककी जड़ और भुनेहुए इन्द्रजौ ॥ आधसेर यथाविधिसे इसतेलको सिद्धकरै, यह तेल भगन्दर रोगको दूर करैहै ॥ २३ ॥

निशार्कक्षीरसिन्ध्वग्निपुराश्वहनवत्सकैः
सिद्धमभ्यंजनेतैलंभगन्दरविनाशनम् ॥ २४ ॥

इति निशाद्यं तैलम्।

अर्थ-तेल २ दोसेर, जल ८ आठसेर, तथा कल्कके लिये हलदी, आकका दूध, सेंधानोन, चीता, और गूगल तथा कनेरकी जड़, और इन्द्रजौ यह सब आध ॥ सेर, इस तेलकी मालिस करनेसे भगन्दर रोग आराम होता है ॥ २४ ॥

शुद्धसूतंसमंगंधंमृतनागंसतुत्थकम्।
जीरकंसैन्धवंतुल्यंतिक्ताकोषातकीद्रवैः ॥ २५ ॥
पिष्टंतल्लेपनाद्धन्तिभक्षणाच्चभगन्दरम्।
रसःकालाग्निनामोऽयंद्विगुंजंमृत्युजिद्भवेत् ॥ २६ ॥

इति कालाग्निरसः।

अर्थ-शुद्धपारा, गंधक, मृतसीसा, तूतिया, जीरा और सैंधानोन यह सब औषधि समान भागले कुटकी और कड़वी तोरइयोंके रसमें पीसकर लेपकरनेसे अथवा दोरतीकी गोली बनाकर प्रतिदिन एक गोली खानेसे भगन्दर रोग दूर होता है ॥ २५ ॥ २६ ॥

पूयश्चहरतेपक्वंकष्टसाध्योभगन्दरः।
त्रिदोषोत्थमसाध्यंस्यात्क्रिमिजश्चभगन्दरः ॥
आदौसर्वप्रयत्नेनपाकंरक्षेद्भगन्दरे ॥ २७ ॥

अर्थ-भगन्दर पकजायतौ राध निकालदेवै, यह पक्व भगन्दर कष्ट-साध्य है। त्रिदोषोत्पन्नभगन्दर तथा क्रिमिजभगन्दर असाध्यहै। सबसे पहिले वैद्यको चाहिये कि जिससे भगन्दर पके नहीं ऐसे यत्नोंसे भगन्दरकी रक्षा करै ॥ २७ ॥

शुद्धसूतंद्विधागन्धंकुमारीरसमर्दितम्।

त्र्यहान्तेगोलकंकृत्वाहण्डिकान्तेनिरोधयेत् ॥ २८ ॥
तयोःसमेताम्रपात्रेशुद्धेचताम्रलेपिते ।
तद्भाण्डंभस्मनापूर्यचुल्ल्यांतीव्राग्निनापचेत् ॥ २९ ॥
त्रियामान्तेसमुद्धृत्यचूर्णयेत्स्वाङ्गशीतलम् ।
जम्बीरस्यद्रवैःपिष्ट्वारुध्वासप्तपुटेपचेत् ॥ ३० ॥
गुंजैकंमधुनाज्येनलिह्याद्धन्तिभगन्दरम् ।
मुशलीलशुनंचानुआरनालयुतांपिबेत् ॥ ३१ ॥
कर्त्तव्यंमधुनाहारंदिवास्वप्नश्चमैथुनम् ।
वर्जयेच्छीतमाहाररसेऽस्मिन्रतिताण्डवे ॥ ३२ ॥

इति रतिताण्डवरसः ।

अर्थ-पारा १ एकभाग, गंधक २ दोभाग, दोनोंको एकत्र घीकारके रसमें तीनदिन खरलकर गोलाबनालेवै, इसपर कपरौटीकरै, फिर दोनों-की बराबर तांबेके पत्रोंकोले, उनको एक हाँडीमें बिछाकर उनके बीचमें गोलेको रख ऊपरसे खूब दाबकर राखभरदेवै, पश्चात् चूल्हेपै चढ़ाकर तीनप्रहरतक प्रचण्ड अग्निदेवै, पश्चात् चूल्हेपरसे उतार स्वांगशीतल-होनेपर चूर्ण करले, फिर जम्भीरी नीबूके रसमें खरलकर सम्पुटमें रख फूँक देवै, इसप्रकार सातपुटदेवै, इसरसको एक रत्तीभर सहत और घीकेसाथ सेवनकरै तौ भगन्दररोग दूर होवै । ऊपरसे मूसली और लहसनके चूर्णको काँजीके साथ पानकरै, यह अनुपानहै । इसरसको सेवन करनेवाला मनुष्य मधुरभोजन करै, तथा दिनमें सोना, मैथुन और शीतल आहार यह सब इसपै त्यागदेवै, इसको रतिताण्डवरस कहतेहैं ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

भूनिम्बत्रिफलाकुष्ठवानरीबीजगन्धकम् ।
लशुनञ्चशिलायुक्तंतुल्यंचूर्णप्रकल्पयेत् ॥ ३३ ॥
उदुम्बरस्यचूर्णन्तुगवांक्षीरेणपाययेत् ।
तत्कषाययुतंचूर्णरात्रौलेपञ्चशान्तये ॥ ३४ ॥

गुग्गुलुश्चपलान्पश्चपलैकापिप्पलीतथा ।
त्रिफलापलमेकञ्चत्वगेलाप्रतिकार्षिकम् ॥ ३५ ॥
चूर्णयेन्मधुनाज्येनमुक्ताहन्तिभगन्दरम् ॥ ३६ ॥

अर्थ-चिरायता, कूठ, हरड़, बहेड़ा, आमला, कौंछकेबीज, गंधक, लहसुन और मैनशिलके चूर्णको गायके दूधके साथ अथवा गूलरके चूर्णको गायके दूधके साथ पीनेसे तथा उपरोक्त द्रव्योंके क्वाथमें उपरोक्त औषधियोंका चूर्ण डालकर रात्रिमें लेपकरनेसे-भगन्दररोग शान्त होताहै । गूगल ५ पाँचपल, पीपलका चूर्ण १ एक पल, त्रिफलेका चूर्ण ४ चारतोले, दालचीनी २ दोतोले, और छोटी इलायची २ दोतोले सबको एकत्र मिलाकर सहत और घृतके साथ सेवन करनेसे भगन्दर-रोग दूर होताहै ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

नशस्त्रैश्छेदयेत्प्राज्ञःस्फोटयेल्लेपनादिभिः ।
हरिद्रानिम्बसिन्धूत्थंपिष्ट्वालिम्पेत्स्फुटत्यलम् ॥ ३७ ॥
नरास्थितैललेपेनस्फुटितःशुध्यतिव्रणः ।
ताम्रचूर्णसमंचूर्णसुतमेकंविमर्दयेत् ॥ ३८ ॥
सैन्धवंसप्तभागश्चगंधकंनवभागकम् ।
भृंगीद्रवैःसजम्बीरैःसप्ताहंघर्म्मर्दितम् ॥ ३९ ॥
तैललिप्तंस्फुटत्याशुयदपक्कंभगन्दरम् ।
ताम्रभस्मद्रवैर्मर्द्यंमधुपर्णीपुनर्नवा ॥ ४० ॥
मेषशृंगीदिनैकेनव्रणशोधनरोपणम् ।
कांचनीद्विनिशामुण्डीमंजिष्ठाचशतावरी ॥ ४१ ॥
गंधकंधातकीपुष्पं तुल्यं लवणपंचकम् ।
कन्याद्रवयुतोलेपःकफोत्थेचभगन्दरे ॥ ४२ ॥

अर्थ-भगन्दरके व्रणोंको कदापि शस्त्रसे न चीरे, किन्तु लेपादिसे तोड़े । हलदी, नीम, और सैंधेनोनको एकत्र पीसकर प्रलेप करनेसे, अथवा मनुष्यकी हड्डियोंके चूर्णको तेलमें मिलाकर लेप करनेसे भगन्दर-

के सब व्रण फूटकर सूख जाते हैं । ताँबेके चूर्णको और पारेको एक एक भागलेकर दोनोंको एकत्र खरल करै, पश्चात् इसमें सैंधानोन ७ सात भाग और गंधक ९ नौ भाग मिलाकर भांगरेके रसमें और जम्भीरी नीबूके रसमें सात दिनतक धूपमें खरल करै, फिर इसमें तेल मिलाकर लेप करनेसे अपक्व भगन्दरभी फूट जाताहै । ताँबेकी भस्मको मधुपर्णी पुनर्नवा और मेढ़ासिंगीके रसमें एक दिन खरलकर लेप करनेसे व्रण शुद्ध होजाते हैं, और भरजाते हैं । सत्यानाशी कटेरी, हलदी, दारुहलदी, गोरखमुण्डी, मजीठ, सतावर, गंधक, धायके फूल और पाँचों नोन इन सब औषधियोंको समान भागले घीकारके रसमें खरलकर कफज भगन्दर पै लेप करै ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

सैन्धवंचित्रकंदन्तींपलाशञ्चेन्द्रवारुणीम् ।
गोमूत्रेऽष्टगुणेपच्याद्ग्राह्यमष्टावशेषकम् ॥ ४३ ॥
क्वाथपादंक्षिपेत्तैलंकृष्णायसस्त्वयोमृतम् ।
पचेत्तैलावशेषञ्चतेनलेप्यंभगन्दरम् ॥ ४४ ॥
असाध्यंसाधयत्याशुपक्वंकृमिकुलान्वितम् ॥ ४५ ॥

इति सैन्धवादि तैलम् ।

अर्थ-तिलका तेल १ एक सेर क्वाथके लिये सैंधानोन, चीता, दन्ती, पलाश और इन्द्रायणकी जड़, यह सब कूटेहुए द्रव्य प्रत्येक ३ तीन पल २ दो तोले, पाकके लिये गोमूत्र १२८ एक सौ अठाईस पल, शेष ३२ बत्तीसपल, तथा कल्कके लिये पुटपाकसे मारा हुआ और जारण किया हुवा लोहा २ दोपल, सबको यथाविधिसे मिलाकर तेलको सिद्ध करै । इस तेलका लेप करनेसे पक्व और कृमिसंयुक्त, असाध्य भगन्दरभी दूर होता है ॥ ४३ ॥ ४४ ॥ ४५ ॥

निशासैन्धवसिद्धार्थक्षौद्रगुग्गुलुसंयुता ।
वर्त्तिर्भगन्दरेयोज्यातथानाडीव्रणापहा ॥ ४६ ॥

अर्थ-हलदी, सैन्धवलवण, सफेद सरसों, सहत और गूगल, इन सब औषधियोंको समान भाग लेकर बत्तीबना योजनेसे भगन्दर और नाडीव्रण दूर होता है ॥ ४६ ॥

व्यायामंमैथुनंयुद्धंपृष्ठायानंगुरूणिच।
संवत्सरंपरिहरेदपिरूढव्रणोनरः॥ ४७॥

इति भगंदराध्यायः।

अर्थ–व्रणोंके मरजानेपर अर्थात् भगन्दररोगके आरामहोजानेपरभीए कवर्षतक व्यायाम, मैथुन, युद्ध, हाथीघोडेआदि सवारियोंपै चढ़ना और भारीद्रव्य, इन सबको वर्जदेवै॥ ४७॥

इति भगन्दराध्यायःसमाप्तः।

अथोपदंशचिकित्सामाह।

स्निग्धस्विन्नशरीरस्यध्वजमध्येसिराव्यधः।
जलौकःपातनंवास्यादूर्ध्वाधःशोधनंतथा॥ १॥
सद्योहितदोषस्यरुक्शोथावुपशाम्यतः।
पाकोरक्ष्यःप्रयत्नेनशिश्नक्षयकरोहिसः॥ २॥

अर्थ–उपदंशरोगमें प्रथम स्नेह और स्वेददेकर लिंगकी फस्त खोले, अथवा जोंक लगवावे तथा वमन और विरेचन दोनों कराकर शुद्ध करै, इस प्रकार करनेसे सम्पूर्ण दोष दूर होकर तत्काल पीडा और सूजन दूर होजाती है। परन्तु जिससे उपदंश पकेनहीं, ऐसे यत्नोंसे रक्षा करै इसका विशेष ख्याल रक्खै, कारण यह है कि उपदंशके पकनेसे लिंगका अग्रभाग पक अर्थात् सडकर गिरपडता है, इससे लिंग छोटा और असमर्थ हो जाता है। तथा कोई कोई रोगी परलोकनिवासीभी होजाते हैं॥ १॥ २॥

पटोलनिम्बत्रिफलागुडूचीक्वाथंपिबेद्वाखदिराशनाभ्याम्।
सगुग्गुलुंवात्रिफलायुतंवासर्वोपदंशापहरःप्रयोगः॥ ३॥
प्रपौण्डरीकंमधुकंरास्नाकुष्ठपुनर्नवाः।
सारलागुरुभद्राख्यैर्वातिकेलेपसेचने॥ ४॥

भद्रोदेवदारुः।

अर्थ-परवल, नीम, त्रिफला, और गिलोयके काथमें अथवा खैर और असनके काथमें गूगल अथवा त्रिफलेका चूर्ण डालकर पीनेसे सर्व प्रकारके उपदंश नष्ट हो जाते हैं, पुण्डेरिया, मुलेठी, रास्ना, कूठ, पुनर्नवा, सरल, अगर, और देवदारु, इन सब औषधियोंको एकत्र पीसकर लेप करनेसे अथवा इन औषधियोंका काथ बनाकर सेवन करनेसे उपदंश रोग शान्त होता है ॥ ३ ॥ ४ ॥

गैरिकांजनमंजिष्ठामधुकोशीरपद्मकैः।
सचन्दनोत्पलैःस्निग्धैःपैत्तिकंसप्रलेपयेत्॥५॥

अर्थ-गेरू, रसौत, मजीठ मुलेठी, खस, पद्माख, लालचंदन और उत्पल, इन सब औषधियोंको एकत्र पीस घी मिलाके लेप करनेसे पित्तज उपदंश दूर होताहै ॥ ५ ॥

निम्बार्ज्जुनाश्वत्थकदम्बशालजम्बूवटोदुम्बरवेतसेषु।
प्रक्षालनालेपघृतानिकुर्याच्चूर्णञ्चपित्तास्रभवोपदंशैः॥६॥

अर्थ-नीम, अर्ज्जुन, पीपल, कदम, शाल, जामुन, वड, गूलर और वेत, इन सब वृक्षोंकी छालका काथ बनाकर परिषेक करनेसे अथवा इन सब छालोंको पीसकर लेप करनेसे, किम्वा इन सब छालोंके योगसे घृतको सिद्धकर सेवन करनेसे या उक्त, छालोंका चूर्ण बनाकर योजनेसे पित्त और रक्तजन्य उपदंश दूर होताहै ॥ ६ ॥

त्रिफलायाःकषायेणभृंगराजरसेनवा।
व्रणप्रक्षालनंकुर्यादुपदंशप्रशान्तये॥ ७ ॥

अर्थ-त्रिफलेके काढ़ेसे अथवा भांगरेके रससे उपदंशको धोनेसे आराम होताहै ॥ ७ ॥

दार्वीरसांजनंद्राक्षाशंखनाभिपयोमधु ।
तैलाज्यगोमयरसोलेपस्तैःसमभागकैः ॥
सुपिष्टैरुपदंशेस्याद्व्रणश्वयथुदाहता ॥ ८ ॥

अर्थ-दारुहलदी, रसौत, लाख, शंखनाभि, दूध, सहत, तेल, घृत और गोबरका रस, इन सबको समान भागले एकत्रपीसकर लेप करनेसे उपदंशके घाव, सूजन और दाह दूर होजाती है ॥ ८ ॥

वटप्ररोहार्ज्जुनजम्बुपथ्यालोध्रोहरिद्राचहितःप्रलेपः ।
सर्वोपदंशेषुचरोहणार्थंचूर्णश्च तज्जंविमलांजनेन ॥९॥

अर्थ-वड़के अंकुर, अर्जुनकी छाल, जामुनकी छाल, हरड़, लोध, और हलदी, इन सब औषधियोंको एकत्र पीसकर लेप करनेसे अथवा उक्त औषधियोंका चूर्ण, फिटकरी और रसौत मिलाकर योजनेसे-उपदंश रोगके घाव भरजाते हैं ॥ ९ ॥

भूनिम्बनिम्बत्रिफलापटोलकरञ्जजातीखादिराशनाभ्याम् ।
सतोयकल्कैर्घृतमाशुपक्कंसर्वोपदंशापहरःप्रविष्टम् ॥ १० ॥
करञ्जस्यफलं । एतद्भक्षणंम्रक्षणञ्च ।

इति भूनिम्बाद्यं घृतम् ।

अर्थ-घृत ४ चारसेर, क्काथके लिये चिरायता, नीमकीछाल, पटोलपत्र, करंजकेफल, चमेलीके पत्ते, खैर और विजयसार प्रत्येक एक एकसेर, पाकके लिये जल ६४ चौंसठसेर, शेष १६ सोलहसेर और कल्कके लिये भी येही औषधि एकसेर लेवे, यथाविधिसे घृतको सिद्धकरै। इस घृतके खानेसे-तथा लगानेसे-सर्व प्रकारके उपदंश दूर होतेहैं॥ १०॥

घृतानियानिचोक्तानिकुष्ठेनाड़ीव्रणेव्रणे ।
उपदंशेप्रयोज्यानिसेकाभ्यंजनभोजनैः ॥ ११ ॥

अर्थ-जोघृत कुष्ठरोग, नाडीव्रण और व्रणरोगमें कहेहैं, यह सबघृत

उपदंश रोगमें सेक, अभ्यंग और भोजनरूपसे व्यवहार करने चाहिये ॥ ११ ॥

गृहधूमनिशाकिण्वैरेकद्वित्र्यंशकैःक्रमात्।
तैलंसिद्धंसकण्डूश्चशोथंचौवोपदंशनुत् ॥ १२ ॥
किण्वंसुराबीजम्।

इति गृहधूमाद्यं तैलम्।

अर्थ-तेल ४ चारसेर, जल १६ सोलहसेर, तथा कल्कके लिये घरका धुआँ १ एक पल-४ चारतोले-पाँच ५ मासे-३ तीन रत्ती, हलदी २ दो पल-५ पाँच तोले-२ मासे- ३ तीनरत्ती, और सुराबीज ३ तीन-पल- ७ सात तोले- ७ सात मासे ८ आठ रत्ती लेवै। यथा विधिसे तैलको सिद्धकरै, यह तेल-कण्डू और सूजन संयुक्त उपदंश रोगको दूर करैहै ॥ १२ ॥

यस्यलिंगस्यमांसन्तुशीर्य्यतेकृमिभक्षितम्।
तस्यकोषातकीलम्बाबीजनागरसाधितम् ॥
तैलंहन्त्यचिराद्घोरंदुष्टव्रणभगन्दरम् ॥ १३ ॥
इति कोषातकाद्यं तैलम्।

अर्थ-तेल ४ चारसेर, जल १६ सोलह सेर, तथा कल्कके लिये कड़वी तोरइयों के बीज और सोंठ, यह सब १ एक सेर, यथा विधिसे तैलको सिद्धकर लगानेसे शीर्णमांस और कृमि भक्षित उपदंश रोग, दुष्ट व्रण तथा भगन्दर रोग दूर होताहै ॥ १३ ॥

महाशंखंजलैःपिष्टातेनलिङ्गंप्रलेपयेत्।
लिङ्गरोगंनिहन्त्याशुलेपोऽयंव्याधिनाशकः ॥ १४ ॥

अर्थ-मनुष्यकी खोपडीको जलमें पीसकर लेपकरनेसे उपदंश रोग दूर होताहै ॥ १४ ॥

कुष्टंपूगंवचातोयैःसारंवाखादिरोत्थितम्।
जलैर्घृष्टंप्रलेपोऽयंलिंगरोगहरं परम् ॥ १५ ॥

अर्थ-कूठ, सुपारी और वचको जलमें पीसकर लेपकरनेसे अथवा खैरसारको जलमें पीसकर लेपकरनेसे उपदंश रोग दूर होताहै ॥ १५॥

क्षालयेत्रिफलाक्काथैःपक्कंलिंगंपुनःपुनः ।
तच्चूर्णदेयमात्रेणअङ्कुरश्चजयेद्ध्रुवम् ॥ १६ ॥

अर्थ-पकेहुए लिंगको त्रिफलेके काथसे वारंवार धोवै,पश्चात् त्रिफलेकाचूर्ण लिंगपै बुरकादेवै, इससे लिंगपै अंकुर आजातेहैं ॥ १६ ॥

सगन्धकघृतैर्लेप्यंपक्कंलिंगंसुखावहम् ॥ १७ ॥

अर्थ-गन्धकके चूर्णको घृतमें पीसकर लेपकरनेसे-उपदंश नाशको प्राप्त होताहै ॥ १७ ॥

मृणालंपद्मबीजानिनालंपद्मश्चकेशरम् ॥
सर्वंसप्तदलंकुर्यात्रिंशत्पलश्चगोघृतम् ॥ १८ ॥
घृताच्चतुर्गुणंक्षीरंघृतशेषंविपाचयेत् ।
पाकान्तेचूर्णमेषाञ्चक्षिप्त्वातदवतारयेत् ॥
भक्षयेल्लिंगरोगघ्नंघृतंपंचारविन्दकम् ॥ १९ ॥

इति पंचारविन्दघृतम् ।

अर्थ-मृणाल, कमलगट्टे, कमलकी डंडी, कमल, और कमलकेशर इन सबका चूर्ण ७ सात पल बनारक्खै, पश्चात् ३० तीसपलघृत १२० एक सौवीसपल दूध, इन दोनोंको एकत्र पकावै, जब पकते पकते घृत शेषरहजाय तब पूर्वोक्त मृणालादिका चूर्ण ७ सात पल मिलादेवै, इस पंचारविन्दघृतको खानेसे लिंगरोग दूर होताहै ॥ १८ ॥ १९ ॥

तुत्थटंकणकाशीशंशिलातालंरसांजनम् ।
सौराष्ट्रीसैन्धवश्चैलांसिन्दूरंरेणुभूषणम् ॥
पिष्ट्वातुक्षौद्रसंयुक्तंलेपंलिंगरुजापहम् ॥ २० ॥

अर्थ-तूतिया, सुहागा, कसीस, मैनाशिल, हरिताल, रसौत, सोरठकी मट्टी, सैंधानोन, इलायची, सिन्दूर और कपूर यह सब औषधि समान भागले सहतके साथ पीसकर लेपकरनेसे लिङ्गरोग नष्ट होताहै ॥ २०॥

कुमारीरससंपिष्टंजीरकंलेपनाद्रुजम् ।
तेनदाहश्चपाकश्चशान्तिमाप्नोतिनिश्चितम् ॥ २१ ॥

अर्थ-घीकारके रसमें जीरेको पीसकर लेप करनेसे उपदंशका दाह और पाक निवारण होता है ॥ २१ ॥

अयोरजस्ताम्ररजस्त्रिफलागैरिकस्तथा ।
उपदंशंनिहन्त्येतद्वृक्षमिन्द्राशनिर्यथा ॥ २२ ॥

अर्थ-लोहा, तांबेका चूर्ण, त्रिफला और गेरू, इन सब औषधियोंको जलमें पीसकर लगानेसे उपदंश रोग दूर होता है ॥ २२ ॥

मार्कवस्त्रिफलादन्तीताम्रचूर्णमयोरजः ।
उपदंशंनिहन्त्येतद्वृक्षमिन्द्राशनिर्यथा ॥ २३ ॥

इत्युपदंशाऽध्यायः ॥

अर्थ-भांगरा, त्रिफला, दन्ती, तांबेका चूर्ण और लोहेका चूर्ण जलमें पीसकर लेप करनेसे उपदंश रोग दूर होता है ॥ २३ ॥

इति उपदंशाऽधिकारः समाप्तः ।

अथ शूकदोष चिकित्सामाह ।

शूकदोषेषुसर्वेषुविषघ्नींकारयेत्क्रियाम् ।
हितंचसर्पिषःपानंपथ्यञ्चापिविरेचनम् ॥ १ ॥
हितंशोणितमोक्षश्चयच्चापिलघुभोजनम् ।
ज्वलतग्रथिताष्ठीलासर्षपीणांविशेषतः ॥ २ ॥
उपनाशनमांसानांकल्कानांव्रणवद्विधिः ।
पित्तरक्तोल्बणानाञ्चपित्तश्वयथुवत्क्रिया ॥ ३ ॥
सुखोष्णैरुपनाहैश्चसुस्निग्धैरुपनाहयेत् ।
कुम्भिकायांहरेद्रक्तंपक्वायांशोधितेव्रणे ॥ ४ ॥
तिन्दुकात्रिफलालोध्रैर्लेपस्तैलञ्चरोपणे ।
अलज्यांहृतरक्तायामयमेवाक्रियाक्रमः ॥ ५ ॥

स्वेदयेद्ग्रथितंशिश्नंनाडीस्वेदेनबुद्धिमान् ।
रक्तविद्रधिवच्चापिक्रियाशोणितजार्बुदे ॥ ६ ॥
कषायकल्कसर्पींषितैलंचूर्णंरसक्रियाम् ।
शोधनेरोपणेचैववीक्ष्यावस्थांविचारयेत् ॥ ७ ॥
अर्बुदंमांसपाकञ्चविद्रधिंतिलतालकम् ।
प्रत्याख्यायप्रकुर्वीतभिषक्तेषांप्रतिक्रियाम् ॥ ८ ॥

इतिशूकदोषाधिकारःसमाप्तः ।

अर्थ-सर्व प्रकारके शूकदोषोंमें विषघ्न क्रिया करै । घृतपान, विरेचन, रक्तमोक्षण और लघुभोजन, यह सब शूकदोषमें विशेष हितकारी हैं । ज्वलिता, ग्रथिता, अष्ठीला, और सर्षपी इन चार प्रकारके अधिक मांसयुक्त शूकदोष रोगमें व्रणवत् विधि प्रयोग करनी चाहिये । पित्त और रक्तजन्य शूकदोषरोगमें पित्तज शोथकी समान क्रिया करै, तथा किंचित् गरम, सुस्निग्ध प्रलेप देवै । कुम्भिकानामक शूक दोषमें फस्त खुलवावै और जो वह पकजाय तौ व्रणको शुद्धकर पश्चात् तेंदू, त्रिफला और लोधको एकत्र पीस तेलमें मिलाकर लेप करै, इससे घाव भरजाते हैं । अलजी शूकदोषमेंभी फस्त खुलवाकर, पश्चात् इसी प्रकार क्रिया करै । ग्रथितशूकदोषमें नाडीस्वेदप्रदान करै । रक्तार्बुदशूकदोषमें रक्तज विद्रधिकी समान चिकित्सा करै । कषाय, कल्क, घृत, तेल, चूर्ण और रसक्रिया यह सब शूकदोषकी अवस्थाके अनुसार वारंवार विचार कर प्रयोग करै । अर्बुद, मांसपाक, विद्रधि और तिलकालक इनको त्यागकै चिकित्सा करै, अर्थात् इनकी चिकित्सा न करै यह असाध्य हैं ॥ १ ॥ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

इति शूकदोषाधिकारः समाप्तः ।

अथ भग्नचिकित्सामाह ।

आदौभग्नंविदित्वातुसेचयेच्छीतलांबुना ।
पंकेनालेपनंकार्यंबन्धनञ्चकुशान्वितम् ॥ १ ॥

कुशाबन्धनद्रव्यं ।

पलाशोदुम्बराश्वत्थकदम्बनिचुलत्वचः ।

वंशसर्जार्जुनंवाथकुशार्थमुपकल्पयेत् ॥ २ ॥
सघृतेनास्थिसंहारंलाक्षागोधूममर्ज्जुनम् ।
सन्धियुक्तेऽस्थिभग्नेतुपिबेत्क्षीरेणमानवः ॥ ३ ॥
रसोनमधुलाक्षाज्यंसिताकल्कंसमश्नताम् ।
छिन्नाभिन्नच्युतोऽस्थीनांसन्धानमचिराद्भवेत् ॥ ४ ॥
पीतंवराटिकाचूर्णंद्विगुंजंवात्रिगुञ्जकम् ।
अपक्कक्षीरपीतंस्यादस्थिभग्नप्ररोहणम् ॥ ५ ॥
लाक्षास्थिसंहृत्ककुभाश्वगन्धाचूर्णीकृतानागबलापुरश्च ।
संभग्नयुक्तास्थिरुजंनिहन्यादङ्गानिकुर्यात्कुलिशोपमानि ६॥

अर्थ--प्रथम भग्नरोगमें अर्थात् जिसकी हड्डी टूटगई हो उसको शीतल जलसे छिड़कै, पश्चात् कींचकालेप करै, तथा ढाक, गूलर, पीपल, कदम जलवैंत, बाँस, शाल और अर्जुनादिकी छालको पीसकर कुशाके संग बाँधे, संधियुक्त हड्डी टूट जावे तौ हडसंघारी, लाख, गेहुं, और अर्जुन इन सबको घृत और दूधके साथ पीवै, लशुन, सहत, घी, लाख और खाँड, इन सबको एकत्र पीसकर सेवन करनेसे छिन्न, भिन्न, और च्युत हड्डी जुड जाती है। २ दोरत्ती अथवा ३ तीन रत्ती पीली कौडीके चूर्णको कच्चे दूधके साथ सेवन करनेसे टूटी हड्डी जुड जाती है, लाख, हड़संघारी, अर्जुन, असगंध और गंगेरन इन सब औषधियोंको समान भागले चूर्णकर सबकी बराबर गूगल मिलाकर सेवन करनेसे अस्थि भग्न नष्ट होता है॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

आभाफलत्रिकाव्योषैःसर्वैरेभिःसमीकृतैः ।
तुल्योगुग्गुलुर्वायोज्योभग्नसंधिप्रसाधकः ॥ ७ ॥

इति आभागुग्गुलुः ।

अर्थ–आभा (वणिक्द्रव्य विशेष), त्रिफला और त्रिकुटा, यह समान भाग और सबकी बराबर गूगल मिलाकर सेवन करनेसे अस्थिभग्न दूर होताहै ॥ ७ ॥

सद्योऽभिघातजनितरोगरुजाश्वयथवःप्रशाम्यन्ति ।
पिष्टकलवणालेपादम्लीकाफलरसाभ्यांवा ॥ ८ ॥
कांजिकेनैवसंपिष्टंशाल्मलीवल्कलंहितम् ।
छागविट्सहितंकोष्णमास्थिभग्नेप्रलेपनम् ॥ ९ ॥

अर्थ–पिष्टक और लवण को इमलीके रसमें पीसकर लेपकरनेसे तत्काल अभिघातजनित पीड़ा और सूजन दूर होतीहै । सेमलकी छालको काँजीमें पीसकर लेपकरना हितकारकहै । अथवा बकरीकी मैंगनको काँजीमें पीस गरमकरके लेपकरना हितकारकहै ॥ ८ ॥ ९ ॥

लवणंकटुकंक्षारमम्लमैथुनमातपम् ।
व्यायामञ्चनसेवेतभग्नोरूक्षान्नमेवच ॥ १० ॥

अर्थ–निमकीन, चरपरे, खारी, खट्टे, मैथुन, धूप, कसरत और रूखे अन्न, यह सब भग्नरोगमें विशेष अहितकारीहै ॥ १० ॥

वज्रवल्ल्यर्जुनोवासाविशालालोहटंकणौ ।
रसगन्धकसिन्धूत्थाःसमभागेनचूर्णयेत् ॥ ११ ॥
चूर्णाद्गुणत्रयंग्राह्यंगुग्गुलुंघृतपिट्टितम् ।
वज्रवल्ल्यादिकोनामगुग्गुलुःपरिनिर्मितः ॥ १२ ॥
गहनानन्दनाथेनभग्नरोगविनाशनः ।
नानाभग्नंनिहन्त्याशुबलवर्णाग्निवर्द्धनः ॥ १३ ॥
कृमिकुष्ठाक्षिरोगाणांहन्ताग्रन्थिव्यथापहः ॥
कटिहृद्रोगशमनआमवातनिषूदनः ॥ १४ ॥

वज्रवल्लीहाड़ाच ।

इति वज्रवल्ल्यादि गुग्गुलुः।

अर्थ–वज्रवल्ली (हड़संघारी), अर्जुनवृक्षकी छाल, अडूसा, इन्द्रायन, लोहा, सुहागा, पारा, गंधक और सैंधानोन, यह सब औषधि समान भागले चूर्णकरै और सब चूर्णसे तिगुने घीमें पिसेहुए गूगल मिलादेवै । यह वज्रवल्ल्यादि गूगल श्रीमद्गहनानन्द वैद्यने भग्नरोगको

नष्ट करनेके लिये निर्म्माण कियाहै। यह–नानाप्रकारके भग्नरोग, कृमिरोग, कुष्ठरोग, नेत्ररोग, ग्रन्थिरोग, कटिरोग, हृदयरोग और आमवात रोगको दूर करैहै। तथा बल, वर्ण, और अग्निको बढ़ावैहै ॥ ११ ॥ १२॥ १३ ॥ १४ ॥

मासत्रयंप्रकर्त्तव्यंवज्रवल्लीरसैःसह।
शुद्ध्यर्थिनेप्रदातव्यंतैलमेरण्डजंशुभम् ॥ १५ ॥

इति भग्नाधिकारः।

अर्थ–कोठेको साफ रखनेके लिये भग्नरोगीको हड़संघारीके रसके साथ अण्डीका तेल पीनेको देवै ॥ १५ ॥

इति भग्नाधिकारः समाप्तः।

अथ कुष्ठचिकित्सामाह।

पुण्डरीकंसविस्फोटंपामाणंगजचर्म्मकम्।
काकणंकच्छुकंदद्रुजिह्वकंचाष्टमंस्मृतम् ॥ १ ॥
गलितश्चमहाकुष्ठंकापालश्चउदुम्बरम्।
मण्डलश्चविचर्चाख्यंवैपादिकिट्टिमन्तथा ॥ २ ॥
चर्म्मदद्रुतथासिध्मशतारुःस्याद्दशस्मृतम्।
श्वित्रकाख्यंविसर्पश्चविंशभेदाःप्रकीर्त्तिताः ॥ ३ ॥

अर्थ–पुण्डरीक, विस्फोट, पामा, गजचर्म्मक, काकण, कच्छू, दद्रु जिह्वक, गलित, कापाल, उदुम्बर, मण्डल, विचर्चिका, किट्टिम, वैपादिका, चर्म्मदद्रु, सिध्म, शतारु, श्वित्र और विसर्प इन भेदोंसे कुष्ठ २० बीस प्रकारहै। अथवा यह कुष्ठके २० बीसभेदहैं ॥ १ ॥ २ ॥ ३ ॥

पक्षेपक्षेचवमनंमासेमासेविरेचनम्।
षण्मासेचशिरामोक्षंनस्यंसप्तदिनान्तरे ॥ ४ ॥
वातोद्भवेतुसर्पिर्वमनंश्लेष्मोत्तरेषुकुष्ठेषु।
पित्तोत्तरेषुमोक्षोरक्तस्याविरेचनंचाग्रम् ॥ ५ ॥
प्रच्छलमल्पेकुष्ठेमहतिचशस्ताशिराव्यधनम्।
बहुदोषःसंशोध्यःकुष्ठीबहुशोनुरक्षताप्राणान् ॥ ६ ॥

वचावासापटोलानांनिम्बस्यफलिनीत्वचः ।
कषायोमधुनापीतोवान्तिकृन्मदनान्वितैः ॥ ७ ॥
विरेचनञ्चकर्त्तव्यंत्रिवृद्दन्तीफलत्रिकैः ।
नस्यधूमौविधातव्योबुध्वावास्तिश्चजानता ॥ ८ ॥
पुराणाःशालिगोधूममुद्गाद्याःकुष्ठिनेहिताः ।
तिक्तशाकंजांगलञ्चपानादौखादिरोदकम् ॥ ९ ॥

अर्थ-कुष्ठरोगी पक्ष पक्ष अर्थात् पन्द्रह पन्द्रह दिनमें वमन, एक एक महीनेमें विरेचन, छै महीनेमें रक्तमोक्षण, और सात सात दिनके बाद नास लेवै। वातकुष्ठरोगमें घृत पान, कफजकुष्ठमें वमन, पित्तजकुष्ठरोगमें रक्तमोक्षण और तीक्ष्णविरेचन, क्षुद्रकुष्ठ रोगमें अस्त्रकर्म्म और महाकुष्ठरोगमें शिरावेध करै। और बहुत दोषवाले कुष्ठरोगीको इस प्रकार वमन और विरेचनके द्वारा वारंवार शोधन करै, जिससे बलका नाश न होवै। वच, अडूसा, पटोल, नीमकी छाल, प्रियंगूकी छाल और मैनफल, इनका क्काथ बनाकर सहत मिला वमनके लिये कुष्ठ रोगीको पीनेको देवै। नस्य, धूमपान, बस्तिक्रिया, पुराने शालिधानके चावलोंका भात, गेहूँ, मूंग, आदिका यूष, तिक्तशाक, जंगल देशके जीवोंका मांस और खदिरका जल, यह सब कुष्ठरोगीके लिये विशेष हितकारी हैं॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥

मनःशिलालेमरिचानितैलमार्कपयःकुष्ठहरःप्रदेहः ।
करञ्जबीजैडगजंसकुष्ठंगोमूत्रपिष्टञ्चपरःप्रदेहः ॥ १० ॥
पत्राणिपिष्ट्वाचतुरङ्गुलस्यतक्रेणपत्राण्यनुकाकमाच्याः ।
तैलाक्तगात्रस्यनरस्यकुष्ठान्युद्वर्त्तयेदश्वहनच्छदैश्च॥ ११॥

अश्वहनः करवीरः ।

अर्थ-मैनशिल, हरिताल, कालीमिरच, सरसोंका तेल, और आकका दूध, इन सबको एकत्र पीसकर लेप करनेसे कुष्ठरोग नष्टहोता है। करंजके बीज, चकवड़, और कूठ, इन तीनों औषधियोंको एकत्र गोमूत्रके संग पीसकर लेप करनेसे कुष्ठरोग नष्ट होता है। कुष्ठरोगीके शरीरपै तैल मलकर अमलतासके पत्ते घोलके साथ पीसकर मर्दन करनेसे

अथवा मकोयको पीसकर मर्दन करनेसे-किम्वा कनेरके पत्तोंको पीसकर मर्दन करनेसे कुष्ठरोग दूर होता है ॥ १० ॥ ११ ॥

आरग्वधःसेडगजःकरञ्जोवासागुडूचीमदनंहरिद्रे ।
श्याह्वःसुराह्वःखदिरोधवश्चनिम्बंविडंगंकरवीरकश्च ॥१२॥
ग्रन्थिश्चभौर्ज्जोलशुनःशिरीषःसालोमथोगुग्गुलकृष्णगन्धे ।
फणिज्जकोवत्सकसप्तपर्णौपिचूनिकुष्ठंसुमनःप्रवालाः ॥१३॥
वचाहरेणुस्त्रिवृतानिकुम्भो भल्लातकंगैरिकमंजनञ्च ।
मनःशिलालेगृहधूमएलाकासीसलोध्राज्जुनमुस्तसर्ज्जा १४
आयर्द्धरूपैर्विहिताःषडेतेगोपित्तपीताःपुनरेवपिष्टाः ।
सिद्धाःपरंसर्षपतैलयुक्ताश्चूर्णप्रदेहाभिषजाप्रयोज्याः ॥१५॥
कुष्ठानिकृच्छ्राणिनवींकंचनासंसुरेन्द्रलुप्तंकिटिभंसदद्रुः ।
भगन्दरार्शांस्यपचींसपामांहन्युःप्रयुक्तानचिरान्नराणाम् १६

अर्थ-अमलतास, चकवड़, करञ्ज, अडूसा, मैनफल हलदी, और दारुहलदी १ गंधविजोरा, देवदारु, खैर, धववृक्षकी छाल, नीमकी छाल, वायविडंग और कनेर २ गठिवन, भोजपत्र, लशुन, सिरकी छाल गूलर और सैंजिनेकी छाल ३ तुलसी, कुडेके बीज, कपास, सतोनेकी छाल, कूठ और चमेलीके पत्ते ४ वच, रेणुका, निसोत, गूगल, भिलावे के बीज, गेरु और रसौत ५ मैनशिल, हरिताल, घरका धुआँ, इलायची, कसीस, लोध, अर्जुन, नागरमोथा और राल ६ इन छै योगोंमेंसे एक किसी योगका काथकर गोलोचनके संग पीनेसे अथवा पीसकर लेपकरनेसे, या इनका चूर्ण सहतमें मिलाकर लेपकरनेसे, सर्वप्रकारके कुष्ठ और भगन्दर, बवासीर, तथा अपची आदि रोग दूर होतेहैं ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

हरिद्रेपथ्याकुष्ठञ्चघनंसहरितालकम् ।
बिभीतकंमुस्तकञ्चकटुतैलंमनःशिला ॥ १७ ॥
एतद्विचूर्ण्यसंमिश्रचरौद्रेतुपरिपाचयेत् ।
विचर्चिकापामादद्रुखजकुष्ठहरंपरम् ॥ १८ ॥

इति हरिद्राद्यं तैलम् ।

अर्थ–हलदी, दारुहलदी, कूठ, अभ्रक, हरिताल, बहेड़ा, नागरमोथा और मैनशिल, इन सब औषधियोंको समानभागले सरसोंके तेलमें मिलाय धूपमें पकाकर परिषेक करनेसे विचर्चिका, पामा, दद्रु, खञ्ज आदि कुष्ठ नष्ट होतेहैं ॥ १७ ॥ १८ ॥

पल्लवैरर्कपूतीकस्नुहारग्वधजातिजैः ।
उद्धर्त्तनंसगोमूत्रैःसर्वत्वग्दोषनाशनम् ॥ १९ ॥
विडंगैडगजाकुष्ठंनिशासिन्धूत्थसर्षपैः ।
धान्याम्लपिष्टोलेपनदद्रुकुष्ठविनाशनः ॥ २० ॥
तुल्योरसःशालतरोस्तुषेणसचक्रमर्दोऽप्यभयाविमिश्रः ।
पानीयभक्तेनतदम्बुपिष्टोलेपःकृतोदद्रुगजेन्द्रसिंहः २१॥
प्रपुन्नाडस्यबीजानिधात्रीसर्ज्जरसःस्नुही ।
सौवीरपिष्टंदद्रूणामेतदुद्वर्त्तनेहितम् ॥ २२ ॥
चक्रमर्दसमापथ्यालेपाद्दद्रुविनाशिनी ।
लेपनाद्भक्षणाद्वापितृणकंदद्रुनाशनम् ॥ २३ ॥
सक्षारंगंधकंलेपात्कटुतैलेनसिध्मजित् ।
सगन्धकंकासमर्दबीजकंमूलकंतथा ॥ २४ ॥
कदलीक्षारसंयुक्तारजनीसिध्मनाशिनी ।
तक्रमूलकबीजाभ्यांप्रलेपःसिध्मनाशनः ॥ २५ ॥
चक्राह्वयंस्नुहीक्षीरंभावितंमूत्रसंयुतम् ।
रवितप्तंहिकिंचिच्चलेपनंकिट्टिभापहम् ॥ २६ ॥
आरग्वधस्यपत्राणिचारनालेनपेषयेत् ।
दद्रुकिट्टिमकुष्ठानिहन्तिसिध्मानमेवच ॥ २७ ॥
एडगजकुष्ठसैन्धवसौवीरकसर्षपैश्चाक्रमिघ्नैः ।
क्रिमिसिध्मदद्रुमण्डलकुष्ठानांनाशनोलेपःपरमः ॥ २८॥

एडगजातिलसर्षपकुष्ठंमागधिकालवणद्वयमस्तु।
वर्षशतोपचितामपिकण्डूंनाशयतीहविचर्चिकदद्रुः२९॥
जलेनापिष्ठ्वातद्देशेलेपः।
नारिकेलोदकेन्यस्तस्तण्डुलःपूतिकांगतः।
लेपाद्विपादिकांहन्तिचिरकालानुबन्धिनीम् ॥ ३० ॥
शुक्तिकाभस्मसिन्धूत्थसर्पिःसर्जरसंपयः।
पादस्फोटनहालेपःतिक्तालावुव्यवस्थितः ॥ ३१ ॥

अर्थ-आक, पूतिकरञ्ज, थूहर, अमलतास और चमेलीके पत्तोंको गोमूत्रमें पीसकर मर्द्दनकरनेसे सर्वप्रकारके चर्म्मरोग दूर होतेहैं। वायविडंग, चकवड़, कूठ, हलदी, सैंधानोन और सरसों इन सबको समान भागले काँजीमें पीसकर लेपकरनेसे दद्रु कुष्ठ नष्ट होताहै। राल, तुष, चकवड़, और हरड़ इन सबको भातकी काँजीमें पीसकर लेपकरनेसे दद्रुकुष्ठरोग दूर होताहै। चकवड़के बीज, आमला, राल और थूहर इन सबको काँजीमें पीसकर लेपकरनेसे अथवा चकवड़ और हरड़को जलमें पीसकर लेपकरनेसे या चीनाधानको पीसकर लेपकरनेसे वा भक्षणकरनेसे दद्रुकुष्ठ नष्ट होताहै। गंधकका चूर्ण और जवाखार सरसोंके तेलमें मिलाकर लेपकरनेसे अथवा गंधक, कसोंदीके बीज, मूलीके बीज केलेकाखार और हलदी एकत्र पीसकर लेपकरनेसे या तक्रके साथ मूलीके बीजोंको पीसकर लेपकरनेसे सिध्मकुष्ठ नष्ट होताहै। चकवड़के बीजोंको थूहरके दूधमें और गोमूत्रमें भावनादेकर धूपमें गरमकर लेपकरनेसे किट्टिम कुष्ठ नष्ट होताहै। अमलतासके पत्तोंको काँजीमें पीसकर लेपकरनेसे दद्रु, किट्टिम और सिध्मकुष्ठ नष्ट होताहै। चकवड़, कूठ, सैंधानोन, काँजी, सरसों, और वायविडंग, इन सबको एकत्र पीसकर लेपकरनेसे कृमि, सिध्म, दद्रु और मण्डल कुष्ठ नष्ट होताहै। चकवड़, तिल, सरसों, कूठ, पीपल, सेंधानोन, कालानोन, और दहीका तोड़, इन सबको एकत्र जलके साथ पीसकर लेपकरनेसे कण्डू, विचर्चिका और दद्रुकुष्ठ विनष्ट होताहै। नारियलके जलमें चावलोंको भिजो देवै, जब उसमें बास आनेलगै तब

पीसकर लेपकरनेसे विपादिका कुष्ठ रोग विनष्ट होता है। सीपकी भस्म, सैंधानोन, घृत, राल और दूध, इन सबको समान भाग लेकर एक दिन कडवे कद्दूके बीचमें रक्खै, पश्चात् लेप करनेसे-पादस्फोट दूर होता है ॥ २९ ॥ ३० ॥ ३१ ॥

त्रिफलापटोलरजनीमंजिष्ठारोहिणीवचानिम्बैः ।
एषकषायोऽभ्यस्तोनिहन्तिकफपित्तजंकुष्ठम् ॥ ३२ ॥

इतिनवकषायः ।

अर्थ-हरड़, बहेड़ा, आमला, पटोल, हलदी, मजीठ, कुटकी, बच और नीमकी छाल, इन सबको समान भागले क्वाथकर पीनेसे कफ पित्तज कुष्ठ नष्ट होता है ॥ ३२ ॥

पटोलखदिरारिष्टत्रिफलाकृष्णवेत्रजम् ।
तिक्तासिनःपिबेत्क्वाथंसर्वकुष्ठंव्यपोहति ॥ ३३ ॥
कोष्ठोडुम्बरिकारिष्टविडंगव्योषयासकम् ।
कल्कंलिप्त्वाजयेत्कुष्ठंकुटजत्वक्कृताम्बुना ॥ ३४ ॥

अर्थ-पटोल, खैर, नीमकी छाल, हरड़, बहेड़ा, आमला, कृष्णवेंत, कुटकी और विजयसारकी छाल, इनका क्वाथ पीनेसे सर्वप्रकारके कुष्ठ रोग नष्ट होते हैं। कठूमर, वायविडंग, सोंठ, मिरच, पीपल और जवासा यह सब समान भाग लेकर कुडेकी छालके क्वाथमें पीसकर, लेप करनेसे सर्व प्रकारके कुष्ठ नष्ट होते हैं ॥ ३३ ॥ ३४ ॥

निम्बंपटोलंव्याघ्रीञ्चगुडूचींवासकन्तथा ।
कुर्याद्दशपलान्भागानेकैकस्यसुकुट्टितान् ॥ ३५ ॥
जलद्रोणेविपक्तव्यंयावत्पादावशेषितम् ।
घृतप्रस्थंपचेत्तेनत्रिफलागर्भसंयुतम् ॥ ३६ ॥
पंचतिक्तमितिख्यातंसर्पिःकुष्ठविनाशनम् ।
अशीतिंवातजान्रोगांश्चत्वारिंशच्चपैत्तिकान् ॥ ३७ ॥

विंशतिंश्लैष्मिकांश्चैवपानादेवापकर्षति।
दुष्टव्रणक्रिमीनर्शःपंचकासांश्चनाशयेत् ॥ ३८ ॥

इति पंचतिक्तघृतम्।

अर्थ–गायका घी २ दो सेर, काथके लिये नीमकी छाल, कटेरी, गिलोय और अडूसा प्रत्येक दश दश पल, पाकके लिये जल ३२ बत्ती, ससेर, शेष ८ आठ सेर, तथा कल्कके लिये हरड, बहेडा और आमला ॥ आधसेर। यथाविधिसे घृतको सिद्ध करै, यह पंचातिक्त घृत कुष्ठरोग, अस्सी प्रकारके वातरोग, चालीस प्रकारके पित्तरोग, बीस प्रकारके कफके रोग, दुष्टव्रण, कृमिरोग, बवासीर और पाँच प्रकारकी खाँसीको दूर करै है ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

सपिप्पलीकासहतालमूलासवेल्ववासासशशाङ्कलेखा।
सायोमलासामलकासतैलासर्वाणिकुष्ठान्यपहन्तिलीढा ३९
शशाङ्कलेखाहाकुचीबीजम्। सायोमलासमण्डूरा।

विडंगत्रिफलाकृष्णाचूर्णंलीढ्वासमाक्षिकम्।
हन्तिकुष्ठंकृमीन्मेहान्नाडीव्रणभगन्दरान् ॥ ४० ॥
शक्राशनंसमादायप्रशस्तेऽहनिचोद्धृतम्।
तच्चूर्णंमधुसर्पिर्भ्यांलिह्यात्क्षीरघृताशनः ॥ ४१ ॥
हत्वाचसर्वकुष्ठानिजीवेद्वर्षशतद्वयम्।
बाकुचीबीजसंजातदधिसारंसमाक्षिकम् ॥
लीढ्वाचानुपिबेत्तक्रमेतत्स्यात्सर्वकुष्ठनुत् ॥ ४२ ॥

इति दधिसारं नवनीतम्।

अर्थ–पीपल, मुसली, वायविडंग, अडूसा, बापचीके बीज, मण्डूर, और आमला, इन सब औषधियोंको समान भागले तिलके तेलमें मिलाकर सेवन करनेसे सर्व प्रकारके कुष्ठ नष्ट होते हैं। वायविड़ंग, हरड, बहेड़ा, आमला, और पीपल, इन सब औषधियोंको समानभाग ले सहतमें मिलाकर चाटनेसे–कोढ़, कृमि, प्रमेह, नाड़ीव्रण और

भगन्दर रोग दूर होते है। शुभ दिनमें भाँगको उखाड़ लावै, पश्चात् उत्तम रीतिसे बारीक चूर्णकर सहतमें मिलाकर चाटै और दूध तथा घृतके साथ भोजन करै तौ सर्व प्रकारके कुष्ठरोग दूर होजाते हैं, तथा २०० दो सौ वर्षपर्यन्त जीता रहता है। बापचीके बीजोंके योगसे निकाला हुवा नौनीघी सहतमें मिलाकर चाटै और ऊपरसे तक्र पीवै, इससे सर्व प्रकारके कुष्ठरोग नष्ट होते हैं॥ ३९ ॥ ॥ ४० ४१ ॥ ४२ ॥

पिबतिसकटुतैलंगन्धपाषाणचूर्णं
रविकिरणसुतप्तंपामनोयःपलार्द्धम्।
त्रिदिनंतदनुसिक्तंक्षीरभोजीतुशीघ्रं
भवतिकनकदीप्तिःकामचारीमनुष्यः॥ ४३ ॥
त्रिभिर्दिनैःपलार्द्धंभक्ष्यम्।
गन्धकचूर्णमिश्रितकटुतैलेनगात्रम्रक्षणेन।
दुग्धेनभोक्तव्यंवातातपंवर्जयित्वातिष्ठेत् ॥ ४४ ॥
एकस्तिलस्यभागौद्वौसोमराज्यास्तथैवच।
भक्ष्यमाणमिदंप्रातर्गुह्यदद्रुविनाशनम् ॥ ४५ ॥

अर्थ–कड़वे तेलमें दो तोले गंधकको मिलाकर तीन दिनतक सेवन करै, तथा इसीको धूपमें गरमकर कुष्ठरोगीके शरीरपै मले और केवल दुग्धान्न पथ्यहै। इससे निश्चय कुष्ठरोग दूर होता है, और शरीर सुवर्ण-की समान दीप्तिमान् होताहै। गंधकके चूर्णको कड़वे तेलमें मिलाकर शरीरपै मलै, इसपै वायु सेवन और धूप सेवन करना त्यागदेवै, केवल दूधके साथ अन्न भक्षणकरै। एकभाग तिल और दोभाग बापचीके बीज, दोनोंको एकत्र पीसकर सेवन करनेसै–गुह्य देशके दाद दूर होतेहैं॥ ४३ ॥ ४४ ॥ ४५ ॥

चित्रकत्रिफलाव्योषमजाजीकारवीवचाम्।
सैन्धवातिविषेकुष्ठंचव्येलायावशूकजम् ॥ ४६ ॥
विडंगान्यजमोदाचमुस्तान्यमरदारुच।
यावन्त्येतानिचूर्णानितावन्मात्रन्तुगुग्गुलुम् ॥ ४७ ॥

संमर्द्यसर्पिषासार्द्धंगुटिकांकारयेद्भिषक् ।
प्रातर्भोजनकालेवाभक्षयेच्चयथाबलम् ॥ ४८ ॥
हन्त्यष्टादशकुष्ठानिकृमिदुष्टव्रणानिच ।
ग्रहण्यर्शोविकारांश्चमुखामयगलग्रहान् ॥ ४९ ॥
गृध्रसीमथगुल्मञ्चभग्नंचापिनियच्छति ।
व्याधीन्कोष्ठगताश्चान्याञ्जयेद्विष्णुरिवासुरान् ॥ ५० ॥

इति एकविंशति गुग्गुलुः ।

अर्थ–चीता, हरड़, बहेड़ा, आमला, सोंठ, मिरच, पीपल जीरा, सौंफ, वच, सैंधानोन, अतीस, कूठ, चव्य, इलायची, जवाखार, वायविडंग, अजमोदा, नागरमोथा और देवदारु, इन सब औषधियोंका चूर्ण समान भाग और सबकी बराबर गूगल ले, सबको घृतमें मिलाकर गोली बनालेवै, इसको प्रातःकाल और भोजनके समय सेवन करनेसे अठारह प्रकारके कुष्ठ, कृमि, दुष्टव्रण, संग्रहणी, बवासीर मुखरोग, गलग्रह, गृध्रसी, गुल्म, भग्न, कोठगतरोग और अन्यान्यरोग दूर होतेहैं ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

निम्बामृतावृषपटोलनिदिग्धिकानां
भागान्पृथक्दशपलान्विपचेद्घटेऽपाम् ।
अष्टांशशेषितरसेनसुनिश्चितेन
प्रस्थंघृतस्यविपचेत्पिचुभागकल्कैः ॥ ५१ ॥
पाठाविडंगसुरदारुगजोपकुल्या
द्विक्षारनागरनिशामिषिचव्यकुष्ठैः ।
तेजोवतीमिरचवत्सकदीप्यकाग्नि
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥ ५२ ॥
मंजिष्ठयातिविषयावरयायवान्या
संशुद्धगुग्गुलुपलैरपिपंचसंख्यैः ।
तत्सेवितंविधमातिप्रबलंसमीरं

सन्ध्यस्थिमज्जगतमप्यथकुष्ठमीदृक् ॥ ५३ ॥
जत्रूर्द्ध्वसर्वगदगुल्मगुदोत्थमेहान्
यक्ष्मारुचिश्वसनपीनसकासशोषम्।
हृत्पाण्डुरोगगलविद्रधिवातरक्तम् ॥ ५४ ॥

इति गुग्गुलुपंचतिक्तघृतम्।

अर्थ-गायका घी २ दोसेर, क्वाथके लिये नीमकी छाल, गिलोय, अडूसेकी छाल, पटोल, और कटेरी प्रत्येक दशपल, पाकके लिये जल ३२ सेर, शेष ८ सेर, तथा कल्कके लिये पाढ़, वायविडंग, देवदारु, जवाखार, गजपीपल, सज्जी, सोंठ, हलदी, सोया, कूठ, तेजपल, कालीमिरच, इन्द्रजौ, अजमोद, चीता, कुटकी, भिलावा, वच, पीपरामूल, मजीठ, अतीस, त्रिफला, और, अजवायन, प्रत्येक २ दो दो तोले तथा शुद्धगूगल दश १० तोले। यथा विधिसै इस पंचतिक्त घृत गूगलको सिद्ध-करै। यह पंचतिक्त घृतगूगल अत्यन्त प्रबलवात, सन्धि, अस्थि और मज्जागत वायु कुष्ठ, ऊर्ध्वजत्रुरोग, गुल्म, गुदजरोग, प्रमेहरोग, राजयक्ष्मा, अरुचि, श्वास, पीनस, खाँसी, शोष, हृदयरोग, पाण्डुरोग गलरोग, विद्रधिरोग, वातरक्त और विशेष करकै कुष्ठरोगको नष्ट करै है ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

निम्बंगोपारुणाकट्वीत्रायन्तीत्रिफलाघनम्।
पर्पटीवल्गुजानन्तावचाखदिरचन्दनम् ॥ ५५ ॥
पाठाशुण्ठीशटीभार्ङ्गीवासाभूनिम्बवत्सकम्।
श्यामेन्द्रवारुणीमूर्वाविडंगन्तुविसानलम् ॥ ५६ ॥
हस्तिकर्णमृतात्रेकापटोलंरजनीद्वयम्।
कणारग्वधसप्ताश्वकृष्णवेत्रोच्चटाफलम् ॥ ५७ ॥
भूकन्दंतिलपर्णश्चाजिङ्गीपद्माचमूषली।
विष्वक्सेनाचकैटर्य्यःशरपुंखाचकञ्चुकी ॥ ५८ ॥
एतेषांद्विपलान्भागाञ्जलद्रोणेविपाचयेत्।
अष्टभागावशेषेणकषायमवतारयेत् ॥ ५९ ॥

भल्लातकसहस्राणिछित्वात्रीण्यर्म्मणेऽम्भसि ।
चतुर्भागावशिष्टंतुकषायंपरिकल्पयेत् ॥ ६० ॥
तौकषायौसमादायवस्त्रपूतौसमाचरेत् ।
भल्लातकसहस्राणांमज्जानंतत्रदापयेत् ॥ ६१ ॥
गुडस्यचतुलांदत्वालेहवत्साधुसाधयेत् ।
त्रिकटुत्रिफलामुस्तसैन्धवानांपलंपलम् ॥ ६२ ॥
दीप्यकस्यपलंचैवचातुर्जातपलन्तथा ।
संचूर्ण्यप्रक्षिपेत्सिद्धेघृतभाण्डेनिधापयेत् ॥ ६३ ॥
महाभल्लातकोह्येषमहादेवेननिर्म्मितः ।
प्राणिनान्तुहितार्थायजयेच्छीघ्रंनिषेवितः ॥ ६४ ॥
श्वित्रमौदुम्बरंदद्रुऋष्याजिह्वंसकाकणम् ।
पुण्डरीकंचचर्म्माख्यंविस्फोटंमण्डलंतथा ॥ ६५ ॥
कण्डूंकपालकुष्ठञ्चविसर्पंसविपादिकम् ।
वातरक्तमुदावर्तंपाण्डुरोगंव्रणक्रुमीन् ॥ ६६ ॥
अर्शांसिषट्प्रकाराणिकासंश्वासंभगन्दरम् ।
सदाभ्यासेनपलितमामवातंसुदारुणम् ॥ ६७ ॥
निर्यंत्रणंचकथितंसर्वत्रापिचशस्यते ।
अग्निंचकुरुतेदीप्तंदीपनंपरमुत्तमम् ॥ ६८ ॥
अनुपानंप्रयोक्तव्यंछिन्नाक्वाथंपयोऽथवा ।
अम्लञ्चसर्वथात्याज्यंशाकमेवविशेषतः ॥ ६९ ॥

इतिमहाभल्लातकम् ।

अर्थ–नीमकी छाल, अनन्तमूल, अतीस, कुटकी, त्रायमान, हरड़, बहेड़ा, आमला, नागरमोथा, पित्तपापड़ा, बापचीके बीज, करिया, वासाऊ, वच, खैर, लालचंदन, पाढ़, सोंठ कचूर, भारंगी, अडूसा चिरायता, कुडेके बीज, कालानिसोत, इन्द्रायन, मूर्वा, वायविडंग, कमल-

केशर, पीपल, चीतेकीजड़, हस्तिकर्णपलाश, गिलोय, गोरखमुण्डी, परवल, हलदी, दारुहलदी, अमलतासकी छाल, आककी जड़, कृष्ण-बेत, उच्चटाफल, जंगलीजमीकन्द. लालचन्दन, मंजीठ, स्थलकमल, मुसली, फूलप्रियंगू, शरफोंका, कायफल, और कञ्चुकी (क्षीरीशवृक्षकी छाल) प्रत्येक आठ आठ तोले लेकर एकद्रोण जलमें पकावै, जब आठमाभाग जल शेष रहै तब उतारले। पश्चात् १००० एकहजार भिलावोंको लेकर टुकड़े करकै ३२ बत्तीससेर जलमें पकावै, जब आठ-सेर जल शेषरहै तब उतार लेवै, पश्चात् कपडेमें छानकर दोनों काथोंको मिलालेवै, फिर इसमें उपरोक्त भिलावोंकी गिरि और ६। सवा छैसेर गुड़मिलाके पकावै जब पकते पकते लेहकीसमान होजाय तब सोंठ, मिरच, पीपल, हरड, बहेड़ा, आमला, नागरमोथा, और सैंधेनों-नका चूर्ण प्रत्येक चार चार तोले, अजवायनका चूर्ण ४ चार तोले, और चातुर्जातकका चूर्ण ४ चार तोले डालदेवै, सिद्धहोजानेपर इसको एक उत्तम चिकने घीके बासनमें भरके रखदेवै।यहमहाभल्लातक श्रीगिरि-जापतिने संसारके प्राणियोंके हितके लिये निर्म्माण कियाहै। इसको सेवन करनेसे श्वित्रकुष्ठ, औदुम्बरकुष्ठ, दद्रु, ऋक्ष्यजिह्व, काकण, पुण्ड-रीक, चर्म्माख्य, विस्फोट, मण्डल, कण्डू, कपालकुष्ठ, विसर्प, विपादिका, वातरक्त, उदावर्त्त, पाण्डुरोग, व्रण, कृमि, छैप्रकारकी बवासीर, खाँसी, श्वास, भगन्दर और सदाअभ्यासकर सेवन करनेसे पलितरोग, दारुण आमवात, यह सब रोग दूरहोतेहैं। इसको नियन्त्रणकहाहै सर्वत्र प्रशस्त है। अग्निको दीपनकरै, और दीप्ताग्निवाले मनुष्योंको परमोत्तमहै। अनुपान–गिलोयका क्वाथ या दूध। सर्वप्रकारकी खटाई और विशेष करकै सम्पूर्ण शाकखाने वर्जितहैं॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

अमृतभल्लातकीकुष्ठेऽपिकार्या ॥ ७० ॥

अर्थ–अमृतभल्लातकीभी कुष्ठरोगमें प्रयोग करना चाहिये ॥ ७० ॥

निम्बंपटोलंव्याघ्रीञ्चगुडूचीवासकंतथा।
कुर्य्याद्दशपलान्भागानेकैकस्यसुकुट्टितान् ॥ ७१ ॥
जलद्रोणेविपक्तव्यंयावत्पादावशेषितम्।

घृतप्रस्थंपचेत्तेनत्रिफलागर्भसंयुतम् ॥ ७२ ॥
पंचतिक्तमितिख्यातंसर्पिःकुष्ठविनाशनम् ।
अशीतिंवातजान्रोगांश्चत्वारिंशच्चपैत्तिकान् ॥ ७३ ॥
विंशतिंश्लैष्मिकांश्चैवपानादेवापकर्षति ।
दुष्टव्रणकृमीनर्शःपंचकासांश्चनाशयेत् ॥ ७४ ॥

इति पंचतिक्तघृतम् ।

अर्थ-गायका घी २ दोसेर, क्वाथके लिये नीमकीछाल,पटोल, कटेरी, गिलोय और अडूसेकी छाल,प्रत्येक कुटी हुई दशदशपल, पाकके लिये जल ३२ बत्तीससेर, शेष आठ ८ सेर कल्कके लिये त्रिफलेका चूर्ण ॥ आधसेर, यथाविधिसे इसको सिद्धकरै। यह पंचतिक्तघृत-सर्वप्रकारके कुष्ठोंको नष्टकरैहै, तथा ८०अस्सी प्रकारके वातरोग, ४० चालीसप्रकारके पित्तरोग, २० बिसप्रकारके कफ रोग, दुष्टव्रण, कृमि, बवासीर और पाँचप्रकारकी खाँसीको दूरकरैहै ॥ ७१ ॥ ७२ ॥ ७३ ॥ ७४ ॥

खदिरारग्वधव्योषत्रिवृच्चित्रकदन्तिका ।
पटोलत्रिफलारिष्टहरिद्राबाकुचीफलम् ॥ ७५ ॥
कटुकातिविषापाठात्रायन्तीधन्वयासकम् ।
कुष्ठंकरञ्जबीजानिशारिवेंद्रसवत्सकैः ॥ ७६ ॥
भल्लातकंविडंगानिगुग्गुलुश्चेतिकल्कितैः ।
पंचतिक्तकषायेणसर्पिःसिद्धंपिबेन्नरः ॥ ७७ ॥
हन्त्यष्टकुष्ठानिग्रंथिंगलगण्डंतथैवच ।
विषविस्फोटवीसर्पकण्डूदुष्टव्रणानपि ॥
रोगानन्यांश्चविविधान्वृक्षमिन्द्राशनिर्यथा ॥ ७८ ॥

इति खदिरादिपंचतिक्तकंघृतम् ।

अर्थ-गायका घी २ दोसेर, क्वाथके लिये नीमकीछाल, पटोल, कटेरी, गिलोय और अडूसा प्रत्येक दश दश पल, पाकके लिये जल ३२ बत्तीससेर, शेष ८ सेर, तथा कल्कके लिये खैर, अमलतास, त्रिकुटा, नीम,

की छाल, निसोत, चीता, दन्ती, पटोल, त्रिफला, हलदी, वापचीके बीज, कुटकी, अतीस, पाढ़, धमासा, त्रायमान, कूठ, करंजकेबीज, अनन्तमूल, गौरीसर, कुडेकेबीज, भिलावे, वायविडंग और गूगल ॥ आधसेर, सबको मिलाकर यथाविधिसे घृतको सिद्धकरै, अठारह प्रकारके कोढ़, ग्रन्थिरोग, गलगण्डरोग, विषविकार, विस्फोट, वीसर्प, कण्डू, दुष्टव्रण तथा अन्यान्यरोगोंको यह घृतदूरकरै है ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८

त्रिफलाद्विनिशावासायासपर्पटभूणकान् ।
त्रायन्तीकटुकानिम्बान्प्रत्येकंद्विपलोन्मितान् ॥ ७९ ॥
क्वाथयित्वाजलद्रोणेपादशेषेणतेनतु ।
घृतप्रस्थंपचेद्दक्षैःपिप्पलीघनचंदनैः ॥ ८० ॥
त्रायन्तीशक्रभूनिम्बैस्तत्पीतंतिक्तकंघृतम् ।
निहन्तिकुष्ठान्यर्शांसिश्वयथुंग्रहणीगदम् ॥ ८१ ॥
पाण्डुरोगंविसर्पञ्चजीवानामपिशस्यते ॥ ८२ ॥

इति तिक्तकंघृतम् ।

अर्थ—गायका घी२ दोसेर, क्वाथके लिये हरड, बहेडा, आमला, हलदी दारुहलदी, अडूसा, जवासा, पित्तपापडा, सुगंधवाला, त्रायमान, कुटकी और नीमकीछाल, प्रत्येक ८ आठतोले, जल३२ बत्तीससेर, शेष आठ ८ आठसेर, तथा कल्कके लिये बहेड़ा, पीपल, नागरमोथा, लालचंदन, त्रायमान, कुडेकेबीज और चिरायता आधसेर, यथाविधिसे घृतको सिद्ध करै, यह घृत—कुष्ठरोग, बवासीर, सूजन, संग्रहणी, पाण्डुरोग और विसर्परोगको नष्ट करैहै ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥

सप्तच्छदंप्रतिविषांशम्याकंतिक्तरोहिणींपाठाम् ।
मुस्तमुशीरंत्रिफलांपटोलपिचुमर्दपर्पटकम् ॥ ८३ ॥
धन्वयवासंचन्दनमुपकुल्येपद्मकरजन्यौच ।
षडग्रन्थांसविशालांशतावरींशारिवेचोभे ॥ ८४ ॥
वत्सकबीजंवासांमूर्वाममृतांकिराततिक्तञ्च ।

कल्कान्कुर्यान्मतिमान्यष्ट्याह्वत्रायमाणाञ्च ॥ ८५ ॥
कल्कस्तुचतुर्भागोजलमष्टगुणंरसोऽमृतफलानाम् ।
द्विगुणोघृतात्प्रदेयस्तत्सर्पिःपाययेत्सिद्धम् ॥ ८६ ॥
कुष्ठानिरक्तपित्तंप्रबलान्यर्शांसिरक्तवाहीनि ।
विसर्पमम्लपित्तंवातामृक्पाण्डुरोगांश्च ॥ ८७ ॥
विस्फोटकान्सपामानुन्मादकान्कामलांज्वरंकण्डूम् ।
हृद्रोगगुल्मपिडकानम्लपित्तमसृग्दरंगंडमालांच॥८८॥
हन्यादेतत्सद्यःपीतंकालेयथाबलंसर्पिः ।
योगशतैरप्यजितान्महाविकारान्महातिक्तम् ॥ ८९ ॥
अमृतफलानां आमलकीफलानाम् ।

इति महातिक्तकं घृतम् ।

अर्थ–उत्तम गायका घी २ दोसेर, जल ८ आठसेर,आमलोंका रस४ चारसेर, तथा कल्कके लिये सतवनकी छाल, अतीस अमलतासकी मज्जा, कुटकी, पाढ़, नागरमोथा, खस, हरड़, बहेडा आमला, नीमकी छाल, पित्तपापडा, धमासा, लालचंदन, पीपल, गजपीपल,पद्माख, हलदी, दारुहलदी, वच, इन्द्रायन, सतावर, गौरिया वासाऊ, करियावासाऊ, इन्द्रजौ, अडूसा, मूर्वा, गिलोय, चिरायता, मुलेठी, और त्रायमान यह सब ॥ आधसेर, यथाविधिसै यह घृत सिद्धकरै । यह घृत सर्वप्रकारके कुष्ठ, रक्तपित्त, प्रबल और रुधिरकी बहनेवाली बवासीर, विसर्प, अम्लपित्त, वातरक्त, पाण्डुरोग, विस्फोटक, पामारोग, उन्माद कामला, ज्वर, कण्डू, हृदयरोग, गुल्म, पिड़का, अम्लपित्त, प्रदर और गण्डमालादि रोगोंको दूर करै है । सैंकडों योगोंसे जिन रोगोंको आराम नहीं हुआहै, उन सबको यह महातिक्त घृत दूर करताहै ॥८३॥ ॥८४॥ ॥८५॥ ॥८६॥ ॥८७॥ ८८ ॥८९॥

वासागुडूचीत्रिफलापटोलं करञ्जनिम्बासनकृष्णवेत्रम् ।
तत्क्वाथकल्केनघृतंविपक्वं तद्वज्रकंकुष्ठहरंप्रदिष्टम् ॥९० ॥

विशीर्णकर्णाङ्गुलिहस्तपादः कृम्यर्दितोभिन्नमलोऽपिमर्दः।
पौराणिकंकान्तिमवाप्यजीवे दव्याहतोवर्षशतञ्चकुष्ठी॥९१

इति वज्रकंघृतम्।

अर्थ-उत्तम गायका घी२ दो सेर, जल ८ आठसेर, तथा कल्कके लिये अडूसा, गिलोय, हरड़, बहेडा आमला, पटोल, करंजके बीज, नीमकी छाल, असन वृक्षकी छाल, और कृष्णवेंत प्रत्येक दो दो तोले। और क्काथके लिये उपरोक्त क्काथकी औषधि प्रत्येक चार चार पल, पाकके लिये जल ८ आठसेर, शेष २ दोसेर रक्खै। सबको यथाविधिसे मिलाकर विधिपूर्वक घृतको सिद्धकरै, यह वज्रक घृत कुष्ठको नष्ट करैहै। इस घृतको सेवन करनेसे गलगईहै हाथपाँवोंकी ऊंगली जिनकी, तथा जिनके कीड़े पड़ गयेहैं और वारंबार दस्त आतेहैं, उन कुष्ठरोगियोंको रोगसै छुटाकर पौराणिक कान्तिको प्राप्त कर १०० सौवर्षतक जिवाताहै॥ ९० ॥ ९१ ॥

पटोलवासकारिष्टकरञ्जव्याघ्रिकामृता।
प्रत्येकंविंशतिपलाञ्जलद्रोणेविपाचयेत्॥ ९२ ॥
पादशेषेरसेतस्मिन्घृतप्रस्थंविपाचयेत्।
कल्कैरक्षरसैदारुत्रिफलात्र्यूषणाग्निभिः॥ ९३ ॥
पृथ्वीकातिविषापाठाचव्येन्द्रयवदीप्यकैः।
मूर्वाक्षारद्वयाजाजीवचाकृमिहरैर्युतैः॥ ९४ ॥
कटुकासप्तपर्णाभ्यंपुरस्याष्टपलेनतु।
सर्वकुष्ठान्यसृक्पित्तंविसर्पपूतिकोष्ठताम्॥ ९५ ॥
वातपित्तकफोद्भूतान्गदांस्तांस्तान्पृथग्विधान्।
पानात्प्रशमयत्येतद्गुग्गुलोःपंचतिक्तकम्॥ ९६ ॥
सिद्धश्चैतेनविधिनातैलप्रस्थःसगुग्गुलुः।
पानाभ्यंजननस्येषुयुक्तःपूर्वगुणावहः॥ ९७ ॥

इति बृहद्गुग्गुलोःपंचतिक्तकंघृतंतैलञ्च।

अर्थ-गायका घी या तिलका तेल २ दो सेर, क्काथके लिये पटोल

अडूसा, नीमकी छाल, करंजकेबीज, कटेरी और गिलोय प्रत्येक २० वीसपल, पाकके लिये जल ३२ बत्तीससेर, शेष ८ आठसेर, तथा कल्कके लिये देवदारु, त्रिफला, कालाजीरा, त्रिकुटा, चीता, अतीस, पाढ़ इन्द्रजौ, अजवायन, मूर्वा, चव्य, जवाखार, सज्जी, जीरा, वच, वायविडंग, कुटकी और सतवनकी छाल प्रत्येक २ दो दो तोले, गूगल ८ आठपल, यथाविधिसे घृत या तेलको सिद्धकर सेवन करनेसे सर्वप्रकारके कुष्ठ, और रक्तपित्तादि नानाप्रकारके रोग दूर होतेहैं ॥ ९२ ॥ ९३ ॥ ॥ ९४ ॥ ९५ ॥ ९६ ॥ ९७ ॥

महौषधंमहामेदानिम्बपत्रंचसर्षपाः ।
मनःशिलाचसिन्दूरंपद्मचारिण्यवल्गुजम् ॥ ९८ ॥
हरिद्रेहरितालंचत्रिफलापीतगंधकम् ।
एतानिसमभागानिकर्षार्द्धंश्चप्रयोजयेत् ॥ ९९ ॥
सर्पिषश्चपलान्यष्टौदेवदारुरसंशुभम् ।
द्विगुणंत्रिगुणंक्षीरंगोमूत्रंचचतुर्गुणम् ॥ १०० ॥
ताम्रभाण्डेतुसंस्थाप्यशनैर्मृद्वग्निनापचेत् ।
चतुर्भागावशेषन्तुसकल्कमवतारयेत् ॥ १०१ ॥
अग्नौक्षिप्तन्तुनिःशब्दंजलयुक्तंविचक्षणः ।
अभ्यंगपानयोगाच्चतदासर्वगदाञ्जयेत् ॥ १०२ ॥
अष्टादशानांकुष्ठानांदद्रूणांश्वित्रिणांतथा ।
कुष्ठनाडीषुमर्त्यानांदुष्टानांकीटिनांतथा ॥ १०३ ॥
असृक्स्रावपरीतायेयेचत्यक्तभिषक्क्रियाः ।
विसर्पग्रहग्रस्तानांशीर्णाङ्गानांविशेषतः ॥ १०४ ॥
सर्वधातुगतेकुष्ठेपतितभ्रूशिरोग्रहे ।
घर्घराव्यक्तघोषाणांतथासर्वाङ्गपीडिनाम् ॥ १०५ ॥
पानेऽभ्यंगेतथानस्येबस्तिकर्म्मणिनित्यशः ।
सप्तरात्रप्रयोगेणसर्वकुष्ठानिनाशयेत् ॥ १०६ ॥
द्विसप्ताहप्रयोगेणपूर्णचन्द्रनिभाननः ।

जातकेशनखश्मश्रुर्भातिषोडशवर्षवत् ॥ १०७ ॥
अनङ्गसदृशःसाक्षात्सर्वामयविवर्ज्जितः ।
एतद्घृतंमहाश्रेष्ठंभार्गवेणविनिर्मितम् ॥ १०८ ॥
प्रजानाञ्चहितार्थायसर्वव्याधिहरंशुभम् ।
महामार्क्करनामेदंघृतंसर्वापराजितम् ॥ १०९ ॥

इति महामार्क्करघृतम् ।

अर्थ–गायका घी १ एक सेर, देवदारुका रस या क्काथ २ दो सेर, गायका दूध ३ तीन सेर, गोमूत्र ४ चारसेर, तथा कल्कके लिये सोंठ, महामेदा, नीमके पत्ते, सरसों, मैनाशिल, सिन्दूर, स्थलकमल, वापचीके बीज, हलदी दारुहलदी, हरिताल, आमला, बहेडा, हरड़, और पीलाचंदन, प्रत्येक एक एक तोले, यथाविधिसे इस घृतको ताँबेके पात्रमें मृदु अग्नि से शनैः शनैः पकावै, जब चौथा भाग शेष रहै तब उतार लेवै । जल समेत इस घीको अग्निमें गेरे, जो यह घी शब्द न करै तौ जानों कि सिद्ध होगया । इसघीको पीनेसे–अथवा इसके मालिस करनेसे–सर्व प्रकारके रोग, अठारह प्रकारके कोढ़, दाद, श्वित्रकुष्ठ, दुष्टनाडीव्रण, दुष्टकीटि रोग, रक्तस्रावयुक्तकुष्ठरोग, असाध्यकुष्ठ, विसर्परोग, शीर्णांग, सर्वप्रकारके धातुगत कुष्ठ, पतितभृकुटीरोग, शिरोग्रह, घर्घरशब्द, अव्यक्तशब्द, सर्वाङ्ग पीडितरोग, यह सब रोग दूर होजाते हैं । इस घीको पीनेसे, मलनेसे, और निरंतर सात रोजतक बस्तिकर्म्ममें प्रयोग करनेसे सर्वप्रकारके कुष्ठरोग नष्ट होते हैं । इसको दो सप्ताहतक सेवन करनेसे पूर्णचन्द्रमाकी समान मुख होजाताहै, तथा बाल, नख, और डाढ़ी, यह सब उत्पन्न होजाते हैं, तथा सोलह वर्षके पुरुषकी समान छबिवाला होजाताहै, और सर्वप्रकारके रोगोंसे रहित होकर साक्षात् कामदेव की समान होजाता है । यह महाश्रेष्ठ महामार्क्कर नामवाला घृत संसारके उपकारके लिये श्रीमान् भृगुजीने निर्म्माण किया है, सर्व रोग नाशक और उत्तम है ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ ॥ १०५ ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥

शतंछिन्नरुहायाश्चजलद्रोणेविपाचयेत् ।
तेनपादावशेषेणतैलप्रस्थंविपाचयेत् ॥ ११० ॥

क्षीरंचतुर्गुणन्तस्यकल्कान्येतानियत्नतः ।
अश्वगन्धाविधारीचकाकोलीहरिचंदनम् ॥ १११ ॥
शतावरीचातिबलाश्वद्रंष्ट्राबृहतीद्वयम् ॥ ।
क्रिमिघ्नंत्रिफलारास्नात्रायमाणाचशारिवा ॥ ११२ ॥
जीवन्तीग्रन्थिकंव्योषंबाकुचीभेकपर्णिका ।
विशालामुद्गपर्णींचमंजिष्ठावन्दनीनिशा ॥ ११३ ॥
शताह्वासप्तपर्णीभिःकार्षिकाणिप्रकल्पयेत् ।
पानाभ्यंजननस्येषुदातव्यन्तुभिषग्वरैः ॥ ११४ ॥
वातरक्तमुदर्दञ्चकुष्ठान्यष्टादशैवतु ।
हनुस्तम्भंप्रमेहञ्चकामलांपाण्डुतांतथा ॥ ११५ ॥
विस्फोटञ्चविषञ्चापिव्रणनाडीभगन्दरम् ।
विचर्चिकांगात्रगण्डूँहन्तिसर्वान्विशेषतः ॥ ११६ ॥
एतत्तैलरसश्चैववलीपलितनाशनः ।
आत्रेयनिर्मितंचैवबलवर्णकरंस्मृतम् ॥ ११७ ॥

इति बृहद्गुडूचा..लम् ।

अर्थ–तिलका तेल २ दो सेर, दूध ८ आठ सेर, काथके लिये गिलोय ६। सवा छह सेर, जल ३२ बत्तीससेर, शेष ८ आठसेर, और कल्कके लिये असगंध, बिदारीकन्द, काकोली, हरिचन्दन, सतावर, गंगेरन, कंघी, गोखुरू, कटेरी, बडी कटेरी, बायविडंग, हरड बहेडा, आमला, रायसन, त्रायमान, अनन्तमूल, जीवन्ती, गठिवन, त्रिकुटा, बापची, मण्डूकपर्णी, इन्द्रायन, मुगवन, मजीठ, काली शारिवा, हलदी, सोया, और लज्जावन्ती ये प्रत्येक २ दो दो तोले, यथाविधिसे इसतेलको सिद्ध करै, इसको पान, अभ्यंजन, और नस्यकर्म्ममें प्रयोग करनेसे वातरक्त, उदर्द, अठारह प्रकारके कोढ़, हनुस्तम्भ, प्रमेह, कामला, पाण्डुरोग, विस्फोट, विषदोष, नाडीव्रण, भगन्दर, विचर्चिका, गात्रकण्डु, और वलीपलित रोगोंको दूर करैहै । बलकारक और वर्णको उत्तम

करैहै । यह तेलोंमें उत्तमतेल श्रीमान् आत्रेय जीने निर्माण किया है ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ११७ ॥

सर्षपकरञ्जकोषातकीतैलोनान्यथेङ्गुदीनाञ्च ।
कुष्ठेषुहितानाञ्चतैलंश्रेष्ठञ्चखादिरस्य ॥ ११८ ॥
मंजिष्ठारुग्निशाचक्रमर्दारग्वधपल्लवैः ।
तृणकस्वरसेसिद्धंतैलंकुष्ठहरंकटु ॥ ११९ ॥

इति तृणकतैलम् ।

अर्थ–सरसों, करञ्ज,, कडवी तोरई, हिंगोट और खैरका तेल अथवा कुष्ठको हितकारक किसी अन्य औषधीका तेल २ दो सेर, जल ८ आठ सेर, तथा कल्कके लिये मजीठ, कूठ, हलदी, चकवड, और अमलतास के पत्ते॥आधसेर और चीनाधानोंका स्वरस८आठसेर, सबको विधिपूर्वक मिलाकर तेलको सिद्ध करै,यह तेल कुष्ठरोगको नष्ट करैहै ।११८॥११९।

हरिद्रात्रिफलादारुहयमारकाचित्रकम् ।
सप्तच्छदश्चनिम्बत्वक्करञ्जौवालकंनखी ॥ १२० ॥
कुष्ठमेढ्गजाविजंलांगलीगणिकारिका ।
जातीपत्रञ्चदार्वीत्वक्हरितालंमनःशिला ॥ १२१ ॥
कलिङ्गंतिलपाकंचक्षीरञ्चगुग्गुलुन्तथा ।
गुडत्वक्मरिचंचोचंकुंकुमंग्रन्थिपर्णकम् ॥ १२२ ॥
सर्ज्जपर्णासखदिरविडंगंपिप्पलीवचा ।
घनरेणवमृतायष्टीकेशरंध्यामकंविषम् ॥ १२३ ॥
विश्वकट्फलमंजिष्ठाबोलंतुम्बीफलन्तथा ।
स्नुहीसम्याकयोःपत्रंवागुजीबीजमासिके ॥ १२४ ॥
एलाज्योतिष्मतीमूलंशिरीषोगोमयाद्रसः ।
चन्दनेकुष्ठनिर्गुण्डीविशालामल्लिकाद्वयदम् ॥ १२५ ॥
वासाश्वगन्धेब्राह्मीचश्याह्वश्चम्पककुड्मलम् ।

एतैःकल्कैः पचेत्तैलंतृणकस्वरसद्रवम् ॥ १२६ ॥
सर्वत्वग्रोगहरणंमहातृणकसंज्ञितम् ॥ १२७ ॥

इति महातृणकतैलम् ।

अर्थ-कड़वातेल २ दोसेर, जल ८ आठसेर, चीनाधानोंका स्वरस ८ आठसेर, तथा कल्कके लिये हलदी, हरड़, बहेड़ा, आमला, देवदारु कनेरकीजड, चीतेकीजड, सतवनकी छाल, नीमकीछाल, दोनोंकरञ्ज सुगंधवाला, नखद्रव्य, कूठ, पमाडकेबीज, अरणी, कलिहारी, चमेलीके पत्ते, दारुहलदी, दारुचीनी, हरिताल, मैनशिल, इन्द्रजौ, लालचंदन, आककादूध, गूगल, कालीमिरच, तेजपात, केसर, गठिवन, राल, तुलसी, खैर, वायविडंग, पीपल, वच, नागरमोथा, रेणुका, गिलोय, मुलेठी, नागकेशर, सुगंधतृण, मीठाविष, सोंठ, कायफल, मजीठ, बोल, तौंवी, थूहरकेपत्ते, अमलतासकेपत्र, वापचीकेबीज, बालछड़, इलायची, मालकांगनकी जड, सिरसकीछाल, गोबरकारस, लालचंदन, सफेदचन्दन कूठ, सम्हालू, इन्द्रायण, बेला, वनवेला, अडूसा, असगंध, ब्राह्मी, श्रीवास, और चम्पेकीकली, यह सब औषधि १ एकसेर, सबको मिलाकर यथाविधिसे तेलको सिद्धकरै, इसतेलसे सर्वप्रकारके चर्म्मदोष दूर होते हैं ॥ १२० ॥ १२१ ॥१२२॥१२३॥१२४॥१२५॥१२६॥१२७॥

सप्तपर्णकरंजार्कमालतीकरवीरकम् ।
मूलंस्नुहीशिरीषाभ्यांचित्रकास्फोतयोरपि ॥ १२८ ॥
करंजबीजंत्रिकटुत्रिफलारजनीद्वयम् ।
सिद्धार्थकं विडंगंचप्रपुन्नाडंचसंहरेत् ॥ १२९ ॥
मूत्रपिष्टैःपचेत्तैलमेभिःकुष्ठविनाशनम् ।
अभ्यंगाद्वज्रकंनामनाडीदुष्टव्रणापहम् ॥ १३० ॥
केचित्कुष्ठहरन्तैलमितिकुष्ठविनाशनम् ।
सर्षपकरंजादितैलंपक्तव्यंनतुतिलतैलम् ॥ १३१ ॥

इति वज्रतैलम् ।

अर्थ-कड़वातेल २ दोसेर; गोमूत्र ८ आठसेर, जल ८ आठसेर,

तथा कल्कके लिये सतोनेकी छाल, आककीजड, करंजकीछाल, मालती के पत्र, कनेरकीजड, थूहरकीजड, सिरसकीजड, चीतेकीजड. अपराजिताकीजड, करंजके बीज, सोंठ, मिर्च, पीपल, हरड, बहेडा, आमला, हलदी, दारुहलदी, सफेद सरसों, वायविडंग, और पमाड, यह सब द्रव्य ऽ॥ आधसेर, यथा विधिसे इसतेलको पकाकर मर्दन करने से-सब प्रकारके कोढ़ दुष्टव्रण और नाडीव्रण दूर होते हैं ॥ १२८ ॥ १२९ ॥ १३० ॥ १३१ ॥

मरिचंत्रिवृतादन्तीक्षीरमार्कंशकृद्रसः ।
देवदारुहरिद्रेद्वेमांसीकुष्ठंकुचन्दनम् ॥ १३२ ॥
विशालाकरवीरंचहारितालंमनःशिला ।
चित्रकोलांगलाख्याचविडंगंचक्रमर्दकम् ॥ १३३ ॥
शिरीषःकुटजोनिम्बःसप्तपर्णस्नुहामृता ।
शम्याकोनक्तमालोऽब्दःखदिरंपिप्पलीवचा ॥ १३४ ॥
ज्योतिष्मतीचपलिकाविषस्याद्विपलंभवेत् ।
आढकंकटुतैलस्यगोमूत्रन्तुचतुर्गुणम् ॥ १३५ ॥
मृतपात्रेलोहपात्रेवाशनैर्मृद्वग्निनापचेत् ।
पक्त्वातैलपरंह्येतत्म्रक्षयेत्कोष्ठिकान्व्रणान् ॥१३६ ॥
पामाविचर्चिकादद्रूकण्डूविस्फोटकानिच ।
विलयःपलितच्छायानीलीव्यंगंतथैवच ॥ १३७ ॥
अभ्यंगेनप्रणश्यन्तिसौकुमार्यंञ्चजायते ।
प्रथमेवयसिस्त्रीणांयासांनस्यञ्चदीयते ॥ १३८ ॥
परामपिजरांप्राप्यनस्तनायान्तिनम्रताम् ।
वलीवर्दस्तुरंगोवागजोवावायुपीडितः ।
त्रिभिरभ्यङ्गनैर्गाढंभवेन्मारुतविक्रमः ॥ १३९ ॥

इति बृहन्मारिचाद्यंतैलम् ।

अर्थ-सरसोंका तेल ८ आठसेर, गोमूत्र ३२ बत्तीससेर, जल बत्तीस

३२ सेर, तथा कल्ककेलिये कालीमिरच, निसोतकी जड, दन्तीकीजड, चीता, वायविडंग, शिरस, सतोना, आककादूध, गोवरकारस, देवदारु, हलदी, दारुहलदी, बालछड, कूट, लालचंदन, इन्द्रायणकी जड़, कनेरकी जड़, हरिताल, मैनशिल, कलिहारीकी जड़, कुड़ेकी छाल, नीमकी छाल, थूहरका दूध, गिलोय, अमलतासके पत्र, करंजकीछाल, नागरमोथा खैर, पीपल, वच और मालकांगनी, यह सब औषधि कुटीहुई प्रत्येक चार चार तोले, तथा मीठा विष ८ आठ तोले लेवै। सबको मिलाकर यथाविधिसे तेलको सिद्धकर मर्दन करनेसे कुष्ठ, व्रण, पामा, विचर्चिका, दाद, कण्डू, विस्फोट, वलीपलितरोग, छाया, नीलता और व्यंग (झाँई) यह सब दूरहोजातेहैं, तथा सुकुमारता उत्पन्नहोतीहै। स्त्रियोंको बाल्यावस्थामें इसतेलका नासदेनेसे वृद्धावस्थामें स्त्रियोंके स्तन नहीं नवतेहैं अर्थात् वृद्धावस्थामेंभी स्तन पुष्टरहतेहैं। वायुसे पीड़ितबैल, घोडा और हाथीके इसतेलको तीन दिन मलनेंसे वातविकारसे मुक्त होकर पवनकी समान पराक्रमी होजातेहैं ॥ १३२ ॥ १३३ ॥ १३४ ॥ ॥ १३५ ॥ १३६ ॥ १३७ ॥ १३८ ॥ १३९ ॥

सोमराजीतुलाक्काथेतथादद्रुघ्नकस्यच ।
विपचेत्कार्षिकैरेतैःकटुतैलाढकंभिषक् ॥ १४० ॥
चित्रकंलाङ्गलाख्यञ्चनागरंकुष्ठमेवच ।
हरिद्रानक्तमालश्चहरितालंमनःशिला ॥ १४१ ॥
स्थौणेयंकरवीरञ्चसप्तपर्णार्कगोमयम् ।
खादिरोनिम्बपत्रञ्चमरिचंकासमर्दकम् ॥ १४२ ॥
सुपिष्टंनिक्षिपेत्सर्वंगोमूत्राढकमेवच ।
सिद्धमभ्यंगतोहन्तिकुष्ठान्यष्टादशाद्रुतम् ॥ १४३ ॥
रोगांस्त्वसृग्भवान्सर्वान्कृमिवर्णविवर्णताम् ।
पाण्डुकण्डूविसर्पांश्चशीर्णचर्मादिदार्व्यकृत् ॥ १४४ ॥

बृहत्सोमराजी तैलम्।

अर्थ-कड़वातेल ८ आठसेर, गोमूत्र३२ बत्तीससेर, काथकेलिये बापचीकेबीज सवाछै ६। सेर, जल ३२ बत्तीससेर, शेष ८ आठसेर, चकवड़ ६। सवाछैसेर, जल३२ बत्तीससेर, शेष ८ आठसेर, तथा काथकेलिये

चीतेकीजड़, कलिहारीकीजड, सोंठ, कूठ, हलदी, बडीकरंज, हरिताल, मैनाशिल, गठिवन, कनेरकीजड, सतोनेकीछाल, गोबरकारस, आकका दूध, खैर, नीमकेपत्ते, मिरच और कसौंदी प्रत्येक कुटेहुए दो दो तोले सबको मिलाकर यथाविधिसे तेलको सिद्धकरै। इस तेलको शरीरादिपै मर्दनकरनेसे १८ अठारह प्रकारके कोढ़, रजोदोषजन्य वातरक्तादिरोग कृमि, व्रण और विवर्णता दूरहोतीहै॥ १४०॥ १४१॥ १४२॥॥ १४३॥ १४४॥

नक्तमालंहरिद्रेद्वेअर्कंतगरमेवच ।
करवीरंवचाकुष्ठमास्फोतारक्तचंदनम् ॥ १४५ ॥
मालतीसप्तपर्णश्चमंजिष्ठासिन्धुवारिका
एषामर्द्धपलान्भागान्विषस्यापिपलंभवेत् ॥ १४६ ॥
चतुर्गुणेगवांमूत्रेतैलपात्रेविपाचयेत् ।
श्वित्रविस्फोटकिटिमकीटलूताविचर्चिका ॥ १४७ ॥
कण्डूकच्छूविकारांश्चयेव्रणाविषदूषिताः ।
विषतैलमिदंनाम्नासर्वव्रणविशोधनम् ॥ १४८ ॥

इति विषतैलम्।

अर्थ-कडवातैल ८ आठसेर, जल ८ आठसेर, गोमूत्र ३२ बत्तीससेर तथा कल्कके लिये करंजकी छाल, हलदी, दारुहलदी, आकका दूध, तगर कनेरकी जड, वच, कूठ, सफेदकोयलकीजड, लालचंदन, मालतीके पत्ते सतोनेकी छाल, मजीठ, और सह्मालूके पत्ते यह सब कुटेहुए प्रत्येक २ दो दोतोले, और मीठाविष४ चार तोले, यथाविधिसे इस तेलको सिद्धकरै। इस तेलको शरीरादिसे मलनेसे श्वित्रकुष्ठ, विस्फोट, किटिम, कीट, लूता विचर्चिका, कण्डू, कच्छू, और विषदूषित व्रण, दूरहोजातेहैं। यह विष, तेल-सर्वप्रकारके व्रणोंको शुद्धकरैहै ॥ १४५ ॥ १४६ ॥ १४७ ॥ १४८॥

पुण्डरीकदलंताम्रंश्वेतरक्तंघनंगुरुम् ।
गलगण्डसरागञ्चपुण्डरीकंकफाधिके ॥ १४९ ॥

अर्थ-पुण्डरीक (कमल)के पत्तेकी समान आकृतिवाला, ताँबेकी समान छविवाला, सफेद और लालरंगका, घन और भारी, तथा गल,

गण्डकी समान वर्णवाला पुण्डरीक कुष्ठ होताहै, यह पुण्डरीक कुष्ठ कफकी अधिकतासे होता है ॥ १४९ ॥

तालंताप्यंशिलासूतंशुद्धसैन्धवटंकणम् ।
समांसंचूर्णयेत्खल्वेसूताद्विगुणगंधकम् ॥ १५० ॥
गंधतुल्यंमृतंताम्रंजम्बीरैर्दिनपंचच ।
मर्द्यंषड्भिःपुटेपाच्यंभूधरेसंपुटोदरे ॥ १५१ ॥
पुटेपुटेद्रवैर्मर्द्यंसर्वमेतच्चषट्पलम् ।
द्विपलंमारितंताम्रंलोहभस्मचतुःपलम् ॥ १५२ ॥
जम्बीराम्लेनतत्सर्वंदिनंमर्द्यंपुटेल्लघु ।
त्रिंशदंशंविषंचास्यक्षिप्यंसर्वंविचूर्णयेत् ॥ १५३ ॥
महिषाज्येनसंमिश्र्यनिष्कार्द्धंपुण्डरीकनुत् ।
मध्वाज्यैर्बाकुचीचूर्णंकर्षमात्रंलिहेदनु ॥ १५४ ॥
सर्वान्कुष्ठान्निहन्त्याशुमहातालेश्वरोरसः ॥ १५५ ॥

इति महातालेश्वरोरसः ।

अर्थ-हरिताल, सोनामाखी, मैनशिल, पारा, सैंधानोन और सुहागा, प्रत्येक १ एक भाग, गन्धक २ दो भाग और ताँबेकी भस्म २ दो भाग सबको एकत्र पीसकर जम्भीरी नीबूके रसमें ५ पाँचदिनतक खरलकरै, पश्चात् गोलाबनाकर सम्पुटमें रख भूधरयंत्रमें छै पुटदेवै, और प्रत्येक पुटपर जम्भीरीनीबूके रसमें खरलकरै, पश्चात् भूधरयंत्रमें पकाई हुई औषधि ६ छैपल, ताँबेकी भस्म २ दो पल, और लोहेकी भस्म ४ चारपल, इन तीनोंको जम्भीरी नीबूके रसमें एकदिन खरलकर लघुपुटमें पकावै, फिर इसमें ३० तीस भाग मीठा विष मिलाकर चूर्णकरले, इसको भैंसके घीमें मिलाकर दोमासेभर खानेसे पुण्डरीक कुष्ठ नष्ट होताहै, ऊपरसे बापचीके चूर्णको सहत और घृतमें मिलाकर दो तोलेभर खावै, यह अनुपानहै । यह महातालेश्वर रस-सर्व प्रकारके कुष्ठोंको दूर करैहै ॥ १५० ॥ १५१ ॥ १५२ ॥ १५३ ॥ १५४ ॥ १५५ ॥

अर्कक्षीरंस्नुहीक्षीरंभृङ्गधत्तूरयोर्द्रवम् ।
द्रवंजम्बीरगोमूत्रंप्रत्येकंपलविंशतिम् ॥ १५६
तिलतैलंपलांस्त्रिंशत्सर्वमेकत्रपाचयेत् ।
तैलावशेषमुत्तार्यतत्रचूर्णंविनिक्षिपेत् ॥ १५७ ॥
कांचनीधातकीपुष्पंमंजिष्ठाचशतावरी ।
गंधकंपंचलवणंद्विनिशावत्सनाभकम् ॥ १५८ ॥
प्रतिचार्द्धपलंयोज्यंएकीकृत्यविमर्दयेत् ।
घर्म्मस्थःसर्वकुष्ठानिभानुतैलंनिहन्त्यलम् ॥ १५९ ॥

इति भानुतैलम् ।

अर्थ-तिलकातेल ३० तीसपल, तथा आककादूध, थूहरका दूध, भांगरेका रस, धतूरेका रस, जम्भीरी नीबूका रस और गोमूत्र प्रत्येक २० वीस पल, सबको एकत्र मिलाकर विधिपूर्वक पकावै, जबकेवल तेलही शेष रहै तब उतारलेवै, पश्चात् इस तेलमें सत्यानासी कटेरी, धायकेफूल, मजीठ, सतावर, गंधक, सैंधानोन, कालानोन, विरियासंचरनोन, सांभरनोन समुद्रलवण, हलदी,दारुहलदी,और वत्सनाभ विष, प्रत्येकका दो दो तोले चूर्ण डालकर एकत्र करै, फिर इसको मर्दनकर धूपमें धरदेवै, इस तेलको शरीरादिसे मलनेसे-निश्चय सर्व प्रकारके कुष्ठ नष्ट होतेहैं ॥ १५६ ॥ १५७ ॥ १५८ ॥ १५९ ॥

हिंगूलसम्भवंसूतंगंधकंमृतताम्रकम् ।
सम्यक्शुद्धंतथाकान्तंवंगंचापिशिलाजतुम् ॥ १६० ॥
तुत्थंरसांजनंचैवतालकंशंखमेवच ।
वराटकंचापितुल्यंजैपालीद्विगुणीकृतम् ॥ ६६१ ॥
हवुषांपंचलवणंपंचैवकटुकानिच ।
विडंगंपिप्पलीमूलंप्रियंगूरजमोदकम् ॥ १६२ ॥
द्राक्षारीकुष्ठमेलाचलवङ्गंजीरकद्वयम् ।
शटीदन्तीत्रिवृच्चैवत्रिफलागजपिप्पली ॥ १६३ ॥

सर्वमेकत्रसंचूर्ण्यभावयेत्रिफलाजलैः।
सप्तधाखलुपाषाणेप्रचण्डातपशोषितम्॥ १६४॥
हरीतकीरसेनाथपुनःसंचूर्ण्ययत्नतः।
पंचरक्तीप्रमाणन्तुवटिकांकारयेद्भिषक्॥ १६५॥
एकैकांखादयेत्प्रातःशृङ्गवेररसाप्लुताम्।
हन्तिकुष्ठंतथामेदआममारुतमेवच॥ १६६॥
श्लीपदंगण्डमालाञ्चगलगण्डंभगन्दरम्।
नाडीदुष्टव्रणञ्चैवअन्त्रवृद्धिश्चदारुणाम्॥ १६७॥
अम्लपित्तंरक्तपित्तंपक्तिशूलंहलीमकम्।
वातरक्तंवातकफमुपदंशंसपीनसम्॥ १६८॥
पंचगुल्मांस्तथानाहंप्लीहशोथज्वरानपि।
उदराणितथाकासान्रसोऽयंवाडवानलः॥ १६९॥

इति वाडवानलरसः।

अर्थ-सिंग्रफसे निकालाहुआ पारा, शुद्धगंधक, ताँबेकी भस्म, शुद्धकान्तलोह, शुद्धवंग, शुद्धशिलाजीत, नीलाथोथा, रसौत, हरिताल, शंखकी भस्म, कौडीकी भस्म, हाऊबेर, सेंधानोन, कालानोन, विरियासंचरनोन, समुद्रनोन, सामरनोन, सोंठ, मिरच, पीपल, जवाखार, कूठ, छोटी इलायची, लोंग, फूलप्रियंगू, अजमोद, वायविडंग, पीपरामूल, जीरा, काला जीरा, कचूर, दन्ती, निसोतकीजड हरड, बहेडा आमला और गजपीपल प्रत्येक एकभाग तथा जमालगोटेके बीज २ भागलेवै, सबको एकत्र पीसकर सातबार त्रिफलेके क्राथमें भावना देकर धूपमें खरलकरै, फिर इसी प्रकार हरडके क्राथमें भावना देकर पाँच पाँच रत्तीकी गोली बनालेवै, प्रतिदिन, प्रातःकाल एक गोली अदरखके रसमें मिलाकर खावै, इससे-कुष्ठरोग, मेदरोग, आमवात, श्लीपद, गण्डमाला, गलगण्ड, भगन्दर, नाडीव्रण, दुष्टव्रण, दारुण अंत्रवृद्धि, अम्लपित्त, रक्तपित्त, परिणामशूल, हलीमक, वातरक्त, बातकफ, उपदंश, पीनसरोग, पंचगुल्म, आनाह, प्लीहा, सूजन, ज्वर, उदररोग और खांसी दूर होती है। इसको वाड़वानल रस कहते हैं॥ १६०॥ १६१॥ ॥ १६२॥ १६३॥ १६४॥ १६५॥ १६६॥ १६७॥ १६८॥ १६९॥

वृद्धदारकमूलानामाढकंतर्ज्जनीकृतम्।
जलद्रोणेपचेद्धीमानाढकेचावशेषितम्॥ १७० ॥
घृतप्रस्थंपचेत्तेनदत्वामूलंपलाष्टकम्।
सर्पिरेतन्महावीर्यंरसायनमनुत्तमम्॥ १६७१ ॥
वातपित्तकफोत्थश्चद्वन्द्वजंसान्निपातिकम्।
नानावर्णंजयेत्पुंसांश्लीपदंशीघ्रमेवच॥ १७२ ॥

इति वृद्धदारकघृतम्।

अर्थ–गायका घी दोसेर, कल्कके लिये विधारेकी जड ऽ॥ आधसेर जल ८ आठसेर, क्वाथके लिये विधारेकी जड ४ चारसेर, पाकके लिये जल ३२ बत्तीस सेर, शेष ८ आठसेर, यथाविधिसे घृतको सिद्धकरै,यह घृत महावीर्यवान्, उत्तम रसायन, वात पित्त और कफसे उत्पन्न हुआ, द्वन्द्वज, सान्निपातिक और नाना वर्णके श्लीपद रोगोंको दूर करै है ॥ ॥ १७० ॥ १७१ ॥ १७२ ॥

स्फोटंकण्डूंतीव्रदाहंमण्डलंस्निग्धपाण्डुता।
पाणौकच्छूस्फिचौक्लेदंकुष्ठविस्फोटलक्षणम्॥ १७३ ॥

अर्थ–स्फोटक, खुजली, और तीव्रदाह, हो मण्डलाकार चिह्न होवै, चर्म्म स्निग्ध और पाण्डु वर्णहो, हाथमें खुजली और नितम्बोंमें क्लेदहो, उसको विस्फोटक कुष्ठ कहतेहैं ॥ १७३ ॥

मृतस्वर्णाभ्रकंशुण्ठींशुद्धसूतंत्रिभिःसमम्।
अम्लैर्मर्द्यन्तुतद्गोलंपिष्ट्वातुल्यंचगन्धकम्॥ १७४ ॥
कटुतैलयुतंपाच्यंलौहेचमृदुनाग्निना।
द्रवैर्जीर्णैविचूर्ण्याथवह्निमूलकटुत्रिकैः॥ १७५ ॥
त्वग्विडङ्गविषैस्तुल्यैःत्रिगुणंत्रिफलाविषात्।
अजामूत्रेदिनंपिष्ट्वागुञ्जैकांभक्षयेद्वटीम्॥ १७६ ॥
निष्कैकंबाकुचीतैलंपिबेद्विस्फोटकुष्ठजित्।
रसःकनकसंकोचोद्विगुंजंयाजयेत्क्रमात्॥ १७७ ॥

इति कनकसंकोचरसः।

अर्थ-सोनेकी भस्म १ एक भाग,अभ्रककी भस्म १ एक भाग,सोंठ १ एक भाग पारेकी भस्म ३ तीन भाग, सबको एकत्र नीबूके रसमें खरलकर गोला बनालेवै, फिर इसमें छै भाग गंधक मिलाकर पीसलेवै, पश्चात् इसको कड़वे तेलमें मिलाकर लोहेके पात्रमें मन्द मन्द अग्निसे पकावै, जब पकजावै तब चीतेकी जड़, त्रिकुटा, दालचीनी, वायविडंग और विषका चूर्ण प्रत्येक एक भाग और त्रिफलेका चूर्ण प्रत्येक तीन भाग मिलाकर बकरीके मूत्रमें एकदिन खरलकर एक एक रत्ती भरकी गोली बनालेवै, एक गोली प्रतिदिन खाय और ऊपरसे चारमासे वापचीका तेलपीवै तौ विस्फोट कुष्ठ नष्टहोवै। यह कनकसंकोच रस क्रमसे एक रत्तीसे लेकर दो रत्तीतक खाय ॥ १७४ ॥ १७५ ॥ १७६ ॥ १७७ ॥

शुद्धसूतंद्विधागन्धंनिर्गुण्डीबाकुचीरसैः।
दिनैकंमर्दयेत्पाच्यंयामंलवणयंत्रके ॥ १७८ ॥
उद्धृत्यचूर्णयेत्तुल्यैस्त्रिफलाबाकुचीफलैः।
तुल्यांशंभृंगचूर्णञ्चसर्वमेकत्रपाचयेत् ॥ १७९ ॥
पलाशखदिरक्काथंगोमूत्रैर्लोहभाजने।
दिनैकान्तेवटींकुर्यान्निष्कैकंभक्षयेत्सदा ॥ १८० ॥
कुष्ठंविस्फोटकंहन्तिनाम्नाकुष्ठान्तकोरसः।
मर्दनंभानुतैलेनआतपेकारयेत्सदा ॥ १८१ ॥

इति कुष्ठान्तकोरसः।

अर्थ-शुद्धपारा १ एक भाग.शुद्धगंधक२ दोभाग,इनको एकत्र सम्हालू और वापचीके रसमें एकदिन खरलकर एक प्रहरतक लवणयंत्रमें पकावै, स्वांगशीतल होनेपर निकालकर चूर्णकर बराबर का त्रिफला वापचीकेबीज और दालचीनीका चूर्ण मिलाकर पालाश और खैरके क्वाथ और गोमूत्रमें एकदिनतक पकावै परन्तु लोहेके बासनमें पकावै, पश्चात् चार चार मासेकी गोली बनालेवै, प्रतिदिन एक गोली खाय तौ निश्चय विस्फोटक कुष्ठ नष्ट होजाय। विस्फोटक कुष्ठपै भानु तेलको धूपमें सदैव मर्दन करै ॥ १७८ ॥ १७९ ॥ १८० ॥ १८१ ॥

पारदंगंधकंताम्रंशिलाजतुशिलामृता।

मेघनादाश्वगंधाख्यंतुल्यंक्षौद्रेविमर्दयेत् ॥
उद्धृतंलेपयेन्मासाद्गजचर्म्मविनश्यति ॥ १८२ ॥

अर्थ-पारा, गन्धक, ताँबा, शिलाजीत, मैनाशिल, गिलोय, चौलाईकी जड और असगंध, इन सब औषधियोंको समानभागले उत्तम रीतिसे चूर्णकर सहतमें मिलाके खरलकर एकमही नेतक शरीरपै लेप करनेसे गजचर्म्म कुष्ठ नष्ट होताहै ॥ १८२ ॥

लोहभस्मामिषंवह्निकटुकात्रिकटुत्रयम् ।
तुल्यांशंचूर्णितंभाव्यंक्काथेनानेनतद्दिनम् ॥ १८३ ॥
पथ्यानिम्बविडंगानिखदिरंवासकामृता ।
जलैरष्टावशेषन्तुकषायंभावनेहितम् ॥ १८४ ॥
मासमात्रंलिहेत्क्षौद्रैःकाकणंहन्तितद्वटी ।
इन्द्रवारुणिकामूलंवागुचीत्रिफलाग्निभिः ॥ १८५ ॥
निम्बस्यवह्निशुण्ठीश्चमरिचंचूर्णयेत्समम् ।
गोमूत्रैःपाययेत्कर्षमनुपानेनभक्षयेत् ॥ १८६ ॥

इति काकणघ्नवटी ।

अर्थ-लोहेकीभस्म, विष, चीता, कुटकी सोंठ, मिरच और पीपल, इन सबको समानभाग लेकर हरड, नीमकीछाल वायविडंग, खैर, अडूसा और गिलोय इनको अष्टावशेष क्काथमें भावनादेकर एक एक मासेभरकी गोली बना सहतके साथ खानेसे काकण कुष्ठ नष्ट होताहै। इसके ऊपर इन्द्रायणकीजड़, बापचीकेबीज, हरड़, बहेड़ा, आमला, चीतेकीजड़, नीमकीछाल, भिलावेकेबीज, सोंठ और कालीमिरच इन सब औषधियोंको समानभागले चूर्णकर २ दो तोलेभर गोमूत्रके साथ पानकरै ॥ १८३ ॥ १८४ ॥ १८५ ॥ १८६ ॥

वज्रीक्षीरंरविक्षीरंधुस्तूरंचित्रकद्रवम् ।
सर्वांशंतिलतैलंचगोमूत्रेणसमंपचेत् ॥ १८७ ॥
तत्तैलंपाचयेद्यत्नाद्द्रव्याण्येतान्यतःपचेत् ।

गन्धकाग्निशिलातालंविडंगातिविषाविषम् ॥ १८८ ॥
तिक्ताकोषातकीकुष्ठंवचामांसीकटुत्रयम् ।
हरिद्रादारुयष्ट्याह्वसर्जक्षारञ्जजीरकम् ॥ १८९ ॥
कर्षांशंदेवकाष्ठञ्चचूर्णन्तैलेविमिश्रयेत् ।
वज्रतैलमिदंख्यातंमर्दनात्सर्वकुष्ठजित् ॥ १९० ॥

इति वज्रतैलम् ।

अर्थ-थूहरकादूध, आककादूध, धतूरेकारस, और चीतेकी जड़कारस प्रत्येक १ एकसेर, तिलकातेल ४ चारसेर, और गोमूत्र ४ चारसेर, इनसबद्रव्योंको एकत्रपकावै, जब केवल तैल शेषरहै तव उतारलेवै, पश्चात् इस तेलमें गंधक, चीतेकीजड़, मैनशिल, हरिताल, वायविडंग, अतीस, विष, चिरायता, कडवी तोरई, कूट बच वालछड़, त्रिकुटा हलदी, दारुहलदी सज्जी, जीरा और देवदारु प्रत्येकका चूर्ण २ दोतोले मिलादेवै, तौ वज्रतेल सिद्धहो, इसतेलको मर्दनकरनेसे-सर्वप्रकारके कुष्ठ नष्ट होतेहैं ॥ १८७ ॥ १८८ ॥ १८९ ॥ १९० ॥

तार्क्ष्यंगन्धंशुद्धसूतंशिलाजत्वम्लवेतसम् ।
मृतताम्राभ्रकंतुल्यंमध्वाज्यगुडमिश्रितम् ॥ १९१ ॥
मासैकंजिह्मगंहन्तिसूर्यकान्तोमहारसः ।
मुण्डीपंचाङ्गचूर्णञ्चवाकुचीतुल्यचूर्णकम् ।
मध्वाज्यसंयुतंकर्षंलेहयेदनुपानकम् ॥ १९२ ॥

इति सूर्यकान्तरसः ।

अर्थ-सोनामाखी, गंधक, पारा, शिलाजीत, अमलवेंत, ताँबा और अभ्रक, इन सबको समानभागले सहत, घी और गुड़में मिलाकर एकमासेभर खायतौ, यह सूर्यकान्तनामवाला रस-जिह्मग कुष्ठको दूर करैहै, ऊपरसे गोरखमुण्डीके पत्ते, मूल, पुष्पफल और छालका चूर्ण और वापचीका चूर्ण सहत या घृतमें मिलाकर दोतोलेभर खावै, यह अनुपानहै ॥ ११९ ॥ १९२ ॥

भस्मसूतसमोगन्धोमृतायस्ताम्रगुग्गुलुः ।

त्रिफलाविषमुष्टिश्चचित्रकंचशिलाजतु ॥ १९३ ॥
इत्येवंचूर्णितंकुर्यात्प्रत्येकंनिष्कषोडश ।
चतुःषष्टिकरंजस्यबीजचूर्णंप्रकल्पयेत् ॥ १९४ ॥
चतुःषष्टिवटीचक्रेमध्वाज्याभ्यांविलोडयेत् ।
स्निग्धभाण्डगतंखादेद्द्विनिष्कंगलितंचयत् ॥ १९५ ॥
रसःकुष्ठकुठारोऽयंगलत्कुष्ठनिकृन्तनम् ।
पथ्यंत्रिमधुरैर्देयंदत्तभोजनलेपनम् ॥ १९६ ॥
पंचांगतण्डुलीमूलंमधुपुष्पाचधान्यकम् ।
सितयाभक्षयेत्कर्षमतितापप्रशान्तये ॥ १९७ ॥
लिह्यान्नागबलामूलंमध्वाज्यैर्वातितापनुत् ॥ १९८ ॥

इति कुष्ठकुठाररसः ।

अर्थ-रससिन्दूर, गन्धक, लोहा, ताँबा, गूगल, हरड़, बहेड़ा, आमला, कलिहारीकिजड़, चीतेकीजड़, और शिलाजीत प्रत्येक आठ तोले ले बारीक चूर्ण करै, पश्चात् इस चूर्ण में ३२ बत्तीस तोले करंजके बीजों का चूर्ण मिलाकर उत्तम प्रकार से सहत और घृतकेसाथ खरलकर ६४ चौंसठ वटी बनालेवै, उन गोलियोंको एक उत्तम चिकने बासनमें भरके रख देवै, इस औषधिको चार मासे भर खाने से-गलित कुष्ठ नष्ट होता है, इसके ऊपरसे पंचांगयुक्त चौलाईकिजड, दन्तीकी जड, और धनियेके चूर्णमें बूरा मिलाकर २ दोतोलेभर अथवा गंगेरनकी जडका चूर्ण २ दोतोलेभर सहत और घृतके साथ सेवन करनेसे-कुष्ठरोगीकी रोग जनित अत्यन्तज्वाला निवारण होतीहै । इससे रोगीको घृत, बूरा और सहत सेवन करना और लेप करना पथ्यहैं ॥ १९३ ॥ १९४ ॥ ॥ १९५ ॥ १९६ ॥ १९७ ॥ १९८ ॥

भस्मसूतार्कलोहानांकृष्णागंधकटंकणम् ।
कुष्ठतुल्यकतुल्यांशंमर्द्यंधुस्तूरजैर्द्रवैः ॥ १९९ ॥
दिनैकंतद्वटींकुर्यान्माषमात्रञ्चभक्षयेत् ।
रसोलंकेश्वरोनाम्नाप्रसूतमण्डलप्रणुत् ॥ २०० ॥

गन्धकंत्रिफलाचूर्णंनिर्विषींगुग्गुलुंसमम् ।
लिहेदेरण्डतैलेनकर्षैकमनुपानकम् ॥ २०१ ॥

इति लंकेश्वररसः ।

अर्थ-रससिन्दूर, ताँबा, लोहा, पीपल, गन्धक, सुहागा और कूठ, इन सब औषधियोंको समानभागलेकर धतूरेके रसमें एकदिनखरलकर एक एक मासेकी गोली बनालेवै, प्रतिदिन एक गोली खावै तौ यह लंकेश्वरनामक रस मण्डल कुष्ठको नष्टकरैहै । इसके पश्चात् गन्धक, त्रिफला, निर्विषीतृण, और गूगलका चूर्ण करके अण्डीके तेलके साथ पानकरै ॥ ॥ १९९ ॥ २०० ॥ २०१ ॥

शुद्धसूतंविषंगन्धंतुल्यंताप्यंशिलाजतु ।
शुद्धतीक्ष्णंमृतंलौहंसर्वंमर्द्यंदिनत्रयम् ॥ २०२ ॥
काकमाचीदेवदाल्योःकर्कोटैश्चद्रवैर्दृढम् ।
मर्दयेद्भूधरेपच्यात्रिदिनन्तुतुषाग्निना ॥ २०३ ॥
निष्कार्द्धंलेहयेत्क्षौद्रैःरसःकुष्ठनिकृन्तनः ।
भल्लातबाकुचीपथ्याविडंगंचित्रकंतथा ॥ २०४ ॥
जीरकंबदरीमूलंकटुतैलेङ्गुदेनतु ।
भक्षयेदनुपानोऽयंहन्तिकुष्ठंविचर्चिकाम् ॥ २०५ ॥

इति कुष्ठान्तकोरसः ।

अर्थ-पारा, विष, गन्धक, सोनामाखी, शिलाजीत, तीक्ष्णलोह और काललोह, इन सब औषधियोंको समानले उत्तमप्रकार से चूर्णकर मकोयके रसमें एकदिन, देवदालीके रसमें एकदिन और ककोडेके रसमें एकदिन खरलकर भुसकी अग्निसे तीनदिन तक भूधरयंत्रमें पकावै, स्वांग शीतल होनेपर चूर्णकरले, इसको दोमासेभर सहतके साथ चाटै तौ कुष्ठरोग दूरहोवै । इस औषधिके सेवनके पश्चात् भिलावा, वापचीकेबीज, हरड, वायविडंग, चीतेकीजड, जीरा और बेरकी जड़ यह सब समान भागले चूर्णकर कडवेतेल अथवा हिंगोटकेतेलके साथ पानकरै, यह अनुपानहै । इससे निश्चय विचर्चिका कुष्ठ नष्ट होताहै॥२०२॥२०३॥ ॥ २०४ ॥ २०५ ॥

वालकंमाक्षिकंलोहंनागकेशरपत्रकम् ।

चंदनश्चमृणालानिभार्ङ्गींचतुर्गुणानिच ॥ २०६ ॥
घृतंकुष्ठेविलेपोऽयंअतिदाहहरः परः।

इति लेपः।

अर्थ-सुगन्धवाला, सोनामाखी, लोहेकीभस्म, नागकेशर, तेजपात, लालचंदन और खस, प्रत्येक एक २ भाग, और सबसे चौगुनी भारंगी, सबको एकत्र घृतके साथ पीसकर लेप करनेसे कुष्ठजन्य शरीरकी दाह दूर होतीहै ॥ २०६ ॥

रसंटंकणगंधार्कक्षीरंस्नुक्पयसापिच ॥ २०७ ॥
पिप्पलीचंदनंकुष्ठघृततुल्येनपाचयेत्।
लेपोऽयंमातुलुंगाम्लैश्चर्म्मकुष्ठकुलान्तकः ॥ २०८ ॥

इति लेपः।

अर्थ-पारा, सुहागा, गंधक, आकका दूध, थूहरका दूध, पीपल, लालचंदन, और कूठ, इन सब औषधियोंको समानभागले घृतमें पकाकर बिजौरे नींबूके रसमें मिलाकर लेपकरनेसे चर्म्मगत सम्पूर्ण कुष्ठ नष्टहोतेहैं ॥ २०७ ॥ २०८ ॥

कूष्माण्डचक्रमर्दाभ्यांबीजंपथ्याचसैन्धवम्।
क्षीरैस्तक्रैःकांजिकैर्वापिष्ट्वालेपंचदद्रुजित् ॥ २०९ ॥

इति लेपः।

अर्थ-पेठेकेबीज, चकवडकेबीज, हरड और सैन्धव लवण, इनको एकत्र दूध और तक्र अथवा काँजीके साथ पीसकर लेपकरनेसे-दाद दूरहोतेहैं ॥ २०९ ॥

पारदंटंकणंगंधंमूषलीचार्द्रकद्रवैः।
दिनंमर्द्यंव्रणेलेपःसिध्महन्तिमहद्भुतम् ॥ २१० ॥

इति लेपः।

अर्थ-पारा, सुहागा और गंधक, इनको एकत्र मुसली और अदरखके रसमें एकदिन खरलकर लेपकरनेसे सिध्म कुष्ठ नष्ट होताहै। २१० ॥

अभ्रकंमृतलौहश्चशुद्धसूतंशिलाजतु।
ताप्यंबाकुचिबीजानित्रिफलामुसलीसमम् ॥ २११ ॥

सव्योषंचूर्णितंलेह्यंमधुनानिष्कमात्रकम् ।
मासकंनाशयेत्सिध्मवेतालोऽयंमहारसः ॥ २१२ ॥

इति वेतालरसः ।

अर्थ–अभ्रक, लोहेकी भस्म, पारा, शिलाजीत, सोनामाखी, बापचीकेबीज, हरड़, बहेड़ा, आमला, मुसली, सोंठ, मिरच और पीपल, इन सब औषधियोंको समानभागले सहतमें मिलाकर चार चार मासेकी गोली बनालेवै, एकमासे प्रतिदिन सेवनकरनेसे सिध्मकुष्ठ नष्ट होताहै॥ २११ ॥ २१२ ॥

सूताभ्रंशुण्ठिभस्मानिगन्धंतालंशिलाजतु ।
अम्लवेतसतुल्यांशंचाम्लेनमर्दयेत्ततः ॥ २१३ ॥
मध्वाज्याभ्यांवटींकुर्याद्द्विगुंजंभक्षयेत्सदा ।
कुष्ठंहन्तिनसन्देहोरसोलंकाधिपेश्वरः ॥ २१४ ॥
त्रिफलानिम्बमंजिष्ठावचापटोलमूलकम् ।
कटुकीरजनीतुल्यंक्वाथोऽयमनुपानतः ॥ २१५ ॥

इति लंकाधिपेश्वरोरसः ।

अर्थ–पारेकी भस्म, अभ्रककी भस्म, सोंठ, गन्धक, हरिताल, शिलाजीत, अमलवेंत, इन सब औषधियोंको समानभागलेकर चूर्णकर काँजीके साथ खरलकर २ दोरत्ती सहत और घृतमें मिलाकर सेवन करनेसे कुष्ठरोग नष्ट होताहै। इस औषधिके सेवन करनेके पश्चात् त्रिफला, नीमकीछाल, मजीठ, वच, पटोल, मूली, कुटकी और हलदीका क्वाथ पानकरै ॥ २१३ ॥ २१४ ॥ २१५ ॥

चक्रमर्दस्यबीजानिकणाश्वेताश्चसर्षपाः ।
कुष्ठंद्वेरजनीतुल्यंतक्रैःपिष्ट्वाप्रलेपयेत् ॥ २१६ ॥
सर्वकुष्ठहरोलेपोनात्रकार्याविचारणा ।

अर्थ–पमाड़केबीज, पीपल, सफेदसरसों, कूठ, हलदी, और दारुहलदी, इन सब औषधियोंको समानभाग ले तक्रमें पीसकर लेप करनेसे सर्व प्रकारके कुष्ठरोग नष्टहोतेहैं ॥ २१६ ॥

तालकंमरिचंकुष्ठंकाचटङ्कनिशावचा ।
निर्गुण्डीनिम्बकरलाबीजंवादलमेववा ॥ २१७ ॥
प्रत्येकंतोलकंचूर्णंचूर्णतुल्यन्तुगुग्गुलुः ।
बाकुच्याःपलिकंग्राह्यंपलंसूतंचगंधकम् ॥ २१८ ॥
लोहस्यद्विपलंचात्रत्रिफलाजलशोधितम् ।
षण्मासावटिकाकार्यागोमूत्रेणनिषेविता ॥ २१९ ॥
कुष्ठशैलेन्द्रवज्राख्योलेहोऽयममृतोपमः ।
अष्टादशानिकुष्ठानिकण्डूदद्रुसकुष्ठकम् ॥ २२० ॥
विद्रधिंगण्डमालाञ्चगर्दभामुपगर्दभाम् ।
प्लीहगुल्मोदरान्हन्तिकासंश्वासंहलीमकम् ॥ २२१ ॥
कामलापाण्डुरोगांश्चश्वयथुंश्चामवातजम् ।
चन्द्रनाथमुखाच्छ्रुत्वागहनानन्दभाषितः ॥ २२२ ॥
एषलोहरसोदिव्योमेधायुर्बलदायकः ।
कालदेशवयोवह्नीन्दृष्ट्वावात्रुटिवर्द्धनम् ॥ २२३ ॥
अनुपानंप्रकर्त्तव्यंवातिकेविश्वकुण्डली ।
पटोलमुद्गैःपित्तेचपर्पटेनापिवारिणा ॥ २२४ ॥
अंकोठदलनीरेणचक्रमर्द्दरसैःकफे ।
केवलेवातिकेपैत्तेगोमूत्रंपरिवर्ज्जयेत् ॥ २२५ ॥
मूत्रस्थानेप्रकर्त्तव्यंछागीदुग्धंनसंशयः ॥ २२६ ॥

इति कुष्ठशैलेन्द्र रसः ।

अर्थ–हरिताल, मरिच, कूठ, कांच, सुहागा, हलदी, वच, सह्मालूके पत्ते, नीमकीछाल, करेलेके बीज या पत्ते, प्रत्येक एकएक तोले लेकर सबका चूर्ण करले और सबचूर्णकी बराबर बापचीकेबीज ४ चारतोले, पारा चार ४ तोले, गंधक ४ चारतोले और त्रिफलेके क्वाथसे शुद्ध किया हुआ लोहेका चूर्ण ८ आठतोले, इन सब द्रव्योंको एकत्र गोमूत्रमें खरलकर छैछै मासेकी गोली बनालेवै, इसको कुष्ठशैलेन्द्रवज्राख्यरस

कहतेहैं। यह रस-अमृतके समानहै, तथा अठारह प्रकारके कोढ़ कण्डू, दद्दु, कुष्ठ, विद्रधि, गण्डमाला, गर्दभा, उपगर्दभा, प्लीहा, गुल्म, उदररोग, खाँसी, श्वास, हलीमक, कामला, पाण्डुरोग और आमवातसे उत्पन्न हुई सूजनको दूरकरैहै। यह श्रीगुरुचन्द्रनाथके मुखसे सुनकर महाराज गहनानन्दने भाषणकियाहै। यह लोहरस दिव्य, मेधा, आयु और बलको बढ़ानेवालाहै। इसको समय, देश, उमर, और अग्निको देखकर कमबढ़तीकरै। अनुपान-वाताधिक्यमें सोंठ और गिलोय, पित्ताधिक्यमें पटोल, पूग और पित्तपापडेका क्वाथ, तथा कफाधिक्यमें अंकोलके पत्तोंका रस और चकवड़के पत्तोंका रस और केवल वात और पित्तरोगमें गोमूत्रको छोड़कर बकरीके दूधकेसाथ गोलियें बनावै ॥ ॥ २१७॥ २१८॥२१९॥२२०॥२२१॥२२२॥२२३॥२२४॥२२५॥२२६॥

करंजैडगजानिम्बंगुडावाकुचिकुष्ठके।
तालकंमरिचंमुस्तंगोमूत्रकर्दमैःसह ॥ २२७ ॥
सर्वकुष्ठहरोलेपोगहनानन्दनिर्म्मितः।
दहेद्दावानलेयद्वन्निदाघतृणसंकुलम् ॥ २२८ ॥
पूर्णचन्द्रकनामायंकुष्ठनाशोभवेत्तथा।
यथाचन्द्रोनिशांमन्दांतमसःपरिवर्जयेत् ॥ २२९ ॥

इति पूर्णचन्द्रलेपः।

अर्थ-करंज, चकवड़, नीम, थूहरकादूध, बापचीकेबीज, कूठ, हरिताल, कालीमिरच और नागरमोथा, इन सबको समानभाग लेकर गोमूत्र और कर्दमके साथ पीसकर लेपकरनेसे कुष्ठरोग नष्ट होताहै ॥ ॥ २२७ ॥ २२८ ॥ २२९ ॥

शतमूलीरसश्चैवकृष्णामूल्यामृताकुची।
चक्रंचैडगजावज्रीसमभागेनलेपयेत् ॥ २३० ॥
वातरक्तंनिहन्त्याशुकुष्ठमन्यंविनाशनम्।
सप्तामृतोभवेल्लेपोगदापन्नोनिशाकरः ॥
श्रीमद्गहननाथेनानिर्मितोविश्वसम्पादे ॥ २३१ ॥

इति सप्तामृतालेपः।

अर्थ-सतावरकारस, श्यामालता, गिलोय, वाकुची, अमलतासके पत्र, चकवड़, और थूहरकादूध, यह सब समानभागले पीसकर लेपकरनेसे-वातरक्त और सर्वप्रकारके कुष्ठ नष्ट होतेहैं ॥ २३० ॥ २३१ ॥

राजवृक्षदलस्याष्टपलंशुद्धंसमुद्धरेत् ।
तथासप्तच्छदस्याष्टपलंशुद्धंविचक्षणः ॥ २३२ ॥
एतत्क्काथेपचेत्तैलंपलान्पंचभिषग्वरः ।
स्नुक्पयोगंधकंपथ्याकरलाबीजमेवच ॥ २३३ ॥
तोलैकमानंतैलेषुदद्यात्पाचनकालतः ।
तैलमूर्च्छनहेत्वर्थंकृष्णवल्लीविषाकुची ॥ २३४ ॥
एषांतोलाचतुर्दद्यात्तैलपाकार्थसिद्धये ।
श्रीमद्गहननाथेनमित्रतैलविनिर्मितम् ।
हन्तिवज्रंतथाकुष्ठंकृमिदोषंविशेषतः ॥ २३५ ॥

इति मित्रतैलम् ।

अर्थ-पकनेके समय मसूरिका पवन सुखादेतीहै, इसकारण इसपै विशोषक पथ्य नहीं देवै, पुष्टिकारक पथ्य देवै । गिलोय, मुलेठी, दाख, मोरटलता और अनारकी छाल, इनका क्काथ बना गुड़ डालके मसूरिकाके पकनेके समय पीवै, इससे मसूरिका शीघ्रही पकजातीहै और वात कुपित नहीं होती ॥ ३४ ॥ ३५ ॥

लिह्याद्वावादरंचूर्णंपाचनार्थंगुडेनतु ।
अनेनाशुत्रिपच्यन्तेवातपित्तकफात्मिका ॥ ३६ ॥
शूलाध्मानपरीतस्यकाम्यमानस्यवायुना ।
धन्वमांसरसाःशस्ताईषत्सैन्धवसंयुताः ॥ ३७ ॥
पंचमुष्टिकयूषस्तुदोषत्रयहरंपरम् ।
साधितो दशमूलार्द्धंशृतेनधन्वजोरसः ॥ ३८ ॥
हन्तिकाम्यंप्रलापंचेत्यनुभूतमनेकधा ॥ ३९ ॥

अर्थ–बेरोंका चूर्ण गुड़में मिलाकर सेवन करनेसेभी मसूरिका पकजातीहै । शूल और आध्मानसे पीड़ित तथा वायुसे कम्पायमान मनुष्यको जंगलदेशके जीवोंके मांसका रस सैंधेनोनके साथ सेवन करनेसे विशेष लाभ होताहै । बेर, कुलथी, मूँग, मूली और सोंठ, इनका यूष पीनेसे त्रिदोषज मसूरिका रोग दूर होजाताहै । दशमूलके साथ, जांगलमांसका रस बनाकर पीनेसे कम्प और प्रलाप दूर होताहै ॥ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

जातीपत्रंसमंजिष्ठादार्वीपूगफलंशमी ।
धात्रीफलंसमधुकंक्कथितंमधुसंयुतम् ॥ ४० ॥
मुखरोगेकण्ठरोगेगण्डूषान्नंप्रशस्यते ।
कुष्ठाभयारजोलिह्यान्मधुनाकण्ठशुद्धये ॥ ४१ ॥

अर्थ–चमेलीके पत्ते, मजीठ, दारुहलदी, सुपारी, छोकरा, आमला और मुलेठी, इनके क्काथमें सहत डालकर गण्डूष धारण करनेसे मुखरोग और कण्ठरोग दूर होताहै । कूट और हरडका चूर्ण सहतके साथ चाटनेसे कण्ठ शुद्ध होताहै ॥ ४० ॥ ४१ ॥

अष्टांगकावलेहोवाकवडश्चार्द्रकादिभिः ।
शेलुत्वक्त्रिफलादार्वीक्काथोरोचनयायुतः ॥ ४२ ॥
अक्ष्णोःसेकंप्रशंसन्तिगवेधुमधुकाम्बुना ।

मधुकंत्रिफलामूर्वीदार्वीत्वङ्नीलमुत्पलम् ॥ ४३ ॥
उशीरंलोध्रमंजिष्ठाप्रलेपाश्चोतनेहिताः ।
गवेधुमधुसिन्धूत्थघृतंवैकंकतंसमम् ॥ ४४ ॥
नेत्रयोरंजनाद्धन्तिशोषंविस्फोटदुर्ज्जयम् ॥ ४५ ॥

अर्थ—अष्टांगावलेह सेवनकरनेसे, अथवा अदरखके रसादिका कवल धारण करनेसे या लिसोडेकी छाल, हरड़ बहेड़ा, आमला, और दारुहलदी, इनका क्वाथ गोलोचनके साथ पीनेसे, या गरहेडुआ और मुलेठीके क्वाथसे आँखोंको सींचनेसे विशेष लाभ होताहै । मुलैठी, हरड़, आमला, बहेड़ा, मूर्वा, दारुहलदीकी छाल, नीलोत्पल, खस, लोध, और मजीठ इनके प्रलेपके द्वारा नेत्रोंमें आश्चोतन प्रयोग करनेसे अथवा गरहेडुआ, सहत, सैंधानोन, घृत और विकंकत इनको पीस नेत्रोंमें अंजनलगानेसे शीघ्रही विस्फोट रोग दूर होताहै ॥ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

अथशुद्धस्यंसूतस्यमूर्छितस्यमृतस्यच ।
धवलापिप्पलीधात्रीरुद्राक्षघृतमाक्षिकैः ॥ ४६ ॥
पापरोगान्तकोयोगःपृथिव्यामेवदुर्लभः ॥ ४७ ॥

अर्थ—शुद्ध और मूर्छित पारेकी भस्म, सफेद कोयल, पीपल, आमला और रुद्राक्ष इन सब औषधियोंको समान भागलेकर सहत और घृतके साथ सेवन करनेसे सर्व प्रकार केमसूरिका रोग दूर होतेहैं॥ ४६॥ ४७॥

इति मसूरिकारोगाध्यायः ।

अथक्षुद्ररोगचिकित्सामाह ।

तत्राजगल्लिकामामांजलौकाभिरुपाचरेत् ।
शुद्धिसौराष्ट्रिकाक्षारकल्कैश्चालेपयेन्मुहुः ॥ १ ॥
इन्द्रलुप्तेसिराविद्धाशिलाकाशीशतुत्थकैः ।
लेपयेत्परितःकल्कैस्तैलंवाऽभ्यञ्जनेहितम् ॥ २ ॥

कुटन्नटंशिखीजातीकरञ्जकरवीरजैः ।
अवगाढपदश्चैवप्रच्छयित्वापुनःपुनः ॥ ३ ॥
गुञ्जाफलैश्चिरैलिम्पेत्केशभूमिंसमन्ततः ॥ ४ ॥

अर्थ-अथ क्षुद्ररोगोंकी चिकित्साका वर्णन करतेहैं-सीप, सोरठकी मट्टी, और जवाखार इन तीनोंको एकत्र पीसकर लेपकरनेसे अजगल्लिका रोग दूर होताहै । इन्द्रलुप्तरोगमें शिरावेध करावे, हरिताल, कसीस, और तूतिया इनको एकत्रपीसकर प्रलेप करनेसे अथवा सिरसे तेल मर्दन करनेसे इन्द्रलुप्त रोग नष्ट होताहै । श्योनाक, चीता, चमेली, करंज और कनेर सबको एकत्र पीसकर, वारंवार मस्तकपै गाढा प्रलेपकर ढक देवे अथवा चौटलीयोंको पीसकर मस्तक पै सर्वत्र प्रलेप करनेसे इन्द्रलुप्त रोग आराम होताहै ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

हस्तिदंतमसीलेपःसतैलमिन्द्रलुप्तजित् ।
हस्तिदंतंमसीकृत्वासुखाश्चैवरसाञ्जनम् ॥ ५ ॥
लोमान्ययेनजायन्तेनृणांपाणितलेष्वपि ।
भल्लातकबृहतीफलगुञ्जामूलफलेभ्यः ॥ ६ ॥
एकेनमधुसहितैर्विलिप्तंसुरपतिलुप्तंशमंयाति ॥ ७ ॥

अर्थ-हाथीके दांतकी स्याहीको तेलमें मिलाकर लेप करनेसे इन्द्रलुप्त नष्ट होताहै । हाथीके दाँतकी स्याहीमें रसौत मिलाकर लेप करनेसे इन्द्रलुप्त रोग दूर होताहै इसको हथेलीमें भी लगानेसे रुयें जमआते हैं । भिलावेकी गुठली बृहतीके फल, चौटली और चौटलीकी जड़ इन चारोंमेंसे किसी एकको सहतके साथ पीसकर प्रलेप करनेसे निश्चय इन्द्रलुप्त रोग आराम होता है ॥ ५ ॥ ६ ॥ ७ ॥

बृहतीफलसंपिष्टंगुञ्जाफलश्चेन्द्रलुप्तस्य ।
कनकनिघृष्टस्यसतोदातव्यंप्रच्छितस्यसदा ॥ ८ ॥
मधुकेन्द्रीवरमूर्वातिलाज्यगोक्षीरभृंगलेपेन ।
अचिराद्भवन्तिकेशाघनदृढमूलायतानृजवः ॥ ९ ॥

अर्थ–बृहतीके फल और गुंजा दोनोंको एकत्र पीसकर लेपकरनेसे अथवा कनक धतूरेको पीसकर मस्तकपै प्रलेप करके मस्तकको ढकलेवे, इससै इन्द्रलुप्तरोग दूर होताहै ॥ ८ ॥ ९ ॥

मालतीकरवीराग्निनक्तमालविपाचितम् ।
तैलमभ्यञ्जनेशस्तमिन्द्रलुप्तविनाशनम् ॥ १० ॥
इदंहित्वरितंहन्तिदारुणंनियतंनृणाम् ॥ ११ ॥
(अग्निश्चित्रकः गोमूत्रेणपाकः)

अर्थ–मालतीके पत्र कनेर, चीता, और करंजकी छाल यह सब ऽ॥ सेर । यथाविधिसे तेलको पकावे । यह तेल बहुत शीघ्र इन्द्रलुप्त और दारुणकरोगको दूर करेहै ॥ १० ॥ ११ ॥

इति मालत्यादितैलम् ।

स्नुहीपयःपयोर्कस्यमार्कवोलांगलीविषम् ।
मूत्रमाजंसगोमूत्रंरक्तिकासेन्द्रदारुणी ॥ १२ ॥
सिद्धार्थतीक्ष्णतैलंचगर्भंदत्वाविपाश्चिता ।
वह्निनामृदुनापक्वंतैलंखालित्यनाशनम् ॥ १३ ॥
कूर्म्मपृष्ठसमानापिरूक्षायारोमत्रक्षरी ॥
दिग्धामानेनजायेतऋक्षणानीरलोमसा ॥ १४ ॥
(लांगलिविषंलांगलीमूलं । रतिकागुंजामूलम् ।
तीक्ष्णज्योतिष्मतीमूलं । केचिच्चसिद्धार्थतीक्ष्णतैल
मितिश्वेतसर्षपतैलंवदन्ति)

अर्थ–तिलकातेल २ सेर. गोमूत्र ४ सेर, बकरीका मूत्र ४ सेर, तथा कल्कके लिये थूहरकादूध, आककादूध, भांगरा, कलिहारीकी जड़, चोटली इन्द्रायणकीजड़, सफेद सरसों और मालकांगुनीकी जड यह

सब ऽ॥सेर। यथाविधिसे तेलको सिद्धकरे। इस तेलको सिरसे मलनेसे खालित्यरोग दूर होताहै ॥ १२ ॥ १३ ॥ १४ ॥

इतिस्नुह्यादितैलम्।

वटावरोहकेशिन्योचूर्णेनादित्यपाचितम्।
गुडूचीस्वरसेतैलमभ्यङ्गात्केशरोपणम् ॥ १५ ॥
(केशिनीभूकेशी।एवंचतुर्गुणम्)

इति आदित्यपाकतैलम्।

अर्थ–वड़के अंकुर, भूकेशीकाचूर्ण और गिलोयके रसमें तेलको मिलाकर धूपमें पकाकर सिरसे मलनेसे सिरपै बाल जम आतेहैं ॥१५॥

तैलंसयष्टीमधुकैःक्षीरेधात्रीफलैःस्मृतम् ॥
नश्यदत्तंजनयतिकेशान्श्मश्रूणिचाप्यथ ॥१६॥
श्वेतसर्षपकल्केनस्नानंदारुणकापहम्।
कार्य्योदारुणकेमूर्ध्निप्रलेपोमधुसंयुतः ॥ १७ ॥
पियालबीजमधुकैःकुष्ठमिश्रैःससैन्धवैः।
काञ्जिकस्थास्त्रिसप्ताहंमासाद्दारुणकापहाः ॥ १८ ॥

अर्थ–तेल २ सेर, दूध ८ सेर, और कल्कके लिये मुलेठीऔर आमला दोनों ऽ॥ सेर। यथाविधिसे तेलको सिद्ध करे। इस तेलका नास लेनेसे केश और श्मश्रू उत्पन्न होजाते हैं। सफेद सरसों को पीसकर शरीर से मलकर स्नान करने से या मस्तकपर प्रलेप करनेसे दारुणक रोग दूर होता है। चिरौंजीकी जड, मुलैठी, कूठ और सैंधानोन यह चारों औषधी समान भाग ले कर २१ दिनतक काँजीमें स्थापन करे, पश्चात् इससे लेप करने से एक महीनेमें दारुणकरोग दूरता है ॥ ॥ १६ ॥ १७ ॥ १८ ॥

नागरंगफलत्वग्भिःस्नानंलेपनकन्तथा।
सहनीलोत्पलकेशवयष्टीमधुतिलैःसदृशामलकम्।
चिरजातमपिशीर्षेदारुणरोगंसमंनयाति ॥ १९ ॥

अर्थ-नारंगीके छुलके को पीसकर स्नान करनेसे अथवा मस्तक पै प्रलेप करने से शीघ्रही दारुणक रोग नष्ट होता है । नीलोत्पल, पुन्नागपुष्प, मुलेठी, और तिल प्रत्येक एक १ भाग, और आमला ४ चारभाग, सबको एकत्र पीसकर मस्तकपै प्रलेप करनेसे बहुत दिनोंका दारुणक रोग दूर होताहै ॥ १९ ॥

चित्रकंदन्तिमूलंचकोषातकीसमन्वितम् ।
कल्कंपिष्ट्वापचेत्तैलंकेशशत्रुविनाशनम् ॥ २० ॥

इति चित्रकादितैलम् ।

अर्थ-तेल २ सेर, जल ८ सेर, और चीता, दंतीकी जड, तथा कडवी तोरई यह सब आधऽ॥सेर । यथाविधिसे तेलको सिद्धकरे । इस तेलको सिरसे मर्दनकरनेसे दारुणकरोग दूर होताहै ॥ २० ॥

गुञ्जाफलैःशृतंतैलंभृङ्गराजरसेनतु ।
कण्डूदारुणहृत्कुष्ठकपालव्याधिनाशनम् ॥ २१ ॥

इति गुञ्जातैलम् ।

अर्थ-तेल२ सेर, भांगरेकारस८ सेर,तथा कल्ककेलिये चौंटलीकी जड ऽ॥ सेर, यथाविधिसे तेलको सिद्ध करे । यह तेल कण्डू, दारुणक, और कपाल कुष्ठको नष्टकरैहै ॥ २१ ॥

भृंगराजस्त्रिफलोत्पलशारिवलोहपुरीषसमन्वितकारि ।
तैलमिदंपचदारुणहारिकुञ्चितकेशघनस्थिरकारि २२॥

इति भृंगराजतैलम् ।

अर्थ-तिलकातेल दो सेर, भांगरेका रस आठसेर, और कल्ककेलिये हरड़, बहेड़ा, आमला, नीलिकमल, अनन्तमूल, लोहेकामल और आमकीगुठली यह सब आध ऽ॥ सेर, यथाविधिसे तेलको सिद्धकर शरीर पै मर्दन करनेसे केश सघन, कुञ्चित और दृढ़होजातेहैं ॥ २२ ॥

हरिद्राद्वयभूनिम्बत्रिफलारिष्टचन्दनैः ।
एतत्तैलमरुंषीणांसिद्धमभ्यंजनेहितम् ॥ २३ ॥

इति हरिद्राद्यंतैलम् ।

अर्थ-तेल दोसेर, जल ८ सेर, और कल्कके लिये हलदी, दारुहलदी,

चीता, हरड़, बहेड़ा, आमला, नीमकी छाल, और लालचंदन, यह सब ऽ॥ आधसेर, यथाविधिसे तैलको सिद्धकरे। यह तेल-निश्चय अरुंषिका रोगको नष्टकरैहै ॥ २३ ॥

कटुतैलमरूंषीघ्नंमूत्रेवंशफलैःस्मृतम् ॥ २४ ॥

इति वंशतैलम्।

अर्थ-कड़वातेल २ दोसेर, गोमूत्र ८ आठसेर, और कल्कके लिये बांसके फल कुटेहुए चावल ऽ॥ आधसेर, यथाविधिसे तैलको सिद्धकर मस्तकपै मलनेसे अरुंषिका रोग दूरहोताहै ॥ २४ ॥

काकमाचीरसेसिद्धंकटुतैलंचतुःपलम्।
मनःशिलासोमराजीबीजसिन्दूरगंधकैः ॥ २५ ॥
शाणमात्रैस्तदभ्यंगाद्धंन्त्यवश्यमरुंषिकाम्।
पामांविचर्चिकाञ्चैवतथान्याञ्छिरसोव्रणान् ॥ २६ ॥

इति काकमाचीतैलम्।

अर्थ-कड़वातेल १ एकसेर, मकोयका रस ४ चार सेर, और कल्ककेलिये मैनशिल, वापचीकेबीज, सिन्दूर और गंधक प्रत्येक ६ छैमासे, यथा विधिसे तेलको सिद्धकरै, इसतेलको मस्तकादिसे मर्दन करनेसे अरुंषिका, पामा, विचर्चिका और शिरोव्रण नष्ट होतेहैं ॥ २५ ॥ २६ ॥

लोहमलामलकल्कैःसजवाकुसुमैर्नरःसदास्नायी।
पलितानीहनपश्यतिगंगास्नायीवपातकानि ॥ २७ ॥
शिरसिलेपंकृत्वाचिरंस्थातव्यः।
नवदग्धशंखचूर्णकांजिकसहितंहिसीसकंघृष्ट्वा।
लेपात्कचानर्कदलानवद्धानशुभ्रान्करोतिनीलभवान् २८

अर्थ-लोहेका मैल, आमला और गुड़हरकेफूल, एकत्र पीसकर मस्तकपै प्रलेप कर पश्चात् स्नान करनेसे पलित रोग दूर होताहै। तत्काल जलाया हुवा शंखका चूना और सीसा इनको काँजीमें पीसकर मस्तक पर प्रलेप करै, और सिरसै आकके पत्ते बांधले तौ धवलबाल नीले होजाते हैं ॥ २७ ॥ २८ ॥

धात्रीफलंद्वयंपथ्येद्वेतथैकंविभीतकम् ।
लोहचूर्णस्यकर्षन्तुकर्षार्द्धंचूतमज्जतः ॥ २९ ॥
पिष्ट्वालोहमयेभाण्डेस्थापयेदुषितंनिशाम् ।
लेपोनिहन्यादचिरादकालपलितंमहत् ॥ ३० ॥

अर्थ-आमले २, हरड २, बहेडा १, लोहेकाचूर्ण दो तोले, और आमकी मज्जा १ एक तोला, इन सब द्रव्योंको एकत्रपीस एकलोहेके बासनमें भरके रखदेवै, दूसरे दिन प्रातःकाल मस्तकपै लेप करनेसे अकालमें केशोंका पकना दूर होजाताहै ॥ २९ ॥ ३० ॥

त्रिफलाचूर्णसंयुक्तंलोहचूर्णविनिःक्षिपेत् ।
ईषत्पक्वेनारिकेलेभृंगराजरसान्विते ॥ ३१ ॥
मासकेन्तुविनिःक्षिप्यसम्यग्दत्वासमुद्धरेत् ।
ततःशिरोमुण्डयित्वालेपंदत्वाभिषग्वरः ॥ ३२ ॥
संवेष्टयकदलीपत्रैर्मोचयेत्सप्तमेदिने ।
क्षालयेत्रिफलाक्वाथैःक्षीरमांसरसाशिनः ॥ ३३ ॥
कपालरंजनंचैतत्कृशीकरणमुत्तमम् ॥ ३४ ॥

इति गर्त्तान्नारिकेलोदकात् ।

अर्थ-त्रिफलेका चूर्ण और लोहेकाचूर्ण, दोनोंको एकत्र भांगरेके रसमें मिलाकर एक नारियलके भीतर भरके एक महीनेतक रक्खारहने देवै, पश्चात् शिरको मुंडवाकर लेपकरै और केलेके पत्तोंको सिरपै बाँध देवै, फिर सातदिनमें खोलै, और त्रिफलेके क्वाथसे सिरको धोवै। दूध और मांसके साथ अन्नका भोजन करै तौ अकालमें बालोंका सफेद होजाना दूर होजाताहै ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

ओड्रकुसुमस्वरसोमधुतुल्योनश्यतःपलितम् ।
योगशतैरप्यजितंमासाज्जयतिनाश्चर्य्यम् ॥ ३५ ॥

अर्थ-गुड़हरके फूलोंका स्वरस, सहतमें मिलाकर नासलेनेसे १ एक महीनेमेंही अकालमें बालोंका पकजाना दूरहोकर केश कृष्णवर्ण हो जातेहै ॥ ३५ ॥

चन्दनंमधुकंमूर्वात्रिफलानीलमुत्पलम्।
कान्तावटावरोहश्चगुडूचींविषमेवच ॥ ३६ ॥
लौहचूर्णतथाकेशीशारिवेद्वेतथैवच।
मार्कवस्वरसेनैवतैलंमृद्वग्निनापचेत् ॥ ३७ ॥
शिरस्युत्पतिताःकेशाजायन्तेयेनकुंचिताः।
दृढमूलामूलाढ्याश्चतथाभ्रमरसन्निभाः ॥
नस्येनाकालपलितंनिहन्त्यात्तैलमुत्तमम् ॥ ३८ ॥

इति चन्दनादितैलम्।

अर्थ-तिलका तेल २ दो सेर, भांगरेका स्वरस ८ आठसेर, तथा कल्कके लिये लालचंदन, मुलैठी, मूर्वा, आमला, हरड, बहेड़ा, नीलेकमल, फूलप्रियंगू, वटांकुर, गिलोय, मृणाल, जारण करकै पुटसे पकाया हुवा लोहा, भूकेशी, अनन्तमूल, और करिया वासाऊ, यह सब औषधी ऽ॥ आधसेर, यथाविधिसे तेलको सिद्धकरै, इस तेलको सिरसे मलनेसे बाल कुंचित, दृढ़मूल, और भौंरेकी समान कृष्णवर्ण होजातेहैं, इस तेलसे नाशलेनेसे, अकालमें उत्पन्न हुवा पलित रोग दूर होजाताहै ॥ ॥ ३६ ॥ ३७ ॥ ३८ ॥

अंजनंमधुकंकृष्णंतार्क्षजंशारिवोत्पलम्।
त्रिफलानीलिकापत्रंकाशीशंमुस्तकंतिलाः ॥ ३९ ॥
आम्रास्थितालपत्रंचफलंपिण्डीतकस्यच।
जम्ब्वाम्राजुनपत्राणिकूर्म्मपित्तंसतुत्थकम् ॥ ४० ॥
भूकेशःशिंशपाश्चैवमार्कवंसत्रिकण्टकम्।
पृथक्कर्षसमान्भागान्तथालौहरजःसमम् ॥ ४१ ॥
तैलप्रस्थमजाक्षीरंधात्रीभृंगरसाढकम्।
पक्कन्तुलौहभाण्डस्थंशिरसोऽभ्यङ्गनस्ययोः ॥ ४२ ॥
यत्नेनयोजयेत्तैलंवराङ्गेविनिपातयेत्।
पतन्तिबिन्दवोयत्रकृष्णत्वमुपजायते ॥ ४३ ॥

भवन्तिकुटिलाःशीघ्रंकेशाःषट्पदकोपमाः ।
खालित्यंपलितंचैवइन्द्रलुप्तञ्चनाशयेत् ॥ ४४ ॥
मेध्यंमंगल्यमायुष्यंबलवर्णकरंशिवम् ।
नीलबिन्दुरितिख्यातंविश्वामित्रेणपूजितम् ॥ ४५ ॥

इति नीलबिन्दुतैलम् ।

अर्थ–तेल २ दोसेर, बकरीका दूध, आमलोंका रस और भांगरेका रस यह तीनों मिले हुए ४ चारसेर, और कल्कके लिये कालासुर्म्मा, मुलैठी, सफेद सुर्म्मा, अनन्तमूल, कमल, हरड़, बहेडा, आमला, नीलेके पत्ते, हीराकसीस, नागरमोथा, तिल, आमलेकी गुठली, ताड़के पत्र, मैनफल, जामुनकेपत्ते, आमकेपत्ते अर्जुनकेपत्ते, कछुएकापित्त, तूतिया, भूकेशी, सीसमकी छाल, भांगरा और गोखरू, प्रत्येक दोदो तोले तथा लोहेका चूर्ण २ दो तोले और अर्जुनकी छालका क्वाथ ४ चारसेर, यथा विधिसे लोहेके बासनमें तेलको सिद्धकरै । इस तेलका नासदेवै या सिरसे मर्दनकरै । इस तेलके बिन्दु सिरपै डालनेसे शीघ्रही कुटिलकेश भौंरेके समान कृष्णवर्ण होजातेहैं । तथा खालित्यरोग, पलितरोग, और इन्द्रलुप्तरोग, दूर होताहै । यह तेल– मेधाको बढावैहै, मंगलदायकहै अवस्थाको स्थापन करैहै, बल और वर्णको बढ़ावैहै । इसको नील बिन्दु तेल कहतेहैं ॥३९॥४०॥४१॥४२॥४३॥४४॥४५॥

भृंगराजरसेकंसेकेशराजरसेतथा ।
त्रिफलायारसेकंसेक्षीरकंसेसुसाधितम् ॥ ४६ ॥
कंसंचातिलतैलस्यलौहपात्रेतुपाकवित् ।
कल्कंमृणालशालूकमंजिष्ठापीतशालकम् ॥ ४७ ॥
नीलिकापद्मबीजञ्चशटीमुस्तंपुनर्नवा ।
वरावात्यालकंकेशीकेशराजंसकेशरम् ॥ ४८ ॥
मण्डूरंचाम्रबीजञ्चश्यामानन्ताप्रियंगुका ।
पाकलंमधुकंझिण्टादेवदारुसपद्मकम् ॥ ४९ ॥
ह्रीवेरंचन्दनंपत्रंमेथीमधुरिकावरी ।

न्यग्रोधोरोचनातुत्थंमाहेन्द्रींकेतकीकेशी ॥ ५० ॥
उत्पलंचौण्ड्रपुष्पंचनीलीलताक्षबीजकम्।
रास्नाचगैरिकंदार्वीपुण्डरीकंरसाञ्जनम् ॥ ५१ ॥
जीवनीयगणोलाक्षाश्रीखंडंभद्रमुस्तकम्।
त्वक्पत्रंवावुषामूलंकृष्णागुरुचलोध्रकम् ॥ ५२ ॥
दत्वापलोन्मितैर्भागैःशनैर्मृद्वग्निनापचेत्।
शिरोमध्यगतान्रोगान्नेत्ररोगांश्चसर्वशः ॥ ५३ ॥
हन्तिवातश्चपित्तंचपलितंकालसंभवम्।
खालित्यमिन्द्रलुप्तञ्चहन्यादेतन्नसंशयः ॥ ५४ ॥
कचान्नीलतरान्कुर्यात्सुस्निग्धान्कुटिलांस्तथा।
नस्याभ्यंजनपानेचतैलमेतत्प्रयोजयेत् ॥ ५५ ॥
यत्रतैलरसस्यास्यपतन्तिबिन्दवःशुभाः।
तत्रकेशाःप्रजायंतेनृणांपाणितलेष्वपि ॥ ५६ ॥
अजातेकेशमस्तेचजातेनष्टेचवापुनः।
तत्रोपजायतेकेशंहन्तिदारुणकंतथा ॥ ५७ ॥

इति बृहद्भृङ्गराजतैलम्। वा५३५८१३१

अर्थ-तिलकातेल आठ सेर, भांगरेका रस ८ आठ सेर, कुकुरभांगरेका रस ८ आठ सेर, त्रिफलेका क्वाथ ८ आठ सेर, गायका दूध ८ आठ सेर, और कल्कके लिये कमलकी नाल, कमलकी जड, मजीठ, पियासाल, नील, कमलगट्टा, कचूर, नागरमोथा, पुनर्नवा, हरड, बहेडा, आमला, भूतकेशी, खिरेटी, कुकुरभांगरा, नागकेशर, मण्डूर, आमके बीज, करियावासाऊ, गौरियावासाऊ, फूलप्रियंगू, कूठ, मुलैठी, पियावासा, देवदारु, पद्माख, सुगंधवाला, लालचंदन, तेजपात, मेथी, सौंफ, सतावर, वडके अंकुर, गोरोचन, तूतिया, बड़ीइन्द्रायन, केतकी, मांसरोहिणी, उत्पल, जवाकेफूल, नीली, बहेडेके बीज, रास्ना, गेरू, दारुहलदी, पुण्डेरिया, रसौत, जीवक, ऋषभक, ऋद्धि, वृद्धि,

मेदा, महामेदा, काकोली, क्षीरकाकोली, जीवन्ती, मुलहठी, मुगवन, मषवन, लाख, लालचंदन, नागरमोथा, दालचीनी, तेजपात, पीले केलेकी जड, कालीअगर, और लोध, प्रत्येक औषधि चार चार तोले यथाविधिसे सबको मिलाकर मन्द मन्द अग्निसे तेलको पकावै। यह तेल–कुटिल केशोंको नील और चिकने करै है। इसको नस्य, अभ्यंजन और पान, इनमें प्रयोग करै। यह तेल–शिरोरोग, नेत्ररोग, वातरोग, पित्तरोग, अकालोत्पन्न पलित रोग, खालित्यरोग, और इन्द्रलुप्त रोगको दूर करै है। इस तेल रूपी रसके जिस जिस स्थलमें बिन्दु गिरते हैं। वहीं केश उत्पन्न हो जाते हैं, यहाँतक कि हथेलीमें भी बाल जम आते हैं। जिस स्थानमें केश नहीं उत्पन्न हुए हैं और जिन स्थानोंमें उत्पन्न होकर नष्ट होगये हैं, उन सब स्थानोंमें इस तेलको लगानेसे शीघ्रही केश उत्पन्न होजाते हैं, यह तेल दारुणक को भी दूर करै है ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ॥५५ ॥ ५६ ॥ ५७ ॥

लोध्रनागवलालेपस्तारुण्यपिडकापहः ।
तद्वद्गोरोचनायुक्तंमरिचंमुखलेपनात् ॥ ५८ ॥
सिद्धार्थकवचालोध्रसैन्धवैश्चप्रलेपनम् ।
वरण्डश्चनिहन्त्याशुपिडकांयौवनोद्भवाम् ॥ ५९ ॥
व्यंगेषुचार्जुनत्वचामंजिष्ठावासमाक्षिका ।
लेपःसनवनीतावाश्वेताश्वखुरजामसी ॥ ६० ॥
(श्वेताश्वखुरदग्धनवनीतेनसमलेपः ।)

अर्थ–लोध और गंगेरनको पीसकर प्रलेप करनेसे मुखके मुहासे दूर होजाते हैं। गोरोचन और काली मिरच, दोनोंको एकत्र पीसकर अथवा सफेद सरसों, वच, लोध और सैंधानोन, इनको एकत्र पीसके लेप करनेसे मुखके मुहासे दूर होजाते हैं। अर्जुनकी छालको अथवा मजीठको सहतमें पीसके, या सफेद रंगके घोडेके खुरको अग्निमें जला स्याही बना नौनीमें मिलाकर लेप करनेसे व्यंग रोग दूर होता है ॥ ५८ ॥ ५९ ॥ ६० ॥

रक्तचंदनमंजिष्ठाकुष्ठलोध्रप्रियंगवः ।
वटाङ्कुरामसूराश्चव्यंगघ्नामुखकान्तिदाः ॥ ६१ ॥
(व्यस्तसमस्तेन)
मधुनादाड़िमार्द्रत्वग्लेपोव्यंगविनाशनः ।
व्यंगजिद्वरुणत्वग्वाछागदुग्धप्रपेषिता ॥ ६२ ॥

अर्थ-लालचंदन, मजीठ, कूठ, लोध, फूलप्रियंगू, वड़के अंकुर, और मसूर, इन सबको एकत्र पीसकर अथवा प्रत्येकको अलग अलग पीसकर प्रलेपकरनेसे व्यंगरोग नष्ट होकर मुखकी कांति बढतीहै । सहत, अनारकीछाल, अदरख और दालचीनी, इनको एकत्र पीसकर लेप करनेसै व्यंगरोग दूर होताहै। बरनेकी छालको बकरीके दूधमें पीसकर प्रलेप करनेसे भी व्यंगरोग दूर होताहै ॥ ६१ ॥ ६२ ॥

केवलान्पयसापिष्टातीक्ष्णान्शाल्मलिकंटकान् ।
आलिप्तंत्र्यहमेतेनभवेत्पद्मोपमोमुखम् ॥ ६३ ॥
श्वेतंपुनर्नवामूलंसर्पाक्षीमूलसंयुतम् ।
उद्वर्त्तनंहरेत्स्त्रीणांअक्षिच्छायाश्चदुःसहाः ॥ ६४ ॥
महिषीक्षीरसंपिष्टमंजनंरक्तचंदनम् ।
कृतोलेपोनिहन्त्याशुमक्षिकांगण्डयोःस्थिताम् ॥ ६५ ॥

अर्थ-केवल तीक्ष्ण सेमलके कांटोंको दूधमें पीसकर प्रलेप करनेसे तीन दिनमें ही व्यंग (झाई) रोग नष्ट होकर मुख कमलके समान सुंदर हो जाता है। सफेद पुनर्नवे की जड और सर्पाक्षी की जडको एकत्र पीसकर उद्वर्त्तन करनेसे स्त्रियोंकी अक्षिच्छाया दूरहोजातीहै । रसौत और लालचंदन भैंसके दूधमें पीसकर प्रलेप करनेसे गण्डस्थितमक्षिकारोग दूर होजाताहै ॥ ६३ ॥ ६४ ॥ ६५ ॥

मनःशिलातथालोध्रंद्विनिशासर्षपाःसमम् ।
वारिपिष्टोहितोलेपोवदनैर्मक्षिकांहरेत् ॥ ६६ ॥
माक्षिकंतालकंतुत्थंराजावर्त्तशिलाजतु ।

महिषाक्षंसर्वतुल्यंपेषयेन्महिषीपयैः ॥ ६७ ॥
सप्ताहंमर्द्दयेद्गाढंव्यंगघ्नंकान्तिवर्द्धनम् ।
महिषीक्षीरमथितमेतदुद्वर्त्तनंहितम् ॥ ६८ ॥
मुखवर्णकरंस्त्रीणांतिलकालंचनाशयेत् ॥ ६९ ॥

अर्थ-मैनशिल, लोध, हलदी, दारुहलदी, और सरसों, इन सबको एकत्रपीसकर मुखपै प्रलेप करनेसे मक्षिकानामक काले रंगके दाग दूर होकर मुख उज्वल कान्तियुक्त होजाताहै । सोनामाखी, हरिताल, तूतिया, राजावर्त्त (रेवटी), शिलाजीत, और भैंसिया गूगल, यह सब औषधि समान भागले एकत्र भैंसके दूधमें पीसके मुखपै प्रलेप करनेसे एक सप्ताहमें व्यंग दूर होकर मुख कांतियुक्त होजाताहै । भैंसकी नौनीको मुखपै मलनेसे स्त्रियोंके मुखकी कान्ति बढ़ती है ॥ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

चतुर्गुणंगवांक्षीरंक्षीरार्द्धंतिलतैलकम् ।
मंजिष्ठाद्विनिशालोध्रतुवरीतालकंशिला ॥ ७० ॥
लाक्षागोरोचनाकुष्टंतथाचकुंकुमद्वयम् ।
गैरिकंशिखितुत्थञ्चवटवृक्षस्यपत्रकम् ॥ ७१ ॥
नागकेशरकालीयपद्मबीजञ्चकेशरम् ।
पारदंगंधकंपत्रंत्वचञ्चप्रतिकार्षिकम् ॥ ७२ ॥
सर्वपाच्यंतैलशेषंम्रक्षणान्मक्षिकापहम् ।
वदनञ्चेन्दुतुल्यंस्यात्सप्तरात्रान्नसंशयः ॥ ७३ ॥

इति प्रथममंजिष्ठाद्यंतैलम् ।

अर्थ-तिलका तेल २ दो सेर, गायका दूध आठ ८ सेर, और कल्कके लिये मजीठ, हलदी, दारुहलदी, दोनों प्रकारकी केशर, गेरू, तूतिया, बड़के पत्ते, नागकेशर, कलम्बक, कमलगट्टा और कमलकेशर, पारा, गंधक, तेजपात, और दालचीनी प्रत्येक दोतोले यथाविधिसे तेलको तय्यार कर मुखपै मालिस करनेसे ७ सात रात्रिमें ही मुखगत मक्षि-

का रोग नष्ट होकर मुख चंद्रमाके समान शोभायमान होजाताहै ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥

मधुयष्टीपलंतद्वत्द्वात्रिंशच्चापलंनिवै ।
पादशेषोभवेत्क्वाथोक्वाथांशंतिलतैलकम् ॥ ७४ ॥
पुनर्मरिचमंजिष्ठप्रत्येकंचपलार्द्धकम् ।
तैलशेषंपचेत्सर्वलेपोऽयंमुखवर्णकृत् ॥ ७५ ॥

इतिद्वितीयमंजिष्ठाद्यंतैलम् ।

अर्थ-मुलैठी ८ आठ तोले, जल बत्तीस ३२ पल, शेष १ सेर, तिलकातेल ८ आठ तोले, और कल्कके लिये काली मिरच २ दो तोले, और मजीठ २ दो तोले। यथा विधिसे तेलको पकावै, जब तेल शेष रहजाय तब उतारलेवै। इस तेलको मुखपै मलनेसे व्यंगरोगादि नष्ट होकर मुख उज्वल हो जाताहै ॥ ७४ ॥ ७५ ॥

मंजिष्ठामधुकंलाक्षामातुलुंगंसयाष्टिकम् ।
कर्षप्रमाणैरेतैस्तुतैलस्यकुडवं पचेत् ॥ ७६ ॥
अजाक्षीरञ्चद्विगुणंशनैर्मृद्वग्निनापचेत् ॥
नीलिकापिडकाव्यंगानभ्यंगादेवनाशयेत् ॥ ७७ ॥
मुखंप्रसन्नोपचितंवलीपलितवर्ज्जितम् ।
सप्तरात्रप्रयोगेणमुखंस्यात्कांचनप्रभम् ॥ ७८ ॥

इतितृतीयमंजिष्ठाद्यंतैलम् ।

अर्थ-तिलकातेल ॥ आधसेर, बकरीका दूध एकसेर, और मजीठ, मुलेठी, लाख, बिजौरानींबू और महुवा, प्रत्येक दो दो तोले सबको मिलाकर मंद मंद अग्निसे तेलको सिद्धकरै। इस तेलको मुखादिसे मर्दन करनेसे नीलिका, पिड़का, व्यंगादि मुख दूषितरोग सात दिनमें नष्ट होजातेहैं। मुखमंडल उज्वल और कांचनके तुल्य दीप्तिमान् हो जाताहै, और वलीपलितादि रोग दूर होजातेहैं ॥ ७६ ॥ ७७ ॥ ७८ ॥

कुंकुमंकिंशुकंलाक्षामंजिष्ठारक्तचंदनम् ।
कालीयकंपद्मकञ्चमातुलुंगस्यकेशरम् ॥ ७९ ॥

कुसुम्भंमधुयष्टीचफलिनीमदयन्तिका ।
निशिगोरोचनापद्ममुत्पलञ्चमनःशिला ॥ ८० ॥
काकोल्यादिसमायुक्तैरेतैरक्षसमैर्भिषक् ।
लाक्षारसपयोभ्याञ्चतैलप्रस्थंविपाचयेत् ॥ ८१ ॥
कुंकुमाद्यमिदन्तैलमभ्यंगात्कांचनोपमम् ।
करोतिवदनंसद्यःपुष्टिलावण्यकान्तिदम् ॥ ८२ ॥
सौभाग्यलक्ष्मीजननंवशीकरणमुत्तमम् ॥ ८३ ॥

इतिकुंकुमाद्यंतैलम् ।

अर्थ–तिलकातेल २ दो सेर, लाखका क्काथ २ दोसेर, गायका दूध २ दो सेर, जल आठ ८ सेर, और कल्कके लिये सर, ढाककेबीज, लाख, मजीठ, लालचंदन, कलम्बक, पद्माख, बिजोरे नीबूकी केशर, कसूमके बीज, मुलेठी, फूलप्रियंगू, मोतियाकेफूल, हलदी, दारुहलदी, मैनशिल, गोरोचन, कमल, कुमुद, काकोली, क्षीरकाकोली, मेदा, महामेदा, जीवक, ऋषभक, ऋद्धि, और वृद्धि प्रत्येक दो दो तोले, यथा विधिसे तैलको सिद्धकरै । इस तेलको मुखपै मलनेसे तत्कालही मुख कांचन के समान हो जाताहै। यह तेल–पुष्टि, लावण्य, कान्ति, सौभाग्य और लक्ष्मीको देै है तथा उत्तम वशीकरणहै ॥ ७९ ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥

कोमलंपद्मिनीपत्रंयःखादेच्छर्करान्वितम् ।
एतन्निश्चित्यानिर्दिष्टंनतस्यगुदनिर्गमः ॥ ८४ ॥
वृक्षाम्लकंचचांगेरीशुण्ठीपाठायवाग्रजम् ।
तक्रेणशीलयेत्पायुभ्रंशार्त्तानलदीपनम् ॥ ८५ ॥

अर्थ–कमलके कोमल पत्तोंको बूराके साथ सेवन करनेसे काँच निकलनी बंद होजातीहै। विषांविल, चांगेरी, सोंठ, पाठ और जवाखार, इन सबको तक्रमें पीसके सेवन करनेसे गुदभ्रंश रोगवाले मनुष्य की अग्नि दीपन होजातीहै ॥ ८४ ॥ ८५ ॥

चांगेरीकोलदध्यम्लयवक्षारसमायुतम्।
घृतमुत्कथितंदेयंगुदभ्रंशरुजापहम्॥
बदरस्यक्वाथःदधिचांगेर्य्यास्वरसः॥ ८६॥

इति चांगेरी घृतम्।

अर्थ-गायकाघी २ दो सेर, चांगेरीका रस २ दो सेर, बेरोंका क्वाथ २ दो सेर, खट्टादही २ दो सेर, और जवाखार ऽ॥ आधसेर। यथाविधिसे तेलको पकावै। इस तेलको मर्द्दन करनेसे गुदभ्रंश दूरहोताहै॥ ८६॥

मूषिकामांसकुडवंदशमूलंपलोन्मितम्।
चित्रकंद्विपलंचात्रक्वाथश्चाष्टगुणेऽम्भसि॥ ८७॥
पादावशेषंकर्त्तव्यंतैलंपाच्यंपयःसमम्।
जीवनीयैस्तुतत्पादैःपचेन्मृद्वग्निनाभिषक्॥ ८८॥
अभ्यंगान्नाशयत्याशुगुदभ्रंशंसुदारुणम्।
भगंदरंगुदेशूलंनाडीदुष्टव्रणापहम्॥ ८९॥

अर्थ-तिलकातेल ४ चार सेर, गायकादूध ४ चारसेर, कल्कके लिये चूहेकामांस ऽ॥ आधसेर, दशमूलकी औषधि प्रत्येक एक एक पल, चीता दो २ पल, जल १२८ एकसौ अटाईस पल, और कल्कके लिये जीवनीय गण १ एक सेर, यथा विधिसे तेलको सिद्धकरै। इसतेलको गुह्यदेशपै मर्द्दन करनेसे दारुण गुदभ्रंश, भगन्दर, गुदशूल, नाडीव्रण, और दुष्टव्रण नष्ट हो जातेहैं॥ ८७॥ ८८॥ ८९॥

इतिक्षुद्ररोगाऽध्यायः।

अथ मुखरोगचिकित्सामाह।

मुखदन्तमूलगलजाःप्रायोरोगाःकफास्रभूयिष्ठाः।
तस्मात्तेषामसकृद्रक्तंविस्रापयेद्दुष्टम्॥ १॥
शुद्धिर्नस्यंकवडाःकटुतिक्ताःकफरक्तहरत्कर्म्म।
यवतृणधान्ययुक्तंरूक्षैर्यूषादिकंहितंतेषु॥ २॥

अर्थ-मुखरोग, मसूड़ेकेरोग और गलरोग, यह सब प्रायः कफ और रक्तजन्य होतेहैं, इस कारण इन सब रोगोंमें वारंवार दुष्ट रुधिरको निकलवाना चाहिये, और वमन, विरेचन, नस्य, कटु और तिक्त द्रव्यों का कवल तथा कफ और दूषित रक्त नाशक क्रिया करनी चाहिये। उक्तरोगोंमें यव और तृणधानोंका भोजन रूक्षद्रव्योंके यूषादिके साथ पथ्यहै ॥ १ ॥ २ ॥

ओष्ठप्रकोपेवातोत्थेशाल्वनेनोपनाहयेत् ।
मस्तिष्केचैवनस्येचतैलंवातहरंस्मृतम् ॥ ३ ॥
श्रीवेष्टकंसर्ज्जरसंगुग्गुलुंसुरदारुच ।
यष्टिमधुकचूर्णञ्चविदध्यात्प्रतिसारणम् ॥ ४ ॥
त्रिकटुःसर्ज्जिकाक्षारःक्षारश्चयवशूकजः ।
क्षौद्रयुक्तंविधातव्यंएतच्चप्रतिसारणम् ॥ ५ ॥
प्रियंगुत्रिफलालोध्रंसक्षौद्रंप्रतिसारणम् ।
हितंचात्रिफलाचूर्णमधुयुक्तंप्रलेपनम् ॥ ६ ॥
तैलाक्तंसर्ज्जचूर्णंचजलधौतमनेकधा ।
लेपतःशतशोदृष्टमोष्टस्फुटननाशनम् ॥ ७ ॥

अर्थ-वातजन्य ओष्ठप्रकोपमें शाल्वनस्वेद प्रयोगकरै, और मस्तिष्करोगमें नासके लिये वातनाशक तेल प्रयोग करने चाहिये। श्रीवेष्टक, राल, गूलर, देवदारु और मुलेठी,इन सब औषधोंका चूर्णकर प्रतिसारण करनेसे, अथवा सोंठ, मिरच, पीपल, सज्जी और जवाखार इनको एकत्रपीस सहतमें मिलाके प्रतिसारण करनेसे या फूलप्रियंगू, हरड़, बहेड़ा आमला और लोध इनको भले प्रकारसे पीस सहतमें मिलाकर प्रतिसारण करनेसे अथवा त्रिफलेके चूर्णको सहतमें मिलाकर प्रलेप करनेसे या सज्जी को वारंवार जलमें धोकर तेलमें मिलाके लेपकरनेसे ओष्ठस्फुटन दूर हो जाताहै ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

काशीशलोध्रकृष्णामनःशिलालप्रियंगूचव्योत्थम् ।
चूर्णमधुसंयुक्तंशीतादेपूतिमांसहरम् ॥ ८ ॥

कुष्ठंदार्वीलोध्रमब्दंसमंगापाठातिक्तातेजनीपीडिकाच।
चूर्णंशस्तंघर्षणंतद्विजानांरक्तस्रावंहन्तिकण्डूरुजश्च॥९॥
प्रपौण्डरीकंमधुकंत्रिफलोत्पलसाधितम्।
तैलंघृतंवानस्येनशीतादंप्रशमंनयेत्॥ १० ॥

अर्थ–कसीस, लोध, पीपल, मैनशिल, हरिताल, फूलप्रियंगु और चव्य, इन सब औषधियोंका चूर्ण सहतमें मिलाकर शीतादरोगमें देनेसे पूतिमांस दूरहोताहै॥ कूठ, दारुहलदी, लोध, नागरमोथा, मजीठ, पाढ़ कुटकी, चव्य, और असबरग, इनके चूर्णसे मसूढोंको घिसनेसे मसूढोंमेंसे रुधिरका निकलना, कण्डू, और पीड़ा दूर हो जातीहै। पुण्डरिया, मुलेठी, त्रिफला, और कमलके साथ सिद्ध किये तेल या घीसे नास देनेसे शीतादरोग दूर होताहै॥ ८॥ ९॥ १०॥

दन्तपुष्पटकेकार्यंतरुणेरक्तमोक्षणम्।
सपंचलवणक्षारंसक्षौद्रंप्रतिसारणम्॥ ११ ॥
विस्राविते दन्तवेष्टव्रणन्तुप्रतिसारयेत्।
शस्त्रेणदन्तवैदर्भेदन्तमूलानिशोधयेत्॥ १२॥
ततःक्षीरंप्रयुंजीतक्रियाःसर्वाश्चशीतलाः।
तैलंमधुककाकोलीशर्करासाधितंहितम्॥ १३ ॥
विद्रधौकटुतिक्तोष्णरूक्षैःकवललेपनम्॥ १४ ॥

अर्थ–नवीनदन्त पुप्पुट रोगमें रक्त मोक्षण (फस्त) कराना हितकारीहै। पांचोंनोन और जवाखारको सहतमें मिलाकर दन्तवेष्ट रोगमें रक्तमोक्षण कराकर पश्चात् प्रतिसारणके द्वारा व्रण नष्ट करे। दन्त वैदर्भ रोगमें दन्तमूलोंको शुद्ध करकै पश्चात् दूध और सर्व प्रकारकी शीतल क्रियाकरै। मुलेठी, काकोली और खाँडके द्वारा सिद्ध किये हुए तेलसेभी दन्तवैदर्भरोग दूर होताहै। कटु, तिक्त, रूक्ष और उष्ण द्रव्योंका कवल और लेपनके द्वारा दन्त विद्रधि रोगकी चिकित्सा करनी चाहिये॥ ११॥ १२॥ १३॥ १४॥

चलद्दन्तास्थिरकरंकार्यंवकुलचर्वणम् ।
दन्तचालेहितंश्रेष्ठंतिलोग्राचर्वणंहितम् ॥ १५ ॥
दन्तकालेतुगण्डूषोबकुलत्वक्कृतोहितः ।
क्काथोवादशमूलस्यसस्नेहःकवलग्रहः ॥ १६ ॥
भद्रमुस्ताभयाव्योषविडंगारिष्टपल्लवैः ।
गोमूत्रपिष्टैर्गुडिकांछायाशुष्कांप्रकल्पयेत् ॥ १७ ॥
तांनिधायमुखेदद्यादन्तचालंजयेद्ध्रुवम् ।

अर्थ–मौलसिरीकी छालको चाबनेसे चलदन्त रोग (दांतोंकाहिलना) स्थिर होजाताहै । तिल, और वच दोनोंको मिलाकर चाबनेसे अथवा मौलसिरीके रसके द्वारा कवल धारण करनेसे या दशमूलके क्काथको घृत या तेलके साथ कुल्ले करनेसे, या नागरमोथा, हरड़, सोंठ, मिरच, पीपल, वायविडंग और नीमके पत्ते इन सब औषधियोंको पीस गोलीबना छायामें सुखाकर मुखमें धारण करनेसे हिलतेहुए दांत स्थिर होजातेहैं ॥ १५ ॥ १६ ॥ १७ ॥

तुलाघृतांनीलसहाचरस्यद्रोणेऽम्भसःसंस्रवणंयथावत् ।
कृत्वाचतुर्भागरसेचतैलंपचेच्छनैरर्द्धपलप्रमाणैः ॥ १८ ॥
कल्कैरनन्ताखदिरेरिमेदाजम्ब्वाम्रयष्टीमधुकोत्पलानाम् ।
तत्तैलमाश्वेवघृतंमुखेनस्थैर्य्यंद्विजानांविदधातिसद्यः ॥ १९

इतिसहाचरतैलम् ।

अर्थ–तिलकातेल २ दो सेर, क्काथके लिये कटसरैया ६। सवाछैसेर, जल ३२ बत्तीस सेर, शेष ८ आठसेर और कल्कके लिये अनन्त मूल, खैर, दुर्गंध खैर, जामुन, आम, मुलैठी और कमल ॥ आधसेर, यथा विधिसे तैलको सिद्धकर मुखमें धारण करनेसै चलदन्त स्थिर हो जातेहैं ॥ १८ ॥ १९ ॥

वकुलस्यफलंलोध्रंवज्रवल्लीकुरुण्टकम् ।
चतुरंगुलबघोलंवाजिकर्णौविनाशनम् ॥ २० ॥

एषांकषायकल्काभ्यांतैलपक्कंमुखेधृतम्।
स्थैर्य्यंकरोतिदन्तानांचलतांपवनेनच ॥ २१ ॥

इतिवकुलाद्यंतैलम्।

अर्थ–तिलका तेल २ दो सेर, जल बत्तीस सेर, काथके लिये मौल सिरीकेफल, लोध, वज्रवल्ली, कटसरैया, अण्ड, बबूर, और पियासाल यह सब ६। सवाछैसेर, शेष ८ आठसेर, और कल्कके लियेभी येही सब औषधि ऽ।। आधसेर यथा विधिसे तैलको सिद्धकरै। इसतेलको मुखमें धारण करनेसे वायु जन्य चलदन्त स्थिर होजातेहैं ॥ २० ॥ २१ ॥

बृहत्यास्तुफलंपिष्ट्वासर्पिषासहदापयेत्।
अस्यधूमोमुखेनैवधार्योदन्तरुजापहः ॥ २२ ॥
नीलीवायसजंघास्तुवज्रीणांमूलमेकैकम्।
संचर्व्यदशनविधृतंदशनकृमिपातनंसद्यः ॥ २३ ॥
दन्तमूलकृमिहरंवासामूलस्यचर्वणम्।
बीजपूरकमूलन्तुवागुजीबीजसंयुतम् ॥ २४ ॥
वर्त्तीकृतंदन्तदत्तंकृमिदन्तकनाशनम्।
स्नूहार्कयोर्वादुग्धेनदन्तच्छिद्रंप्रपूरणम् ॥ २५ ॥
फलान्यम्लानिशीताम्बुरूक्षान्नंदन्तधावनम्।
तथातिकठिनान्भक्षान्दन्तरोगीविवर्जयेत् ॥ २६ ॥

अर्थ–कटाईके फलोंको घृतमें पीसकर उनकाधुआँ मुखमें धारण करनेसे दन्त गतपीडा दूर हो जातीहै। नील, या काकजंघा अथवा थूहरकी जड़को चाबकर दाँतोंमें धारण करनेसे तत्काल दांतोंके कीड़े गिर पड़तेहैं। अडूसेकी जड़को चाबनेसे दन्तमूलगत कृमि नष्ट हो जातेहैं। बिजौरेकी जड़, और बापचीके बीज दोनोंको एकत्र पीस बत्ती बनाके दाँतोंमें रखनेसे कृमिदन्तकरोग दूर होताहै। थूहरका दूध अथवा आकका दूध दाँतोंमें भरनेसेभी कृमिदन्तकरोग नष्ट होताहै। दन्त रोगी अम्लपित्त, शीतलजल, रूखा अन्न, दतौन और अत्यन्त कठिन पदार्थोंका भोजन त्याग देवै ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

बलाक्काथोमाक्षिकसैन्धवगृहधूममालतीयुक्तः ।
गण्डूषेणनिहन्यादुपजिह्वांकण्ठशालूकञ्च ॥ २७ ॥
वचामतिविषांपाठांरास्नांकटुकरोहिणीम् ।
निक्काथ्यपिचुमर्दश्चकवलंतत्रयोजयेत् ॥ २८ ॥
क्षीरसिद्धेषुमुद्गेषुयूषश्चाप्यशनेहितः ।
मरिचातिविषापाठावचाकुष्ठाम्बुदैस्तथा ॥ २९ ॥
क्षौद्रयुक्तैःससिन्धूत्थैर्गलशुण्डींप्रघर्षयेत् ।
उपजिह्वांतथाहन्तिगलशुण्डीमशेषतः ॥
गलशुण्डीहरंतद्वच्छेफालीमूलचर्वणम् ॥ ३० ॥

अर्थ–खिरेटीके क्वाथमें सहत, सैंधानोन, घरकाधुआँ और मालती केफूलोंका चूर्ण मिलाकर गण्डूष धारण करनेसे उपजिह्विका और कण्ठ शालूक रोग दूर होताहै । बच, अतीस, पाठ, रास्ना, कुटकी और नीमकीछाल, इनका क्वाथ बना कवल धारण करनेसे उपजिह्विका और कंठ शालूक रोग दूर होताहै । दूधके साथ मूंगका यूष बनाकर उपजिह्विका और कंठशालूक रोगपै पथ्य देवै । काली मिरच, अतीस, पाढ़, वच, कूठ, और नागरमोथा, इन सब औषधियोंका चूर्ण कर सहत और सैंधानोन मिलाकर घिसनेसे गलशुण्डी रोग और उपजिह्वा रोग दूर होताहै । हारसिंगारकी जड़को चाबनेसै गल शुण्डीरोग दूर होताहै ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

साध्यानांरोहिणीनांचहितंशोणितमोक्षणम् ।
छर्दनंधूमपानञ्चगण्डूषोनस्तकर्म्मच ॥ ३१ ॥
वातिकन्तुगतेरक्तेलवणैःप्रतिसारयेत् ।
क्काथोबृहत्पंचमूलाद्गण्डूषश्चात्रशस्यते ॥ ३२ ॥

अर्थ–साध्यकंठरोहिणी रोगमें रक्तमोक्षण,वमन,धूमपान, गंडूष धारण और नस्य कर्म्म प्रयोगकरना चाहिये । वातज कंठरोहिणी रोगमें प्रथम रक्त मोक्षणकराकर पश्चात् सैंधानोनके चूर्णके द्वारा प्रतिसार अथवा बृहत्पंचमूलके काथका गंडूष धारण करनेसे विशेष लाभ होताहै ३१॥३२

गृहधूमयवक्षारःपाठाव्योषरसांजनम्।
तेजोह्वात्रिफलालौहंचित्रकंचेतिचूर्णितम् ॥ ३३ ॥
सक्षौद्रंधारयेदेतद्गलरोगविनाशनम्।
कालकन्नामतच्चूर्णंदन्तस्यगलरोगनुत् ॥
तेजोऽह्वाचक्रीलौहंजारितपुटितम् ॥ ३४ ॥

इतिकालकचूर्णम्।

अर्थ-घरकाधुआँ, जवाखार, पाढ़, सोंठ, मिरच, पीपल, रसौत, चव्य, हरड़, बहेड़ा, आमला, लोहा और चीतेकी जड़, इन सबको एकत्र पीस सहत मिलाके मुखमें धारण करनेसै दन्तरोग और गलरोग दूर होताहै, इसको कालक चूर्ण कहते हैं ॥ ३३ ॥ ३४ ॥

मनःशिलायवक्षारोहरितालंससैन्धवम्।
दार्वीत्वक्चेतितच्चूर्णमाक्षिकेणसमायुतम् ॥ ३५ ॥
मूर्च्छितंघृतमण्डेनकण्ठरोगेषुधारयेत्।
मुखरोगेषुचश्रेष्ठंपीतकन्नामकीर्त्तितम् ॥ ३६ ॥

इतिपीतकचूर्णम्।

अर्थ-मैनशिल, जवाखार, हरिताल, सैंधानोन और दारुहलदीकी छाल, यह सब समान भागले सहतमिला घृतसेमूर्च्छितकर मूखमें धारण करनेसे कण्ठरोग और मुखरोग आरोग्य होताहै ॥ ३५ ॥ ३६ ॥

जातीपत्रपुनर्नवातिलकणाकौरण्टयकुष्ठंवचा।
शुण्ठीदीप्यहरीतकंसमघृतंचूर्णंमुखेधारितम् ॥ ३७ ॥
वातघ्नंक्रिमिकण्डुशूलदलनंसर्वामयघ्नंसकृत्।
दुर्गन्धादिसमस्तदोषविमलंदन्तश्ववज्रायते ॥ ३८ ॥
सप्तच्छदोशीरपटोलमुस्तहरीतकीतिक्तकरोहिणीभिः।
यष्ट्याह्वराजद्रुमचन्दनैश्चक्काथोहरेत्पाकमुखंनरस्य ॥ ३९ ॥
ताम्रपात्रेक्षणंपाच्यंअभयाचूर्णितंमधु।
कठिनागुड़िकाकार्यादन्तैर्धार्याक्रिमिहरेत् ॥ ४० ॥

अर्थ–चमेलीके पत्ते, पुनर्नवा, तिल, पीपल, पियावाँसा, कूठ, वच सोंठ, अजवायन और हरड़ यह सब द्रव्य समान भागलेकर मुखमें धारणरनेसे–वात, कृमि, कण्डू, शूल और दुर्गन्धादि सम्पूर्ण दोष दूर होकर दन्त निर्म्मल और व्रजके समान दृढ़ होजातेहैं । सतोनेकी छाल खस, पटोल, नागरमोथा, हरड कुटकी, अमलतास और लालचन्दनका क्काथ बनाकर पीनेसे मुखपाक रोग दूर होजाताहै । हरड़का चूर्ण और सहत दोनोंको ताँबेके बासनमें मंद अग्निसै पकाकर शक्त गोली बनाकर दाँतोंमें रखनेसे दाँतोंके कीड़े गिरजातेहैं ॥ ३७ ॥ ३८ ॥ ३९ ॥४०॥

कौशिकंहिंगुसौराष्ट्रींपिष्ट्वाचैवसमंजलैः ।
गुड़िकांधारयेद्दन्तेकृमिशूलहरंपरम् ॥ ४१ ॥
यवचिञ्चाजयापुंखामूलंवाचूर्णमाहरेत् ।
चलदन्तादृढकराःप्रत्येकंदन्तघर्षनात् ॥ ४२ ॥
जातीकुरुण्टपत्रंवाचर्वयेत्प्रातरुत्थितः ।
स्थिराश्चचलितादन्तातत्काष्ठेदंतधावनात् ॥ ४३ ॥

अर्थ–गूगल, हींग, और सोरठकी मिट्टी समानभागले जलमें पीस कर गोली बना दाँतोंमें रखनेसे कृमि शूलरोग नष्ट होताहै । शंखिनी, जयन्ती और शरफोंके की जड़ इनमेंसे किसीएकका चूर्णकर दाँतोंको घिसनेसे हिलते हुए दाँत दृढ होजाते हैं । चमेलीके पत्ते, अथवा पियाबाँसेके पत्ते प्रातःकाल उठकर चाबनेसे तथा चमेलीकी लकड़ी या बाँसे की लकड़ीसे दतौन करनेसे चलदन्त स्थिर होजाते हैं ॥४१॥४२॥४३॥

मुण्डीशुण्ठीवचाकुष्ठंपाठाक्षौद्रविनिश्चितम् ।
गुटिकांधारयेद्दन्तेकृमिशूलहरंभवेत् ॥ ४४ ॥
त्रिसूतंरौप्यमेकन्तुजम्बीराणांद्रवैर्युतम् ।
जम्बीरफलमध्यस्थंवस्त्रवद्धात्र्यहंपचेत् ॥ ४५ ॥
क्षारमध्येसमुद्धृत्यगुटिकाभंततःपुनः ।
भावितंभानुदुग्धेनतालकंसूक्ष्ममुण्डितम् ॥ ४६ ॥
तन्मध्येगुटिकांक्षिप्त्वावस्त्रेबध्वादिनत्रयम् ।

मधुभाण्डगतंपच्यादुद्धृत्यचास्यधारितम् ॥ ४७ ॥
चलांश्चगलितान्दन्तान्सप्ताहात्कुरुतेदृढम् ॥४८॥

अर्थ–गोरख सुण्डी, सोंठ, वच, कूठ और पाढ़ यह सब औषधि समान भागले चूर्णकर सहत मिलाकर गोली बना दाँतोंमें रखनेसे दंतगत कृमि शूल नष्ट होजाताहै । पारा ३ तीन भाग, और रूपा एक १ भाग, दोनोंको एकत्र खरल करै, पश्चात् इसमें जम्भीरीनीबूका रस मिलाकर जँभीरी नीबूके भीतर रख वस्त्रसे बाँध तीन दिनतक पकावै, पश्चात् खूब बारीक पिसी हुई हरितालको आकके दूधमें भावनादे जवाखारके साथ पूर्वोक्तमें मिलाकर गोली बना उक्त जम्भीरी नीबूमेंभर वस्त्रसे बाँध सहतसे भरेहुए भाँडेमें डालकर ३ तीन दिनतक पकावै । इस औषधिको मुखमें धारण करनेसे ७ सात दिनमेंही चलदन्त निश्चल होजातेहैं ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

पारदंविमलाताप्यंत्रिकटुस्ताम्रसैन्धवम् ।
तुल्यंगवांजलैःपिष्टंसुखोष्णंलेपयेन्मुहुः ॥ ४९ ॥
त्रिदिनात्कण्ठशालूकंगलगंडञ्चनाशयेत् ।
तेजोह्वांत्रिफलांलोहंचित्रकंचूर्णयेत्समम् ॥ ५० ॥
सक्षौद्रंलेपयेत्कण्ठंगलरोगप्रशान्तये ।
समंगाधातकीलोध्रश्यामापद्मकरेणुभिः ॥
अवचूर्ण्यंपाचनीयंयुञ्ज्याच्चमुखधावनम् ॥ ५१ ॥

अर्थ–पारा, विमला (सोनामाखीभेद) सोनामाखी, सोंठ, मिरच, पीपल, ताँबा और सैंधानोन, यह सब औषधि समान भाग लेवै, फिर इनको गोमूत्रमें पीस किंचित् गरम करकै वारंवार प्रलेप करनेसे ३ तीन दिनमेंही गलगण्ड और कण्ठशालूक रोग दूर होताहै । चव्य, हरड़, बहेड़ा, आमला, लोहा, चीता, यह सब औषधि समान भागले बारीक चूर्णकरै, पश्चात् इसचूर्णमें सहत मिलाकर कण्ठमें लेपकरनेसे गलरोग दूर होताहै । मजीठ, धायके फूल, लोध, कारियावासाऊ, पद्माख और रेणुका, इनका क्वाथ बनाकर अथवा चूर्णकर तिस क्वाथ

या चूर्णसे मुख धोनेसे सर्व प्रकारके गलरोग दूर होजाते हैं ॥ ॥ ४९ ॥ ५० ॥ ५१ ॥

घनकुष्ठैलाधान्याकयष्टीमध्वेलवालुकैः ।
वदनस्थंपूतिगंधंहरतिमुरालशुनगंधंच ॥ ५२ ॥
(चूर्णैः कवलः)
कोषफलकुष्ठमरुवकभृंगैर्वर्त्तिःकृताघृतावक्त्रे ।
घोरमुखपूतिगंधंहत्वाकुरुतेऽतिकमनीयम् ॥ ५३ ॥

अर्थ–नागरमोथा, कूठ, छोटीइलायची, धनिया, मुलेठी और एलुआ, इन सब औषधियोंका कवल धारण करनेसे अथवा कपूर, कचरी, लशुन और एलुआ इनका चूर्णकर कवल धारण करनेसे मुखकी दुर्गन्ध दूर होती है । जायफल, कूठ, मरुवेके फूल और भांगरा, इन सबद्रव्योंको एकत्रपीस बत्तीबनाकर मुखमें धारणकरनेसे मुख की घोर दुर्गन्ध दूर होजाती है ॥ ५२ ॥ ५३ ॥

इरिमेदत्वक्पलशतमापोथ्यखण्डशःकृत्वा ।
तोयाढकैश्चतुर्भिर्निःक्वाथ्यंचतुर्दशाहेन ॥ ५४ ॥
क्वाथेनतेनमतिमान्तैलस्याद्धाढकंपचेत् ।
कल्कैरक्षमांसैर्मञ्जिष्ठालोध्रमधुकानाम् ॥ ५५ ॥
कट्फललाक्षान्यग्रोधमुस्तसूक्ष्मैला ।
कर्पूरागुरुपद्मकलवंगकंकोलजातीनाम् ॥ ५६ ॥
फलपत्तंगगैरिकवराङ्गगजकुसुमधातकीनाम् ।
सिद्धंभिषग्विदध्यादिदंमुखोत्थेषुरोगेषु ॥ ५७ ॥
परिशीर्णदन्तविद्रधिशौषिरशीताददन्तहर्षेषु ।
कृमिदन्तहरणचालितप्रकृष्टमांसावशीर्णेषु ॥ ५८ ॥
मुखादौकुष्ठेकार्यंप्रागुक्तेष्वामयेषुतैलमिदम् ॥ ५९ ॥

इति इरिमेदाद्यंतैलम् ।

अर्थ–तिलकातेल ८ आठ सेर, क्वाथके लिये खैर ६। सवा छे सेर,

जल ३२ बत्तीस सेर, शेष ८ आठ सेर, इस क्राथको चौदह दिनमें पकावै, तथा कल्कके लिये मजीठ, लोध, मुलेठी, कायफल, लाख, वटांकुर, नागरमोथा, छोटीइलायची, कपूर, अगर, पद्माख, लौंग, कंकोल, जायफल, चमेलीके फूल, लालचंदन, गेरू, दालचीनी, नागकेशर और धायके फूल, प्रत्येक २ दो तोले, यथा विधिसे तेलको सिद्ध करै, यह तेल-सर्व प्रकारके मुखरोग, शीर्णदन्त, दन्तविद्रधि, शौषिर, शीताद, आदि रोगोंको दूर करै है ॥ ५४ ॥ ५५ ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥

तैलंलाक्षारसंक्षीरंपृथक्प्रस्थेसमंपचेत्।
चतुर्गुणेरिमेदक्काथेद्रवैश्चपलसम्मितैः ॥ ६० ॥
लोध्रकट्फलमंजिष्ठापद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तैलंगण्डूषधारणम् ॥ ६१ ॥
दालनंदन्तचालश्चदन्तमोक्षंकपालिकाम्।
शीतादंपूतिवक्रत्वमरुचिंविरसास्यताम् ॥
हन्त्यादाशुगदानेतान्कुर्याद्दन्तानपिस्थिरान् ॥ ६२ ॥

इति लाक्षाद्यंतैलम्।

अर्थ-तिलकातेल २ दो सेर, लाखका काथ २ दो सेर, गायका दूध २ सेर, दुर्गन्ध खैरका काथ ८ आठ सेर, तथा कल्कके लिये-लोध, कायफल, मजीठ, कमलकेशर, पद्माख, लालचंदन, कमल और मुलेठी, प्रत्येक ४ चार तोले, यथा विधिसे तेलको पकाकर गण्डूष धारण करनेसे दालन, दन्तचालन, दन्तमोक्षादि, नाना प्रकारके दंत गत और मुखगत रोग दूर हो जाते है ॥ ६० ॥ ६१ ॥ ६२ ॥

एलालतालवलिकाफलशीतकोष
कोलद्विकानिखदिरस्यकृतेकषाये।
तुल्यांशकानिदशभागमितेनिधाय
प्रोद्भिन्नकेतकिपुटेपुटद्विपाच्य ॥ ६३ ॥
प्रागंशतुल्यशशिनाभितदेकशस्तं

पिष्टानवेनसहकाररसेनहस्तौ ।
लिप्त्वायथाभिलषितांगुटिकांविदध्या
त्स्त्रीपुंसयोर्वदनसौरभवल्गुभूताम् ॥ ६४ ॥

इति सहकारिवटिका ।

अर्थ-इलायची, लताकस्तूरी, लवंगफल, कपूर, जायफल, कंकोल और अगर यह सब औषधि समान भागले दश गुने खैरके क्काथमें मिलाकर केतकी पुटमें स्थापन कर पकावै, शीतल होनेपर निकाल लेवै, पश्चात् इसमें पूर्व भागकी समान एक भाग कपूर और एक भाग कस्तूरी मिला लेवै, फिर कलमी आमके रसको हथेली लेपकर पूर्वोक्त औषधिकी गोलियें बनालेवै । इन गोलियोंको मुखमें धारण करनेसे स्त्री पुरुष दोनोंका मुखमण्डल सुगंधित और कमनीय हो जाताहै ॥ ६३ ६४॥

खदिरस्यतुलांसम्यक्जलद्रोणेविपाचयेत् ।
अष्टभागावशेषेणदद्यादत्रघनीकृते ॥ ६५ ॥
जातीकर्पूरपूगानिकंकोलकफलानिच ।
इत्येषागुटिकाकार्यासुखसौभाग्यवर्द्धनी ॥ ६६ ॥
दन्तोष्ठमुखरोगेषुजिह्वाताल्वाशयेषुच ॥ ६७ ॥

इति स्वल्पखादिर वटिका ।

अर्थ-६ छैसेर खैरके टुकडोंको ३२ बत्तीस सेर जलमें पकावै, जब आठमा भाग शेष रहजाय तब उतारकर छान लेवै,पश्चात् इस छने हुए क्काथको फिर पकावै, जब गाढ़ा होजाय तब जावित्री, कपूर, शीतलचीनी, सुपारी और जायफल, प्रत्येक ४ चार तोले मिलाकर गोली बनालेवै । यह गोली-सुख और सौभाग्यको बढानेवालीहै, तथा मुखरोग, तालुरोग और दन्तरोगादिको दूर करैहै ॥ ६५ ॥ ६६ ॥ ६७ ॥

मायत्रिसारतुलामिरिमेदवल्कलानां
सार्द्धतुलायुगलमम्लघटैश्चतुर्भिः ।
निःक्काथ्यपादमवशिष्यसुवस्त्रपूतं
भूयःपचेदथशनैर्मृदुनानलेन ॥ ६८ ॥

तस्मिन्घनत्वमुपगच्छतिचूर्णमेषां
क्षिप्रंक्षिपेच्चकवडग्रहभागिकानाम् ॥
एलामृणालसितचंदनचंदनाम्बु ।
श्यामातमालविकषाघनलोहयष्टी ॥ ६९ ॥
लज्जाफलत्रयरसांजनधातकीभिः
श्रीपुष्पगैरिककटंकटकट्फलानाम् ।
पद्माह्वलोध्रवटरोहयवासकानां
मांसीनिशासुरभिवल्कलसंयुतानाम् ॥ ७० ॥
कक्कोलजातिफलकोषलवंगकानि
चूर्णीकृतानिविदधीतपलांशिकानि ।
शीतेऽवताय्यंघनसारचतुष्पलञ्च
क्षिप्त्वाकलायसदृशींगुटिकांप्रकुर्यात् ॥ ७१ ॥
शुष्कामुखेविनिहिताविनिवारयन्ति ।
रोगान्गलौष्ठरसनाद्विजतालुजातान् ।
कुर्यान्मुखेसुरभितांपटुतारुचिञ्च
स्थैर्यस्परंदशनगंरसनालघुत्वम् ॥ ७२ ॥

इति बृहत्खादिरवटिका ।

अर्थ–खैरसार १२॥ साढ़ेबारहसेर, और दुर्गन्धखैरकी छाल ॥ ३१। सवाइकतीस सेर, पाकके लिये काँजी ४ द्रोण, शेष १ एकद्रोण रक्खै इसकाढ़ेको उत्तमरीतिसे छानकर फिर पकावै, जब पकते पकते गाढ़ा होजाय तब छोटी इलायची, खस, सफेदचंदन, लालचंदन, सुगंधवाला करियावासाऊ, श्यामतमालकी छाल, मजीठ, नागरमोथा, अगर, मुलेठी, लज्जावंती, हरड़, बहेड़ा, आमला, रसौत, धायकेफूल पुण्डेरिया गेरू, दारुहलदी, कायफल, पद्माख, लोध, वडके अंकुर, धमासा, बाल छड़, हलदी, कुन्दुरु, दालचीनी, शीतलचीनी जायफल, जावित्री और लोंग, प्रत्येक चारचार तोले, मिलादेवै, जब शीतल होजाय तब १६ सोलह तोले कपूरका चूर्ण मिलाकर मटरकी समान गोलियें बनालेवै ।

इन गोलियोंको सुखाकर मुखमें धारण करनेसे-गलरोग, ओष्ठरोग जिह्वारोग, दन्तरोग और तालुरोग दूर होतेहैं। मुखमें सुगंधि, पटुता, और रुचि उत्पन्न होतीहै ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥

मृतसूताभ्रकंतुल्यंमृतलोहंशिलाजतु।
गुग्गुलुश्चशिलाताप्यंसमांशमधुनालिहेत् ॥
मासमात्रप्रयोगेणमुखरोगंविनाशयेत् ॥ ७३ ॥

इति सप्तामृतरसः।

इति मुखरोग चिकित्साध्यायः।

अर्थ-पारेकीभस्म, अभ्रककीभस्म, लोहेकीभस्म, शुद्धशिलाजीत, शुद्धगूगल, मैनशिल और सोनामाखी, यह सब समानभागले चूर्णकर सहतमें मिलाकर चाटनेसे एक महीनेमें ही सर्व प्रकारके मूख रोग दूर हो जाते है और दातोंमें दृढ़ता उत्पन्न होतीहै, और जिह्वामें कोमलता उत्पन्न होती है ॥ ७३ ॥

इति मुखरोगचिकित्सासमाप्ता।

अथकर्णरोगचिकित्सामाह।

सामान्यकर्णरोगेषुघृतपानंरसायनम्।
अव्यायामोऽशिरःस्नानंदिवास्वप्नमभाषणम् ॥ १ ॥
कपित्थमातुलुंगाम्बुशृंगवेररसैःशुभैः।
सुखोष्णैःपूरयेत्कर्णंकर्णशूलोपशान्तये ॥ २ ॥

(कपित्थस्यफलम्)

लशुनार्द्रकशिग्रूणांसुरङ्ग्यामूलकस्यच।
कदल्याःस्वरसःश्रेष्ठंकदुष्णःकर्णपूरणे ॥ ३ ॥

(सुरंगीरक्तशोभांजनः)

अर्थ-सामान्यकर्णरोगोंमें घृतपानही रसायनहै। व्यायाम (कसरत) नहीं करना, सिरसे स्नान नहीं करना, दिनमें नहीं सोना, और बहुत कम बोलना, यह सब कर्ण रोगमें विशेष हितकारी है। कैथ, बिजोरेनीबूका रस और अदरखका रस, इनको गरम करके कान में डालनेसे-कर्णशूल नष्ट होता है। लशुन अदरख, सैंजिना, लाल-

सेकाजिना, मूली और केला, इनका किंचित् गरम रस कानमें भरने सैशूल नष्ट होता है ॥ १ ॥ २ ॥ ३ ॥

आर्द्रकसूर्यावर्त्तशोभाञ्जनमूलकस्वरसाः।
मधुतैलसैन्धवयुताःपृथग्युक्ताःकर्णशूलहराः ॥ ४ ॥
कोष्णाशिग्रुरसःकर्णेतिलतैलेनशूलनुत्।
कर्कपत्रपुटेदग्धःस्नुहीपत्रभवोरसः ॥
कदुष्णःपूरणादेवकर्णशूलनिवारणः ॥ ५ ॥
अर्कस्यपत्रंपरिणामपीतमाज्येनलिप्तंशिखिनावतप्तम्।
अपीड्यतोयंश्रवणेनिषिक्तंनिहन्तिशूलंबहुवेदनञ्च ॥६॥

अर्थ-अदरख, हुलहुल और सैंजिनेकी जडका रस अलग २ सहत, तेल, सैंधानोन के साथ कानमें डालनेसे कर्णशूल नष्ट होता है। किंचित् गरम सैंजिनेका रस तिलोंके तेलमें मिलाकर कानमें डालनेसे कर्णशूल नष्ट होता है। आकके पत्तोंके पुटमें पकाया हुवा थूहरके पत्तोंका रस किंचित् गरम करकै कानमें डालनेसे निश्चय कर्णशूल नष्ट होता है। आकके पकेहुए पीले पत्तोंपे घृत चिपडके आगसे गरम कर कानमें निचोडने से कर्णशूल और अत्यन्त पीडा दूर हो जाती है ॥ ॥ ४ ॥ ५ ॥ ६ ॥

तीव्रशूलार्त्तवेकर्णेसशब्दक्लेदवाहिनि।
बस्तमूत्रंक्षिपेत्कोष्णंसैन्धवेनसमन्वितम् ॥ ७ ॥
अंगारपूर्णात्तैलाक्तादश्वत्थदलखल्लकात्।
च्युतंतैलंजयेत्सद्यःपूरणात्कर्णवेदनाः ॥ ८ ॥

अर्थ-कानमें शूलकी समान तीव्र वेदना, शब्द और क्लेद होय तो बकरेके मूत्रमें सेंधेनोनका चूर्ण डाल गरम करकै कानमें डालै। पीपलके पत्तोंमें तेल या घी मिलाके खरलकर अंगारोंकी आग पै धर देवै, इन अंगारोंमेंसे जो तेलकी बूंदे टपकै, उन बूंदोंको कानमें डालनेसे कानकी पीडा दूर होती है ॥ ७ ॥ ८ ॥

हिंगुतुम्बुरुशुण्ठीभिःसाध्यंतैलन्तुसार्षपम्।
कर्णशूलेप्रधानन्तुपूरणंहितमुच्यते॥ ९॥

इति हिंग्वाद्यंतैलम्।

अर्थ-सरसों का तेल २ दो सेर और कल्कके लिये हींग, कडवी तोंम्बी और सोंठ, यह सब आधसेर, यथाविधिसे तेलको पकावे। इस तेलको कानमें डालनेसे-कर्णशूल नष्ट होताहै॥ ९॥

रास्नाघृतैरण्डसुराह्वविश्वंतुल्यंपुरेणाथविमर्द्यखादेत्।
वातामयीकर्णशिरोगदीचनाडीव्रणंचापिभगन्दरीच॥ १०॥

इति रास्नादि गुग्गुलुः।

अर्थ-रास्ना, घृत, अण्ड, देवदारु, सोंठ, यह सब समान भाग, और सबकी बराबर गूगलले एकत्र खरलकर सेवन करनेसे- वातरोग, कर्ण-रोग, शिरोरोग नाड़ी व्रण और भगंदर रोग नष्ट होजातेहैं॥ १०॥

बालमूलकशुण्ठीनांक्षारोहिंगुसनागरम्।
शतपुष्पावचाकुष्ठंदारुशिग्रुरसांजनम्॥ ११॥
सौवर्चलंयवक्षारःस्वर्जिकोद्भिदसैन्धवम्।
मातुलुंगरसंचैवकदल्यारसएवच॥ १२॥
तैलमेभिर्विपक्तव्यंकर्णशूलहरंपरम्।
बाधिर्य्यंकर्णनादश्चपूयास्रावश्चदारुणः॥ १३॥
पूरणादस्यतैलस्यक्रमयःकर्णसंश्रिताः।
क्षिप्रंविनाशंगच्छन्तिकृष्णात्रेयस्यशासनात्॥ १४॥
क्षारतैलमिदंश्रेष्ठंमुखकर्णामयापहम्।
मधुप्रधानंशुक्तञ्चमधुशुक्तंतथापरम्॥ १५॥
जम्बीरस्यफलरसंपिप्पलीमूलसंयुतम्।
मधुभाण्डेविनिक्षिप्यधान्यराशौनिधापयेत्॥ १६॥
मासेनतज्जातरसंमधुशुक्तमुदाहृतम्॥ १७॥

इति क्षारतैलम्।

तिलकातेल दोसेर, बिजौरे नीबूकारस २ दोसेर, केलेका रस २ सेर, और कल्कके लिये कच्ची सूखी मूलीका खार, हींग, सोंठ, सोया, वच, कूठ, देवदारु, सैंजिनेकी जडकी छाल, रसौत, कालानोन, जवाखार, सज्जी, औद्भिदनोन, और सैंधेनोनका चूर्ण, प्रत्येक ऽ॥ आधसेर, यथा विधिसे तेलको पकावै। यहतेल- कर्णशूल, बधिरता, कर्णनाद, पूयस्राव, और कानके कीडोंको दूर करैहै, तथा मुख और सम्पूर्ण कानके रोगोंको दूर करैहै। यह क्षारतेल कृष्णात्रेयने कहाहै। अनुपान-मधु प्रधान शुक्त तथा मधुशुक्तहै। मधुशुक्त बनानेकी विधि यहहै किजम्भीरी, निम्बूका रस और पीपलामूलके चूर्णको सहतसे भरेहुए बासनमें डालकै धानोंके ढेरमें धरदेवै,पश्चात् १ एक महीनेके बाद निकाललेवै, उसबासनकेही रसको मधुशुक्त कहते हैं ॥११॥१२॥१३॥१४॥१५॥१६॥१७॥

गुडविश्वाम्बुनानस्यंनादबाधिर्ययोर्हितम् ॥ १८ ॥

अर्थ-सोंठके काथमें गुड डालकर नासदेनेसे कर्णनाद और बधिरता दूरहोतीहै ॥ १८ ॥

स्वर्जिकामूलकंशुष्कंहिंगुकृष्णामहौषधम् ।
शतपुष्पाचतैस्तैलंपक्त्वाशुक्तचतुर्गुणम् ॥ १९ ॥
प्रनादशूलबाधिर्यस्रवश्चाशुव्यपोहति ॥ २० ॥

इति स्वर्जिकाद्यं तैलम् ।

अर्थ-तेल दो २ सेर, काँजी ८ आठसेर, और कल्कके लिये सज्जी, सूखीमूली, हींग, पीपल, सोंठ, और सोया, यह सब ऽ॥ आधसेर, यथाविधिसे तेलको सिद्धकरै। इस तेलको कानमें डालनेसे कर्णनाद, कर्णशूल, बधिरता और पूयस्राव दूरहोताहै ॥ १९ ॥ २० ॥

दशमूलीकषायेणतैलप्रस्थंविपाचयेत् ।
एतत्कल्कंप्रदायैवबाधिर्येपरमौषधम् ॥ २१ ॥

इति दशमूलीतैलम् ।

अर्थ-तेल २ दो सेर, दशमूलका काथ ८ आठसेर, तथा कल्कके लियेभी दशमूलका चूर्ण ऽ॥ आधसेर, यथाविधिसे तेलको पकाकर कानमें डालनेसे-बधिरता दूरहोतीहै ॥ २१ ॥

फलंबिल्वस्यमूत्रेणपिष्ट्वातैलंविपाचयेत् ।
साजक्षीरंतद्धिहरेद्बाधिर्येकर्णपूरणम् ॥ २२ ॥

इति बिल्वतैलम् ।

अर्थ-तेल २ दोसेर, बकरीकादूध ८ आठसेर, और कल्कके लिये गोमूत्रमें पिसाहुवा तेल ऽ॥ आधसेर, यथाविधिसे तेलको सिद्धकर कानमें डालनेसे बधिरता दूरहोजातीहै ॥ २२ ॥

जम्ब्वाम्रपत्रंतरुणंसमांशंकापित्थकर्पासफलश्चसार्द्रम् ।
क्षुद्रारसन्तंमधुनाविमिश्रंस्रावापहंसप्रवदन्तितज्ज्ञाः २३
चूर्णाधिकन्तुताम्बूलंसंचर्व्यास्यरसेनतु ।
पूरणान्नियतन्त्याशुमृताःकारण्डकादयः ॥ २४ ॥
नीलबह्वारसस्तैलसिन्धुकांजिकसंयुतम् ।
कदुष्णापूरणात्कर्णेनिःशेषकृमिपातनम् ॥ २५ ॥
घृष्टंरसांजनंनार्याःक्षीरेणक्षौद्रसंयुतः ।
प्रशस्यतेचिरोत्थेचसास्रावेपूतिकर्णके ॥ २६ ॥
निर्गुण्डीस्वरसन्तैलंसिन्धुधूमरजोगुडः ।
पूरणात्पूतिकर्णस्यशमनोमधुसंयुतः ॥
जातीपत्ररसेतैलंविपक्वंपूतिकर्णजित् ॥ २७ ॥

इति जातीतैलम् ।

अर्थ-कच्चे जामुनके पत्ते, कच्चे आमके पत्ते, कच्चा कैथकाफल, कच्चे कपासके फल, और अदरख इनको समान भागले कूटकर रस निकाल लेवै, पश्चात् इस रसमें सहत मिलाकर कानमें डालनेसे पूयादिस्राव दूरहोताहै । पानमें अधिक चूनालगाकर पानको चाबकै तिसकारस कानमें डालनेसे कानके समस्त कीड़े मरजातेहैं । नीलबोनेकारस, तेल, सैंधानोन और कांजी इनको एकत्र किंचित् गरम करके कानमें डालनेसे कानके सब कीड़े गिरजातेहैं । स्त्रीके दूधमें रसौतको घिसकर सहत मिलाके कानमें डालनेसे बहुत दिनोंका स्राव युक्त पूतिकर्ण नष्ट होजाताहै । सह्मालूका रस, तेल, सेंधानोन, घरके धुंएका चूर्ण, गुड़,

और सहत एकत्र मिलाकर कानमें डालनेसे पूतिकर्णरोग दूरहोताहै । चमेलीके पत्तोंके रसमें तेलको पकाकर कानमें डालनेसे पूतिकर्ण रोग दूरहोजाताहै ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

कुष्ठहिंगुवचादारुशताह्वाविश्वसैन्धवम् ।
पूतिकर्णापहंतैलंवस्तमूत्रेण साधितम् ॥ २८ ॥

इति कुष्ठादि तैलम् ।

अर्थ-तिलकातेल २ दोसेर, बकरीका मूत्र ८ आठसेर तथा कल्कके लिये कूठ, हींग, वच, दारुहलदी, सोया, सोंठ, और सैंधानोन, यह ऽ॥ आधसेर । यथा नियमसे तेलको सिद्धकर कानमें भरने से पूति कर्ण रोग शान्त होताहै ॥ २८ ॥

प्रस्थंशम्बूकमांसस्यकटुतैलञ्चतत्समम् ।
कुष्ठंभृंगोरजोवासाह्यर्कपत्रंस्नुहीघनम् ॥ २९ ॥
बिल्वंशालिञ्चपत्रंचकेशरंनागकेशरम् ।
द्राक्षाचातिविषाचैवयष्टीमधुकमेवच ॥ ३० ॥
शटीचैरण्डकार्पासभृङ्गकेशरजस्यच ।
एतेषांकर्षमादायपचेत्तैलंभिषग्वरः ॥ ३१ ॥
तस्यपूरणमात्रेणकर्णनाडीप्रशाम्यति ।
वाधिर्यंकर्णनादञ्चपूयास्रावंसुदारुणम् ॥ ३२ ॥
चक्षुरोगंशिरोरोगंनाशयेत्तिमिरार्बुदम् ॥ ३३ ॥

इति बृहत्शम्बूकाद्यं तैलम् ।

अर्थ-कड़वातेल २ दो सेर, शम्बूकका मांस २ दो सेर, तथा कूठ, दालचीनी, पित्तपापडा, अडूसा, आकके पत्ते, थूहरके पत्ते, नागरमोथा, वेलशालिंचके पत्र, केशर, नागकेशर, दाख, अतीस, मुलेठी, कचूर, अण्ड, कपास, भांगरा और कुकुरभांगरा यह सब ऽ॥ आधसेर, यथाविधिसे तेलको पकाकर कानमें डालनेसे कर्णनाली, बधिरता, कर्णनाद, नेत्ररोग, शिरोरोग, तिमिररोग और अर्बुदरोग नष्ट होता है ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥

शम्बूकमांसकल्केनकटुतैलंविपाचयेत् ।
अस्यपूरणमात्रेणकर्णनाडीप्रशाम्यति ॥ ३४ ॥

इति शम्बूकाद्यंतैलम् ।

अर्थ-कड़वा तेल २ दोसेर, और शम्बूकका मांस ऽ॥आधसेर दोनोंको मिलाकर यथाविधिसे टपकाकर कानमें डालनेसे कर्ण नाडी रोग नष्ट होताहै ॥ ३४ ॥

निशागन्धपलेपक्कंकटुतैलंपलाष्टकम् ।
धुस्तूरपत्रजरसेकर्णनाड़ीजिदुत्तमम् ॥ ३५ ॥

इति धुस्तूर तैलम् ।

अर्थ-कड़वातेल १ एकसेर, धतूरेके पत्तोंका स्वरस ४ चार सेर, और कल्कके लिये हलदी ४ चार तोले और गंधक चार ४ तोले, यथाविधिसे तेलको पकाकर कानमें डालनेसे कर्ण नाली रोग दूर होताहै ॥ ३५ ॥

केतकीशिग्रुलवणमारनालेनपेषयेत् ।
कर्णमूलस्थितंस्फोटंलेपनाच्चव्यथापहम् ॥ ३६ ॥
पुत्रजीवफलमज्जाज्वलेचैतत्प्रलेपिते ।
शोथोहन्तिगलेकर्णेकर्णस्फोटंविशेषतः ॥ ३७ ॥

अर्थ-केतकी, सैंजिना, सैंधानोन और कांजी इन चारोंको एकत्र पीसके लेपकरनेसे कर्णशूल स्थित पीड़ा और स्फोटक नाश होजातेहैं। पतिजियाके फलोंकी मींगको जलमें पीसके लेप करनेसे कर्णशोथ, गलशोथ, और कर्णस्फोट नष्ट होताहै ॥ ३६ ॥ ३७ ॥

मूषलीकन्दमूलञ्चमाहिषीनवनीतयुक् ।
गोलयित्वाक्षिपेद्भाण्डेधान्यराशौनिवेशयेत् ॥ ३८ ॥
सप्ताहादुद्धृतंलेपंकर्णपालीविवर्द्धनम् ।
चर्म्मचटस्यरक्तेनलेपात्कर्णौविवर्द्धते ॥ ३९ ॥

अश्वगन्धावचाकुष्ठंगजपिप्पलिकासमम् ।
महिषीनवनीतेनलेपात्कर्णोविवर्द्धते ॥ ४० ॥

अर्थ-मुसलीकी जड़को भैंसके माखनमें मिलाके गोला बनालेवै, उस गोलेको एकबासनमें स्थापनकर उस बासनको धानोंके ढेरमें धरदेवै, सात ७ दिनके बाद उसको निकालकर कानपे प्रलेप करनेसे कर्णपाली बढ़ताहै । चर्म्मचटके रुधिरका लेप करनेसे कर्ण बढ़ताहै । असगन्ध, वच, कूठ, और गजपीपल समान भागले भैंसके दूधमें पीसकर लेप करनेसे कर्णपाली बढ़ताहै ॥ ३८ ॥ ३९ ॥ ४० ॥

कल्केनजीवनीयेनतैलंपयसिसाधितम् ।
अनूपमांसक्काथेनपालिशोषणवर्द्धनम् ॥ ४१ ॥

इति जीवनाद्यंतैलम् ।

अर्थ-तेल २ दोसेर, क्काथके लिये अनूपदेशके जीवोंके मांसका क्काथ ८ आठसेर और कल्कके लिये जीवनीयगणकी औषधि आधसेर यथाविधिसे तेलको पकाकर कानोंको मलनेसे शुष्क कर्णपाली बढ़जातीहै ॥ ४१ ॥

निशागन्धपलेद्वेतुकटुतैलंपलाष्टकम् ।
धूर्त्तपत्ररसेसिद्धंकर्णनाड़ीजिदुत्तमम् ॥ ४२ ॥

इति गन्धकतैलम् ।

अर्थ-कड़वातेल १ एकसेर, गंधक और हलदी प्रत्येक चारतोले धतूरेके पत्तोंका रस २ दोसेर, यथाविधिसे तेलको पकाकर कानमें डालनेसे कर्णनाड़ी रोग नष्ट होताहै ॥ ४२ ॥

निर्गुण्डीस्वरसैस्तैलंसिन्धुधूमरजोगुडः ।
पूरणात्पूतिकर्णस्यशमनोमधुसंयुतः ॥ ४३ ॥

इति निर्गुण्डीतैलम् ।

अर्थ-कड़वातेल २ दो सेर, सह्मालूकारस ८ आठसेर, और कल्कके लिये सैंधानोन, घरका धुआँ और गुड़ ऽ॥ आधसेर । यथाविधिसे तेलको पकाकर सहतके साथ प्रयोग करनेसे पूति कर्ण रोग शांत होताहै ॥ ४३ ॥

शतावरीवाजिगन्धापयस्थैरण्डबीजकैः ।
तैलंपक्वंसमंक्षीरंपालीनांपुष्टिवर्द्धनम् ॥ ४४ ॥

इति शतावरीतैलम् ।

इति कर्णरोगाऽध्यायः ।

अर्थ-तेल २ दो सेर, गायका दूध २ सेर, और कल्कके लिये सतावर असगंध, विदारीकन्द और अंडके बीज ऽ॥ आधसेर, यथाविधिसे तेलको सिद्धकर कानमें मलनेसे कर्णपाली पुष्ट होतीहै ॥ ४४ ॥

इति कर्णरोगाऽध्यायः ।

अथ नासारोगचिकित्सामाह ।

व्योषचित्रकतालीशतिन्तिडीचाम्लवेतसम् ।
सचव्यजाजीतुल्यांशंएलात्वक्पत्रपादिकम् ॥ १ ॥
तच्चव्योषादिकंचूर्णपुराणगुडसंयुतम् ।
पीनसश्वासकासघ्नंरुचिस्वरकरम्परम् ॥ २ ॥

अर्थ-सोंठ, मिरच, पीपल, चीतेकी जड,तालीसपत्र, इमली, अमलवेंत, चव्य, और जीरा, प्रत्येक औषधिका चूर्ण १ एक भाग, और दालचीनी, तेजपात, और छोटी इलायची प्रत्येक चूर्ण चौथाई भाग; सबको एकत्र पीस पुराना गुड़ मिलाकर सेवन करनेसे पीनस, श्वास और कास रोग दूर होताहै, तथा रुचि और स्वरको करैहै ॥ १ ॥ २ ॥

यःपिबतिशयनकालेशयनारूढःसुशीतलंभूवि ।
सलिलंपीनसयुक्तःसोऽपिचमुच्यतेऽत्रयोगेन ॥ ३ ॥
द्वेपलेदाडिमादष्टौखण्डाद्व्योषपलद्वयम् ।
त्रिसुगन्धिपलश्चैकंचूर्णमेकत्रकारयेत् ॥ ४ ॥
दीपनंरुचिरंस्वर्य्यंपीनसज्वरकासनुत् ॥

इति दाड़िमाद्यंचूर्णम् ।

अर्थ-जो मनुष्य रात्रिमें सोतेहुए शय्यापर शीतल जलको पीते उनके पीनसरोग निश्चय दूर होजाताहै । अनारकी छाल २ दोपल

खांड ८ आठपल, सोंठ २ दोपल, पीपल २ दोपल, कालीमिरच २ दो पल, छोटी इलायची १ एक पल, तेजपात १ एक पल, और दालचीनी १ एकपल, सबको एकत्र पीसकर चूर्ण करलेवै। यह चूर्ण-अग्नि प्रदीपक रुचिकारक, स्वरको शुद्ध करनेवाला, पीनस रोगको हरनेवाला ज्वरको नष्ट करनेवाला, और खांसीको दूर करैहै ॥ ३ ॥ ४ ॥

त्रिफलाचपलासैन्धवचूर्णंसक्षौद्रमशितमथसायम्।
पीनसशोषश्वासान्जयतीहकफसंभवान्वितम् ॥ ५ ॥

अर्थ-हरड, बहेडा, आमला, पीपल और सैंधानोन यह सब औषधि समान भागले बारीक चूर्णकर सहतके साथ सायंकालको सेवन करनेसे पीनस, शोष श्वास और कफजनित रोग दूर होतेहैं ॥ ५ ॥

पाठाद्विरजनीमूर्वापिप्पलीजातिपल्लवैः।
दन्त्याचतैलंसंसिद्धंनस्यंसम्पक्वपीनसे ॥ ६ ॥
इति पाठाद्यंतैलम्।

अर्थ-पाढ़, हलदी, दारुहलदी, मूर्वा, पीपल, चमेलीके पत्ते, और दन्तीकी जड़, यह सब औषधि कल्कके लिये ऽ॥ आधसेर, और तेल २ दो सेर, इस तेलको पकाकर नास देनेसे पक्व पीनस रोग शान्त होता है ॥ ६ ॥

कलिङ्गहिङ्गुमरिचलाक्षासुरसकट्फलैः।
कुष्ठोग्राशिग्रुजन्तुघ्नैरवपीडःप्रशस्यते ॥ ७ ॥
तैरेवमूत्रसंयुक्तैःकटुतैलंविपाचयेत्।
अपीनसेपूतिनस्येशमनंकीर्त्तितंपरम् ॥ ८ ॥
इति कलिंगाद्यंतैलम्।

कौटजंत्रिफलानिम्बंपटोलघननागरैः ॥ ४४ ॥
भावितानिदशाहानिरसेद्वित्रिगुणेनवा ।
शिलाजतुपलान्यष्टौतावतीसितशर्करा ॥ ४५ ॥
त्वक्क्षीरीपिप्पलीधात्रीकर्कटाख्यपलोन्मिता ।
निदिग्धिकाफलमूलाभ्यांपलंयुंजात्रिजातकम् ॥ ४६ ॥
मधुनःपलसंयुक्तंकुर्यादक्षसमान्गुडान् ।
दाडिमाम्बुपयःपाक्षिरसतोयसुवासनान् ॥ ४७ ॥
तांभक्षयित्वात्रापिबेन्निरन्नोभुक्तएववा ।
पाण्डुकुष्ठज्वरप्लीहतमकार्शोभगन्दरान् ॥ ४८ ॥
पूतिकृन्मूत्रशुक्रादिदोषमेहमहोदरम् ।
कासासृक्रक्तपित्तंचप्रदरंरक्तसम्भवम् ॥ ४९ ॥
तान्सर्वान्सुतरान्हन्तिसर्वदोषहराःशिवाः ॥ ५० ॥

इति शिलाजतुवटिका ।

अर्थ–प्रदर रोगमें कुटजाष्टक विशेष हितकारीहै । पारा, और गंधक, दोनोंको समान भाग लेकर लालकमलके पत्तोंके रसमें खरल करै, जब एकपहर होजाय तब आधारस निकालके आधेको खरल करै । पश्चात् कुडेकी छाल, त्रिफला, नीमकी छाल, पटोल, नागर मोथा और सोंठ, इनके दुगुने या तिगुने रसमें १० दिन भावनादेवै । फिर इसमें आठ ८ पल शिलाजीत, मिश्री ८ आठपल, वंशलोचन, पीपल, आमला,

काकडासींगी, खल और जड़ सहित कटेरी और त्रिजातक प्रत्येकका चूर्ण चार चार तोले और सहत चारतोले मिलाकर दो दो तोलेकी गोलियाँ बनालेवै, इस रसको अनारके रसके साथ या दूधके साथ अथवा पक्षियोंके मांसके रसके साथ नित्ये या भोजनके ऊपर खावै। यह रस- पाण्डुरोग, कुष्ठ, ज्वर, प्लीहा, तमकरोग, बवासीर, भगंदर, मूत्र शुक्रादि दोष प्रमेह, महोदर, खाँसी, रक्तपित्त रक्तप्रदर, इन सब रोगोंको दूर करैहै ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥

शुद्धसूतंतथागंधंशुद्धवंगकरूप्यकम् ।
खर्परंचवराटंचशाणमानंपृथक्पृथक् ॥ ५१ ॥
तृतीयतोलकंग्राह्यंलौहचूर्णंददौसुधीः ।
कन्यानीरेणसंमर्द्यदिनमेकंभिषग्वरः ॥
असाध्यप्रदरंहन्तिभक्षणान्नात्रसंशयः ॥ ५२ ॥

इति प्रदरान्तकोरसः।

इति प्रदराध्यायः।

अर्थ–पारा, गंधक, वंग, रूपा, खपरिया और कौडी, प्रत्येकका चूर्ण चार चार मासे, और लोहेका चूर्ण तीन तोले, सबको एकत्र मिलाकर घीकारके रसमें एकदिन खरलकर गोली बनालेवै। यह गोली असाध्य प्रदर रोगको दूर करैहै ॥ ५१ ॥ ५२ ॥

इति प्रदराधिकारः।

अथसोमरोगचिकित्सामाह ।

स्त्रीणामतिप्रसंगाद्वाशोकाद्वाथप्रमादपि ।
अभिचारिकदोषाद्वागरदोषात्तथैवच ॥ १ ॥
आपःसर्वशरीरेषुक्षुभ्यन्तिप्रस्रवन्तिच ।
तासांताःप्रच्युताःस्थानान्मूत्रमार्गंव्रजन्तिहि ॥ २ ॥
प्रसन्नाविमलाःशीताःनिर्गन्धानिरुजःसिता ।
स्रवन्तिचातिमात्रन्तुदौर्बल्यंशक्तिहीनता ॥ ३ ॥
शिरसःशिथिलत्वंचमुखतालूकशोषणम् ।

मूर्च्छाजृम्भाप्रलापंचदग्धंवाचातिमात्रतः ॥ ४ ॥
भक्षभोज्यैश्चपेयैश्चतृप्तिंनलभतेसदा ।
सोमरोगइतिज्ञेयोदेहेसोमक्षयात्स्त्रीणाम् ॥ ५ ॥
शरीरधारणाच्चापिसोमइत्यभिधीयते ।
सोऽतिक्रान्तंक्रमेणैवस्रवेन्मूत्रमभीक्ष्णशः ॥ ६ ॥
मूत्रातिसारमप्येवंतमाहुर्बलनाशनम् ॥ ७ ॥

इति सोमरोगनिदानम् ।

अर्थ-अत्यन्त मैथुन, शोक, परिश्रम, अभिचार, और विषदोष, इन सब कारणोंसे स्त्रियोंके सर्व शरीरगत जल क्षोभित होकर गिरैहै, तब वह अपने स्थानसे हटकर मूत्रके मार्गसे निकलतेहैं। प्रसन्न, विमल, शीतल निर्गन्ध, पीड़ा रहित, सफेद रंगका अधिक जल मूत्र मार्गसे निकलतेहैं। इससे स्त्रियोंके दुर्बलता, शक्तिहीनता, मस्तकमें शिथिलता, मुखशोष, तालुशोष मूर्छा, जम्भाई, प्रलाप, और शरीरमें रूक्षता उत्पन्न होतीहै। तथा भक्ष्य, भोज्य, और पेय पदार्थोंके पीनेसे कदापि तृप्ति नहोवैहै। स्त्रियोंके शरीरमें सोमके नास होनेसे सोमरोग होताहै। शरीरके धारण करनेसे इसको सोमरोग कहतेहैं। जिस सोमरोगमें अति क्रमसे वारंवार योनिके द्वारा अत्यन्त मूत्र निर्गत होवै, उसको मूत्रातिसार कहतेहैं। इससे स्त्रियोंका बल कम होताहै ॥ १ ॥ २ ॥३॥ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

कदलीनांफलंपक्कंधात्रीफलरसंमधु ।
शर्करापयसापेयंसोमधारणमुत्तमम् ॥ ८ ॥
माषचूर्णञ्चमधुकंविदारीमधुशर्करा ।
पयसापाययेत्प्रातस्त्वपांधारणमुत्तमम् ॥ ९ ॥

अर्थ-केलेकी पकी हुई फली, आमलोंकारस, सहत, बूरा और दूध, इन सब द्रव्योंको एकत्र मिलाकर पीनेसे स्त्रियोंकी सोम धातु निकलनी बंद होजातीहै। उडदोंका चूर्ण, मूलेठी, विदारीकंद सहत और बूरा, इन सब द्रव्योंको एकत्र मिलाकर दूधके साथ पीनेसे-सोमरोग दूर होजाताहै ॥ ८ ॥ ९ ॥

धात्रीफलरसप्रस्थेविदार्याःस्वरसेतथा ।
तृणपंचरसप्रस्थेघृतप्रस्थंविपाचयेत् ॥ १० ॥
क्षीरस्यापिशतावर्याःप्रस्थंप्रस्थंरसस्यच ।
दत्वामृद्वग्निनावैद्यःपचेत्सिद्धंविधानतः ॥ ११ ॥
सुशीतेप्रक्षिपेच्चूर्णमेषाञ्चापिपलंपलम् ।
मधुकंत्रिवृताञ्चैवक्षारंचवृद्धदारकम् ॥ १२ ॥
शर्करायाःपलान्यष्टौमधुनश्चपलाष्टकम् ।
चूर्णंदत्वाप्रमथितंहन्त्याशुतृणदाहकम् ॥ १३ ॥
मूत्रकृच्छ्रञ्चकृच्छ्रञ्चबहुमूत्रंविनाशयेत् ।
पित्तजान्विविधान्व्याधीन्वातजांश्चसुदुस्तरान् ॥ १४ ॥
करोतिशुक्रोपचयंसर्पिरेतदनुत्तमम् ॥

इति धात्रीघृतम् ।

इति सोमरोगाध्यायः ।

अर्थ–उत्तम गायका घी २ दो सेर, आमलोंका रस, २ सेर विदारीकंद का रस दो २ सेर, तृण पंच मूलका रस २ दो सेर, दूध २ दो सेर, और सतावरका रस २ दो सेर, सबको मिलाकर यथाविधिसे घृतको सिद्ध करै । जब पक कर शीतल हो जाय तब मुलेठी, निसोत, जवाखार और विधारा, प्रत्येक का चूर्ण ४ चार चार तोले, बूरा ८ आठ पल और सहत आठ ८ पल मिलादेवे, यह घृत–तृषा, दाह, मूत्रकृच्छ्र कृच्छ्र, बहुमूत्र, नाना प्रकारके पित्तरोग और विविध प्रकारके वातरोगोंको दूर करै है । यह उत्तम घी–शुक्रको संचय करै है ॥ १० ॥ ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

इति सोमरोगाध्यायः समाप्तः ।

अथयोनिव्याधिचिकित्सामाह ।

योनिव्यापत्सुभूयिष्ठंशस्यतेकर्मवातजित् ।
वस्त्यभ्यङ्गपरीषेकप्रलेपपिचुधारणम् ॥ १ ॥

कदंबमूलवल्कञ्चखदिराङ्गारमिश्रितम् ।
मासंनारीपिबेत्काले योनिशूलनिपीडिताः ॥ २ ॥
रास्नाश्वगन्धावासाभिःशृतंवाशूलनुत्पयः ॥ ३ ॥

अर्थ–योनिव्यापत रोगमें वात नाशक क्रिया, बस्तिकर्म्म, अभ्यंग, सेचन, प्रलेप और पिचु (रुई आदिका फोहा) धारण, यह सब हितकारी हैं। कदमकी जडकी छाल और खैरके अंगारोंका एकत्र चूर्ण करकै जलके साथ एक महीने तक पीवैं तो योनि शूल दूर होवै। रास्ना, असगंध और अडूसा, इन तीनों औषधियों के साथ दूधको पकाकर पीनेसे–योनिशूल दूर होताहै ॥ १ ॥ २ ॥ ३ ॥

वासोपकुंचिकाजाजीवचारास्नाचचित्रकम् ।
यमानीसैन्धवंक्षारंपिष्ट्वाभृष्ट्वाघृतेनतु ॥ ४ ॥
योनिजंमर्मशूलघ्नंपेयमुष्णोपकादिभिः ।
शतावरीघृतंशस्तंयोनिपित्तविकारनुत् ॥ ५ ॥
रक्तयोन्यांयथादोषंप्रदरघ्नोहितोविधिः ।
पेटिकामूललेपाच्चयोनिभिन्नाप्रशाम्यति ॥ ६ ॥
मुसलीमूललेपाच्चप्रविष्टाच्चबहिर्नयेत् ।
पिष्ट्वाशम्बूकजंमांसंपक्वांतिन्तिडीसंयुतम् ॥ ७ ॥
लेपमात्रेणनारीणांयोनिकन्दहरंपरम् ।
घोषाख्यपुष्पलेपेनकन्दःशान्तिंव्रजेद्ध्रुवम् ॥ ८ ॥

अर्थ–अडूसा, कालाजीरा, जीरा, वच, रास्ना, चीतेकी जड, अजवायन, सैंधानोन और जवाखार इन सब औषधियोंको जलमें पीसकर घृतमें भूनकर गरम जल आदिके साथ पीनेसे योनि शूल नष्ट होताहै। शतावरी घृत योनिजात पित्तके विकारोंमें विशेष हितकारी है। रक्तस्राव युक्त योनिरोगमें प्रदरनाशक औषधादि देवै। पेटारीकी जडको पीसकर प्रलेप करनेसे योनिभिन्नारोग दूर होता है। मुसलीकी जडको पीसकर प्रलेप करनेसे भी उक्तरोग दूर होता है। पकी इमलीके

साथ शम्बुकके मांसको पीसकर लेप करनेसे अथवा तोरईयोंको पीसकर प्रलेप करनेसे योनिकन्द रोग दूर होता है ॥ ४ ॥ ५ ॥ ६ ॥ ॥ ७ ॥ ८ ॥

मंजिष्ठामधुकंकुष्ठंत्रिफलाशर्करावला ।
मेदाकाकोलीमूलंमूलंचैवाश्वगन्धजम् ॥ ९ ॥
अजमोदाहरिद्रेद्वेहिंगुककटुरोहिणी ।
उत्पलंकुमुदंद्राक्षाकाकोल्याचंदनद्वयम् ॥ १० ॥
एतेषांकार्षिकैर्भागैर्घृतप्रस्थंविपाचयेत् ।
शतावरीरसंक्षीरंघृताद्देयंचतुर्गुणम् ॥ ११ ॥
सर्पिरेतन्नरःपीत्वास्त्रियंनित्यंवृषायते ।
पुत्रान्संजनयेन्नारीमेधाढ्यान्प्रियदर्शनान् ॥ १२ ॥
याचैवाऽस्थिरगर्भास्यात्याचवाजनयेत्मृतम् ।
स्वल्पायुषंवाजनयेद्याचकन्यांप्रसूयते ॥ १३ ॥
योनिदोषेरजोदोषेपरिस्रावेचशस्यते ।
प्रजावर्द्धनमायुष्यंसर्वग्रहनिवारणम् ॥ १४ ॥
नाम्नाफलघृतंह्येतदश्विभ्यांनिर्मितंपुरा ।
अनुक्तंलक्ष्मणामूलंक्षिपन्त्यत्रचिकित्सकाः ॥ १५ ॥
जीववत्सैकवर्णायाघृतमत्रतुगृह्यते ।
अरण्यगोमयेनात्रवह्निज्वालाप्रदीयते ॥ १६ ॥

इति फलघृतम् ।

अर्थ—उत्तम गायका घी २ दो सेर, सतावरका रस ८ आठ सेर, गायका दूध ८ आठ सेर, तथा कल्कके लिये—मजीठ, मुलेठी, कूठ, हरड, बहेडा, आमला, मिश्री, खिरेटी, मेदा, लक्ष्मणा, काकोली, असगंधकी जड, अजमोद, हलदी, दारुहलदी, हींग, कुटकी, उत्पल, कुमुद, दाख, काकोली, क्षीरकाकोली, लालचंदन और सफेद चंदन, प्रत्येक दो दो तोले लेवै, यथाविधिसे घृतको सिद्ध करै इस घृतको पीनेसे मनुष्य वृषकी समान स्त्रियोंमें आचरण करता है । और जो

स्त्री पीवै तौ उत्तम बुद्धिवाले और सुंदर स्वरूपवाले पुत्रोंको उत्पन्न करती है, जिन स्त्रियोंके गर्भ नहीं रहता है, जिन स्त्रियोंके मरेहुए पुत्र उत्पन्न होतेहैं, जिनके पुत्र उत्पन्न होकर मरजातेहैं, और जिनस्त्रियोंके कन्या उत्पन्न होतीहै, योनिदोषवाली, रजोदोषवाली, और परिस्रावरोगमें यह घृत महाहितकारी है । प्रजावर्द्धक, आयुको बढानेवाला, और सर्वग्रहनाशक है । यह फल घृत-पूर्वकालमें श्रीमान् अश्विनीकुमारोंने रचाहै । जिन गायोंका बछड़ा जीताहै, और जिनका रंग बछड़े के रंगसे मिलताहो, उन गायोंका यहाँ घी लेना चाहिये । आरनेउपलोंकी आगसे इस घृतको पकावे ॥ ९ ॥१०॥ ११॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

दग्ध्वाशंखंक्षिपेद्रंभास्वरसेतच्चपेषितम् ।
तुल्याललेपनाद्धन्तिरोमगुह्यादिसम्भवम् ॥ १७ ॥

(कदलीपाथुडरसः ।)

(आलंहरितालम्)

रक्तांजनापुच्छचूर्णयुक्तन्तैलन्तुसार्षपम् ।
सप्ताहमुषितंहन्तिमूलाद्रोमाण्यसंशयः ॥ १८ ॥

अर्थ-शंखकी भस्मको केलेके रसमें पीसकर, पश्चात् बराबरकी हरिताल मिलाके लेपकरनेसे गुह्यादि स्थानोंमें उत्पन्नहुए रोम दूरहोजातेहैं। रक्तांजनाके पुच्छके चूर्णको सरसोंके तेलमें मिला सातदिन तक बासीकर पश्चात् लेपकरनेसे मूलसहित रोम गिरजातेहैं ॥ १७ ॥ १८ ॥

आरग्वधमूलपलंकर्षद्वितयन्तुशंखचूर्णस्य ।
हरितालस्यचखरस्यमूत्रप्रस्थेकटुतैलम् ॥ १९ ॥
पक्वंतैलन्तुदत्वासशंखहरितालचूर्णितंलेपात् ।
निर्मूलयतिहिरोमाण्यन्येषांसम्भवोनैव ॥
खरोगर्द्धभःशंखहरितालयोर्मिलित्वापादिकत्वम् ॥२०॥

इति आरग्वधादितैलम् ।

अर्थ-कडवातेल २ दो सेर, गधेकामूत्र ८ आठसेर, अमलतासकी जड़ ४ चारतोले, शंखका चूर्ण ४ चारतोले, हरितालका चूर्ण ४ चार

तोले, यथाविधिसे तेलको पकावे, पश्चात् इसतेलमें चौथाई भाग शंख और हरितालका चूर्ण मिलाकर मलनेसे-मूल सहित बाल गिर जातेहैं ॥ १९ ॥ २० ॥

कर्पूरभल्लातकशंखचूर्णक्षारोयवानांचमनःशिलाच ।
तैलंविपक्वंहरितालमिश्रंरोमाणिनिर्मूलयतिक्षणेन ॥ २१

इति कर्पूरादितैलः ।

अर्थ-कडवातेल २ दोसेर, कल्कके लिये कपूर, भिलावा, शंखकाचूर्ण, जवाखार, और मैनशिल, यथाविधिसे तेलको पकावे, फिर इसतेलमें चौथाई भाग हरितालका चूर्ण मिलाकर मर्दन करनेसे मूलसहित रोम नाशहोतेहैं ॥ २१ ॥

शुक्तिशंबूकशंखानांदीर्घवृन्तात्समुस्ककात् ।
दग्ध्वाक्षारंसमादायखरमूत्रेणगालयेत् ॥ २२ ॥
क्षाराष्टभागंविपचेत्तैलंवैसार्षपंबुधः ।
इदमन्तःपुरेदेयंतैलमात्रेयपूजितम् ॥ २३ ॥
बिन्दुरेकःपतेद्यत्रतत्ररोमनजायते ।
मदनादिव्रणेतैलंअश्विभ्यामेवनिर्मितम् ॥ २४ ॥
अर्शसांकुष्ठरोगाणांपामादद्रुविचर्चिकाम् ।
क्षारतैलमिदंश्रेष्ठंसर्वक्लेदहरंपरम् ॥ २५ ॥

इति लोमशातने ।

अर्थ-सीप, शम्बूक, शंख, श्योनाक, और मोखा, इनको एकत्र जलाकर क्षार ग्रहण करले, पश्चात् इस क्षारको गधेके मूत्रमें मिलाकर छानलेवे, यह क्षार ऽ॥ आधसेर, और सरसोंकातेल ४ चार सेर लेवै, यथाविधिसे तेलको सिद्धकरै । यह तेल आत्रेय करके पूजितहै । इसतेलकी जिसस्थानमें बूंद गिरजातीहै, वहां रोम उत्पन्न नहींहोतेहैं । मदनादिके व्रणमें इस तेलको अश्विनीकुमारोंने कहाहै, बवासीर, कुष्ठरोग, पामा, दद्रु, विचर्चिका, इन रोगोंमें यह तेल श्रेष्ठहै, और सर्व क्लेद नाशक है ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

यस्यावाताहतंपुष्पंफलंतस्यानविद्यते ।
अतःशुष्कञ्चकुसुमंमेघोदकसमन्वितम् ॥ २६ ॥
कटीशूलंयोनिशूलंबहुरक्तञ्चदृश्यते ।
औषधंतस्यवक्ष्यामियेनचोत्पद्यतेशुभम् ॥ २७ ॥
कदम्बबृहतीमूलंबिल्वञ्चैवचबुद्धिमान् ॥ २८ ॥

अर्थ-जिसस्त्रीके पुष्प वातसे नष्ट होजाताहै,अर्थात् जो स्त्री ऋतुमती नहीं होती, उसके फल अर्थात् सन्तान नहीं होती, जैसे-सूखेफूल मेघके जलके प्राप्त होनेपरभी फलोंको उत्पन्न नहीं करसक्ते । और उससे कटि शूल, योनिशूल, और बहुरक्तस्रावादि नानाप्रकारके रोग स्त्रियोंके उत्पन्न होतेहैं, उन रोगोंकी औषधि कहतेहैं-कदम, बृहतीकीजड़, और बेलकी-जड़, इनको एकत्र जलमें पीसकर सेवन करनेसे-स्त्रियोंके वातज पुष्पदोष दूरहोताहै ॥ २६ ॥ २७ ॥ २८ ॥

यस्याःपित्तहतंपुष्पंफलंतस्यानविद्यते ।
जम्बूफलसमंचोष्णंतस्यावहतिशोणितम् ॥ २९ ॥
कटीशूलंमहच्चैवउदरेशूलमेवच ।
औषधंतस्यवक्ष्यामियेनशीतेनशाम्यते ॥ ३० ॥
उत्पलंचंदनंकुष्ठंशूलंतगरमेवच ।
यष्टीमधुसमायुक्तंसमभागानिकारयेत् ॥ ३१ ॥
अजाक्षीरेणपातव्यंयावद्वहतिशोणितम् ।
ततोयोन्यांविशुद्धायामिमांदद्यान्महौषधीम् ॥
लक्ष्मणांक्षीरसंयुक्तांनस्यंपानंचदीयते ॥ ३२ ॥

अर्थ-जिस स्त्रीके पित्तसे पुष्प दूषित होताहै, उसकेभी सन्तान उत्पन्न नहीं होतीहै । उससे स्त्रियोंके जामुनकी समान गरम रक्त स्राव अत्यन्त कटिशूल और उदर शूल उत्पन्न होताहै । अब उनकी औषधि कहतेहैं उत्पल, चन्दन, कूठ, मूली, तगर और मुलेठी, यह सब औषधि एकत्र पीसकर बकरीके दूधके साथ पीनेसे विशेष लाभ होताहै। योनिके

शुद्ध करनेके लिये यह औषधि देवै, लक्ष्मणाकी जडको दूधमें पीस करपीवै अथवा नास देवै इससे विशेष लाभ होताहै ॥ २९ ॥ ३० ॥ ॥ ३१ ॥ ३२ ॥

यस्याःश्लेष्महतंपुष्पंफलंतस्यानविद्यते।
लक्षणंतस्यवक्ष्यामिभेषजानिपुनस्तथा ॥ ३३ ॥
बहुलंपिच्छिलंस्निग्धंघनंस्रवतिशोणितम्।
योनौतुशूलंचऋतौपरमंदारुणंतथा ॥ ३४ ॥
दद्यान्महौषधींतस्यैतेनसम्पद्यतेशुभम्।
त्रिफलात्रिकटूचैवचित्रकस्यजटातथा ॥ ३५ ॥
एतानिसमभागानिछागीदुग्धेनदापयेत्।
त्रिरात्रंपंचरात्रंवायावद्वहतिशोणितम् ॥ ३६ ॥
तथायोस्यांविशुद्धायामिमांदद्यान्महौषधीम्।
लक्ष्मणामूलचूर्णन्तुछागीक्षीरेणपाययेत् ॥ ३७ ॥

अर्थ-जिस स्त्रीके कफसे पुष्प दूषित हो, उसके भी सन्तान उत्पन्न नहीं होती, उसके लक्षण कहते हैं-बहुत तर, पिच्छिल, स्निग्ध और घनरक्तस्राव तथा ऋतुके समय योनि शूल और नाभि शूल उत्पन्न होता है, अब उसकी औषधि कहते हैं-हरड़, बहेड़ा, आमला, सोंठ मिरच, पीपल और चीतेकी जड, इन सबको एकत्र पीसके बकरीके दूधके साथ जबतक रक्तस्राव हो तबतक सेवन करै। योनि शुद्ध करने के लिये यह महौषधी देवै, कि-लक्ष्मणाकी जड़के चूर्णको बकरीके दूधके साथ पीवै ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

अथप्रथमपुष्पवतीवारलक्षणंयथा।

अर्कवारेयदायोषिद्भवेदृतुमतीकिल।
पुत्रमेकंतदासूतेकाकवन्ध्याभवेद्ध्रुवम् ॥ ३८ ॥
सोमेपुष्पवतीनारीबहुकन्याप्रजायते।
कदाचिल्लभतेपुत्रंसानारीयत्नतोऽपिवा ॥ ३९ ॥
आदावृतुंयदाप्नोतिमंगलेह्निकुमारिका।

बहुपुत्रंदुहितरंलभतेप्राप्ययोषिता ॥ ४० ॥
यदापुष्पवतीनारीभवेद्बुधयुतेऽन्ह्यपि ।
बहुपुत्रंतदाप्नोतिसमृद्धंराजपूजितम् ॥ ४१ ॥
यदावलागुरोर्वारेभवेदृतुमतीभुवि ।
लभेद्बहुसुतंसातुभूयिष्ठंयानभोजनैः ॥ ४२ ॥
यदाशुक्रदिनेनारीपुष्पञ्चलभतेतदा ।
मूलवन्ध्याभवेत्सापिनारदेनेतिभाषितम् ॥ ४३ ॥
यदाकर्मवशात्पुष्पमाप्नोतिशनिवासरे ।
यावान्पुत्रश्चदुहितातस्यास्तुम्रियतेध्रुवम् ॥ ४४ ॥
वारलक्षणमेतद्धिनारदेनमहात्मना ।
कथितंप्रथमेनार्याःपुत्रवत्याःसुनिश्चितम् ॥

अर्थ-जो स्त्री प्रथम प्रथम रविवारके दिन ऋतु मती होय, उसके केवल एकही पुत्र उत्पन्न होगा, पश्चात् वह वंध्या होजातीहै। जो स्त्री प्रथम सोमवारके दिन ऋतुमती होय, उसके बहुतसी कन्या उत्पन्न होतीहैं, और पुत्र उत्पन्न नहीं होता, और जो होय तो बडे यत्नोंसे कभी जो स्त्री मंगलवारके दिन रजस्वला होतीहै उसके बहुतसे पुत्र और कन्या उत्पन्न होतीहैं। प्रथम जो स्त्री बुधवारके दिन रजस्वला होय उसके समृद्धिवान् और राजपूजित बहुतसे पुत्र उत्पन्न होते हैं। जो स्त्री प्रथम बृहस्पति वारके दिन रजस्वला होय, उसके पान और भोजनमें पटु बहुतसे पुत्र उत्पन्न होते हैं। जो स्त्री प्रथम शुक्रके दिन रजस्वला होती है। वह निश्चय वंध्या होती है अर्थात् उसके कदापि संतान नहीं होता है उसके जितने पुत्र और कन्या उत्पन्न होवैं सब मरजातेहैं। यह सब स्त्रियोंके प्रथम ऋतुके दिनोंके लक्षण स्वयं नारदमुनिने कहेहैं॥३८॥३९॥ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

चतुर्थेऽन्हिततःस्नात्वाशुक्लमाल्याम्बराशुचिः ।
इच्छन्तिभर्तृसदृशंपुत्रंपश्येत्पुरःपतिम् ॥ ४५ ॥
पूर्वंपश्येदृतुस्नातायादृशंनरमंगना ।

ताहशंजनयेत्पुत्रंभर्त्तारंदर्शयेदतः ॥ ४६ ॥
मासिमासिरजःस्त्रीणांस्रवतित्र्यहंत्र्यहम् ।
वत्सराद्द्वादशादूर्द्ध्वंयातिपंचाशतःक्षयम् ॥ ४७ ॥
सुतन्तुद्वादशनिशासर्वास्तिस्रोऽतिनिन्दिताः ।
एकादशीचयुग्मासुपुत्रोऽन्यासुतुकन्यकाः ॥ ४८ ॥
शुक्राधिकाच्चपुरुषःप्रमदारजसोऽधिकात् ।
नपुंसकंसमत्वेनशुक्रशोणितयोर्भवेत् ॥ ४९ ॥

अर्थ–ऋतुमती स्त्री चौथे दिन स्नान करकें श्वेतमाला और वस्त्र पहरकै पवित्र होकर पुत्रकी इच्छा करती हुई स्वामीके समीप जावे, प्रथम स्वामीहीके दर्शन करैं, कारण यह है कि–रजस्वला स्त्री स्नानके अंतमें प्रथम जिसके दर्शन करै, उसीकी समान उसके पुत्र उत्पन्न होता है। प्रत्येक महीनेमें स्त्री तीन तीन दिन तक एक वार ऋतुमती होती है। १३ तेरह वर्षसे लेकर ५० पचास बर्षकी उमर तक होती है। १२ बारह रात्रियोंमें पुत्रोत्पादन होता है। ऋतुकालकी तीन रात्रि और ११ ग्यारह रात्रि गर्भाधानमें अत्यन्त निन्दनीय अर्थात् अनिष्ट-दाय हैं। ऋतुकालकी युग्मरात्रियोंमें स्त्रीसे मैथुन करने से पुत्र और अयुग्म रात्रियोंमें मैथुन करनेसे कन्या उत्पन्न होती है। पुरुषके शुक्र अधिक होनेसे पुत्र और स्त्रीके रजके अधिक होनेसे कन्या, तथा शुक्र और आर्त्तव समान होनेसे नपुंसक होता है ॥ ४५ ॥ ४६ ॥ ४७ ॥ ॥ ४८ ॥ ४९ ॥

पद्मंसंकोचमायातिदिनेऽतीतेयथायथा ।
ऋतावतीतेयोनिःसाशुक्रंनातःप्रतीच्छति ॥ ५० ॥
शुद्धःस्नात्वाव्रजेन्नारीमपत्यार्थीनिरामयः ।
शुक्रशुक्रार्त्तवंसुस्थंसरक्तंमिथुनंमिथः ॥ ५१ ॥
उत्तानाउन्मनायोषित्तिष्ठेदङ्गैःसुसंस्थितैः ।
तथाहिबीजंगृह्णातिदोषैःस्वस्थानमस्थितैः ॥ ५२ ॥
अवन्ध्यएवसंयोगःस्यादपत्यञ्चकामतः ।

एतेनापिविधानेनशुद्धासुखलत्रयोनिषु ॥ ५३ ॥
लभन्तेयोषितोगर्भभेषजैस्तुविशेषतः ॥ ५४ ॥

अर्थ-दिनके अंतमें जिस प्रकार कमल बंद हो जाता है, उसी प्रकार ऋतुकालके बीत जानेपर योनि संकुचित होजाती है, इस कारण ऋतुके पश्चात् पुष्प मुद जाता है, फिर वीर्यको ग्रहण नहीं करता, अतएव स्त्रियोंके ऋतुके समय विधिपूर्वक सन्तानके लिये निरोगी मनुष्य शुद्ध और स्नान करके स्त्रीके पास जावे। इसप्रकार स्त्री पुरुषोंके परस्पर संयोगमें शुद्ध शुक्र और आर्तवके मिलनेसे सन्तान उत्पन्न होती है। स्त्री और पुरुष दोनोंके संयोगके समय स्त्री सुखपूर्वक सीधी पाव फैलाके शयनकर उन्मना हो बीजको ग्रहण करै ॥ ५० ॥ ५१ ॥ ॥ ५२ ॥ ५३ ॥ ५४ ॥

कटुतैललवणयुक्तंमूलस्वरसंनिपीयकेशराजस्य।
लभतेगर्भमवश्यंत्रिदिनंनारीतुदृष्टफलम् ॥ ५५ ॥
सितवर्षाभूमूलंमूलंवातुरगगंधायाः।
परिणतकपित्थगुटिकाभक्षयेच्चैकवर्णगोक्षीरे ॥ ५६ ॥
पृथगितिपीतंदृष्टंगर्भदपरिचान्नसन्देहः।
पुष्योद्धृतंलक्ष्मणामूलंपिष्टंचकन्ययातथा ॥ ५७ ॥
ऋत्वन्तेघृतदुग्धाभ्यांपीत्वाप्नोत्यबलासुतम्।
वारिणाशुक्लपक्षेतुपुष्येणतुविशेषतः ॥ ५८ ॥
घृतमंडेनवापीतंनागपुष्परजस्तथा।
क्वाथेनहयगंधायाःसाधितंसघृतंपयः ॥ ५९ ॥
ऋतुस्नातावलापीत्वागर्भंधत्तेनसंशयः ॥ ६० ॥

अर्थ-कुकुर भांगरेका रस, सरसों का तेल और सैंधानोन, तीनोंको एकत्र कर पीनेसे ऋतुमती स्त्री गर्भको धारण करती है। सफेद पुनर्नवेकी जड अथवा असगंधकी जडको एक रंगकी गायके दूधमें पीसकर कैथके फलके समान गोली बनाकर सेवन करनेसे निश्चय ऋतुमती स्त्रियोंके गर्भ रहजाता है। लक्ष्मणाकी जडको पुष्यनक्षत्रमें

उखाड़कर घीकारके रसके साथ पीस घृत और दूध मिलाकर ऋतुके पश्चात् सेवन करनेसे स्त्रियोंके गर्भ रह जाता है । बडके अंकुर पुष्य नक्षत्रमें लाकर जलमें पीसकर सेवन करनेसे वंध्या स्त्री रजस्वला हो जाती है । पुष्यनक्षत्रमें अथवा शुक्लपक्षमें पुन्नागके फूलोंका चूर्ण जलके साथ अथवा घृत मंडके साथ पान करनेसे रजस्वला स्त्रियोंके निश्चय गर्भ रहजाता है । असगंध और घृतको दूधमें सिद्धकर पीनेसे निश्चय ऋतुमती स्त्रियोंके गर्भ रहता है ॥ ५५ ॥ ५६ ॥ ५७ ॥ ॥ ५८ ॥ ५९ ॥ ६० ॥

अश्वगंधाकषायेणसाधितंशीतलंपयः ।
पीत्वाकान्तसमाश्लेषादृतौवंध्याप्रसूयते ॥ ६१ ॥
पिप्पल्यःशृंगवेरंचमरिचंकेशरन्तथा ।
घृतेनसहपातव्यंवन्ध्यागर्भप्रदंपरम् ॥ ६२ ॥
पुत्रजीवकबीजंपीत्वापयसास्यपत्रमूलंवा ।
योषिज्जीवद्वत्साजनयतिदीर्घायुषंपुत्रम् ॥ ६३ ॥

अर्थ–वंध्या स्त्री असगंधको दूधमें औटाके शीतल कर पीवै, पश्चात् पतिके साथ रमण करै तौ निःसंदेह गर्भ रह जाय । पीपल सोंठ,मिरच और नागकेशरकेफूल, इनको एकत्र पीस चूर्णकर घृतके साथ पीनेसे वंध्यास्त्री गर्भको धारण करतीहै । पतिजियाके बीजया पत्र अथवा जड़को दूधमें पीसकर सेवनकरनेसे स्त्रीदीर्घायु पुत्रको जनतीहै ॥ ॥ ६१ ॥ ६२ ॥ ६३ ॥

सिद्धार्थकंवचाब्राह्मीशंखपुष्पीपुनर्नवा ।
पयस्यात्रिफलाकुष्ठंतथाकटुकरोहिणी ॥ ६४ ॥
शारिवाद्वययष्टचाह्वचोरकेसुमनोलता ।
वृषपुष्पंसमंजिष्ठादेवदारुमहौषधम् ॥ ६५ ॥
पिप्पल्यौभृंगराजश्चनिशाश्वामासुवर्चला ।
दशमूलमपामार्गमश्वगन्धाशतावरी ॥ ६६ ॥
जलद्रोणेपचेदेतान्भागैर्द्विपलिकैरिमान् ।

तत्कषायंपरिस्राव्यंघृतंस्यादर्द्धाढकंपचेत् ॥ ६७ ॥
पाचितंतद्घृतंयुक्त्यागायत्र्याचाभिमंत्रितम् ।
द्विमासगर्भिणीनारीषट्मासादुपयोजयेत् ॥ ६८ ॥
सर्वज्ञंजनयेत्पुत्रंसर्वामयविवर्ज्जितम् ।
अस्यप्रभावात्कुक्षिस्थःस्फुटवाग्व्याहरत्यपि ॥ ६९ ॥
योनिदुष्टाश्चयानार्योरेतोदुष्टाश्चयेनराः ।
वंध्यापिलभतेगर्भंशूरंपण्डितमानिनम् ॥ ७० ॥
जडगद्गदमूकत्वंपानादेवापकर्षति ।
सप्तरात्रप्रयोगेणसुस्वरंकुरुतेनरम् ॥ ७१ ॥
मासमात्रप्रयोगेतुभवेच्छ्रुतिधरोनरः ।
नाग्निर्दहतितद्वेश्मनवज्रमपहन्तिच ॥ ७२ ॥
नतत्रम्रियतेबालोयत्रास्तेसोमसंज्ञितम् ।
पयस्याक्षीरकाकोलीसुमनोलतामालती ॥ ७३ ॥

अर्थ–सफेदसरसों, वच, ब्राह्मी, शंखपुष्पी, पुनर्नवा, क्षीरकाकोली, हरड़, बहेड़ा, आमला, कूठ, कुटकी, अनंतमूल, करियावासाऊ, मुलेठी, चोरक, मालतीकेफूल, अडूसेकेफूल, मजीठ, देवदारु, सोंठ, पीपल, गजपीपल, भांगरा, हलदी, कालानिसोत, सुवर्चला, दशमूल, सतावर, चिरचिटा और असगंध, प्रत्येक आठ आठ तोले लेकर ३२ बत्तीससेर जलमें पकावै, जब आठसेर जल शेषरहै तब उतारकर छान लेवै, पश्चात् इसको अग्निपै फिर चढ़ादेवै,इसमें४चारसेर घीमिलाकर पकावै । इस घृतको त्रिपदी गायत्री मंत्रसे अभिमंत्रितकर दोमहीनेकी गर्भवती स्त्री छै महीनेतक सेवन करै, इसके सेवन करनेसे सर्वज्ञ और सर्वरोग रहित पुत्रको उत्पन्न करतीहै । इसके प्रभावसे कोखमें स्थितगर्भ स्फुट शब्दवाला बोलताहै । जो स्त्री योनिदुष्टा है, जिनमनुष्योंका वीर्य दूषितहै उन सबके विकारोंको यह सोमघृत निश्चय दूरकरैहै । इसघृतका सेवन करनेसे वन्ध्या स्त्रीभी शूर, पंडित और मानी पुरुषोंको गर्भमें धारणकरतीहै, तथा जड़ता, गद्गदपना, गूंगापन, यह सब रोग इस

घृतकेपीनेसे निःसंदेह दूरहोजातेहैं । इसको सातरोजतक सेवनकरनेसे मनुष्य उत्तम स्वरवाले होजातेहैं । इस घृतको एकमहीनेतक सेवनकरनेसे बहरे मनुष्य सुन्नेलगतेहैं । जिसघरमें यह सोमघृत रहताहै,उसघरमें कदापि अग्नि नहीं लगती, न बिजली गिरे, और न बालकमरतेहैं ॥ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२ ॥ ७३ ॥

गर्भस्थापनम् ।

गर्भमासत्रयादर्वाक्कुर्यात्पुंसवनंबुधः ।
बलोपुरुषकारोहिदैवमप्यभिवर्त्तते ॥ ७४ ॥
पुंसवनंगर्भस्यपुत्रत्वोत्पादकम् ।
गोष्ठजातवटस्यप्रागुत्तरशाखजेउभेशुङ्गेमाषौ
द्वौतथागौरसर्षपौदध्नियोजितौ ॥
पुष्पपीतौद्रुतापन्नगर्भायाः पुत्रकारकौदुग्धेनपेयः७५॥
क्षीरेणश्वेतबृहतीमूलंनासापुटेस्वयम् ।
पुत्रार्थंदक्षिणेसिञ्चेद्वामेदुहितृवांच्छया ॥ ७६ ॥
भिषक्पुंसवनेयुञ्ज्यात्तथासोमघृतादिकम् ।
लिंगस्तुसद्योगर्भायाःयोन्यांबीजस्यसंग्रहः ॥ ७७ ॥
तृप्तिर्गुरुत्वंस्फुरणंशुक्रस्थानानुवर्त्तनम् ।
हृदयस्पन्दनतन्द्राहृक्हानिर्लोमहर्षणम् ॥ ७८ ॥
ततःपरंगर्भचिह्नंपुष्पाभावोऽक्षिपक्ष्मणम् ।
क्षामतागरिमाकुक्षेर्मूर्च्छाछर्दिररोचकाः ॥ ७९ ॥
जृम्भाप्रसेकसदनंरोमराज्याःप्रकाशनम् ।
अम्लष्टतास्तनौपीनौसस्तन्यौकृष्णचूचुकौ ॥ ८० ॥

अर्थ-स्त्रियोंके तीन महीनेका गर्भ होजाय तो उनको पुंसवन कर्म्मकरै, कारण यह है कि, पुरुषार्थ बलवान् है और दैव निर्बलहै, अर्थात् पीछे रहताहै । पुंसवनकर्म्म गर्भमें पुत्रको उत्पन्न करनेवालाहै । गौके स्थानमें उत्पन्न हुए बड़के उत्तर और पूर्वकी शाखायोंके दो अंकुर, दो उड़द, और दो सफेद सरसोंके दाने, इनको दहीमें मिलाकर पुष्यनक्षत्रमें

दूधके साथ पीनेसे निश्चय गर्भवती स्त्री पुत्रवाली होजातीहै। सफेद कटाईकी जडको दूधमें पीसकर गर्भिणीके दाहिने नाकके छिद्रमें नास देनेसे पुत्र, और बाँए नाकके छिद्रमें नास देनेसे कन्या उत्पन्न होतीहै। और सोम घृतादिकोभी पुंसवन कर्ममें देवै ॥ योनिमें बीजका संग्रह, तृप्तिहोना, भारीपन, स्फुरण होना, शुक्र और आर्त्तव स्थानमें स्थित होजावै, हृदय कम्प, तन्द्रा, दृष्टिलोप, और रोमाञ्च, यह सब लक्षण उस स्त्रीके हैं जिसने तत्काल गर्भ धारण कियाहो। ऋतु धर्मका न होना, नेत्रोंके पलक वारंवार खुले मिचैं, क्षमता, कुक्षिभार, मूर्च्छा, वमन, अरुचि, जम्भाई, वारंवार, मुखमें थूक आय जावै, शरीर टूटे, रोमांचहो आवें, खट्टीचीजें खानेकी इच्छाहो, दोनों स्तनभारी, तथा स्थूल और उनके दोनोंके अग्रभाग काले होजावै, यह सब लक्षण गर्भ रहजानेके पीछेके हैं ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ८० ॥

अव्यक्तंप्रथमेमासिसप्ताहेकललम्भवेत्।
कललंक्केदभूतोऽपिततश्चबुद्बुदाकृतिः ॥ ८१ ॥
द्वितियेमासिकललाद्घनपेष्यथवार्बुदम्।
व्यक्तीभवतिमासेस्यतृतीयेगात्रपंचकम्॥ ८२
मूर्द्धाद्वेशंखिनीबाहुसर्वसूक्ष्मचजन्मच।
समयेबाहुमूर्द्धाद्यैःज्ञानञ्चसुखदुःखयोः ॥ ८३ ॥
तथासापुष्टिमाप्नोतिकेदारइवकुल्यया।
चतुर्थेऽव्यक्तमंगानांचेतनायाश्चपंचमे ॥ ८४ ॥
षष्ठेस्नायुशिरारोमबलवर्णनखत्वचः।
सर्वैःसर्वाङ्गसम्पूर्णैर्भागैःपुष्पतिसप्तमे ॥ ८५ ॥
अतएवहिसंजातस्तत्रजीवतिबालकः।
तेजोऽष्टेसंचरतिमातापुत्रौमुहुःक्रमात् ॥
तेनतौम्लानमुदितौस्यातांजातोनजीवति ॥ ८६ ॥

अर्थ-पहिले महीनेमें गर्भ अव्यक्त अर्थात् गुप्त रहताहै पहिले महीनेमें बीजको ग्रहण करनेके पश्चात् शुक्र और रज मिलकर ७ सातदिनमें कलला

कृति होजाताहै, पश्चात् क्लेदरूप होकर बुद्बुदाकृति होजाताहै । दूसरे महीनेमें बुद्बुदाकृतिसे घनमांस पेषी होजाताहै । तीसरे महीनेमें मांस पेषीका पंचगात्राकार परिणमन होताहै, अर्थात् मांस पेषीसे मस्तकका अर्द्ध भाग, बाहु, शंखिनी, और अन्यान्य सूक्ष्मसूक्ष्म अंग उपजते हैं । और कुछ समयके बाद मस्तकका अपरार्द्ध, और सुख दुःखका ज्ञान उत्पन्न होताहै । और जिस प्रकार तलैयां तथा नहरोंसे खेत परिपुष्ट होताहैं, उसी प्रकार गर्भिणीका गर्भ परिपुष्ट होताहै । चौथे महीनेमें गर्भके सम्पूर्ण अप्रकट अंग प्रकट होजातेहैं, पाँचमें महीनेमें चेतना प्रकट होतीहै । छठे महीनेमें स्नायु, शिरा, रोम, बल, वर्ण, नख और त्वचा उत्पन्न होतीहै सातवें महीनेमें गर्भ सम्पूर्ण अंगयुक्त होजाताहै, इससे इस महीनेका जन्मा हुवा बालक जी जाताहै । आठमें महीनेमें सर्व धातुओंका तेज क्रमसे वारंवार माता और पुत्रमें संचारकरताहै अर्थात् कभी माताका तेज संचार करै, कभी गर्भ गत बालकका तेज संचार करै, इसकारण गर्भिणी और गर्भस्थ बालक दोनों म्लान (मुरझाए हुए) और मुदित (प्रसन्न) होतेहैं । अतएव अष्टम मासकी उत्पन्न हुई सन्तान नहीं जीती है ॥ ८१ ॥ ८२ ॥ ८३ ॥ ॥ ८४ ॥ ८५ ॥ ८६ ॥

रसगंधकतुत्थञ्चत्र्यहंजम्बीरमर्दितम् ।
त्रिभावितंत्रिकटुनादेयंगुंजाचतुष्टयम् ॥ ८७ ॥
गर्भिण्याःशूलविष्टम्भज्वराजीर्णेषुकेवलम् ॥ ८८ ॥

इति गर्भविलासरसः ।

अर्थ-पारा, गंधक और नीलाथोथा, यह तीनों द्रव्य समान भाग लेकर जम्भीरी नीबूके रसमें तीन दिनतक खरल करै, पश्चात् त्रिकुटेके काथमें भावना देकर चार रत्तीभर सेवन करै, इससे गर्भिणियोंका शूल, विष्टम्भ, ज्वर और अजीर्ण रोग दूर होताहै ॥८७॥८८॥

तुत्थस्थानेस्वर्णंदेयंचिंतामणिरसःस्मृतः ॥ ८९ ॥

इति गर्भचिंतामणिरसः ।

अर्थ-उपरोक्त गर्भविलास रसमें स्वर्ण मिलानेसे गर्भचिंतामणि रस होजाताहै, इसकी मात्रा गर्भविलास रसकी समानहै और गुणभी गर्भविलासकी तुल्यहै ॥ ८९ ॥

जातीफलंटंकणंच व्योषंदैत्येन्द्ररक्तकम्।
तच्चूर्णंसमभागेनमर्दितंप्रहरद्वयम् ॥ ९० ॥
जम्बीररसयोगेनवटींकुर्याद्विचक्षणः।
गुंजाद्वयंप्रमाणेनकृत्वावैद्यंप्रयत्नतः ॥ ९१ ॥
आर्द्रकस्यरसेनैवभक्षयेदुष्णवारिणा।
निहन्तिसर्वरोगंचभास्करस्तिमिरंयथा ॥ ९२ ॥

इति गर्भचिंतामणिरसः।

अर्थ-जायफल, सुहागा, सोंठ, मिरच, पीपल, गंधक और सिंगरफ, इन सबको एकत्र पीसके जम्भीरी नीबूके रसमें दो प्रहर खरलकर दो दो रत्तीकी गोली बनालेवै प्रतिदिन एक गोली अदरखके रसमें मिला कर गरम जलके साथ सेवन करनेसे गर्भिणियोंके सर्व प्रकारके रोग दूर होजातेहैं ॥ ९० ॥ ९१ ॥ ९२ ॥

रसंतालंतथालौहंप्रत्येकंकर्षमात्रकम्।
कर्षत्रयंतथाचाभ्रंकर्पूरंवंगताम्रकम् ॥ ९३ ॥
जातीफलंतथाकोषंगोक्षुरंचशतावरी।
बलातिबलयोर्मूलंप्रत्येकंतोलकंशुभम् ॥ ९४ ॥
वारिणावटिकाकार्याद्विगुंजफलमानतः।
सन्निपातंनिहन्त्याशुस्त्रीणांचैवविशेषतः ॥ ९५ ॥
गर्भिण्याज्वरदाहंचप्रदरंसूतिकामयम् ॥ ९६ ॥

इति द्वितीयगर्भचिंतामणिरसः।

अर्थ-पारा, हरिताल और लोहा प्रत्येक एक एक कर्ष, अभ्रक, कपूर वंग, ताँबा, जायफल, जावित्री, गोखरू और सतावर प्रत्येक तीन तीन कर्ष, खिरैटीकी जड, प्रत्येक एक एक तोले। इन सबको एकत्र पीसकर जलमें दो दो रत्तीकी गोली बना लेवै, प्रतिदिन एक गोली खावै, इससे गर्भिणी स्त्रियोंके ज्वर, दाह, प्रदर, सूतिका और सन्निपातादि रोग दूर होते हैं ॥ ९३ ॥ ९४ ॥ ९५ ॥ ९६ ॥

अतिव्यवायव्यायामदिवास्वप्नप्रजागरान् ।
तीक्ष्णोपचारशोकादीन्जलपानोत्कटासनम् ॥ ९७ ॥
दारुणानितथान्यानिगर्भिणीपरिवर्ज्जयेत् ।
संप्राप्तेचाष्टमेमासिमैथुनंपरिवर्ज्जयेत् ॥ ९८ ॥
यदिगच्छतिदुर्मेधाकाममोहादचेतनः ।
विपद्यतेतदागर्भएतत्तेनात्रसंशयः ॥ ९९ ॥
गर्भेमहतियस्यास्तुगर्भिण्याःपुष्पदर्शनम् ।
रक्तस्रवोऽथवातत्रपित्तश्लेष्महितोविधिः ॥ १०० ॥
गर्भोभिघातविषमाशनपीडिताद्यैः
पक्वंद्रुमादिवफलंपततिक्षणेन ।
मूढंकरोतिपवनःखलुमूढगर्भं
शूलंचयोनिजठरादिषुमूत्रसंगः ॥ १०१ ॥

अर्थ–अत्यन्त मैथुन, परिश्रम, दिनमें सोना, रात्रिमें जागरण, तीक्ष्ण उपचार, शोकादि, उत्कटपान, उत्कटभोजन, तथा अन्यान्य दारुण विषयोंको गर्भिणी त्याग देवै । आठमें महीनेमें एकवार भी मैथुन न करै । यदि कोई निर्बुद्धि मनुष्य कामान्ध होकर आठमे महीनेमें गर्भिणी से संगम करै तौ गर्भ निश्चय नष्ट हो जाता है । जो गर्भावस्थामें स्त्रियोंके रजोदर्श अथवा रक्तस्राव होय तौ पित्त श्लेष्म नाशक विधि प्रयोग करै । अभिघात, विषमाशन, और पीडनादिसे तत्काल गर्भ पतित हो जाता है । जैसे वृक्षसे पके हुए फल क्षणमात्रमें पतित हो जाते हैं । वायुसे मूढ गर्भ होता है, तथा योनि, जठरादिकमें शूल और मूत्ररोध होता है ॥ ९७ ॥ ९८ ॥ ९९ ॥ १०० ॥ १०१ ॥

गर्भिण्याःप्रथमेमासिगर्भेशूलंप्रजायते ।
चन्दनंमधुकंलोध्रंकेशरंनीलमुत्पलम् ॥ १०२ ॥
शृंगाटकंकशेरुञ्चसमभागानिकारयेत् ।
क्षीरेणपाययेत्प्रातर्गर्भधारणमुत्तमम् ॥ १०३ ॥

द्वितीयेमासिगर्भिण्याःशूलमुत्पद्यतेयदा।
काकोलीक्षीरकाकोलीआमलामधुयाष्टिका ॥ १०४ ॥
घृतेनसमभागानिक्षीरेणालोड्यपाययेत्।
हन्तिशूलंसमुत्पन्नंगर्भधारणमुत्तमम् ॥ १०५॥

अर्थ-गर्भिणी के प्रथम मासमें गर्भशूल उपजे तौ लालचन्दन, मुलेठी, लोध, नीलोत्पल, सिंघाडे और कसेरु, इनका चूर्ण कर दूधके साथ प्रातःकाल पीवै, यह उत्तम गर्भको धारण करने वाला है। गर्भिणीके दूसरे महीनेमें गर्भ शूल उपजे तो काकोली, क्षीरकाकोली, भुईं आमला और मुलेठी, इनका चूर्ण घृत और दूधमें मिलाकर पीनेसे गर्भशूल नष्ट होकर निश्चय गर्भकी रक्षा होती है ॥ १०२ ॥ १०३ ॥ ॥ १०४ ॥ १०५ ॥

तृतीयेमासिगर्भिण्याःशूलमुत्पद्यतेयदा।
अनन्ताशारिवाक्षीरकाकोलीचवृक्षादनी ॥ १०६ ॥
क्षीरेणपाययेत्प्रातःशूलंहन्तिसुनिश्चयः।
चतुर्थेमासिगर्भिण्याःशूलंवाजायतेयदि ॥ १०७ ॥
उत्पलस्यचशालूकंयष्टीमधुकमेवच।
लोध्रेणापिसमंपिष्ट्वापिबेत्क्षीरेणसंयुतम् ॥ १०८ ॥
ततोविजयतेशूलंस्वास्थ्यंचैवोपपद्यते।
पंचमेमासिगर्भिण्याःगर्भशूलंप्रजायते ॥ १०९ ॥
नीलोत्पलस्यशालूकंपद्मबीजंमृणालकम्।
शर्करायाःसमंपिष्ट्वाक्षीरेणालोड्यपाययेत् ॥ ११० ॥
अस्यसेवाप्रसादेनस्वास्थ्यंसम्पद्यतेक्षणात् ॥ १११ ॥

अर्थ-गर्भिणीके तीसरे महीने गर्भ शूल उत्पन्न होय तौ दोनों सारिवा, क्षीरकाकोली, और बाँदा इन सबको समान भागले दूधमें पीसकर सेवन करनेसे गर्भशूल दूर होताहै। चौथे महीनेमें गर्भिणीके गर्भशूल उपजे तौ भँसीडे, मुलेठी, और लोधको पीसकर दूधके साथ पीवै, इससे निःसंदेह गर्भशूल दूर होजाताहै। पाँचमें महीनेमें गर्भ शूल उपजे

तौ– नीलोत्पलका कन्द, कमलगट्टा, मृणाल और शर्करा यह सब समान भागले एकत्र पीस दूधमें मिलाकर पीनेसे निश्चय गर्भ शूल दूर होकर गर्भकी रक्षा होतीहै ॥ १०६ ॥ १०७ ॥ १०८ ॥ १०९ ॥ ॥ ११० ॥ १११ ॥

षष्ठेमासिभवेद्यस्याःशूलपीडासुदारुणा ।
नीलोत्पलस्यशालूकंकदलीमोचरसस्तथा ॥ ११२ ॥
शर्कराक्षीरकाकोलीजीरकेणसमन्वितम् ।
गवांक्षीरेणसप्ताहंपानाच्छूलहरंपरम् ॥ ११३ ॥
सप्तमेमासिगर्भिण्याःशूलंसंजायतेयदि ।
शृंगाटकंविसंद्राक्षाकशेरुमधुकंसिता ॥ ११४ ॥
एतत्सर्वसमंपिष्ट्वाक्षीरशर्करयासह ।
नारीणांपानयोगेनगर्भस्थापनमुत्तमम् ॥ ११५ ॥

अर्थ–छठे महीनेमें गर्भ शूल उत्पन्न होय तौ नीलोत्पलका कन्द, केला, मोचरस, शर्करा, क्षीरकाकोली और जीवक, यह सब समानले दूधके साथ सात दिन पीनेसे दारुण गर्भ शूल नष्ट होताहै । सातवें महीनेमें गर्भशूल उत्पन्न होय तौ सिंघाडे, भसींडे, दाख, कसेरू, मुलेठी और बूरा यह सब समान भागले पीसकर दूध और मिश्री मिलाकर पीनेसे गर्भस्थापन होता है ॥ ११२ ॥ ११३ ॥ ११४ ॥ ११५ ॥

अष्टमेमासिगर्भिण्याःशूलंसंजायतेयदा ।
उत्पलस्यचशालूकंशृंगाटकद्वयन्तथा ॥ ११६ ॥
मंजिष्ठारक्तशालिचलोध्रंक्षीरेणसंयुतम् ।
पातुंदेयंत्र्यहंस्त्रीणांगर्भधारणमुत्तमम् ॥ ११७ ॥
नवमेमासिगर्भिण्यागर्भशूलंसुदारुणम् ।
पिष्ट्वाचक्षीरकाकोलीक्षीरेणसुखमाप्नुयात् ॥ ११८ ॥
दशमेमासिगर्भिण्याःशूलमुत्पद्यतेयदा ।
पद्ममुत्पलबीजानिशालूकंमधुसैन्धवम् ॥
गवांक्षीरेणपातव्यंगर्भस्थापनमुत्तमम् ॥ ११९ ॥

अर्थ-आठमें महीनेमें गर्भशूल उपजे तौ कमलकन्द, दोनों प्रकारके सिंघाडे, मजीठ, लालशालिधान और लोध, इनको दूधमें पीसकर सेवन करनेसे तीन दिनमें ही गर्भशूल दूर हो जाता है। नवमें महीनेमें गर्भशूल जन्मे तौ क्षीरकाकोलीको दूधमें पीनेसे विशेष लाभ होता है। दशमें महीनेमें गर्भशूल उपजे तौ कमल, उत्पलके बीज, शालूक, सहत और सैंधेनोन को एकत्र मिलाकर दूधके साथ पीनेसे निश्चय गर्भकी रक्षा होती है ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥

चंदनेनमृणालेनपद्मकेशरपद्मकैः।
गर्भप्रदेहंकुर्वीतमधुकेनोत्पलेनच ॥ १२० ॥
कोष्ठोदुम्बरफलजस्वरसोमोचोत्थगर्भोवा।
मधुनापीतःसद्यःशमयतिगर्भस्रुतिबहुलाम् ॥ १२१ ॥

अर्थ-लालचंदन, खस, कमल केशर, पद्माख, मुलेठी और उत्पल, इन सब औषधियोंको एकत्र पीसकर गर्भिणीके उदर पै प्रलेप करनेसे गर्भशूल नष्ट होताहै। कठूमरके फलोंका स्वरस या केलेका मध्यभाग सहतके साथ पीनेसे तत्काल गर्भस्राव दूर होता है ॥ १२० ॥ १२१ ॥

सूतंगंधंतथास्वर्णलौहंरजतमाक्षिकम्।
हरितालंवंगभस्माप्यभ्रकंसमभागिकम् ॥ १२२ ॥
भावनाखलुदातव्यारसैरेषांपृथक्पृथक्।
ब्रह्मीवासाभृंगराजपर्पटंदशमूलकम् ॥ १२३ ॥
सप्तधाभावयेद्वैद्योगुंजामानांवटींचरेत्।
गर्भचिंतामणिरयंपूर्ववत्कथिताःगुणाः ॥ १२४ ॥

इति बृहद्गर्भचिंतामणिरसः।

अर्थ-पारा, गंधक, सोना, लोहा, रूपा, सोनामाखी, हरिताल, वंग की भस्म और अभ्रक, यह सब समान भागले पीसकर ब्राह्मी, अडूसा भाँगरा, पित्तपापडा और दश मूलके रसमें अलग अलग सात भावना देकर एक एक रत्तीकी गोली बना लेवै, यह गर्भचिंतामणि रस-ज्वर और शूलादि रोगोंको दूर करैहै ॥ १२२ ॥ १२३ ॥ १२४ ॥

त्रिभागंत्रिकटुंदेयंचतुर्भागंचहिंगुलम् ।
जातीकोषंलवङ्गञ्चप्रत्येकञ्चत्रिकार्षिकम् ॥ १२५ ॥
सुवर्णमाक्षिकंचैवपलार्द्धंप्रक्षिपेद्बुधः ।
जलेनमर्दयित्वाथचणमात्रावटीकृता ॥
निहन्तिगर्भिणीरोगंभास्करस्तिमिरंयथा ॥ १२६ ॥

इति गर्भविनोदरसः ।

अर्थ-त्रिकुटा ३ तीन भाग, सिंग्रफ ४ चार भाग, जायफल और लौंग, प्रत्येक ३ तीन भाग, सोनामाखी, ४ चार भाग, इन सबका एकत्र चूर्णकर जलके साथ पीसकर चनेकी बराबर गोली बना लेवै। यह गर्भविनोद रस-यथा अनुपानके साथ खानेसे गर्भिणीके सम्पूर्ण रोग दूर करै है ॥ १२५ ॥ १२६ ॥

घटनप्रवृत्तघटकृतकरयुगसंलग्नकर्दमः ।
पीतःसमधुश्छागीक्षीरैर्नियतंसंस्थापयेद्गर्भम् ॥ १२७॥
कशेरुशृंगाटकजीवनीयैःपद्मोत्पलैरण्डशतावरीभिः ।
सिद्धंपयःशर्करयाविमिश्रंसंस्थापयेद्गर्भमुदीर्णशूलं १२८

अर्थ-घडेके बनाते समय कुम्हारके हाथमें जो मट्टी लगजातीहै, उसमट्टीको सहत और बकरीके दूधमें मिलाकर पीवै तौ गर्भ स्थापन होजाताहै। कसेरु, सिंघाडे, जीवनीयगणकी औषधि, कमल, उत्पल, अंड और सतावर इन सब औषधियोंको दूधमें पकाकर पीनेसे-निश्चय गर्भशूल दूर होजाताहै ॥ १२८ ॥

भुग्नोऽनिलेनविगुणेनततःसगर्भः
संख्यामतीवबहुधासमुपैतियोनिम् ॥
द्वारंनिरोध्यशिरसाजठरेणकश्चि
त्कश्चिच्छरीरपरिवर्त्तितदेहकूजः ॥ १२९ ॥
एकेनकश्चिदपरस्तुभुजद्वयेन
तिर्यग्गतोभवतिकश्चिदपराङ्मुखोऽन्यः ।

पाश्वोंपवृत्तगतिरेवतथैवकाश्चि
दित्यष्टधागतिरियंह्यपराचतुर्धा ॥ १३० ॥

अर्थ-दुष्ट वातसे गर्भ टेढ़ा होकर अनेक प्रकारसे योनिके मुखपर आनकर अडजाताहै, तहाँ कोई गर्भ योनिके मुखको मस्तकसे रोक लेताहै कोई उदरसे योनि द्वारको रोकताहै कोई अपने शरीरको गोलघुमाकर कुबडे पनसे योनिद्वारको रोकताहै, कोई एकहाथसे, कोई दोनों हाथोंसे योनि द्वारको रोकताहै,कोई तिरछा होकर योनि द्वारको रोकताहै, कोई नीचा मुख होकर योनि द्वारको रोकताहै, और कोई पसलियोंको टेढ़ा करकै योनि द्वारको रोकताहै, ऐसे आठ प्रकारसे विकृत गर्भकी गति होतीहै। कोई चार प्रकारसे कहतेहैं॥१२९॥१३०॥

करिदमनदहनमूलंपिष्टंसलिलेनपानतःसद्यः।
चिरमाचिरजंगर्भंमृतममृतंवापातयति ॥ १३१ ॥
ज्वरादिरोगेगर्भिण्यामृदुकुर्याच्चिकित्सिम्।
तीक्ष्णंहिभेषजंतस्यागर्भपातायकल्पते ॥ १३२ ॥
चन्दनंशारिवालोध्रंमृद्वीकाशर्करान्वितम्।
क्वाथंकृत्वाप्रदातव्यंगर्भिण्याज्वरनाशनम् ॥ १३३ ॥

शर्कराप्रक्षेप्या।

अर्थ-नाग दौनकी जड, और लाल चीतेकी जडको जलमें पीसकर पीनेसे तत्काल थोडे दिनोंका बहुत दिनोंका, मराहुआ और विनामरा हुआ गर्भ पतित होजाताहै। गर्भिणी स्त्रियोंके ज्वरादि रोगोंमें मृदु चिकित्साकरै, क्योंकि तीक्ष्णऔषधियोंके द्वारा चिकित्सा करनेसे गर्भ पतित होजाताहै। चन्दन, अनन्तमूल, लोध, इनका क्वाथ बना मिश्री मिलाकर पीनेसे गर्भिणियोंका ज्वर दूर होजाताहै ॥ १३१ ॥ ॥ १३२ ॥ १३३ ॥

सहचरमुस्तगुडूचीभद्रोत्कटबिल्ववालकैःक्वथितम्।
पेयंमिश्रंमधुमिश्रंसद्योज्वरशूलनुत्सद्यः ॥ १३४ ॥

इति सहाचरादिः।

अर्थ-कटसरैया, नागरमोथा, गिलोय, भद्रमोथा, वेल और सुगंध

वाला, इनके काथमें सहत डालकर पीनेसे गर्भिणियोंके तत्काल ज्वर और शूल दूर होताहै ॥ १३४ ॥

एरण्डमूलममृतामंजिष्ठारक्तचन्दनम् ।
दारुपद्मयुतःक्काथोगर्भिण्याज्वरनाशनम् ॥ १३५ ॥
रास्नाछिन्नरुहासकुष्ठसहितैर्मूलैश्वपंचान्वितैः ।
तत्प्रातःक्कथितंसशर्करयुतंक्षौद्रेणसंयोजितम् ॥ १३६ ॥
पीतंहन्तिचगर्भिणीज्वरगदंश्लेष्माभिवृद्धिंपुनः ।
सद्यश्चैवचिकित्सकैश्चकुशलैर्ज्ञात्वापुराणैर्मतम् ॥१३७॥
मुस्तपर्पटदुस्पर्शकण्टकारीमहौषधम् ।
वातश्लेष्मारुचिहरंगर्भिण्याज्वरनाशनम् ॥ १३८ ॥
आम्रजम्बूत्वचक्काथंलेहयेल्लाजशक्तुभिः ।
अनेनलीढमात्रेणगर्भिणीसारकंजयेत् ॥ १३९ ॥

अर्थ-अंडकीजड़, गिलोय, मजीठ, लालचंदन, देवदारु और पद्माख यह सब औषधि समानले काथ बनाकर पीनेसे गर्भिणी स्त्रियोंका ज्वर दूर होताहै । रास्ना, गिलोय, कूठ और पंचमूल, यह सब औषधि समान भागले काथ बना बूरा और सहत डालकर पीनेसे गर्भिणियोंका ज्वर और श्लेष्मा, दूर होताहै । नागरमोथा, पित्तपापडा, धमासा, कटेरी और सोंठ यह सब समान भागले काथ बनाकर पीनेसे गर्भिणियोंके वात श्लेष्म, अरुचि और ज्वर दूर होताहै । आमकी छाल और जामुनकी छालका काथ बना तिसमें खीलोंके सत्तु मिलाकर पीनेसे तत्काल अतीसार रोग दूर होताहै ॥ १३५ ॥ १३६ ॥ १३७ ॥ ॥ १३८ ॥ १३९ ॥

ह्रीवेराऽरलुरक्तचंदनवलाधन्याकवत्सादनी ।
मुस्तोशीरयवासपर्पटविषाक्काथंपिबेद्गर्भिणी ॥ १४० ॥
नानावर्णरुजातिसारकगदेरक्तेस्रुतौवाज्वरे ।
योगोऽयंमुनिभिःपुरानिगदितःसूत्यामयेपूत्तमः॥१४१॥

इति ह्रीवेरादिः ।

अर्थ-सुगन्धवाला, श्योनाक, लालचन्दन, खिरैटी, धनिया, गिलोय नागरमोथा, खस, धमासा, पित्तपापडा और अतीस, यह सब औषधि समान भागले काथ करके पीनेसे स्त्रियोंके नाना प्रकारकी पीडा और रक्तस्राव युक्त अतिसार तथा ज्वर रोग दूर होताहै ॥ १४० ॥ १४१ ॥

इति योनिव्यापच्चिकित्सा समाप्ता ।

अथसुखप्रसूतिकरणमाह ।

पाठालांगलिसिंहास्यमयूरकजटैःपृथक् ।
नाभिवस्तिभगालेपात्सुखंनारीप्रसूयते ॥ १ ॥
परूषकस्थिरामूललेपात्तद्वत्पृथक्पृथक् ।
योनौवासांघ्रिलेपेनमहागर्भाप्रसूयते ॥ २ ॥
गृहाम्बुनागेहधूमपानंगर्भापकर्षणम् ।
गृहाम्बुनाहिंगुसिन्धुचूर्णपानंतथैवच ॥ ३ ॥

अर्थ-पाढ़, कलिहारी, अडूसा, मोरशिखा, फालसा, और शालिपर्णी इनमें किसीएक औषधिको पीसकर नाभि, वस्ति, अथवा योनिपै प्रलेप करनेसे- सुखपूर्वक प्रसव होताहै । अडूसेकी जडको जलमें पीसकर, योनिपै प्रलेप करनेसे- सुखसे स्त्री बालकको जनतीहै कॉंजीके साथ धूम पान करनेसे अथवा काँजीमे हींग और सैंधानोनका चूर्ण डालकर पीनेसे स्त्रियें सुखपूर्वक बालकको जनतीहैं ॥ १ ॥ २ ॥ ३ ॥

मातुलुंगस्यमूलानिमधुकंमधुसंयुतम् ।
घृतेनसहपातव्यंसुखंनारीप्रसूयते ॥ ४ ॥
पुटदग्धसर्पकञ्चुकमसृणमसीकुसुमसारसुहिताक्षी ।
झटितिविशल्याभवतिगर्भवतीमूढगर्भापि ॥ ५ ॥
तुषाम्बुपरिपिष्टेनमूलेनपरिलेपयेत् ।
लांगल्यासरणीसूतेक्षिप्रमेतेनगर्भिणी ॥ ६ ॥

अर्थ-बिजोरे नीबूकी जड और मुलेठीको एकत्र पीस सहत मिलाकर घृतके साथ पीनेसे स्त्रियोंके सुखसे प्रसव होताहै साँपकी कैंचलीको पुटके द्वारा जलाकर मसी बनालेवै, फिर उस मसीमें सहत मिलाकर

आँखोंमें लगानेसे मूढ़ गर्भा स्त्रीभी सुख पूर्वक प्रसव करै । कलिहारी जडको काँजीमें पीसकर गर्भिणीके दोनों पाँवोमें प्रलेप करनेसे अत्यन्त शीघ्रप्रसव होताहै ॥ ४ ॥ ५ ॥ ६ ॥

तालतरूत्तरमूलेमुक्तशिखाकच्छमुद्धृतोनियतम् ।
वासामूलेतद्वत्कटिवद्धंतिद्रुतंसूते ॥ ७ ॥
यासौसरस्वतीतीरेजम्भलानामराक्षसी ।
तस्याःस्मरणमात्रेणविशल्यागर्भिणीभवेत् ॥ ८ ॥
अलक्तकेनलिखितागर्भोपरितथाधार्यम् ।
क्षितिर्ज्जलंवियत्तेजोवायुर्विष्णुःप्रजापतिः ॥ ९ ॥
गर्भस्थांत्वांसदोषान्तुविशल्यामादिशन्तुच ।
प्रसूष्वत्वमविक्लिष्टमविक्लिष्टशुभानने ॥ १० ॥
कार्त्तिकेयद्युतिंपुत्रंकार्त्तिकेयाभिरक्षितम् ।
काचिदप्यनुकूलास्त्रीकर्णेवामेजपेच्छनैः ॥ ११ ॥
विशल्यकरणींविद्यांवक्ष्येयज्जलवारिणा ॥
सुखीभवतिशूलार्त्तक्षतोवज्रास्त्रकण्टकैः ॥ १२ ॥
गर्भिण्याविषमोगर्भःसमोभवतिनान्यथा ।
ॐक्षिपनिक्षिपउन्मथनिमथप्रथमप्रथममुञ्चमुञ्चस्वाहा। १३
अनेनचाष्टौपरिलेप्यपानीयंपातुंदेयम् ।
प्राक्चैवनवमान्मासात्सासूतागृहमाश्रयेत् ॥ १४ ॥
देशेप्रशस्तेसम्भारैःसम्पन्नंसाधकेऽहनि ।
तत्रोदीक्षेतसासूतिंसूतिकापरिवारिता ॥ १५ ॥

अर्थ-चोटी और धोतीको खोलकर ताड़वृक्षकी उत्तर दिशाकी जड अथवा अडुसेकी जड़को उखाडलाव, फिर गर्भिणीकी कटिपै बाँधनेसे शीघ्र प्रसव होताहै । " यासौ- गर्भिणीभवेत् ,, इस मंत्रको लाखके रंगसे भोजपत्रपै लिखकर गर्भिणीके गर्भ पैधारणकरै । अथवा- "क्षिति र्जल- शुभानने " इसमंत्रको गर्भिणीके वाए कानमें सुनानेसे स्वामिका-

र्त्तिकेयकी समान पुत्र उत्पन्न होताहै ॥ और " विशल्यकरणी-मुश्च मुश्च स्वाहा " इसमंत्रसे जलको आठवार पढ़कर गर्भिणीको पीनेको देवै । गर्भिणीस्त्री नवे महीनेसे पहिलेही सूतिकागृहमें चली जावै और वह सूतिकागृह उत्तमदेशमें बनाहो, तथा उत्तम तख्ते, कडी और ईंटो से पटाहो और शुभदिनमें उसकी नीमरक्खी गईहो। प्रसवहोनेके पश्चात् मर्यादसे प्रथम कदापि स्त्रीबाहर न निकले ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

अद्यश्वःप्रसवेग्लानिःकुक्षेशिथिलताक्लमः ।
अधोगुरुत्वमरुचिःप्रसेकोबहुमूत्रता ॥ १६ ॥
वेदनोरूदरकटीपृष्ठहृद्बस्तिवङ्क्षणे ।
योनिभेदरुजातोदस्फुरणस्रवणानिच ॥
आधीनामनुजन्मातस्ततोगर्भोदकस्रुतिः ॥ १७ ॥
जातेचशिथिलेकुक्षौमुक्तेहृदयबंधने ।
सशूलेजघनेनारीज्ञेयासातुप्रजायिनी ॥ १८ ॥

अर्थ-ग्लानि, कोखमें शिथिलता, क्लान्ति, अधोभागमें गुरुता, अरुचि, प्रतिश्याय, बहुमूत्रता, ऊरु, उदर, पृष्ठ, हृदय, बस्ति और छातीमेंपीड़ा, योनिमें भेदीसमानकी पीड़ा, सुइकीसमानपीड़ा, यंत्रणा स्फुरण और स्राव,भगसे जल और कफका गिरना, हृदयबंधनमें शिथिलता, और जाँघोमें शूलकी समान पीड़ा, यह सब प्रसवहोनेके चिह्नहैं ॥ १६ ॥ १७ ॥ १८ ॥

अतोपस्थितगर्भांतांकृतकौतुकमंगलाम् ।
हस्तस्थपुन्नामफलांअभ्यक्तोष्णाम्बुसेविताम् ॥ १९ ॥
पाययेत्सघृतांपेयांततोभूशयनेस्थिताम् ॥
पुनःपुनस्तामभ्यज्यकुर्यात्स्वंकर्मसूतिका ॥ २० ॥
मृदुपूर्वंप्रवाहेचवाढमाप्रसवाच्चसा ॥
हर्षयेत्तांमुहुर्जन्मशब्दैःसंजननायवै ।
प्रत्ययान्तितथाप्राणाःसूतिक्लेशावसादिताः ॥ २१ ॥

अर्थ–स्त्रियोंको गर्भ प्रसवके समय कौतुक और मंगल कार्य्य कराकर पश्चात् प्रसूताके हाथमें पुन्नाम कमल देकर योनि आदिमें तेलको मलकर गरमजलसे स्नानकरावै,और घृत संयुक्त पेया मिलाकर भूमिपर सुलादे । इस प्रकार प्रसवतक सूतिकाको वारंवार तैलादिसे अभ्यक्तकर सर्वदा हृष्टरक्खै, इससे प्रसूतिकाके अनेक प्रकारके क्लेश दूर होतेहैं ॥ ॥ १९ ॥ २० ॥ २१ ॥

इहामृतञ्चसोमश्चचित्रभानुश्चभाविनि ।
उच्चैःश्रवाश्चतुरगोमन्दिरेनिवसन्तुते ॥ २२ ॥
इदममृतमपांसमुद्धृतंवैतवलघुगर्भमिमंचतुस्त्री ।
तदनलपवनार्कवासवास्तेसहलवणाम्बुधरैर्दिशन्तुशान्तिम् ।
मुक्ताःपाशाविपाशाश्चमुक्ताःसूर्येन्दुरश्मयः ।
मुक्तःसर्वभयाद्गर्भःएह्येहिमाचिरमाचिरस्वाहा ॥ २४ ॥
अनेनसप्तधासप्तंपीत्वासुंस्त्रीप्रसूयते ।
ओंचँक्रँगर्भफट्स्वाहाइदंचूर्णप्रक्षयित्वा-
पर्णेनलिखित्वाताम्बूलंखादितुंदेयम् ॥ २५ ॥
एरण्डस्यवनेकाकोगंगातीरमुपागतः ।
भूतःपिबतिपानीयंविशल्यागर्भिणीभवेत् ॥
अनेनसप्ताभिमंत्रितंजलंपातुंदेयम् ॥ २६ ॥

अर्थ–"इहामृतञ्चसोमश्च–गर्भफलस्वाहा" इसमंत्रको पानमें चूनेसे लिखकर गर्भिणीको ताम्बूल खानेको देवै । "एरण्डस्यवने–गर्भिणी-भवेत्" इसमंत्रके द्वारा जलको सातवार अभिमंत्रितकर गर्भिणीको पीनेकोदेवै । इससे सुखसहित प्रसवहोताहै ॥२२॥२३॥२४॥२५॥२६॥

श्वेतापराजितामूलंघ्रातंपीतंजलेनवा ।
नाभिप्रलेपतोवापिसुखंसूतिकरंपरम् ॥ २७ ॥
मातुलुंगस्यमूलानिमधुकंमधुसंयुतम् ।
घृतेनसहपातव्यंसुखंनारीप्रसूयते ॥ २८ ॥

सर्पनिर्मोकसर्पिभ्र्यांधूपोयोनौप्रसूतिकृत् ।
प्रत्येकपुष्पीमूलंनिहितंयोनौगुदेऽथवा ॥ २९ ॥
स्त्रीणांबद्धंवाकटिदेशेप्रसवंकुरुतेसुखेनैव ।
यदिअपामार्गोत्पाटनेमूलंत्रुटचति ॥ ३० ॥
यदादुहितुर्ज्जन्मविजानीयादन्यथासूनोः ॥ ३१ ॥

अर्थ-सफेद अपराजिताकी जड़को जलमें पीसकर सूंघनेसे अथवा पीनेसे या नाभिपै लेपकरनेसे सुखपूर्वक प्रसवहोताहै । विजोरे नींबूकीजड़को और मुलेठीको एकत्रपीसकर सहत और घीके साथ मिलाकर पीनेसे स्त्रियोंके अत्यन्तसुखसे प्रसवहोताहै । साँपकी कैंचली और घृत, दोनोंको मिलाकर योनिमें धुआँदेनेसे सुखपूर्वक प्रसवहोताहै चिरचिटेकी जड़को उखाड़कर गर्भिणीयोंकीयोनिमें, गुह्यदेशमें अथवा कटीमें बांधनेसे सुखपूर्वक प्रसवहोताहै । चिरचिटेको उखाड़तेसमय जो उसकी जड़ टूट जावैतौ कन्या उत्पन्नहोवै और जो न टूटे तौ पुत्र उत्पन्नहो ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

नाड़ीऋतुवसुभिःसहपक्षदिगष्टादशभिरेवच ।
अर्कभुवनावेदसहितेरुभयंत्रिंसकमाश्चर्य्यंपंचदशकंवा ॥३२

	३०	३०	३०	
३०	१६	६	८	३०
३०	२	१०	१८	३०
३०	१२	१४	४	३०
	३०	३०	३०	

उभयात्रिंशकः ।

	१५	१५	१५	
१५	८	३	५	१५
१५	१	५	९	१५
१५	६	७	२	१५
	१५	१५	१५	

उभयपञ्चदशकः ।

अर्थ-उपरोक्त ३० तीस, या १५ पन्द्रहके यंत्रको लिखकर गर्भिणी को दिखलानेसे शीघ्र प्रसव होताहै ॥ ३२ ॥

कचवेष्टितयाङ्गुल्याघृष्टेकण्ठेमुखेपतत्यमरा ।

मूलेनलांगलक्यासंलिप्तेपाणिपादेच ॥ ३३ ॥
अमरापातनंसद्यःपिप्पल्यादिरजःपिबेत् ।
मूर्ध्निदद्यात्स्नुहीक्षीरंअमरापातनंपरम् ॥ ३४ ॥
वृद्ध्याद्वित्रिचतुर्मासंगंधकंमदिरान्वितम् ।
तीक्ष्णपर्णद्रवेणादौनाड्याःशुद्ध्यैप्रदीयते ॥ ३५ ॥

अर्थ–बालोंको अंगुलीमें बाँधकर कण्ठ या मुखमें घिसनेसे–निश्चय आंवर (जेर आदि) गिर जातीहै। कलिहारीकी जडको पीसकर गर्भिणीके पाँवों और हाथोंमें प्रलेप करनेसे–तथा पिप्पल्यादि चूर्णको जलकेसाथ पीनेसे निश्चय आंवर पतित होजाताहै। थूहरके दूधको मस्तकपै डालनेसे आमर गिरजातीहै । गंधकवृद्धिके अनुसार २। ३। या ४ मासे मदिरामें मिलाकर कमरखके रसके साथ गर्भिणीको पिलानेसे गर्भिणीकी नाड़ी शुद्धहोजातीहै ॥ ३३ ॥ ३४ ॥ ३५ ॥

संस्वेद्यवालुकाद्यैस्तुलंघितायायथाबलम् ।
क्षुधितायाःप्रशंसन्तिपथ्यंलघ्वन्नमेवच ॥ ३६ ॥
पंचकोलकमिश्रन्तुदशमूलमिहेष्यते ।
केवलंदशमूलंवापिप्पलींप्रक्षिपेत्ततः ॥ ३७ ॥
द्वित्रिरात्रंविधिरसौसप्ताहाद्बृंहणंक्रमात् ।
द्वादशाहेनतिक्रान्तेपिपितंनैवयोजयेत् ॥ ३८ ॥

अर्थ–प्रसूतास्त्रीको वालुकादि के द्वारा स्वेद देवै और बलानुसार लंघनकरावै, भूँखलगे तो हलकाभोजन खानेकोदेवै। गर्भिणीस्त्रीको वातश्लेष्म रोगमें आमवात रोगमें और कफरोगमें पंचकोलयुक्त दशमूल का क्वाथ पीनेको देवै। अथवा दशमूलके क्वाथमें पीपलका चूर्ण डालकर पीने को देवै। जिससे वायु कुपित न होवै और दुष्टरक्त शुद्धहोजाय, ऐसीविधि २–३ रात्रिपर्यन्त गर्भिणीके प्रयोग करै । सातरोजकेबाद बृंहण (पुष्टिकारक) क्रिया प्रदान करै। परन्तु १२ बारह दिनसे कम कदापि मांस न देवै ॥ ३६ ॥ ३७ ॥ ३८ ॥

वायुःप्रकुपितंकुर्यात्संरुध्यरुधिरंच्युतम् ।

सूतायाहृच्छिरोबस्तिशूलंमक्कल्लसंज्ञितम् ॥ ३९ ॥
यवक्षारंभवेत्तत्रसर्पिषोष्णोदकेनवा।
पिप्पल्यादिगणक्काथंपिबेद्वालवणान्वितम् ॥ ४० ॥
पिप्पल्यादिकचूर्णंवासुरामण्डेनपाययेत्।
वंशपत्राङ्कुरक्काथःसयवक्षारउत्तमः ॥ ४१ ॥
बिल्वमल्लीमातुलुंगमूललेपःशिरोऽर्त्तिनुत्।
घृतंमक्कल्लजिद्योनौरुबूतैलाक्तशूलकम्।
त्र्यूषणंपिप्पलीमूलंदारुचव्यंसचित्रकम् ॥ ४२ ॥
रजन्यौहवुषाजाजीसक्षारंलवणद्वयम्।
कल्कमुष्णाम्बुनापीतंसुखेनाशुविरिच्यते ॥ ४३ ॥

मक्कल्लशूलम्।

अर्थ–वायुके कुपित होनेसे प्रसूताओंके गिरताहुवारुधिर बंदहोजाताहै, और हृदय, बस्ति तथा मस्तकमें मक्कल्लक नामक शूल उत्पन्न होताहै। जवाखारके चूर्णको घीके साथ या गरम जलके साथ पीनेसे किम्वा पिप्पल्यादि गणका क्वाथ सेंधेनोनके साथ पीनेसे या पिप्पल्यादि गणकी औषधियोंका चूर्ण सुरामण्डके साथ सेवन करनेसे अथवा बाँस के कल्लोकेक्काथमें जवाखार डालकर पीनेसे प्रसूतस्त्रियों के मक्कल्लनामक शूल नष्ट होताहै। हींग, वेलकेफूल और बिजोरेकी जड़को पीसकर प्रलेप करनेसे प्रसूतास्त्रियोंके शिरःशूल नष्ट होताहै। घी और अण्डीका तेल मिलाकर योनिपै प्रलेप करनेसे योनिशूल दूर होताहै। सोंठ, मिरच, पीपल, पीपरामूल, चव्य, देवदारु, चीतेकी जड हलदी, दारुहलदी, जीरा, जवाखार, सेंधानोन और काला नोन, इनका चूर्ण गरमजलके साथ पीनेसे प्रसूतास्त्रियोंके सुखसहित जुल्लाब होजाताहै ॥ ३९ ॥ ४० ॥ ॥ ४१ ॥ ४२ ॥ ४३ ॥

मासमध्यर्द्धमासंवायावद्वापुष्पदर्शनम्।
अंगमर्दोज्वरःकंपःपिपासागुरुगात्रता ॥ ४४ ॥

शोथःशूलातिसारौचसूतिकारोगदर्शनम् ।
मिथ्योपसेवात्संक्लेशाद्विषमाजीर्णभोजनात् ॥ ४५ ॥
सूतिकायाश्चयेरोगाजायन्तेदारुणाःस्मृताः ।
ज्वरातीसारशोथश्चशूलानाहवलक्षयाः ॥ ४६ ॥
तंत्रारुचिप्रसेकाद्याःकफवातामयोद्भवाः ।
कृच्छ्रसाध्याहितेरोगाःक्षीणमांसवलाग्नितः ॥ ४७ ॥
तेसर्वेसूतिकानाम्नारोगास्तेचाप्युपद्रवाः ।
यत्नेनोपाचरेत्सूतांदुःसाध्योहिगदामयः ॥ ४८ ॥

अर्थ–प्रसूतास्त्रियोंके एक महीनेके भीतर या आधेमहीनेके भीतर पुनः ऋतुहोतेहुए अंगवेदना, ज्वर, पियास, कम्प, गात्रभार, शोथ, शूल और अतीसार यह सब रोग उत्पन्न होवे तौ उनके सूतिका रोग जानना। मिथ्योपचार, संक्लेश, विषमभोजन और अजीर्णमें भोजन करनेसे सूतिका वाली स्त्रियोंके ज्वर, अतिसार, शोथ, शूल, आनाह, बलक्षय तन्द्रा, अरुचि, प्रसेकादि दारुण कफवातोत्पन्न रोग उत्पन्न होतेहैं। इस रोगके होनेसे प्रसूता स्त्रियोंके मांस, बल और अग्नि क्षय होजातीहै, इस कारण कृच्छ्रसाध्य होताहै। अतएव अत्यन्त यत्नोंसे सूतिकाकी चिकित्सा करै ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥

लंघनाभ्यंजनस्वेदैःकटुतीक्ष्णोष्णपेयया ।
शौष्कमूलककौलत्थैर्यूषैर्मांसरसैःशुभैः ॥ ४९ ॥
दशमूलीकृतःक्वाथःसाज्यःसूतीज्वरापहः ।
आमशूलरुजायान्तुधान्यशुण्ठीसमन्विता ॥ ५० ॥
धान्यपंचकयुक्तावादशमूलीप्रशस्यते ।
क्वाथेनगुर्वीनिर्दिष्टाह्रीवेरादिश्चशस्यते ॥ ५१ ॥

अर्थ–लंघन, अभ्यंग, स्वेद, कटु, तीक्ष्ण, उष्णपेया, सूखीमूलीकायूष, कुलथीका यूष, और मांसरस, इनके द्वारा सूतिका रोगकी चिकित्सा करै। दशमूलका क्वाथ घृतके साथ पीनेसे सूतिका स्त्रियोंका ज्वर दूर

होताहै। धनिया और सोंठके साथ दशमूलका काथ या धान्यपंचक संयुक्त दशमूलका काथ या बृहत्पंच मूलका काथ अथवा ह्रीवेरादिका काथ पीनेसे सूतिका स्त्रियोंके आमशूल दूर होताहै ॥ ४९ ॥ ५०॥५१॥

सहाचरकृतःक्काथःपिप्पलीचूर्णमिश्रितः।
दीपनीज्वरशोथामसूतिकारोगनाशनः ॥ ५२ ॥
पीतझिण्टीकृतःक्काथोनिशापर्युषितोजयेत्।
सूतिरोगहरश्चैवतथातन्मूलचर्व्वणम् ॥ ५३ ॥
ध्मापयित्वानलेलोहंमुद्गयूषेनिषेचयेत्।
पंचमूलस्यवाक्काथेपिप्पलीसलिलेऽथवा ॥ ५४ ॥
पीतंयूषादितच्छीघ्रंसर्वसूतीरुजापहम् ॥ ५५ ॥

अर्थ-सफेद कटसरैयाके काथमें पीपलका चूर्ण पीनेसे सूतिका स्त्रियोंके अग्निदीपन होतीहै और सूजन, ज्वर और आमशूलका नाश होताहै। पीलीकटसरैयाका काथ बासी करके पीनेसे अथवा पीली कटसरैया चाबनेसे सर्वप्रकारके सूतिकारोग दूर होतेहैं। लोहेको अग्नि में गरम करकै मूंगके यूषमें, पंच मूलके काथमें और पीपलके काथमें बुझाकर उन यूषादिको पीनेसे सूतिकादिकके सम्पूर्ण रोग दूरहोजातेहैं ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

सहाचरपुष्करवेतसमूलंवैकङ्कतदारुकुलत्थसमम्।
शृतशीतससैन्धवहिंगुयुतंसद्योज्वरसूतिकाशूलहरम् ॥५६॥

अर्थ-कटसरैया, पोहकर मूल, वेतकी जड़, विकंकन, देवदारु और कुलथी, यह सब बराबर लेकर काथ बना शीतलकर हींग और सैंधानोन प्रक्षेपदेकर पीनेसे सूतिकावाली स्त्रियोंके तत्काल ज्वर और शूलादि रोग दूर होतेहैं ॥ ५६ ॥

दशमूलीमुद्गमाषयवकोलकुलत्थजम्।
क्काथंतक्रयुतंपक्कायूषःकार्यःसजीवकः ॥
ससैन्धवोघृतेभृष्टःपयोभुंजीततेनच ॥ ५७ ॥

इति दशमूल्यादि यूषः।

अर्थ-दशमूल, मूंग, उड़द, जौ, सूखीमूली, और कुलथी, इनका क्वाथ बनाकर तक्र और जीरेके साथ पकाकर सैंधानोन और घी मिलाकर दूधमें भूनकर पीनेसे सर्वप्रकारके प्रसूतिका रोग दूर होते हैं॥५७॥

सिद्धंद्विपंचमूलाभ्यांपयःशार्करपादधृक् ।
सूतिकोपद्रवंहन्तिपीतमात्रंनसंशयः ॥ ५८ ॥
देवदारुवचाकुष्ठंपिप्पलीविश्वभेषजम् ।
कट्फलंमुस्तकंनिम्बंतिक्ताधानाहरीतकी ॥ ५९ ॥
गजकृष्णांचदुस्पर्शागोक्षुरंधन्वयासकम् ।
बृहत्यतिविषाच्छिन्नाकर्कटंकृष्णजीरकम् ॥ ६० ॥
समभागान्वितैरेतैःसिन्धुरामठसंयुतम् ।
क्वाथमष्टावशेषन्तुप्रसूतांपाययेत्स्त्रियम् ॥ ६१ ॥

अर्थ-दशमूलको दूधमें औटाकर चौथाईभाग बूरा डालकर पीनेसे सर्वप्रकारके सूतिकारोग दूर होतेहैं। देवदारु, वच, कूठ, पीपल, सोंठ, कायफल, नागरमोथा, नीमकी छाल, कुटकी, धनिया, हरड, गजपीपल, कटेरी, गोखरू, धमासा, बृहती, अतीस, गिलोय, काठ आमला और कालाजीरा, यह सब औषधि समान भागले अष्टावशेष काढ़ाकरै, इस काढेमें सैंधानोन और हींग डालकर पीनेसे प्रसूता स्त्रियोंके शूल, मूर्छादि सूतिकारोग दूर होते हैं ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥

पिप्पलीदेवकाष्ठञ्चभद्रमुस्तकएवच ।
अगुरुंपिप्पलीमूलंश्लक्ष्णपिष्टञ्चकारयेत् ॥ ६२ ॥
तक्रेणसहसंयुक्तंपिबेद्यूषैर्विचक्षणा ।
एतेनघृतयुक्तेनपीतमात्रेणनिश्चितम् ॥ ६३ ॥

अर्थ-पीपल, देवदारु, नागरमोथा, अगर और पीपला मूल इन सबको बारीक पीस तक्रके साथ यूष बनाकर पीनेसे प्रसूता स्त्रियोंके सर्व प्रकारके सूतिका रोग दूर होतेहैं ॥ ६२ ॥ ६३ ॥

यवकोलकुलत्थानांशालिमूलंतथैवच ।
क्वाथयेदप्रमत्तश्चसुपूतेसलिलाढके ॥ ६४ ॥

तत्पादावस्थितंक्काथंसर्पिर्युक्तंसजीरकम् ।
पक्कंघृताक्षमात्रेणसैन्धवेनसमायुतम् ॥ ६५ ॥
एतेनैवचयूषेणचाश्नीयाच्छालिषष्टिकम् ॥
सूतिकोपद्रवंहन्तिभुक्तमात्रन्नसंशयः ॥ ६६ ॥

इति यवाद्यं घृतम् ।

अर्थ-जौ, सूखीमूली, कुलथी और शालिधानों की जड, यह सब २दोसेर लेकर ८ आठसेर जलमें पकावै जब २ दोसेर जल शेषरहै तब उतारकर छान लेवै, पश्चात् इसमें घी और जीरा मिलाकर पकावै,फिर सेंधानोन मिलाकर दोतोले प्रमाण सेवन करै, पश्चात् उक्त यूषके साथ शालि और साठी धानोंका भात भोजन करै तौ सर्व प्रकारके सूतिका रोग दूरहोतेहैं ॥ ६४ ॥ ६५ ॥ ६६ ॥

समूलपत्रक्काथन्तुशतंभद्रोत्कटस्यच ।
वारिद्रोणेनसंसाध्यस्थाप्यंपादावशेषकम् ॥ ६७ ॥
घृतप्रस्थंविपक्तव्यंगर्भंदत्वातुकार्षिकम् ।
व्योषंसपिप्पलीमूलंचित्रकंजीरकन्तथा ॥ ६८ ॥
पंचमूलीकनिष्ठश्चरास्नैरण्डसमायुतम् ।
यवासिन्धुयवक्षारंस्वर्जिकाकृष्णजीरकम् ॥ ६९ ॥
सिद्धमेतद्घृतंसद्योनिहन्यात्सूतिकागदान् ॥ ७० ॥

इति भद्रोत्कटाद्यं घृतम् ।

अर्थ-बकरीकामूत्र ४ चारसेर, क्काथके लिये भद्रमोथेकी जड और पत्र १२॥ साढ़ेबारहसेर, जल ६४ चौंसठसेर, शेष १६ सोलहसेर, और कल्कके लिये सोंठ, मिरच, पीपल, पीपरामूल, लालचीते की जड़ जीरा, स्वल्पपंचमूल, रास्ना, अंडकीजड़, जौ, सैंधानोन, जवाखार, सज्जी और कलाजीरा, यह सब १ एकसेर, इस घृतको सेवन करनेसे अग्निमांद्यादि रोग दूर होतेहैं ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७०॥

पिप्पलीपिप्पलीमूलंचित्रकोहस्तिपिप्पली ।
चव्यंनिशावचाकुष्ठंधान्यंभार्ङ्गीयमानिका ॥ ७१ ॥

व्याघ्रीचेन्द्रयवाःपथ्याबृहतीबिल्वपेषिका।
अर्थ—अब इसके आगे परम दुर्बल पंचामृत रसको कहतेहैं,यह सर्वरोग नाशकहै, सर्वसुखदायकहै, और संसारके रोगोंको दूरकरैहै, इससे पथ्यापथ्य विधिप्रयोग करनी चाहिये, यह विष्णुभगवान् ने कहाहै। पारा, कान्तलोह, ताँबा, अभ्रक और सोनामाखी, प्रत्येककी भस्म चारचार तोले, और शुद्धगंधक बीस बीस तोले लेकर सबको एकत्रपीसके बारीक चूर्णकरले इस चूर्णको अदरखके रसमें तीनदिन खरलकरै, फिर दशमूलके क्काथमें, अथवा लाल चीतेके रसमें ३ दिन खरलकर धूपमें सुखालेवै, पश्चात् हरड़, बहेडा, आमला, सोंठ मिरच, पीपल, वायविडंग चीता, नागरमोथा, तेंदू, तुम्बुरु, रेणुका, भारंगी, चिरायता, कुटकी, जायफल और कसेरु, प्रत्येकका चूर्ण दो दो तोले मिलादेवै, पश्चात् इसको मकोय, सम्हालू, पुनर्नवा, और गोरखमुण्डीके रसमें, दशमूलके क्काथमें, धनियेके क्काथमें, सोंठके क्काथमें, अदरखके रसमें, गिलोयके क्काथमें, सैंजिनेकी जडके रसमें, तथा फिर अदरखके । में

एक एक वार भावनादेकर, झरवेरकी समान गोली बनालेवै, प्रतिदिन एक गोली वीस २०कालीमिरचोंके साथ खावै । और इसपे तक्रके साथ भोजन करै ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥३८ ॥३९॥४०॥

भस्मीभूतसुवर्णतारदिनकृत्कृष्णाभ्रसूतैःक्रमात्
गंधानांखलुभागवृद्धिरपितत्कृत्वाशुभांकज्जलीम् ।
निर्गुण्डीदशमूलवह्निरजनीव्योषार्द्रकैर्भाविते-
र्गोलीकृत्यविशोष्यतन्निगदितःपंचामृतःस्याद्रसः ॥४१॥

इति शुद्धपंचामृत रसः ।

अर्थ–सोनेकी भस्म, चांदीकी भस्म, तांवेकी भस्म, अभ्रककी भस्म, पारेकी भस्म, और शुद्ध गंधक, यह सब क्रमसे एकसे एक अधिक लेकर कज्जली बनावै, पश्चात् इस कज्जलीको सह्मालु, दशमूल, चीता, हलदी, त्रिकुटा और अदरखके रसकी भावना देकर गोली बना धूपमें सुखा देवै, यहरस–सर्व प्रकारके रोगोंको हरै है ॥ ४१ ॥

गंधकेनशिलावापिसीसकोमाक्षिकेणवा ।
अभ्रोलोहेनवातद्वत्समभागेनपारदः ॥ ४२ ॥
सुभृष्टटंगणेनापिरसपादेनसंयुतः ।
रसेनपारिजातस्यकारवेल्यारसेनवा ॥ ४३ ॥
द्रवन्त्यातण्डुलीयकह्येकाहंमर्दयेद्रसम् ।
अर्धसंचूर्ण्यमण्डूरंदिनान्तंपरिमर्दयेत् ॥ ४४ ॥
तज्जलंभाजनेक्षिप्त्वासूर्यतापेनिधापयेत् ।
जलादुत्सृज्यमृत्स्नाञ्चपथ्ययासहमर्दयेत् ॥ ४५ ॥
पूर्वसूतस्यतंकल्कंलिम्पेन्मृत्स्नयातथा ।
अंगुलोत्सेधमानेनततःसंवेष्टचमृन्मयैः ॥ ४६ ॥
विशोष्यतंधमेद्गाढंसार्धैकघटिकावधि ।
तस्मादुद्धृत्यतंभित्वाशीतलाङ्गेनमूषिकाम् ॥ ४७ ॥

इति धातुबद्धोरसः ।

अर्थ-गंधक, मैनशिल, सीसा, सोनामाखी, अभ्रक और लोहा, प्रत्येक एक एक भाग, पारा छै भाग, भुना हुवा सुहागा १॥ डेढभाग, इन सबको एकत्र पीस पारिजातके रसमें करेलेके रसमें मूषा कर्णीके रसमें, और चौलाईके रसमें एक एक बार खरल करै। पश्चात् पारिजात (फरहद), करेला, मूसाकर्णी, और चौलाईके रसमें एक दिन मण्डूरको खरल करै, फिर मण्डूरको सोरठकी मट्टीमें मिलाकर मूषा बना लेवै, पश्चात् पूर्वोक्त गंधकादि खरल कीहुई औषधि इस मूषामें स्थापनकर एक अंगुल ऊंचा मृत्तिकाका लेपकर मृदु अग्निसे पकावे, स्वयं शीतल होजाय तौ चूर्ण करले। इसको त्रिकुटा और चीतादिके चूर्णके साथ खावै ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

अभ्रकंमाक्षिकंवज्रंकान्तंहेमसमंसमम्।
सर्वाणिसमभानिसूतयुक्तानिकारयेत् ॥ ४८ ॥
गोलकंचततःकृत्वापक्वंनिचुलवारिणा।
ततस्तंपुटपाकेनस्तम्भयित्वाप्रयत्नतः ॥ ४९ ॥

इति सुरसुन्दरी गुटिका।

अर्थ-अभ्रक, सोनामाखी, हीरा, कान्तलोह और सोना, सब समान भाग लेकर समान भाग पारेके साथ समुद्र फलके फलमें खरलकर गोला बनालेवे, पश्चात् इस गोलेको मूषामें रख मूषाको मृत्तिकासे लेपकर मृदु अग्निसे पकावै, यह औषधि-सर्व प्रकारके विष रोगोंको दूर करै है ॥ ४८ ॥ ४९ ॥

सूतंकान्तंउपलगगनंताप्यकंशुद्धतालं
राजावर्त्तंसुरभिमधुकंमानसीचेतितुल्यम्।
सर्वैस्तुल्यंदृषदिदलितंभृंगतोयेनसर्वं
गोलीभूतंभवतिविमलःसर्वभद्राभिधानः ॥ ५० ॥

इति सर्वतोभद्ररसः।

अर्थ-पारा, कान्तलोह, पत्थर, अभ्रक, सोनामाखी, हरिताल, राजावर्त्त, गूगल, मुलेठी और दुर्गपुष्पी, यह सब समान भाग लेकर सबकी समान भांगरेके रसमें खरलकर गोली बनालेवै। यह औषधि-गुल्मादि रोगोंको दूर करै है ॥ ५० ॥

पारदंसारलौहश्चकान्तलौहसमन्वितम् ।
माक्षिकस्यापिसत्त्वश्चसत्त्वंगगनसंभवम् ॥ ५१ ॥
पूतानिसमभागानिमर्दयेच्चप्रयत्नतः ।
निचुलफलतोयेनगोलकंकारयेत्ततः ॥ ५२ ॥
नवांगुलप्रमाणेनमूषागर्भेऽथपिण्डिका ।
निर्गुण्डीकाकमाचीचगोजिह्वादुग्धिकातथा ॥ ५३ ॥
गृहकन्यांमधुकश्चसैन्धवंपिण्डिकान्ततः ।
स्वेदयेत्पुटयोगेनसापिण्डीदृढतांव्रजेत् ॥ ५४ ॥

इति मृतिजीवनी गुटिका ।

अर्थ-पारा, सारलोह, कान्तलोह, सोनामाखीका सत्व और अभ्रककां सत्वं, यह सब समान भाग लेकर जलवेतके रसमें खरलकर गोला बनालेवै, पश्चात् इस गोलेको नौ अंगुलकी मूषाके गर्भमें स्थापन करै, फिर सह्मालू, मकोय, गोजिया, दूधी, घीकार, मुलेठी और सैंधानोन यह सब एकत्र पीसकर पूर्वोक्त गोलेमें मिलादेवै, मंद अग्निसे पुटपाक करै, इस औषधिको मुखमें धारण करनेसे सर्व प्रकारके रोग दूर होतेहैं ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥

तोलैकंशुद्धसूतस्यगंधकंतच्चतुर्गुणम् ।
कृत्वाकज्जलिकामादौमर्दयेत्तदनंतरम् ॥ ५५ ॥
पक्वंनिचुलतोयेनयथाकल्कोपजायते ।
ततोद्वयस्यताम्रस्यकृत्वापात्राण्यतःपरम् ॥ ५६ ॥
कज्जल्याःसहपत्राणिपक्वंनिचुलवारिणा ।
प्लावयित्वातुबहुधास्थापयेदातपेखरे ॥ ५७ ॥
तत्क्षिप्त्वाचान्धमूषायांपुटपाकंसमाचरेत् ।
चुल्लिकामुद्धृतंमूषांकृत्वात्रीणिप्रदापयेत् ॥ ५८ ॥
पुटानिकुक्कुटाख्यानिसूतसंस्कारसिद्धये ।

सिद्धसूतंसमादायगुंजामानंप्रदापयेत् ॥ ५९ ॥
चित्रकार्द्रकासिन्धूत्थैर्नागवल्लयादलेनवा ।
उपचारन्तुनिर्दिष्टंयथाप्राणेश्वरेरसे ॥ ६० ॥

इतिउदरभास्कररसः ।

अर्थ–शुद्धपारा १ एकतोला, शुद्धगंधक ४ चारतोले, दोनोंकी कज्जलीकर खरलकरै, पश्चात् पके समुद्र फलोंके रसमें इसका कल्क बनाले, फिर दुगुना तांबा लेकर पत्र बनाले, उन पत्रोंको कज्जलीके साथ बहुतवार पके समुद्रफलोंके रसमें भिजोकर प्रचंड धूपमें धरदेवै, फिर अन्धमूषामें रख पुटपाक करै, पश्चात् चूल्हेसे उतारकर कुक्कुटाख्य तीन पुट देवै, प्रतिदिन १ एकरत्तीभर चीते, अदरख, सैंधानोन, या पानके साथ खावै । उपचार प्राणेश्वर रसकी समान है ॥ ५५ ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥

शुद्धाभ्रकस्यगंधस्यरसस्यचततःपरम् ।
तोलकंकल्पयित्वातुसुगंधस्यचसंख्यया ॥ ६१ ॥
निर्गुण्डीकाकमाचीचधुस्तुरार्द्रकाशिग्रुभिः ।
गिरिकर्णीजयन्तीचभृंगंचातिलपर्णिका ॥ ६२ ॥
दण्डोत्पलीतथाजातीकन्दश्चकेशराजकम् ।
चित्रकश्चमहाराष्ट्रीतथान्यापिप्पलीजटा ॥ ६३ ॥
एतासामौषधीनाञ्चव्योमगंधंतथापरम् ।
रसैःप्रमर्दयेत्खल्लेक्रमेणानेनयत्नतः ॥ ६४ ॥
ततोनिरुन्धयेत्सम्यक्कृत्वासंपुटमध्यगम् ।
आरोप्यसंपुटंचुल्ल्यांकाष्ठाग्निंज्वालयेदधः ॥ ६५ ॥
याममात्रंततोध्मात्वास्वांगशीतलतांगतम् ।
संपुटन्तंसमाकर्षेत्सिद्धसूतंप्रयत्नतः ॥ ६६ ॥
सिद्धसूतात्प्रदातव्याश्चित्रकेणसमन्विताः ।

तिस्रोगुंजाश्चतस्रोवासन्निपातेऽतिदारुणे ॥ ६७ ॥
त्र्यूषणंजीरकेद्वेचयमानीवचयासह ।
आर्द्रकश्चतथापंचलवणानिप्रयोजयेत् ॥ ६८ ॥
क्षारत्रयंतथासर्वंसमभागंप्रकल्पयेत् ।
तत्सर्वमेकतःकृत्वारसमेवविधिःपरम् ॥ ६९ ॥

इति वारिसागररसः ।

अर्थ-अभ्रक, गंधक और पारा प्रत्येक १ एकएक तोला, लेकर सह्यालू, मकोय, धतूरा, अदरख, सैंजिना, कोयल जयंती, भांगरा, तिलवन, सहदेवी, जातीकन्द, कुकुरभांगरा, चीता, जल पीपल और पीपरामूल, प्रत्येकके रसमें क्रमसे एकएक वार खरलकरै, पश्चात् इसको सम्पुटमें रख, सम्पुटको चूल्हेपै स्थापनकर काठकी अग्निसे एक प्रहरतक पकावै, जब स्वांग शीतल होजाय तब सिद्ध पारेको निकाल लेवै, प्रतिदिन १ एकरत्ती खाय, पश्चात् लालचीता, त्रिकुटा, जीरा, अजवायन, वच, अदरख, पंचलवण, जवाखार सज्जी और सुहागेकी खीलोंका चूर्ण सेवन करै, यह वारिसागररस नानाप्रकारके रोगोंको हरै है ॥ ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥

श्वेतापुनर्नवादन्तीवाजिगंधात्रिकत्रयम् ।
दशमूलीवलायुक्तैरेभिर्लौहःप्रसाधितः ॥ ७० ॥
निहन्तिनिहतंकाश्यमपिभृंगविटैरपि ।
नास्त्यनेनसमोलोहःसर्वरोगान्तकारकः ॥
त्रिफलात्रिमदात्रिकटुमिलितसमंलौहम् ॥ ७१ ॥

अर्थ-सफेदकोयल, पुनर्नवा, दन्ती, असगंध, त्रिफला, त्रिकुटा, वायविडंग, चीता, नागरमोथा, दशमूल, खिरेटी, भांगरा और विड़लौन, यह सब एक भाग और सबकी बराबर लोहा लेवै। इस औषधिको यथानुपानके साथ सेवन करै तौ-सर्व प्रकारके रोग दूर होवैं ॥ ७० ॥ ७१ ॥

कासश्वासातिसारज्वरपिटककटीकोठकुष्ठप्रकारान्

मूत्राघातोदरार्शःश्वयथुगलशिरःकर्णशूलाक्षिरोगान् ।
येचान्येवातपित्तक्षयजकफकृताव्याधयःसंतिजन्तो
स्तांस्तानभ्यासयोगादपनमतिपयःपीतमन्तेनिशायाः ७२
विगतघननिशीथेप्रातरुत्थायनित्यं
पिबतिखलुनरोयोनासरन्ध्रेणवारि ।
सभवतिमतिपूर्णश्चक्षुषाताक्ष्यंतुल्यो
वलिपलितविहीनःसर्वरोगैर्विमुक्तः ॥ ७३ ॥
प्रातःपानीयपानेमुनिभिरभिहितंद्रव्यमेतच्चनाद्यात्
मांसंक्षीरंचशाकंसकलविदलकंपिष्टकंचिङ्गटञ्च ।
बिल्वंवेत्राग्रनिम्बंबहुपवनकरंनित्यजातंविदाहि
उष्णान्नंतैलभृष्टंश्रमकुपितवपुःस्वेदनंलंघनंच ॥ ७४ ॥
त्यज्यादभ्यंगमुष्णंबहुपवनवरंतीव्रमादित्यतापं
अग्नेःसेवाविनीतासुरभिजलयुतंलंघनंशीघ्रयानं ॥ ७५ ॥
भक्तंवारियुतंसुपथ्यविहितंतक्रंप्रशस्तंसदा
स्नानंचापिनिरंतरंचशुभदंनिद्राप्रशस्तादिवा ।
कुर्याद्यानिरसायनेचसततंतन्नारिकेलोदकं
दग्धंमीनंमिलित्वापानकरणेझोलञ्चमत्स्यस्यच ॥ ७६ ॥

अर्थ-जो मनुष्य नित्य रात्रिके अंतमें विधिपूर्वक जलपान करतेहैं, उनके खाँसी, श्वास, अतीसार, ज्वर, पिटक, कटिरोग, कोठरोग, कुष्ठरोग, मूत्राघात, उदररोग, बवासीर, सूजन, गलरोग, शिरोरोग, कर्णरोग, शूलरोग, नेत्ररोग, वात, पित्त, क्षय और कफसे, उत्पन्न हुए यह सबरोग नष्ट होजातेहैं । जो मनुष्य मेघरहित रात्रिके अंतमें अर्थात् सूर्योदयसे पहिले नित्य उठकर नासिकाके द्वारा जल पीतेहैं,-वह मति पूर्ण, दृष्टिमें गरुडकीसमान, वलिपलितहीन, और सर्वरोगोंसे छुट जाते हैं । नित्य प्रातःकाल जलपीनेवाले मनुष्यको मांस, दूध, शाक, सर्वप्रकारके विदल अन्न, पिष्टक, चिंगट, वेल, वेतका अग्रभाग, नीम, वातको

करनेवाले पदार्थ, दाहजनक पदार्थ, उष्ण अन्न, तेलमें भुनेहुए पदार्थ, परिश्रम, स्वेद,लंघन,तीक्ष्णद्रव्य, अग्निसेवन, शीघ्रगमन आदि त्यागदेवै। और जलयुक्त भात, तक्र, स्नान, दिनमें सोना, नारियलका जल, भुनी-मछली, और मछलियोंका झोल सदैव सेवनकरै ॥ ७२ ॥ ७३ ॥ ७४॥ ॥ ७५ ॥ ७६ ॥

त्रिफलायाःपलशतंचूर्णंभृङ्गरसाम्बुना।
भावयेत्सप्तवारास्तुच्छायाशुष्कन्तुकारयेत् ॥ ७७ ॥
पादंगंधकचूर्णस्यतदर्द्धंपारदंक्षिपेत्।
लिह्यान्मधुघृताभ्यांचमात्रयाप्रत्यहंपुमान् ॥ ७८ ॥
जीर्णेभोज्येह्यनाहारेगुणानेतानवाप्नुयात् ॥
प्रसन्नदृष्टिरव्याधिर्जीवेद्वर्षशतत्रयम् ॥ ७९ ॥

इति त्रिफलारसायनम्।

अर्थ-१०० सौ पल त्रिफलेके चूर्णको भांगरेके रसमें ७ सात वार भावना देकर छायामें सुखादेवै, पश्चात् इसमें २५ पचीस पल गंधक और १२॥ साढ़ेबारहपल पारा मिलादेवै। इसको प्रतिदिन सहत घृतमें मिलाकर सेवनकरै, भोजनके जीर्ण होनेमें अथवा भोजनसे पहिले खाय। यह-दृष्टिको प्रसन्न करैहै, सम्पूर्ण रोगोंको हरैहै, और ३०० तीनसौ वर्षकी आयु करैहै ॥ ७७ ॥ ७८ ॥ ७९ ॥

विडंगसारोमेधाख्योरक्तवह्निररुष्करः।
हस्तिकर्णःसितार्कश्चतथाश्वेतपुनर्नवा ॥ ८० ॥
वागुजीमुण्डिकाभृंगराजकोवृद्धदायकः।
गुडूच्यतिवलारास्नातालमूलीशतावरी ॥ ८१ ॥
पिण्डारोच्चटागजाःसमूलःकेशराजकः।
पारदंचपृथक्कर्षंलौहस्यपलपंचकम् ॥ ८२ ॥
पंचपलानिचाभ्रस्यपलमेकन्तुगुग्गुलोः।
द्विपलंगन्धकात्प्रोक्तंषट्कर्षाणिमनःशिला ॥ ८३ ॥

स्वर्णमाक्षिककर्षैकंपलंसार्द्धंशिलाजतोः।
त्रिफलात्रिकटूनाञ्चप्रत्येकंकार्षिकद्वयम् ॥ ८४ ॥
सर्वाण्येतानिसंचूर्ण्यघृतेनमधुनासह।
घृतभाण्डेसमालोड्यभक्षयेत्क्रमयोगतः ॥
संज्ञयासर्वतोभद्रंनिरत्ययमुदाहृतम् ॥ ८५ ॥

इति सर्वतोभद्रलौहम्।

अर्थ-विडंगसार, नागरमोथा, लालचीता, भिलावा, हस्तिकर्ण पलाश, सफेद आक, सफेद पुनर्नवा, वापची, गोरखमुण्डी, भांगरा, विधारा, गिलोय, कंघी, रास्ना, मुसली, सतावर, पिण्डार, निर्विषी-तृण, नागकेशर, मूली, कुकुरभांगरा, और पारा, प्रत्येक एकएक कर्ष, लोहा ५ पाँचपल, अभ्रक १ एकपल, गूगल १ एकपल, गंधक २ दोपल, मैनशिल ६ छैकर्ष, सोनामाखी १ एककर्ष, शिलाजीत ६ तोले त्रिफला २ कर्ष और त्रिकुटा २ कर्ष सबको एकत्रपीस बारीक चूर्णकर घृत और सहतमें मिलाके घीकेबासनमें भरके रखदेवै, इसको सेवनकरनेसे-अम्लपित्तादि नानाप्रकारके रोग दूरहोते हैं ॥८०॥ ८१ ॥ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

सहदेवा बलाचैवसूर्यावर्त्तोऽथमारिषः।
अपामार्गोऽमृताचेतिसम्यक्सम्पादयेद्भिषक् ॥८६॥
एषांपलानिचत्वारिप्रत्येकंकुट्टयेत्ततः।
अतऊर्द्ध्वंतदत्वामण्डूरंयत्पुरातनम् ॥ ८७ ॥
गोमूत्रेणपचेत्तावद्यावद्गोमूत्रशोषणम्।
तस्मादुद्धृत्यतच्चूर्णंकुर्यात्पलचतुष्टयम् ॥ ८८ ॥
त्रिकटुत्रिफलामुस्तगुडूचीचित्रकंत्रिवृत्।
दन्तीविडंगमेकैकंकर्षमेयान्तुचूर्णयेत् ॥ ८९ ॥
एकपत्रीकृतस्याथवज्रकाभ्रस्ययत्पलम्।
वार्य्येन्नाम्भस्त्रिरात्रस्थंवारिपर्णीरसाप्लुतम् ॥ ९० ॥

आतपेशोषयेत्तीक्ष्णेदिनमेकंसुरक्षया।
शूरणस्यरसैःपिष्ट्वातत्रटंकणकस्यच ॥ ९१ ॥
दत्वाष्टौमासकांस्तत्रपुटपाकेनपाचयेत्।
मृन्मयेसुदृढेपात्रेमृदुनागोमयाग्निना ॥ ९२ ॥
रसाद्द्वादशमासाश्चकर्षगन्धकतःपृथक्।
रसेमण्डूकपर्ण्याश्चमूर्च्छितौकज्जलीकृतौ ॥ ९३ ॥
घृतस्यमधुनश्चापिपृथक्पलचतुष्टयम्।
तत्सर्वमेकतःकृत्वास्निग्धेभाण्डेनिधापयेत् ॥ ९४ ॥
ततोऽष्टौमासकान्खादेद्दशवाद्वादशैवच।
कर्षवापितथाकुर्याद्बुद्ध्वादोषबलाबलम् ॥ ९५ ॥
दुग्धंचापिपिबेद्रोगीवह्नौमंदभवेततः।
तप्तोदकानुपानंवासेवेच्चग्रहणीगदे ॥
अजाक्षीरानुपानञ्चश्वासकासेप्रयोजयेत् ॥ ९६ ॥

इति रसाभ्रगुटिका।

अर्थ–सहदेई, खिरैटी, डुलडुल मरसा, चिरचिटा और गिलोय, प्रत्येक चारचार पल ले कूटकर आधेको एक हाँडीमें रखदेवै, उसके ऊपर पुराना मण्डुर रस कर फिर ऊपरसे पूर्वोक्त आधा कुटाहुवा द्रव्य रखदेवै, फिर गोमूत्र डालकर पकावै, जब गोमूत्र जलकर सूख जाय तब निकालकर ४ चार पल चूर्ण करले, फिर इस चूर्णमें त्रिकुटा, त्रिफला, नागरमोथा, गिलोय, चीता, निसोत, दन्ती और वायविडंग, प्रत्येकका चूर्ण एक एक कर्ष मिलालेवै, पश्चात् एकपत्री किया हुआ वज्राभ्रक १ एक पल लेकर जलकुम्भीके रसमें तीनदिन भिजोकर एक दिन धूपमें सुखावै, फिर जमीकन्दके रसमें पीस इसमें ८ आठमासे सुहागा मिला दृढ़ मट्टीके पात्रमें मंद मंद उपलोंकी अग्निसे पुटपाक करै पश्चात् इसका चूर्णकर पूर्वोक्त चूर्णके साथ मण्डूकपर्णीके रसमें मूर्च्छित कीहुई कज्जली चार ४ तोले, घृत ४ चारपल, और सहत ४ चारपल, सबको मिलाकर एक घीके बासनमें रखदेवै, इसको दोष और बलानु-

सार सेवन करै। अनुपान–मंदाग्निरोगमें दूत, संग्रहणी रोगमें गरम जल श्वास और खाँसीमें बकरीका दूध, यह अर्शादि रोगोंको दूर करैहै ॥ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ॥ ९५ ॥ ९६ ॥

चित्रकंमाणकश्चैवशूरणंघण्टकर्णकम्।
ग्रान्थिकंत्रिफलाव्योषंकट्फलंसपुनर्नवम् ॥ ९७ ॥
दण्डोत्पलंवृश्चिकालीरुदन्तीकाकमाचिका।
सूर्यावर्त्तत्रिवृद्दन्तीक्रिमिघ्नंकुष्ठमुस्तकम् ॥ ९८ ॥
शतपुष्पावचाचव्यंपत्रंरास्नाचतोलकम्।
माक्षिकाणाश्चताम्राणांपलंगंधकसूतयोः ॥ ९९ ॥
अभ्रकंद्विपलंग्राह्यंपात्रेकृत्वादृढोपमे।
सर्वमेकत्रसंमर्द्यद्विगुणंमृतमायसम् ॥
चूर्णंसर्वेश्वरोनामसर्वामयनिबर्हणम् ॥ १०० ॥

इति सर्वेश्वरोरसः।

अर्थ–चीता, मानकन्द, जमीकन्द, घण्टाकर्ण, पीपलामूल, हरड़ बहेडा, आमला, सोंठ, मिरच, पीपल, कायफल, पुनर्नवा, दण्डोत्पल विछारी, रुदन्ती, काकमाची, वायविडंग, दन्तीकी जड, सूर्यावर्त्त, कूठ, नागरमोथा, निसोत, सोया, वच, चव्य, तेजपात और रास्ना, प्रत्येकका चूर्ण एक एक तोले, सोनामाखी, ताँबा, पारा, और गंधक प्रत्येकका चूर्ण ४ चार चार तोले, अभ्रकका चूर्ण आठ ८ तोले, और दुगुना लोहेका चूर्ण, सबको एकत्र कर उत्तम दृढ़पात्रमें मर्दन करै, यह सर्वेश्वर नामवाला चूर्ण– सर्व प्रकारके रोगोंको दूर करैहै ॥ ९७ ॥ ॥ ९८ ॥ ९९ ॥ १०० ॥

पलंकृष्णाभ्रचूर्णस्यतदर्द्धंरसगंधके।
कर्पूरस्यतदर्द्धन्तुजातीकोषफलेतथा ॥ १०१ ॥
वृद्धदारकबीजश्चबीजमुन्मत्तकस्यच।
त्रैल्योक्यविजयाबीजंविदारीकन्दमेवच ॥ १०२ ॥

नारायणीतथानागबलाचातिबलातथा ।
बीजंगोक्षुरकस्यापिएञ्जलंबीजमेवच ॥ १०३ ॥
एतेषांकार्षिकंचूर्णगृहीत्वावारिणापुनः ।
निष्पिष्यवटिकाकार्यात्रिगुंजाफलमानतः ॥ १०४ ॥
निहन्तिसन्निपातोत्थान्गदान्घोरान्सुदारुणान् ।
वातोत्थान्पैत्तिकांश्चापिनास्त्यत्रनियमःक्वचित् ॥ १०५ ॥
अनुपानमिदंप्रोक्तंमांसंपिष्टंपयोदधि ।
वारितक्रसुधासीधूसेवनात्कामरूपधृक् ॥ १०६ ॥
इतिलक्ष्मीविलासोरसः ।

अर्थ-कृष्णाभ्रक चार ४ तोले, कज्जली ४ चारतोले, कपूर २ दोतोले जायफल, जाविञीकाचूर्ण २ दोतोले, और विधारेकेबीज, धतूरेकेबीज, भांगकेबीज, विदारीकन्द, सतावर, गंगेरन, कंघी, गोखुरुकेबीज और समुद्रफलकेबीज, प्रत्येकका चूर्ण २ दोदोतोले, सबको एकत्र जलमें पीसकर तीन तीनरत्तीकी गोलीबनाले, प्रतिदिन एकगोली खाय तौ नानाप्रकारके रोग दूरहों। अनुपान-दूध, दही, पिष्टक, मांस, जल, तक्र सीधु और सुरा ॥ १०१ ॥ १०२ ॥ १०३ ॥ १०४ ॥ १०५ ॥ १०६ ॥

शुद्धंकृष्णाभ्रचूर्णंद्विपलपरिमितंशाणमानंयदन्यत्
कर्पूरंजातिकोषंसजलमिभकणातेजपत्रंलवंगम् ।
मांसीतालीशचोचंकरिकुसुमगदंधातुकीचेतितुल्यम्
पथ्याधात्रीविभीतंत्रिकटुकपृथकत्वर्द्धशाणंद्विशाणं १०७
एलाजातीफलाख्यंक्षितितलविधिनाशुद्धगंधाश्वकोलं
कोलार्द्धंपारदस्यप्रदिपदनिहितंपिष्टमेकत्रमिश्रम् ।
पानीयेनैवकार्याःपरिमितचणकास्विन्नतुल्याश्ववध्यः ॥
प्रातःखाद्याश्वतस्त्रस्तदनुचाकियत्शृंगवेरंसपटुं
पानीयंपीतमन्तेध्रुवमपहरतिक्षिप्रमादौविकारान् १०८॥

इतिशृङ्गाराभ्रम् ।

अर्थ–शुद्धकृष्णाभ्रककाचूर्ण ८ आठतोले, कपूर, जायफल, सुगंधवाला, गजपीपल, तेजपात, लौंग, बालछड़, तालीशपत्र, दालचीनी, नागकेशर, कूठ और धायकेफूल प्रत्येकका चूर्ण चारचारमासे, हरड़, बहेड़ा, आमला, सौंठ, मिरच और पीपल, प्रत्येकका चूर्ण दोदोमासे इलायची और जावित्री प्रत्येकका चूर्ण ८ आठमासे, शुद्धगंधक और शिलाजीत प्रत्येकएकतोला, तथा पारा (रससिंदूर) ६ मासे, इन सबको एकत्र जलमें पीसकर चनेकी बराबर गोली बनालेवै, प्रतिदिन प्रातःकाल १ एकगोली, अदरख और पानकेरसके साथ सेवनकरै और ऊपरसे जलपीवै, यह औषधि कासादिरोगोंको दूरकरैहै। इस औषधिको सेवन करनेवाला मनुष्य मांस, मूंगादिकायूष, घी और सुपथ्यादिके साथ अन्नभोजनकरै ॥ १०७ ॥ १०८ ॥

विदारीकन्दजंचूर्णंचतुर्दशपलोन्मितम् ।
शाखोटबीजद्विपलंलाजाफलचतुष्टयम् ॥ १०९ ॥
सितापलशतंदेयंक्षीरंदत्त्वाविपाचयेत् ।
जातीफलंत्रिजातश्चसशटीग्रन्थिपर्णिभिः ॥ ११० ॥
यमानिकातथाव्योषंप्रत्येकंचूर्णशुक्तिभिः ।
सिद्धेपाकेक्षिपेत्सर्वंमोदकंशुक्रजीवनम् ॥ १११ ॥
समृद्धयतिवीर्यञ्चतेजोबलकरंपरम् ॥ ११२ ॥

इतिशुक्रसंजीवनीयो मोदकः ।

अर्थ–विदारीकन्दकाचूर्ण १४ चौदहपल, सिहोड़ेके बीज २ दोपल, खीलैं ४ चारपल, मिश्री १०० सौपल, इन सबको १२८ एकसौ अट्ठाईसपलदूधमें डालकर पकावै जब पककर सिद्धहोजाय तब जायफल, त्रिजातक, कचूर, गठिवन, अजवायन और त्रिकुटा प्रत्येककाचूर्ण चार चारतोले मिलाकर शुक्रजीवन नामवाले मोदक बनाले। यह मोदक शुक्र, तेज और बलको बढ़ावैहै ॥ १०९ ॥ ११० ॥ १११॥ ११२॥

फलत्रिकामृतामुस्तवृद्धदारविडंगकम् ।
वचानामेकशंचैवद्विपलंद्विपलंभवेत् ॥ ११३ ॥
कटुत्रिकंकणामूलंजलमूलकचित्रकैः ।

त्वगेलानागचूर्णानांप्रत्येकंचपलंपलम् ॥ ११४ ॥
सर्वंचूर्णमिदंश्लक्ष्णंपलानांपंचविंशतिः ।
द्विगुणेनगुडेनैवमोदकंपरिकल्पयेत् ॥ ११५ ॥
शतत्रयंयष्ट्यधिकंप्रत्यहंभोजनोपरि ।
सुविशुद्धशरीरस्तुशस्तेकालेशुभेदिने ॥ ११६ ॥
एकैकंकृत्वाकालेभक्षयेदामृतोपमम् ।
जलंवाअनुपातव्यंभोजनंसर्वकामिकम् ॥ ११७ ॥
मासेतुप्रथमेसर्वान्व्याधींश्चनाशयेद्ध्रुवम् ।
द्वितीयेपुष्टिजननंतृतीयेकनकप्रभः ॥ ११८ ॥
चतुर्थेशुक्रबहुलःपंचमेतुमहामतिः ।
षष्ठेनागसहस्राणांबलाद्देवातिरिच्यते ॥ ११९ ॥
सप्तमेवाजिवेगःस्यादष्टमेमंत्रसाधकः ।
सर्वज्ञोनवमेमासिदशमेपवनोपमः ॥ १२० ॥
स्त्रीजिदेकादशेमासेनाग्निनाद्वादशेदहेत् ॥
वलीपलितनिर्मुक्तोयुवकादधिकोभवेत् ॥ १२१ ॥
एवंसंवत्सरंयावद्यःकरोतिपुमानिह ।
वत्सराणांसहस्राणिजीवेन्नास्त्यत्रसंशयः ॥ १२२ ॥

इति अमृतसारगुटिका ।

अर्थ-हरड़, बहेड़ा, आमला, गिलोय, नागरमोथा, विधारा और वच, प्रत्येकाचूर्ण आठ आठतोले, सोंठ, मिरच, पीपल, पीपलामूल, सुगंधवाला, चीतेकीजड़, दालचीनी, इलायची और नागकेशर, प्रत्येकका चूर्ण चार चार तोले और सबसे दुगुना गुड़लेवै, सबको मिलाकर ३६० तीनसौ साठ लड्डू बनालेवै । वमन विरेचनादिसे शुद्ध होकर शुभसमय शुभदिनमें रोज रोज एक लड्डू खाय और ऊपरसे जलपीवै । इस औषधिपै इच्छानुसार भोजन पान करै । इसको सेवनकरनेसे पहिले महीनेमें सर्वप्रकारके रोग दूर होतेहैं । दूसरे महीनेमें पुष्टि बढ़ती

है। तीसरे महीनेमें सुवर्णकी समान शरीरकी कान्ति होतीहै। चौथे महीनेमें शुक्रकी अधिकता होतीहै। पाँचमें महीनेमें महाबुद्धिवान् होजाताहै। छठे महीनेमें हाथीकी समान बली होताहै। सातवें महीनेमें घोडेकी समान वेग होताहै। आठमें महीनेमें मंत्रसिद्धि होतीहै। नवमें महीनेमें सर्वज्ञ होताहै। दशमहीनेमें पवनकी समान गति होतीहै। ग्यारहवें महीनेमें मैथुनकेद्वारा स्त्रीको जीतताहै। बारहमें महीनेमें अग्निकी समान तेजकी वृद्धि होतीहै। एकवर्षके पश्चात् वली पलितादि रोगोंसे रहित होकर दीर्घायु होताहै ॥ ११३ ॥ ११४ ॥ ११५ ॥ ११६ ॥ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥ १२१ ॥ १२२ ॥

क्काथेमधुरवर्गस्याप्रस्थेप्रस्थेतथैवच।
पंचमूल्यास्तृणाख्यायाःसिताप्रस्थंविपाचयेत् ॥१२३॥
दत्वार्द्धकुडवंसर्पिर्नारिकेलजलस्यच।
प्रस्थत्रयंविनिक्षिप्यदृढेपात्रेशनैःशनैः ॥ १२४ ॥
सिद्धेवतारितेशीतेचूर्णमेषांविनिक्षिपेत्।
मुस्तैलापत्रधन्याकजीरकाणांगुडत्वचः ॥ १२५ ॥
काख्यावंशजायाश्चरोचनायास्तथैवच।
शाणद्वयमिदंकृत्वाप्रत्येकंकेशरस्यच ॥ १२६ ॥
खादेदग्निबलाक्षेपीपथ्यभुक्मात्रयानरः।
सनाशयेत्सर्वरोगान्शर्करालेहउत्तमः ॥ १२७ ॥

इति शर्करावलेहः।

इति रसायनाधिकारः।

अर्थ-मेदा, महामेदा, ऋद्धि, जीवक, ऋषभक, काकोली, क्षीरकाकोली, जीवन्ती और मुलेठी, इस मधुवर्गका क्काथ २ दो सेर, तृणपंचमूलका क्काथ २ दो सेर, मिश्री २ दो सेर, घी ऽ॥ आधसेर, और नारियलका जल ६ छै सेर, सबको एकत्र पकावै, जब सिद्धहोजाय तब उतारले, शीतल होनेपर नागरमोथा, इलायची तेजपात, धनिया, जीरा, दालचीनी, सौंफ, वंशलोचन, गोलोचन, और नागकेशर, प्रत्येकका चूर्ण आठ आठ मासे मिलादेवै, इसको अग्निका बलाबल देखकर

खावै। यह शर्करावलेह-सर्वप्रकारके पित्त वातादि रोगोंको दूर करैहै। इसपै पथ्य भोजन करै॥ १२३॥ १२४॥ १२५॥ १२६॥ १२७॥

इति रसायनाधिकारः समाप्तः।

नाभिमूलेभवेच्छूलंनिद्रालस्यंज्वरोऽरुचिः।
जाड्यंमलग्रहोदाहोरसाजीर्णेभवेन्नृणाम्॥ १॥
रसाजीर्णमितिज्ञात्वाततःकुर्यात्प्रतिक्रियाम्।
दिनत्रयंप्रयत्नेनक्रियमाणेरसायने॥ २॥
कर्कोटीकन्दसद्भूतंकषायंत्रिदिनंपिबेत्।
रसाजीर्णेपिबेद्वापिगोजलंरुचकान्वितम्॥ ३॥
विश्वसैन्धवसंयुक्तंमातुलुंगस्यमूलकम्।
अंगिनाद्रागकल्केनभुक्तोयदिभवेद्रसः॥ ४॥
नागदोषविशुद्ध्यर्थंगोमूत्रेणसमन्वितम्।
पटुयुक्तंपिबेन्मूलंकारवेल्लयाभवन्तथा॥ ५॥
एषांनागभवोदोषोनाशमायातिनिश्चितम्॥
वन्ध्याकर्कोटकंपुष्पंगरुडीचततःपरम्॥ ६॥
असामान्यतमंमूलंक्षिप्त्वागोजलमध्यतः।
अत्यम्लकटुतिक्तैश्चसूतःस्रवतिसेवितैः॥ ७॥
अत्यम्ललवणाहारैर्मन्दवीर्योभवेद्रसः।
सततंवर्जयेदेकाहारञ्चरससेवकः॥ ८॥
नश्यत्यग्निरनाहारात्सूतोनैवक्रमेत्तनौ।
रोगशान्तिंतथाकर्त्तुंनैवशक्नोति पारदः॥ ९॥
विचित्रैर्भोजनैस्तस्माद्रसंसमुपबृंहयेत्।
निषिद्धंवर्जयेत्सर्वंरससेवाविधौनरः॥ १०॥
रसस्रावकरंवर्ज्यंभोजनेचातियत्नतः।
अग्निमान्द्यकरंतद्वद्वर्ज्यंश्चापिप्रयत्नतः॥ ११॥

अर्थ-नाभिशूल, निद्रा, आलस्य, ज्वर, अरुचि, जड़ता, मलबंध, दाह, यह लक्षण होय तौ रसाजीर्ण जानना। रसाजीर्णके उत्पन्न होतेही तत्काल उसका प्रतिकार करना चाहिये। ककोड़ेके कन्दका क्राथ तीन दिन पीनेसे अथवा कालेनोनके साथ गोमूत्रको पीनेसे रसाजीर्ण नष्ट होताहै। सोंठका चूर्ण, सैंधेनोनका चूर्ण और बिजौरेकी केशर, तीनोंको एकत्र सेवन करनेसे-रसाजीर्ण रोग दूर होता है। मनुष्योंके नागदोष युक्त पारेको सेवन करनेसे-रसाजीर्ण होय तौ नागदोषको दूर करनेके लिये सैंधेनोनका चूर्ण और करेलेकी जडके चूर्णके साथ गोमूत्रको सेवन करै, इससे नागदोष दूर होताहै। वन्ध्याककोंडेके फूल और छिलहिंडकी जड़, थोडेसे गोमूत्रमें पीसकर सेवन करनेसे नाग दोष नष्ट होताहै। अत्यंत खट्टी, चरपरी और कडवी वस्तू खानेसे पारा झिरकर निकलजाताहै, तथा अत्यन्त खटाई और लवणके साथ आहार करनेसे-पारा हीनवीर्य होजाताहै। रसको सेवन करनेवाला मनुष्य सदैव एक प्रकारका अहार त्याग देवै। और एकवार ग्रंथमें आहार न करनेसे जठराग्नि नष्ट होती है पारा निजशक्तिको प्रकाशित नहीं करता और रोग नष्ट करनेकोभी समर्थ नहीं होता, इसकारण पारेको सेवन करनेवाला मनुष्य नानाप्रकारके आहारोंको सेवन करै। पारेको सेवन करनेवाला मनुष्य रसविधिमें संपूर्ण निषिद्धविषय सदैव त्यागदे, तथा आहारके द्रव्योंमें रसस्रावक और मंदाग्निजनक पदार्थ समस्त त्यागने चाहिये ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ॥ ९ ॥ १० ॥ ११ ॥

वलीपलितनिर्मुक्तोमृत्युहीनोभवेन्नरः।
जायतेमन्मथाकारोनरोऽपिप्रमदारतः ॥ १२ ॥
रसायनेहिनिर्दिष्टंप्रायशोरससेवने।
बुद्धिप्रजाबलंकान्तिप्रभावेणयथाबहिः ॥ १३ ॥
नौषधंपारदादन्यन्नदेवःकेशवात्परः।
नवैद्यादपरोबन्धुर्न्नदानादपरोविधिः ॥ १४ ॥
आरोग्यंलघुतासौष्ठ्यंरुचिगुर्व्वन्नजीर्णता।
रोगनाशश्चवृष्यश्चसततंरससेवनात् ॥ १५ ॥

इतिरसोपद्रवशमनम्।

अर्थ-विधिपूर्वक पारेको सेवन करनेसे वली (शरीरमें बलोंका पडना), पलित (बिना समयके बालोंका धवल होजाना) हीन, मृत्युके भयसे रहित और कामदेवके समान स्त्रियोंमें रमण रहता है। तथा बुद्धि, सन्तान, बल और कान्ति बढती है। जैसे-संसारमें कृष्णकी समान दूसरा देवता नहीं है, वैद्यकी समान भाई नहीं है, दानकी समान अन्य विधि नहीं है, उसीप्रकार पारेकी समान अन्य औषधि नहीं है। सदैव पारेको सेवन करनेसे आरोग्यता, शरीरमें लघुता सुन्दरता, रुचि, गुरुपाकी अन्नोंका जीर्ण होना, रोगोंका नाश और वीर्यकी वृद्धि होती है ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

इति रसोपद्रवचिकित्सासमाप्ता।

अथ वाजीकरणमाह।

वातादिकुणपंग्रन्थिक्षीणपूयमलाह्वयम्।
प्रजासमत्वंरेतोस्रंस्वलिंगैर्दोषजंवदेत् ॥ १ ॥
रक्तेनकुणपंश्लेष्मवाताद्यग्रन्थिसंभवम्।
पूयाभंरक्तपित्ताभ्यांक्षीणंमारुतपित्ततः ॥ २ ॥
कृच्छ्राण्येतानिसाध्यानित्रिदोषंमूत्रविट्निभम्।
ते स्वान्याञ्छुक्रदोषांस्तान्स्नेहस्वेदादिभिर्भवेत् ॥ ३ ॥

अर्थ-मनुष्योंका वीर्यवातादि दोषोंसे दूषित होकर दुर्गन्धित, क्षीण, ग्रन्थि, राधकी समान, और मलकी सदृश होजाताहै, तहां रुधिरसे दुर्गन्धित, कफवातसे ग्रन्थियुक्त, रक्तपित्तसे क्षीण और त्रिदोषसे मूत्र और मलकी समान होता है। त्रिदोषजको छोडकर अन्यान्य सर्व प्रकारके शुक्र दोष स्नेह स्वेदादिसे आरोग्य होते हैं, परन्तु त्रिदोषजन्य शुक्र कष्ट साध्य है ॥ १ ॥ २ ॥ ३ ॥

पिप्पलीलवणोपेतौवस्ताण्डौक्षीरसर्पिषा।
साधितौभक्षयेद्यस्तुसगच्छेत्प्रमदाशतम् ॥ ४ ॥
वस्ताण्डसिद्धेपयसिभावितानसकृत्तिलान्।
यःखादेत्सनरोगच्छेत्स्त्रीणांशतमपूर्ववत् ॥ ५ ॥

चूर्णंविदार्याःसुहृतंस्वरसेनैप्रभावितम् ।
सर्पिःक्षौद्रयुतोलीढ्वादशगच्छेन्नरोऽगनाः ॥ ६ ॥
भूमिकूष्माण्डमूलचूर्णमस्यैवमूलरसेन
भावितंरात्रौलेह्यम् । एवमामलकचूर्णं
स्वरसेनैवभावितम् ॥ ७ ॥
शर्करामधुसर्पिभ्यांयुक्तंलीढ्वापयःपिबेत् ।
एतेनाशीतिवर्षोपियुवेवपरिहृष्यति ॥ ८ ॥
विदारीकन्दकल्कन्तुघृतेनपयसानरः ।
उदुम्बरसमंपीत्वावृद्धोऽपितरुणायते ॥ ९ ॥
गोक्षुरकःक्षुरकःशतमूलीवानरीनागबलाऽतिबलानाम् ।
चूर्णमिदंपयसानिशिपेयंयस्यगृहेप्रमदाशतमस्ति ॥ १० ॥

अर्थ–पीपल और सैंधानोन मिलाकर बकरेके अंडकोषोंको घी और दूधके साथ पकावै, पश्चात् इसको खानेसे–सौ १०० स्त्रियोंसे गमन करनेको समर्थ होताहै । जिस दूधमें बकरेके अंडकोषों को पकायाहै उस दूधमें तिलोंको वारंवार भावनादेकर खानेसे–सौ १०० स्त्रियोंसे गमन करनेकी शक्ति होजातीहै । विदारीकन्दके चूर्णको विदारीकन्दके रसमें भावना देकर घृत और सहतकेसाथ सेवनकरनेसे–दश १० स्त्रियोंसे गमनकरनेकी शक्ति होतीहै । विदारीकन्दकी जड़के चूर्णको विदारीकन्दके जड़के रसमें भावनादेकर रात्रिमें शर्करा, घृत और सहतके साथ चाटै, ऊपरसे दूध पीवै, अथवा आमलोंके चूर्णको आमलोंके रसमें भावना देकर शर्करा, घृत और सहतके साथ चाटै, पश्चात् दूध पीवै तौ ८० अस्सीवर्षका वृद्धभी जवानकी समान होजाताहै । विदारी कन्दकी जड़को पीसकर घृत और दूधकेसाथ सेवनकरै तौ वृद्ध मनुष्यभी तरुणताको प्राप्त होताहै । गोखरू, तालमखाना, सतावर, कौंछ,गंगेरन और खिरैंटी, इनका चूर्ण करकै दूधकेसाथ रात्रिमें पीवै तौ १०० सौ स्त्रियोंमें रमणको समर्थहो ॥ ४ ॥५॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥

शतावर्य्यारजःप्रस्थंप्रस्थंगोक्षुरकस्यच ।
वराह्याविंशतिपलंगुडूच्याःपंचविंशतिम् ॥ ११ ॥
भल्लातकानांद्वात्रिंशच्चित्रकस्यदशैवतु ।
तिलानांशोधितानाञ्चप्रस्थंदद्यात्सुचूर्णितम् ॥ १२ ॥
त्र्यूषणस्यपलान्यष्टौशर्करायास्तुसप्तभिः ।
माक्षिकंशर्कराद्धेंनमाक्षिकाद्धेंनचैघृतम् ॥ १३ ॥
शतावरीसमंदेयंविदारीकन्दजंरजः ।
एतदेकीकृतं चूर्णं स्निग्धे भाण्डे निधापयेत् ॥ १४ ॥
पलार्द्धमुपयुञ्जीतयथेष्टञ्चास्य भोजनम् ।
मासैकमुपयोगेन जरां हन्तिरुजापहम् ॥ १५ ॥

नरसिंहचूर्णम् ।

अर्थ–सतावरकाचूर्ण दो २ सेर, गोखुरूकाचूर्ण २ दो सेर, वाराही-कन्दकाचूर्ण २॥ ढाई सेर गिलोयका चूर्ण ३ तीनसेर, चार ४ तोले, भिलावेकेबीजोंका चूर्ण ४ चारसेर, चीतेका चूर्ण १। सवासेर, शुद्ध किये हुए तिलोंका चूर्ण २ दो सेर, त्रिकुटेका चूर्ण १ एकसेर, शर्करा ७ सात पल, सहत १४ चौदह तोले, घी ७ सात तोले, और विदारीकंदका चूर्ण २ दो सेर, सबको एकत्र करके एक चिकने बासनमें भरके रखदेवै, इसमेंसे प्रतिदिन २ दो तोले खाय, इसके ऊपर यथेष्ट भोजन करै, यह औषधि एकमहीनेमें जरा और ज्वरादिरोगोंको दूर करै है ॥ ११ ॥ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

घृतंशतावरीगर्भंक्षीरेदशगुणेपचेत् ।
शर्करापिप्पलीक्षौद्रयुक्तंतद्वृष्यमुच्यते ॥ १६ ॥

इति शतावरीघृतम् ।

अर्थ–गायका घी २ दो सेर, दूध २० बीससेर, तथा कल्ककेलिये सतावरका चूर्ण ऽ॥ आधसेर, यथाविधिसे घृतको सिद्धकरै । सिद्धहोनेपर शर्करा, पीपलका चूर्ण, और सहत मिलाके इसको सेवन करै इससे अत्यन्त वीर्यकी वृद्धिहोतीहै ॥ १६ ॥

यत्किञ्चिन्मधुरंस्निग्धंजीवनंबृंहणंगुरु ।
हर्षणंमनसश्चैवसर्वंतद्वृष्यमुच्यते ॥ १७ ॥
यदिमासाद्रसंशुक्रंउग्रंबतानिरर्थकम् ।
प्रायश्च्योतयतेहिशुक्रंशय्यान्यत्रकरोतितत् ॥ १८ ॥
नरोवीर्य्यकरान्रोगान्सम्यक्शुद्धोनिरामयः ।
आसप्ततिंप्रकुर्वीतवर्षादूर्द्ध्वंश्चषोडशात् ॥ १९ ॥
नतुवैषोडशाद्वर्षात्सप्ततेःपरतोनच ।
आयुःकामोनरःस्त्रीभिःसंयोगंकर्त्तुमर्हति ॥ २० ॥
कल्याणोदग्रवयसोवाजीकरणसेवितः ।
सर्वेषुऋतुषुवह्वव्यवायोहिनिवारितः ॥ २१ ॥
आयुष्मन्तोमन्दजरावपुर्वर्णबलान्वितः ।
स्थिरोपचितमांसाश्चभवन्तिस्त्रीषुसंयताः ॥ २२ ॥
त्रिभिस्त्रिभिरहोभिश्चसेवेतप्रमदानरः ।
सर्वेषुऋतुषुग्रीष्मेपश्चात्पश्चाद्व्रजेद्बुधः ॥ २३ ॥
योगान्संसेव्यवृष्यान्सासितमथपयःशीतलंचाम्बुपीत्वा
गच्छेन्नारींसुरूपांस्मरशतवलांकामुकःकाममाद्ये ।
यामेहृष्टप्रहृष्टांव्यपगतसुरतःसंस्वपेन्नित्यनित्यां
कान्तःकान्ताङ्गसंगादपहृतनरोधातुवैषम्यमेति ॥ २४॥
ग्लानिःकम्पोरुदौर्वल्यंधात्विन्द्रियवलक्षयः ।
क्षयवृद्ध्युपदंशाद्यारोगाश्चातिवदुर्ज्जयाः ॥ २५ ॥
अनेनमरणञ्चास्याद्व्रजतःस्त्रियमन्यथा ।
शोषकासज्वरार्शांसिश्वासकासातिपाण्डुता ॥ २६ ॥
अतिव्यवायाज्जायन्तेरोगाश्चाक्षेपकादयः ।
असेवनान्मेहमेदोग्रन्थिरग्नेश्चमार्द्दवम् ॥ २७ ॥

त्यजेत्पूज्येशुचिस्थानेलोकाध्यक्षञ्चमैथुनम् ॥
ग्लानिःकम्पोऽरुचिःसादस्तदनुचकृशताक्षीणताश्चेन्द्रियाणां
श्वासःशोषोपसंगोज्वरगुदजरुजाक्षीणताश्चेन्द्रियाणाम्।
जायन्तेदुर्निवारःपवनपरिभवःक्लीबतालिङ्गभङ्गो।
रम्यारम्याभियोगाद्व्रजतइवसदावाजिकर्मोच्युतस्य ॥ २८ ॥
तोयाङ्गरागशिशिरातपशीतवाताः
ताम्बूलसोमकरशीतरसेक्षुभक्ष्याः।
स्नानञ्चदुग्धमधुपूगफलानिनिद्रा
सेव्यानिकामुकजनैःसुरतावसाने ॥ २९ ॥

अर्थ-जे पदार्थ किंचित् मधुर, तृप्तिकारक, जीवन पुष्टिकारक भारि और मनको हर्षित करनेवाले हैं उनको वृष्य कहते हैं। मनुष्योंके महीनेकी अपेक्षा अधिक अर्थात् जितना एक महीनेमें होय उससे अधिक शुक्रस्राव होय तौ उससे नानाप्रकारके रोग उत्पन्न होते हैं। शुद्ध और रोगरहित मनुष्य १६ षोड़श वर्षसे लेकर ७० सत्तर वर्षकी आयुतक मैथुन करता है, परन्तु षोड़शवर्षसे कम और ७० सत्तर वर्षसे अधिक कदापि स्त्रीसंसर्ग न करै, किसी ऋतुमेंभी अधिक स्त्रीसंसर्ग नहीं करना चाहिये। आयुष्मान्, जरासेरहित, सुन्दर शरीर वाला, बलवान् और हृष्ट पुष्ट मनुष्यको प्रत्येक ऋतुमें तीन तीन दिनके बाद और ग्रीष्मऋतुमें १५ दिनके पश्चात् मैथुन करना चाहिये। वीर्य्य जनक औषधियोंको सेवनकर पश्चात् मिश्रीके साथ दूध और शीतल जलको पीकर, सुन्दर स्वरूपवाली स्त्रियोंके पासजाय। अत्यन्त मैथुन करनेसे-ग्लानि, कम्प, घुटनोंमें दुर्बलता, धातु और इन्द्रियोंके बलका नाश, राजयक्ष्मा, उपदंश, शोष, खाँसी, ज्वर, बवासीर, श्वास, पाण्डु, और आक्षेपादिरोग उत्पन्न होतेहैं। बिलकुल मैथुन नहीं करनेसे-प्रमेह, मेद वृद्धि, ग्रन्थि, और मंदाग्निरोग उत्पन्न होताहैं। पूज्य और पवित्र स्थानमें स्त्रीसंसर्ग करनेसे ग्लानि, कम्प, अरुचि, अवसाद, कृशता, शोष, श्वास, गरमी, बवासीर, धातुक्षीण, नपुंसकता और ध्वज भंग रोग उत्पन्न होताहे। जल, अंगराग, शिशिर, आतप, शीतलवायु,

ताम्बूल, चन्द्रकिरण, शीतलपदार्थ, ईखकारस, ईखके विकार, दूध, सहत, सुपारी और निद्रा यह सब मैथुनके अंतमें अत्यंत हितकारी है॥ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ॥ २७ ॥ २८ ॥ २९ ॥

त्रैलोक्यविजयापत्रंसबीजंघृतभर्जितम् ।
त्रिकटुत्रिफलाशृंगीकुष्ठसैन्धवधान्यकम् ॥ ३० ॥
शटीतालीशपत्रंचकट्फलंनागकेशरम् ।
यमानिचाजमोदाचयष्टीमधुकमेवच ॥ ३१ ॥
मेथीजीरकयुग्मञ्चगृहीत्वाभर्जितंकियत् ।
यावदेतानिचूर्णानितावदेवतदौषधम् ॥ ३२ ॥
तावदेवसितादेयायावदायातिबन्धनम् ।
घृतेनमधुनामिश्रंमोदकंपरिकल्पयेत् ॥ ३३ ॥
त्रिसुगन्धिसमायुक्तंकर्पूरेणाधिवासयेत् ।
स्थापयेद्घृतभाण्डेतुश्रीमन्मदनमोदकम् ॥ ३४ ॥
भक्षयेत्प्रातरुत्थायवातश्लेष्मविनाशनम् ॥ ३५ ॥

श्रीमन्मदनमोदकः ।

अर्थ—घीमें भुने हुए भांगके बीज और पत्ते, सोंठ, मिरच, पीपल, हरड़, बहेड़ा, आमला, काकडाशिंगी, कूठ, सैंधानोन, धनिया, कचूर, तालीशपत्र, कायफल, नागकेशर, अजवायन, अजमोद, मुलेठी, मेथी, और भुनाहुवा कालाजीरा तथा सफेदजीरा, प्रत्येकका चूर्ण एकएक भाग, सबकी बराबर बूरा, तथा दालचीनी, तेजपात और छोटी इलायची तथा कपूर, प्रत्येक एकभाग, यथानुसार घृत और सहत मिलाकर लड्डू बनाके घीके बासनमें भरके रखदेवै, प्रतिदिन एक मोदक दूधके साथ खाय । यह श्रीमन्मदनमोदक अत्यन्तकामवर्द्धक, तथा वातश्लेष्मादिरोगोंको हरै है ॥ ३० ॥ ३१॥३२॥ ३३ ॥३४॥३५॥

त्रैलोक्यविजयापत्रंसबीजंघृतभर्जितम् ।
समेशीतातपेलेपश्चूर्णयेदतिचिक्कणम् ॥ ३६ ॥

शतावरीरजश्चैवविदारीकन्दजंरजः ।
बलातिबलयोश्चैवमूलवल्कलजंरजः ॥ ३७ ॥
गोक्षुरयोर्बीजाद्रजोवानरीबीजतः ।
एतदेकीकृतंयावच्छतावर्य्यादिकंरजः ॥ ३८ ॥
तस्माच्चतुर्गुणंकार्य्यंत्रैलोक्यविजयारजः ।
पयसाथसमेतस्मिन्गोलयेच्चूर्णसञ्चयः ॥ ३९ ॥
गोलयित्वासिताश्चैवशक्रचूर्णाच्चतुर्गुणाम् ।
पचेदवहितोवैद्योमंदमन्देनवह्निना ॥ ४० ॥
ततःपाकक्रमंदृष्ट्वाभृष्ट्वाचैवाऽसितंतिलम् ।
बुद्ध्वावतारितंदद्यान्मोदकार्थंभिषग्वरः ॥ ४१ ॥
त्रिकटुत्रिसुगंधंचसैन्धवंसधनीयकम् ।
जातीकोषफलंचैवबालकं जीरकद्वयम् ॥ ४२ ॥
शटीकुंदुरुकोटिश्चमुस्तामधुरिकामुरा ।
मांसीतालीशपत्रंचपत्रवारेन्द्रमेवच ॥ ४३ ॥
ग्रन्थिपर्णशिवाचैवतथैवशतपुष्पिका ।
चविकादेवदारुश्चसप्रियंगुलवंगकम् ॥ ४४ ॥
सरलःशैलजश्चैवसर्वमेतद्विचूर्णयेत् ।
अत्रवट्टालनेयुक्तंद्रव्यंतद्गन्धवृद्धये ॥ ४५ ॥
ढालयित्वाकृतंचूर्णशक्रचूर्णस्यपादिकम् ।
सैन्धवंस्वादुतायोग्यंदेयंकटुकमेवच ॥ ४६ ॥
ततःसुमिलितंकुर्यान्मोदकंपरिकल्पयेत् ।
भूयस्त्रिजातकेचूर्णेचूर्णेत्र्यूषणजेतथा ॥ ४७ ॥
लोढयेन्मोदकानेतान्सिद्धार्थानथसिद्धये ।
कांचनेराजतेपात्रेकांस्येसम्पुटकेन्यसेत् ॥ ४८ ॥

रजस्त्रिजातानास्तीर्य्यकर्पूरेणाधिवासयेत् ।
भक्षयेत्प्रातरुत्थायमहामदनमोदकम् ॥ ४९ ॥

इति महाभुदनमोदकम् ।

अर्थ–घृतमें भुनेहुए भाँगके बीज और पत्तोंको पीसकर बारीक चूर्ण बना छायामें और धूपमें सुखालेवै । सतावर, विदारी कंद, खिरैटी, कंघी, गोखरू, तालमखाना और कौंछके बीज, प्रत्येकका चूर्ण एक एक भाग, घीमें भुने हुए भांगके बीज और पत्तोंका चूर्ण २८ अट्ठाईस भाग दूध समान भाग, और बूरा भांगके चूर्णसे चौगुना, सबको मिलाकर मंद मंद अग्निसे पकावै, जब पकते पकते गाढा होजाय तब भुने हुए काले-तिल, त्रिकुटा, त्रिसुगंधि, सैंधानोन, धनिया, जावित्री, जायफल, सुगंध वाला, सफेद जीरा, कालाजीरा, कचूर, कुन्दुरु, सौंफ, नागरमोथा, कपूरकचरी, तालीसपत्र, तेजपात, खिरैटी, हरड़, सोया, चव्य, देव-दारु, फूलप्रियंगु, लौंग, धूप सरल और भूरिछरीलां, इनका चूर्ण करकै मिलादेवै, पश्चात् इसको एक परातमें ढालकर चौथाई भाग भांगका चूर्ण, स्वादके योग्य सैंधव लवणका चूर्ण मिलाकर मोदक बनालेवै, फिर इन लड्डुओंको त्रिजातके चूर्णमें और त्रिकुटेके चूर्णमें लुटाकरकै कपूरकी वासनादेवै, पश्चात् सोने, चांदी, या कांसीके पात्रमें भरकै रखदेवै, इसमेंसे प्रतिदिन एक मोदक खाय और ऊपरसे दूध पीवै तो अत्यन्त कामकी वृद्धिहो, तथा कास श्वासादि सम्पूर्ण रोग नष्ट होय ॥ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

शतावर्य्यःश्वदंष्ट्राचबलाचातिबलातथा ।
मर्कटीक्षुद्रबीजश्चविदारीकंदजंरजः ॥ ५० ॥
एतानिसमभागानिपलिकानिविचूर्णयेत् ।
चूर्णाच्चतुर्गुणन्देयंत्रैलोक्यविजयारजः ॥ ५१ ॥
सर्वमेकीकृतंयावत्तदर्द्धंमाहिषंपयः ।
तावन्मात्रेणदातव्यंशतावर्यारसन्तथा ॥ ५२ ॥
विदार्य्याःस्वरसप्रस्थंसितापलशतंन्यसेत् ।

गोलयित्वासितान्दत्वापात्रेताम्रमयेदृढे ॥ ५३ ॥
पचेत्पाकविधिज्ञोऽपिमोदकःपरमोहितः ।
त्र्यूषणंत्रिफलाशृंगीत्रिजातंसैन्धवंशठो ॥ ५४ ॥
धान्यकंबालकंमुस्तंद्विजीरंकुन्दुरुर्मुरा ।
काकोलीक्षीरकाकोलीद्राक्षातुगामृगाण्डजम् ॥ ५५ ॥
जातीकोलफलंमांसीतालाङ्कुरकशेरुकम् ।
शतपुष्पाचवीदारुग्रन्थिकंसलवंगकम् ॥ ५६ ॥
कुष्ठंयमानिकाचात्मगुप्ताकट्फलमेथिका ।
मधुरीकाचमधुकंतालीशंवरखर्जुरम् ॥ ५७ ॥
टंकणञ्चविचूर्ण्याथप्रत्येकंकोलसंमितम् ।
चूर्णार्द्धंशोधितंगंधंगंधपादांशपारदम् ॥ ५८ ॥
कज्जलीकृत्यदत्वातंलोडयेत्रिसुगन्धिना ।
यथाशक्त्यामोदकंचकर्पूरेणाधिवासयेत् ॥ ५९ ॥
उद्धृत्यस्निग्धभाण्डेतंप्रस्थाप्यचभिषग्वरैः ।
शिवंसंपूज्यसगणंधन्वन्तरिमुनिन्तथा ॥ ६० ॥
कोलप्रमाणंकर्त्तव्यंक्षीरंचानुपिबेन्नरः ।
प्रातर्भोजनकालेवासायंकालेऽपिभक्षयेत् ॥ ६१ ॥
प्रमदाशतंचभजतेनचशुक्रक्षयोभवेत् ।
नातःपरतरंकिंचित्विद्यतेवाजिकर्म्मसु ॥ ६२ ॥
शतावरीमोदकंचवासुदेवेननिर्मितम् ॥ ६३ ॥

इति शतावरीमोदकम् ।

अर्थ–सतावर, गोखरू, खिरेंटी, कंघी, कौंछ, मंदारकेबीज और विदारीकन्दकाचूर्ण प्रत्येक ४ चारतोले, इन सब औषधियोंसे चौगुना भाँगके बीजोंकाचूर्ण, सबचूर्णसे आधा भैंसकादूध, और सतावरका रस, विदारीकन्दका २ दोसेर, और बूरा१००सौपल, इन सबको एकत्र करकै

ताँबेके बासनमें पकावै, जब पकते पकते गाढ़ाहोजाय तब त्रिकुटा, त्रिफला, काकड़ासिंगी, त्रिजातक, सैंधानोन, कचूर, धनिया, सुगंधवाला, नागरमोथा, सफेदजीरा, कालाजीरा, कुन्दुरु, कपूरकचरी, काकोली, क्षीरकाकोली, दाख, वंशलोचन, कस्तूरी, जायफल, जावित्री, बालछड़, ताड़केअंकुर, कसेरु, सोया, चव्य, देवदारु, गठिवन, लौंग, कूठ, अजवायन, कोंछके बीज, कायफल, मेथी, सौंफ, काच (कालानोन), मुलेटी, तालीशपत्र, पिण्डखजूर और सुहागेकीखीलैं, प्रत्येककाचूर्ण एकएकतोला, सबचूर्णसे आधागंधक, और गंधकसे चौथाई भाग पारेकी बनाई हुई कज्जली सबको मिलाकर एकएक तोलेके लड्डू बनालेवै, पश्चात् इन लड्डुओंको त्रिसुगंधिके चूर्णमें लुटाकर कपूरकी बासनादेवै, फिर एक उत्तम चिकने बासनमें भरके रखदेवै, प्रतिदिन १एकलड्डू खाय और ऊपरसे दूधका अनुपान करै। इसके प्रभावसे सौ १०० स्त्रियोंके पास जासक्ताहै और शुक्रका क्षय नहोवै। तथा कास, श्वास और प्लीहादि रोग दूरहोजातेहैं ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥

शतावरीश्वदंष्ट्राचवलाचातिवलातथा।
मर्कटीक्षुरबीजञ्चविदारीकन्दजंरजः ॥ ६४ ॥
एतानिसमभागानिपलिकानिविचूर्णयेत्।
चूर्णाञ्चतुर्गुणंचैवत्रैलोक्यविजयारजः ॥ ६५ ॥
एतदेकीकृतंयावत्तदर्द्धमाहिषंपयः।
तावन्मात्रेणदातव्यंशतावर्यारसन्तथा ॥ ६६ ॥
विदार्याःस्वरसंप्रस्थंसितापलशतद्वयम् ॥
गोलयित्वासितांचैवपात्रेताम्रमयेदृढे ॥ ६७ ॥
पाचयेत्पाकविद्वैद्योमोदकःपरमोहितः।
त्र्यूषणंत्रिफलाशृंगीत्रिजातंसैन्धवंशटी ॥ ६८ ॥
धन्याकंबालकंमुस्तंद्विजीरंकुन्दुरुमुरा।
काकोलीक्षीरकाकोलीकस्तुरीमृद्विकातुगा ॥ ६९ ॥

जातीकोषफलंमांसीपत्रंवारेन्द्रग्रन्थिकम् ।
शतपुष्पाचवीदारुप्रियंगुसलवंगकम् ॥ ७० ॥
सरलंशैलजंकुष्ठंजातीपुष्पंयमानिकाम् ।
कट्फलंकेशरंमेथीमधुकंदेवताडकम् ॥ ७१ ॥
मिषीतालीशपत्रञ्चखर्ज्जुरंरसगंधकम् ।
त्रिसुगन्धिसमायुक्तंकर्पूरेणाधिवासयेत् ॥ ७२ ॥
शिवंसंपूज्यसगणंधन्वन्तरिमथापरम् ।
कोलप्रमाणंकर्त्तव्यंक्षीरंचापिपिबेन्नरः ॥ ७३ ॥
प्रातर्भोजनकालेवाभक्षयेच्चविचक्षणः ।
प्रमदाशतंरमतेनचशुक्रक्षयोभवेत् ॥ ७४ ॥

शतावरीमोदकः ।

अर्थ—सतावर, गोखरूकेबीज, खिरैटीकीजड़, कंघीकीजड़, कौंछकेबीज, तालमखानेकेबीज, और विदारीकन्द, प्रत्येकका चूर्ण एक १ पल, भाँगकाचूर्ण २८ आट्ठाईसपल, बूरा १०० सौपल, भैंसकादूध, सतावरका रस और विदारीकंदकारस, प्रत्येक३२ बत्तीसपल, इन सबको मिलाकर ताँबेके पात्रमें मंद मंद अग्निसे पकावै, जब पकते पकते गाढ़ा होजाय, तब त्रिकुटा, त्रिफला, काकडासिंगी, त्रिजातक, सैंधानोन, कचूर, धनिया, सुगंधवाला, नागरमोथा, कालाजीरा, सफेदजीरा, कुन्दुरु, कपूरकचरी, काकोली, क्षीरकाकोली, कस्तूरी, दाख, वंशलोचन, जावित्री, जायफल, बालछड़, वारेन्द्रपत्र, गठिवन, सोया, चव्य, देवदारु, फूलप्रियंगू, लौंग, धूपसरल, भूरिछरीला, कूठ, चमेलीके फूल, अजवायन, कायफल नागकेशर, मुलेठी, मेथी, देवताड़, सौंफ, तालीशपत्र, खजूर, पारा, गंधक, तगर, लालचन्दन, और सज्जी प्रत्येकका चूर्ण एकएक तोले, मिलादेवै, पश्चात् एक एक तोलेके मोदक बनाकर त्रिजातक, त्रिकुटा और कपूरके चूर्णमें लुटालेवै । प्रतिदिन एकमोदक प्रातःकाल या भोजनके समय अथवा संध्याके समय खाय और ऊपरसे दूध पीवै । इसके प्रभावसे—सौ १०० स्त्रियों के साथ रमै तौभी शुक्रका क्षय न होवै॥६४॥ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ ७१ ॥ ७२॥ ७३ ॥ ७४ ॥

शक्राशनस्यबीजानिचूर्णितानिपलाष्टकम् ।
कुडवंहविमश्चैवखण्डप्रस्थंप्रगृह्यच ॥ ७५ ॥
शतपुत्रीरसप्रस्थंप्रस्थंशक्राशनस्यच ।
गव्यमाजंपयःप्रस्थंदत्वाप्रस्थद्वयंपचेत् ॥ ७६ ॥
धात्रीद्विजीरकप्रस्थंत्वगेलापत्रकेशरम् ।
अतिवलाचात्मगुप्तातालांकुरकशेरुकम् ॥ ७७ ॥
शृंगाटकंत्रिकटुकंधन्याकंचित्रकंतथा ।
पथ्याद्राक्षाचकाकोल्यौखर्ज्जूरस्तवकन्तथा ॥ ७८ ॥
कटुकांमधुकंकुष्ठंलवंगंसारसैन्धवम् ।
यमानिकाचाजमोदाजीवन्तीगजापिप्पली ॥ ७९ ॥
प्रत्येकंकर्षमेकञ्चचूर्णितानिशुभानिच ।
मधुनःकुडवार्द्धञ्चपाकशेषेतथाक्षिपेत् ॥ ८० ॥
मृगाण्डजंसकर्पूरंयथानाभंविनिःक्षिपेत् ।
रतिवल्लभनामायंसेव्यमानोरसायनः ॥ ८१ ॥

इति रतिवल्लभमोदकः ।

अर्थ–भांगका चूर्ण १ एक सेर, घी १ एकसेर, बूरा २ दोसेर, सतावरकारस ४ चारसेर, भांगका रस ४ चारसेर, गायका दूध ४ चारसेर, बकरीका दूध ४ चारसेर, आमलोंका रस ४ चारसेर, तथा दोनों जीरोंका क्काथ ४ चारसेर, इन सबको मिलाकर पकावै, जब पकते पकते गाढा होजाय तब दालचीनी, छोटी इलायची, तेजपात, नागकेशर, कंघी, कौंछ, तालकेअंकुर, कसेरु, सिंघाड़े, सोंठ, मिरच, पीपल, धनिया, लालचीता, हरड़, दाख, काकोली, क्षीरकाकोली, पिण्डखजूर, कुटकी, कूठ, मुलेठी, लौंग, वज्रखार, सैंधानोन, अजमोद, जीवन्ती और गजपीपल प्रत्येकका चूर्ण २ दोदो तोले, सहत एक १ सेर और कस्तूरी तथा कपूर कुछ थोडासा सुगंधिके लिये मिलादेवै । पश्चात् लड्डू बनालेवै । यह लड्डू–अत्यन्त कामदेवको बढावै है, और सर्व रोग नाशक है ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥

समूलपत्रशाखायास्तुलांशक्राशनस्यच।
संरुद्योदूखलेछित्वाऽपांद्रोणेहितथाचवै॥ ८२॥
क्काथंपादावशिष्टन्तुवस्त्रपूतंचकारयेत्।
क्षीरप्रस्थंसमादायखण्डस्यार्द्धशतंन्यसेत्॥ ८३॥
शतावरीरसस्याष्टौपिप्पल्याःकुडवन्तथा।
सर्वमेतत्समालोड्यघृतप्रस्थेनमेलयेत्॥ ८४॥
औषधानान्ततश्चूर्णदापयेत्कालिकंपृथक्।
त्रिकटुत्रिफलाचव्यमेलात्वक्पत्रकेशरम्॥ ८५॥
चित्रकंपिप्पलीमूलंधान्यकाजाजिमेथिका।
कुष्ठाब्दरेणुकाव्योषभार्ङ्गीतालीशकेशरम्॥ ८६॥
तालमूलीत्रिवृद्दन्तीश्रेयसीहिंगुपौष्करम्।
लवंगजातिकोषश्चयमानीकारवीतथा॥ ८७॥
शुभाजातीफलंचन्द्रंशृंगीचैवविदारिका।
अष्टवर्गश्चकाकोलंश्लक्ष्णचूर्णश्चकारयेत्॥ ८८॥
कुडवाद्विपचेद्वैद्योमोदकंकारयेत्ततः।
अक्षमात्रञ्चजग्ध्वैषंशीतलंपाययेज्जलम्॥ ८९॥
नाशयेच्छुक्रदोषश्चषण्ढश्चैवातिदारुणम्॥
श्रीकरंलाघवकरंमेधाबुद्धिप्रवर्द्धनम्॥ ९०॥

इतिमहारतिवल्लभोमोदकः।

अर्थ-मूल, पत्र और शाखाओं समेत भांगको लेकर ओखलीमें कूटले, ऐसी कुटी हुई भांग ६। सवाछै सेर लेकर बत्तीस ३२ सेर जलमें पकावै, जब चतुर्थांश शेषरहै तब उतारकर कपड़ेमें छानलेवै, पश्चात् इसमें गायका दूध २ दोसेर, बूरा ६। सवाछै सेर, सतावरका रस १ एकसेर, पीपलका क्वाथ १ एकसेर, और घी २ दोसेर मिलाकर पकावै, फिर पकते समय त्रिकुटा, त्रिफला, चव्य, छोटी इलायची, दालचीनी, तेजपात, नागकेशर, लालचीता, पीपलामूल, धनिया, जीरा, मेथी,

कूठ, नागरमोथा, रेणुका, त्रिकुटा, भारंगी, तालीशपत्र, नागकेशर, मुसली, निसोत, दन्ती, गजपीपल, हींग, पोहकरमूल, लौंग, जावित्री, अजवायन, सौंफ, पीपल, जायफल, कपूर, काकड़ाशिंगी, विदारीकन्द, अष्टवर्ग और शीतलचीनी, प्रत्येकका चूर्ण ४ चार तोले मिलाकर गुड़की समान पाक करै, फिर दो दो तोलेके लड्डू बनालेवै, प्रतिदिन १ एक लड्डू खाय ऊपरसे शीतल जल पीवै । यह महारति वल्लभमोदक शुक्रदोष और अत्यंत दारुण षण्ढत्वदोषको हरे है । लक्ष्मीजनक, लाघवताकारक, मेधा और बुद्धिको बढावै है ॥ ८२ ॥ ८३ ॥ ८४ ॥ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥ ८९ ॥ ९० ॥

धात्रीसैन्धवकुष्ठकट्फलकणाशुण्ठीयमानीद्वयम् ।
यष्टीजीरकयुग्मधान्यकशटीशृंगीयवाःकेशरम् ॥ ९१ ॥
तालीशंत्रिसुगन्धिकंसमरिचंमेथीकाख्यन्वितम् ॥
चूर्णीकृत्यसमःमनाक्फलयुतंभृष्टइवशक्राशनम् ॥९२॥
सर्वैस्तुल्यमतःसितांसुविमलांदत्वासमंसंक्षिपेत् ।
माध्वीकंसघृतंप्रशस्तदिवसेकुर्याच्छुभान्मोदकान् ९३॥
कर्पूरैरवचूर्णितानापिहितान्दत्वाचभृष्टान्तिलान्
गोप्योऽयंक्षितिमंडलेषुसुधियापाषण्डिनामग्रतः ॥९४॥
आधिव्याधिहरंक्षयक्षयकरंकुष्ठापहंबृंहणम्
स्त्रीणांतोयकरंमुखद्युतिकरंशुक्राग्निवृद्धिप्रदम् ॥९५॥

कामेश्वरमोदकः ।

अर्थ—आमला, सैंधानोन, कूठ, कायफल, पीपल, सोंठ, अजवायन, अजमोद, मुलेठी, जीरा, कालाजीरा, धनिया, कचूर, काकडासिंगी, जौ, नागकेशर, तालीशपत्र, छोटीइलायची, दालचीनी, तेजपात, कालीमिरच, मेथी और सौंफ, प्रत्येकाचूर्ण दो दो तोले, भुनीहुई बीजों समेत भाँगकाचूर्ण, सबकीबराबर, तथा, बूरा, सहत और घी, सबकीबराबर, तथा सुगंधिकेलिये कपूर मात्राके अनुसार और काले तिलोंका चूर्ण, सबको एकत्र पकाकर मोदक बनालेवै । इसकामेश्वर मोदकको

सेवन करनेसे अत्यन्त कामकी वृद्धि होतीहै, तथा सर्वप्रकारके रोग शोकादि दूर होतेहैं ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥ ९५ ॥

चूर्णांशशोधितंचैवगगनंशुद्धमारितम् ।
तदर्द्धंशुद्धलोहञ्चलौहार्द्धंवंगभस्मकम् ॥ ९६ ॥
जातीकोषफलंचैवचूर्णांशंतत्रदापयेत् ।
त्रिकटुत्रिफलामुस्तंचातुर्ज्जातंससैन्धवम् ॥ ९७ ॥
शृंगीजीरकयुग्मञ्चधन्याकंग्रन्थिपर्णकम् ।
मांसीशतावरीकुष्ठंतुगाद्राक्षालवंगकम् ॥ ९८ ॥
शालपर्णीचकण्टीचचित्रकंकुन्दुरुर्मुरा ।
पुनर्नवाश्वगंधांघ्रिपद्मकंक्षुरबीजकम् ॥ ९९ ॥
सितातिलंचधन्याकंमेथिकाहरितालुकम् ।
वलातिवलयोर्मूलंचव्यंचदेवदारुच ॥ १०० ॥
यमानीशतपुष्पाचमर्कटीबीजबिल्वकम् ।
काकोलीक्षीरकाकोलीतालांकुरकशेरुकम् ॥ १०१ ॥
शृंगीलवणकंचैवकर्पूरंदेवताडकम् ।
एतेषांसमभागानांचूर्णंकुर्यात्प्रयत्नतः ॥ १०२ ॥
शोधितंविजयाचूर्णंसर्वचूर्णार्द्धसंयुतम् ।
शर्करांद्विगुणांदत्वामोदकंपरिकल्पयेत् ॥ १०३ ॥
मध्वाज्यमिश्रितंकृत्वाकर्षमेकन्तुमोदकम् ।
खादेत्प्रतिदिनंचैवसर्वव्याधिविवर्जितम् ॥ १०४ ॥
महाकामेश्वरोह्येषमहादेवेननिर्म्मितः ॥

इति महाकामेश्वरोमोदकः ।

अर्थ-त्रिकुटा, त्रिफला, नागरमोथा, चातुर्जातक, सैंधानोन, काकड़ाशिंगी, जीरा, कालाजीरा, धनिया, गठिवन, बालछड़, सतावर, कूठ, वंशलोचन, दाख, लोंग, शालिपर्णी, कटेरी, चीता, कुन्दुरु, पुनर्नवा, कपूरकचरी, असगंधकी जड़, पद्माख, गोखुरुकेबीज, मिश्री,

तिल, धनिया, मेथी, रेणुका, खिरैंटी, कंघी, चव्य, देवदारु, अजवायन, सोया, कौंछ, वेलगिरी, काकोली, क्षीरकाकोली, ताड़के अंकुर, कसेरु, काकडासिंगी, सैंधानोन, कपूर और देवताड, इन सबका चूर्ण समान भाग, सब चूर्णसे चौथाईभाग अभ्रककी भस्म, जायफल, और जावित्रीका चूर्ण अभ्रकसे आधी लोहेकी भस्म, लोहेसे आधी बंगकी भस्म और सब चूर्णसे आधा भाँगका चूर्ण और इससे दुगुना बूरालेवै, इनको एकत्र पकाकर सहत और घृत मिलाके एक एक कर्ष-प्रमाणके मोदक बनालेवै। प्रतिदिन एक १ मोदक खाय, इससे-सर्व-प्रकारके रोग दूर होतेहैं। यह महाकामेश्वर मोदक-महादेवने निर्म्माण करेहैं ॥ ९६ ॥ ९७ ॥ ९८ ॥ ९९ ॥ १००॥१०१ ॥ १०२ ॥१०३॥१०४॥

चूर्णांशंगगनंघनार्द्धविमलंकुष्ठञ्चगंधामृता
मेथीमोचरसोविदारिमुषलीगोक्षूरकंक्षूरकम्।
भीरुश्चैवकशेरुकंयमनिकातालांकुरंधान्यकं
यष्टीनागवलावलामधुरिकाजातीफलंसैन्धवम् ॥१०५॥
भृंगीकर्कटशृंगकंत्रिकटुकंजीरद्वयं चित्रकं
चातुर्ज्जातपुनर्नवंगजकणाद्राक्षाशटीकट्फलम्।
शाल्मल्यंघ्रिफलत्रिकंकपिभवंबीजंसमंचूर्णयेत्
चूर्णार्द्धाविजयासिताद्विगुणितामध्वाज्यमिश्रंनयेत् ॥१०६॥
कर्षार्द्धंगुडकंनिधायविधिनाराजासदासेवयेत्
पेयाक्षीरसितावीर्यकरणेस्तम्भोऽप्ययंकामिनाम्।
वामावश्यकरःसुखातिसुखदःसर्वांगनाद्रावकः
क्षीणेपुष्टिकरःक्षयक्षयकरोनानामयध्वंसकः ॥ १०७ ॥
कासश्वासमहातिसारशमनोमंदानलोदीपको
दृष्टःसिद्धिफलोरसायनवरःकामेश्वरोदुर्ल्लभः ॥ १०८ ॥

इति कामेश्वरोमोदकः।

अर्थ-कूठ, गंधक, गिलोय, मेथी, मोचरस, विदारीकंद, मुसली, गोखुरु, तालमखाना, सतावर, कसेरु, अजवायन, ताड़के अंकुर,

धनिया, मुलेठी, गंगेरन, खिरैंटी, सौंफ, जायफल, सैंधानोन, अतीस, काकडाशिंगी, त्रिकुटा, जीरा, कालाजीरा, चीता, चातुर्जातक, गजपीपल, दाख, कचूर, कायफल, सेमलकीजड़, त्रिफला और कौंछकेबीज, प्रत्येकका चूर्ण समानभाग, सबचूर्णसे आधाभाँगका चूर्ण, भाँगसे आधा अभ्रक और अभ्रकसे आधा रूपामाखीकाचूर्ण, सबचूर्णसे दुगुनी खाँड और कुछ थोडासा सहत तथा घृत सबको मिलाकर एक एक तोलेके मोदक बनालेवै । प्रतिदिन १ एकमोदक खाय, और ऊपरसे मिश्रीसंयुक्त दूधका अनुपानकरै, इससे वीर्यस्तम्भन होताहै, स्त्रियें वशीभूत होजातीहैं, अत्यन्त सुखहोताहै, सर्वस्त्रियें द्रवीभूत होजातीहैं, क्षीणमनुष्योंको पुष्टकरैहै, क्षयरोगको क्षय करैहै, नानाप्रकारके रोगोंको नष्टकरैहै, तथा खाँसी, श्वास और अतीसारादि रोगको दूरकरैहै, मन्दाग्निको दीपनकरैहै इस का फलदेखाहुआहै यह उत्तम कामेश्वर रसायन दुर्लभहै ॥ १०५ ॥ ॥ १०६ ॥ १०७ ॥ १०८ ॥

निश्चन्द्रिकाभ्रंपलमात्रभागंलोहस्यवङ्गस्यतदर्द्धभागम् ।
जातीफलंकोषफलञ्चजीरायमानिकाचाथपलप्रमाणम् १०९
कर्षद्विभागंत्रिसुगन्धिकुष्ठंमांसीमुराकुन्दुरुदेवदारुः ।
चाम्पेयसिन्धूद्भववालचव्यंसौभाग्ययष्टिमधुग्रन्थिपर्णम् ११०
तालीशकर्पूरलवंगकान्ताकाकोलिकायुग्मकटुत्रिकञ्च ।
शैलेयपद्मंसरलंसपुष्यंहस्तीकणावत्सकबीजधान्यम् १११॥
शृंगीशताह्वात्रिफलाथमेथीश्यामाब्दकंकृष्णतिलंकशेरु ।
शक्राशनंतत्सदृशंविभागंसिताचशुभ्राद्विगुणाविधेया ११२
तत्पाकवेत्ताविधिवद्विधानंलब्ध्वाधिवासंनयनागरेण ।
मध्वाज्यमिश्रंवटकप्रमाणंखादेन्नरःकौण्डकमंगलेन ॥११३॥
सर्वामयानांशमनंविधेयंविशेषतःसंग्रहकोष्ठदोषम् ॥११४॥

बृहत्कामेश्वरोमोदकः ।

अर्थ-निश्चन्द्र अभ्रक ४ चारतोले, लोहा २ दोतोले, वंग २ दोतोले, जायफल, जावित्री जीरा, और अजवायन प्रत्येकका चूर्ण, ४ चारतोले,

छोटी इलायची, दालचीनी, तेजपात, कूठ, कपूरकचरी, कुन्दुरु, बालछड, देवदारु, सोनेके वरक, सेंधानोन, सुगंधवाला, चव्य, सुहागा, गठिवन, तालीशपत्र, कपूर, लोंग, फूलप्रियंगु, काकोली, क्षीरकाकोली, सोंठ, मिरच, पीपल, भूरिछरीला, पद्माख, धूपसरल, गजपीपल, इन्द्रजौ, धनिया, काकडासिंगी, सोया, हरड़, बहेड़ा, आमला, मेथी, करियावासाऊ, नागरमोथा, कालेतिल और कसेरु, प्रत्येकका चूर्ण दो कर्ष, भांगका चूर्ण सबकी समान और सब चूर्णसे दुगुनी बूरा, सबको मिलाकर पाकको जाननेवाला उत्तम विधिसे पकावै, फिर नागरमोथे और सोंठकी वासना देकर घृत और सहत मिलाकर बडेकी बराबर मोदक बनालेवै । प्रतिदिन १ एक मोदक खाय । इससे सर्व प्रकारके रोग दूर होते हैं और विशेष करकै यह–कोष्ठदोषको हरै है ॥ ॥ १०९ ॥ ११० ॥ १११ ॥ ११२ ॥ ११३ ॥ ११४ ॥

कर्षौरसोगंधकमभ्रकञ्चत्रिक्षारचित्रेलवणानिपञ्च ।
शटीयमानीद्वयकीटहारितालीशपत्राण्यपरंद्विकर्षम् ॥११५
जीरंचतुर्जातलवंगजातीफलञ्चकर्षत्रयमेवचमन्यत् ।
सवृद्धदारंकटुकत्रयंचतथाचतुःकर्षमिदंनिबोध ॥ ११६ ॥
धन्याकयष्टिमधुरीकशेरुकर्षाःपृथक्पंचवरीविदारी ।
वरेभकर्णेभकणात्मगुप्ताफलंतथागोक्षुरबीजयुक्तम् ॥११७॥
सबीजपत्रेन्द्ररजःसमानंसमासिताक्षौद्रघृतंचतुल्यम् ।
कर्षैकमिन्दोरथमोदकन्तत्कामाग्निसन्दीपनमेतदुक्तम् ११८
इतिकामाग्निसंदीपनमोदकः

अर्थ–पारा, गंधक, अभ्रक, सज्जी, सुहागा, जवाखार, चीता, कालानोन, सैंधानोन, विरियासंचरनोन, सांभरनोन सामुद्रलवण, कचूर, अजवायन, अजमोद, वायविडंग, और तालीशपत्र, प्रत्येक १ एक कर्ष, जीरा २ दो कर्ष, चतुर्जातक प्रत्येक २ दो कर्ष, और लोंग २ दो कर्ष,

जायफल २ दो कर्ष, विधारा ३ तीन कर्ष सोंठ ३ तीन कर्ष; मिरच ३ तीन कर्ष, पीपल ३ तीन कर्ष, धनिया, मुलेठी, सौंफ और कसेरु, प्रत्येक ४ चार कर्ष, सतावर, विदारीकन्द, हरड़, बहेड़ा, आमला, हास्तकर्णी पलाश, गजपीपल, कौंछकेबीज, और गोखुरुकेबीज प्रत्येक ५ पाँच कर्ष, बीज और पत्रोंसमेत भाँगका चूर्ण सबकी बराबर, सबकी समान बूरा, तथा घी और सहत प्रत्येक समानभाग कपूर एक कर्ष सबको एकत्र करकै मोदक बनालेवै इनमोदकोंको सेवन करनेसे कास और यक्ष्मादिरोग दूर होतेहैं॥ ११५ ॥ ११६ ॥ ११७॥ ११८ ॥

पक्वचूतरसद्रोणंपात्रंस्याच्छुद्धखण्डतः ।
घृतमर्द्धंततोग्राह्याचतुर्थांशश्चनागरम् ॥ ११९ ॥
तदर्द्धंमरिचस्यापितदर्द्धापिप्पलीस्मृता ।
तोयंखण्डसमंग्राह्यंसर्वमेकत्रसंस्थितम् ॥ १२० ॥
विपचेन्मृन्मयेपात्रेयावद्दर्वीप्रलेपनम् ।
चूर्णान्येषांततोदद्यात्पत्रंपलचतुष्टयम् ॥ १२१ ॥
ग्रन्थिकंचित्रकंमुस्तंधन्याकंजीरकद्वयम् ।
त्र्यूषणंजातितालीशंचूर्णमेषांपृथक्पलम् ॥ १२२ ॥
त्वगेलानागपुष्पाणांप्रत्येकञ्चपलंतथा ।
सिद्धशीतेनमधुनाप्रस्थार्द्धंसर्वमेकतः ॥ १२३ ॥
सन्धायपिष्टवत्कृत्वाशुभेभाण्डेनिधापयेत् ।
भोजनादग्रतःखादेत्पलमेकंप्रमाणतः ॥ १२४ ॥
शतंवापिशतार्द्धंवारमेत्स्त्रीणांपुमानिह ।
गच्छेत्कन्दर्पदर्पान्धोरागवेगाकुलांस्त्रियम् ॥ १२५ ॥
संसेव्यभेषजंह्येतद्वन्ध्यायांजनयेत्सुतम् ।
वीरंसर्वगुणोपेतंशतायुश्चह्यनामयम् ॥ १२६ ॥
कन्याप्रदायिनीचैवददातिसुतमुत्तमम् ।
मृतवत्साचयानारीयाचगर्भोपघातिनी ॥ १२७ ॥

इति आम्रखण्डम् ।

